Foundation Chennai and eGangotri

Divya Jyoti

Vol. 34 1989-90

G. K. V. LIB.
HARDWAR

Digitized by Arya Samaj Foundation Chennai and eGangotri

077708

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

077708

077708

Stock Verification-2024

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

संस्कृतस्य सचित्रमासिकम्

54-C
Vol: 34
1989-90
1-12

प्रधानामात्यपदवी-
मलञ्चक्रेऽत्र भारते ।

सेयं विराजते मान्या
इन्दिरा प्रियदर्शिनी ।

क्रूरैः शठैर्महाघोरैः-
राक्षसैः सा विहिंसिता ।

देशसेवारता स्वीयान्
अर्पयन्ती मुदा ह्यसून् ।

शिमला अक्तूबर, १९८९

वर्ष ३४ अङ्क १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमः

क्र.	विषय	लेखक	पृष्ठ
१.	संस्कृत कोशवाङ्मयम् (क्रमश)	प्रो. केशव शर्मा, सम्पादकः	१
२.	हसन्तुतराम्	श्री शशिकान्त शर्मा कांगड़ा (हि० प्र०)	२१
३.	अस्माकम् वैदिकसंस्कृतिः	आचार्य सुरेश भारद्वाजः हि. प्र.)	२२
४.	संस्कृतमहाविद्यालयपरिषदः निर्वाचनम्		२३
५.	महाभारते पुरुषार्थः	आचार्य कर्म सिंहः ग्रैण्ड होटल शिमला	२४
६.	अ. भा. संस्कृतमहासम्मेलनम्	मास्टर श्री कृष्ण शर्मा (संयोजक)	२६
७.	कथय कथम्	सुश्री सन्तोष वर्मा करनाल हरियाणा	२७
८	विडम्बना	विमला देवी शास्त्री, एम. फिल. पंजाब	२९
९	समाचारा		३१
१०.	सम्पादकीयम्	प्रधान सम्पादक	

दिव्यज्योतिः

हि० क० सं०भा० अकादमी प्रदत्तानुदानसाहाय्यम् । पत्रिकागतमुद्रणदोषाणां सम्पादकीयनीति-विषये च अकादमीदायित्वं नास्ति ।

हिमाचल प्रदेश–पंजाब-हरियाणा-जम्मूकश्मीर - मध्य प्रदेश–राजस्थान–महाराष्ट्र उत्तरप्रदेश शासन-स्वीकृतं केन्द्रशासनपुरस्कृतं सचित्रं संस्कृतमासिकम् ।

पत्रस्य उद्देश्यानि तथा नियमाः

सरल–सरस-सुबोध-साधनैः सर्वस्मिन् संसारे संस्कृतस्य प्रसारः, साहित्यान्तर्गतानां सकलकलानां समन्वेषणं, संसारस्य हितसम्पादनम्, एवं लौकिक - अलौकिकस्वातन्त्र्यस्य प्राप्तिः ।

"दिव्यज्योतिः" प्रतिमासं पञ्चदशतारिकायाम् (आङ्ग्लमानेन) प्रकाशितं भवति
पत्रस्य-वार्षिक मूल्य ३० रु० अर्धवार्षिकं १५ रु० एकस्याङ्कस्य च रु० २-५० भवति ।
वर्षारम्भः अक्तूबर—मासतः भवति ग्राहकः कस्मादपि मासाद् भवितुं शक्नोति ।
ग्राहकैः, "सम्पादक. दिव्यज्योतिः, भारती विहार, मशोबरा, शिमला-१७१००७ हि० प्र०" इति संकेते धनादेशेन वा. शु. प्रेषणीयम् ।

परिचयः

संस्थापकाः तथा आद्यसम्पादकाः आचार्यश्रीदिवाकरदत्त शर्माणः, — दूरभाषः 78459
प्रधानसम्पादकः— आचार्य केशव शर्मा एम. ए., एम, फिल, साहित्यरत्नम् ,, 8 200
सम्पादकः- श्रीमती सूनृता गौतम एम. ए. (संस्कृत हिन्दी)
दिव्यज्योतिः कार्यालयः भारती विहारः, मशोबरा, शिमला-७ (हि. प्र.)
मुद्रकः प्रकाशकः—
भारतीमुद्रणालय भारती विहार, मशोबरा-१७१००७ शिमला (हि. प्र,)
स्वामीः- श्रीमती आचार्य रत्नकुमारी शर्मा

अक्तूबर. १९८९ कार्तिक २०४६ – वर्षम्–३४ अङ्क १

वार्षिक मूल्यम् ३० रु०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गताङ्कादग्रे **संस्कृतकोशवाङ्मये**

शब्दचन्द्रिका:

अयमपि वामनबाणभट्टविरचितोपरः कोशः अप्राप्यः। अस्य कालः ख्रीष्टाब्दानां पञ्चदशतमः शतकं।

एकाक्षर द्व्यक्षर नाममाला

अस्य कोशस्य प्रणेता आचार्यो सौभरिरस्ति अयं कोशकारः १५८१ ख्रीष्टाब्देभ्योऽर्वाक्कालीनो नास्ति अर्थात् षोडशसप्तादशशतकेऽस्य कालः निर्धारयितुं शक्यते।

नाम्ना- वेदं सुस्पष्टं यदेकस्मिन् भागे एकाक्षरशब्दानां द्वितीयभागे च द्व्यक्षरशब्दानां सङ्ग्रहोऽस्ति

यद्यप्येकाक्षरकोशा अनेके सन्ति। तथाप्यस्य कोशस्य तेभ्यो विशिष्टमौचित्यम् नात्र केवलं ककारस्यैवार्थो विद्यतेऽपि तु ककाकिकीत्यादीनामपि सर्वेषां वर्णानामर्थाः प्रदत्ता सन्ति तदिदमस्य महद् वैशिष्ट्यम्।

शब्दानेकार्थः

हर्षकीर्तेरयमस्ति द्वितीयः कोशः। भारतकार्यालयपुस्तकालये १ स्थितस्यास्य कोशस्य रचनाकालोऽनेन पद्येन परिज्ञायते.

"वर्ण-तर्करस चलौ तु वर्षे तपसि मासि च
राकायां हर्षकीर्त्याह्वः सूरिश्चक्रे सतां मते।

एवमस्य ग्रन्थस्य रचनाकालो विक्रमाब्दा १६६५ ख्रीष्टाब्दाश्च १६०६ सिद्धयति स एव चास्य कोशकारस्यापि कालो भवति।

अनेनान्येऽपि ग्रन्था: प्रणीता:- यथा १ बृहच्छान्तिस्तोत्रम् २ २ कल्याणमन्दिरस्तोत्रटीका ३ ३ सिन्दूर करणटीका। ४ सारस्वतदीपिका ४ ५ सेडनिट्कारिकाविवरणम्। ६ धातुपाठः ७ धातुपाठविवरणम्। ८ योग चिन्तामणि (आयुर्वेदस्य सिद्धग्रन्थः) ९ वैद्यसारोद्धारः १० ज्योतिः सारः ११ ज्योतिः सारोद्धारः १२ श्रुतबोधटीका अनेनास्य विविधशास्त्रपाण्डित्यं स्पष्टमेव।

---

१ India office Library
२ र. का वि सं. १६५५ ख्री. १५९८
३ ह. ले.का., १६३५ ख्री. १५७८
४ र. का, १६६९ ख्री. १६१२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पदमणिमञ्जरी

कोशोऽयं तेलुगुलिप्यामवाप्यते। रचयितार: वेंकटेश्वर शास्त्री, नल्ला-शास्त्री, श्रीधर वेंकटेश्वर शास्त्री च। अस्य सङ्कलनप्रकार :—

शुक: अक: सुखम् शाक: द्विष:)
वक: काक वाक: (उक्ति)
पिक: पाक: धूक
वृक: राक: रवि:) जूक तुला
शक: नाक:। मूक

तनूरुह: (पक्षश्च) शिरोरुह (केश: परिबर्ह:— (वृद्धिश्च) अनोकह सरोरुह: (पद्मम्) उपबर्ह: (उपधानम्) महिरुह: (वृक्षम्) अपवाह: (निष्कासनम्) वरारोह: (स्त्री) परिणाह: (वैशाल्यम्) कर्णजाह: (कर्णमूलम्) ओष्ठजाह: (ओष्ठमूलम्) अवगाह:— मज्जनम्। गन्धवहा-नासिका। विषरुहा (गलूची)

पुष्पिका अत्रसान्ताश्च हान्ताश्च
शब्दा दिङ्मात्रमीरिता:
ऊह्यन्तामेवमन्येऽपि
पाणिनीयैर्मनीषिभि:।

इति भोसलकुलजलधिकला निधिशहजि सार्वभौमवात्सल्यपात्रता तिमात्रीकृतमनीषाविशेषवेंकटेश्वरशास्त्रिनल्लाशास्त्रि — श्रीधरवेंकटेश्वर शास्त्रिभि: पदमणिमञ्जरी दान्तपर्यन्तं यथामति विलिखिता। ककारात्-हकारं यावत्।

एते पण्डिता: सहाजिमहोदयस्य राजसभामण्डिता आसन्। अयं तेञ्जोराधिप: आसीत्। अस्य काल: सन्ति १६८४-१७१० खीष्टाब्दा: अत: कोशोऽयं षोडषशतकस्य खीष्टाब्दीयस्य वर्तते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शारदीयाख्यनाममाला
शारदीयाभिधानमाला
नाममाला १

अस्य कोशस्य निर्माता हर्षकीर्तिः कोशातिरिक्तं व्याकरण-वैद्यक-ज्योतिषादि-विषयकानपि ग्रन्थान् प्रणिनाय । यद्यप्यस्य विषये विशिष्टसामग्री नोपलभ्यते तथापीदं तु स्पष्टं यदयं जैनः, नागपुरीय तपागच्छशाखाया अध्यक्ष भट्टारक आसीत् अस्य गुरोर्नाम चन्द्रकीर्तिरासीत् अयं चन्द्रकीर्तिश्च मोगलराज्ञो जहांगीरात् दिल्लीश्वरात् - लब्धविशिष्टप्रतिष्ठोऽभूत जहांगीरोऽयं-ईशवीय-सप्तदशशतके शासनञ्चकार । धातुपाठतरङ्गिण्या अध्ययनेन ज्ञायते यदस्य शाखायाः आचार्याः मोगलराज्ञां विशेषादरणीयाः बभूवुः ।

कोशस्यास्य नामत्रयी यथा किल शीर्षक स्थाने प्रदर्शितम् । अयं समानार्थकः कोशस्त्रिषुकाण्डेषु विभक्तः वर्गादिक्रमसहितश्चायम् प्रथमे काण्डे देवव्योमधरावर्गा, द्वितीये काण्डेऽङ्गसंयोगादिसंगीतपण्डितवर्गाः तृतीयकाण्डे ब्रह्म-राट्-वैश्यशूद्रसंकीर्णवर्गाः । पूर्णकोशे ४६५ अनुष्टुपछन्दासि — अस्य कोशकारस्य कालः षोडषसप्तदशशतकयोः ख्रीष्टाब्दानां भवितुमर्हति -

— — —

कल्पतरुः २

विश्वनाथविरचितोऽयं कोशः लेखकोऽयं मेवाड़स्य राज्ञो जगत्सिंहस्य समाश्रित आसीत् । १६२८-१६४४ ख्रीष्टाब्देष्वयमेव 'जगत्प्रकाशकाव्यम् व्यरचयत् । अतोऽस्य कालोऽपि ख्रीष्टाब्दानां सप्तादशतमः शतको भवितुमर्हति ।

कल्पतरुरयं विशालकायः कोशोऽस्ति । अस्मिन् पञ्चसहस्रमिताः श्लोका प्रायेण विद्यन्ते । अस्मिन् समानार्थका - नानार्थकाश्चोभयविधाः शब्दाः सन्ति । अयमपि अमरकोशपद्धतिमनुकरोति — —

---

१ प्रकाशकः दक्षिण (डेक्कन) कालेजः, पूना
ख्री १९५१ सम्पादकः मधुकर मंगेश पाटकरः ।

२ सम्पादकः कृष्णमूर्ति शर्मा । प्रकाशकः दक्षिणा-कालेजः प्र. व. १९५७ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कल्पद्रुकोशस्य निर्माता केशव: केशवस्वामीत: पृथक् वर्तते ग्रन्थकार: स्वयमेव कोशस्य निर्माणादिविषये तत्कालविषये च सूचयति । असौ ग्रन्थस्यास्य पूर्तिकालम् ४७६१ कलिसम्वत्सरे निर्दिशति । अयं कालः खीष्टाब्दानां १६६० शतके निपतति । अतोऽस्य केशवस्य काल: स तदशतम: खीष्टाब्दो भवति । केचन कोशमिमं नामकल्पद्रुमनाम्ना उपवर्णयन्ति । पूर्वं किल नानार्थार्णव कार. केशवस्वामी एवास्यापि कर्ता मन्यते स्म । परन्तु गायकवाडप्राच्यग्रन्थमालान्तर्गत यदा कल्पद्रुकोशस्य प्रका न जात तदाऽयं भ्रमोऽपगत: कोशस्य परिमाणाधारादिविषये केशव: स्वयं लिखति:-

"कात्यवाचस्पतिव्याडि भागुर्यमरमङ्गला: ।
साहसाङ्कमहेशाद्या विजयन्ते जिनान्तिमा: ।
समालोच्य मतान्येषां कल्पद्रुरखिलार्थद ।
क्रियते केशवेनायं नामप्रकृतिबोधन: ।
अस्मिन्कोशे त्रयस्कन्धा: प्रकाण्डा: सप्तविंशति ।
श्लोकाश्चतु:सहस्राणि पञ्चाशत्या शतद्वयम् १ ।

समानार्थककोशेषु विशालतमोऽयम् । अस्मिन् चतु:सहस्रमिता: श्लोका: सन्ति । त्रिस्कन्धाश्चास्य, भूमिस्कन्ध, भुव स्कन्ध: स्वर्गस्कन्धश्चेति । प्रत्येक स्कन्धेषु प्रकाण्डा सन्ति । समानार्थकशब्दानामयं विशालसंग्रह: । यथा ६४ शब्दा पृथ्वीवाचका: ११४ शब्दाश्चान्यर्थद्योतका: । शब्दसंग्रहणे प्राचीनकोशेभ्योऽस्मिन्-समयापेक्षिनवीनता द्रष्टुं शक्यते । एवञ्चायं विश्वकोशोऽपि कथयितुं शक्यते

अस्य शब्दचयनं विशालज्ञानवर्धकम् । अस्मिन् १४२-१८८ श्लोकेषु न केवलं हस्तिनामोपवर्णनमेवापितु तेषामुत्पत्तिस्थानादिकमपि सर्वं निर्दिष्टम् । १४६-१५० श्लोकयोरवस्थानुसारं हस्तिनामप्रदर्शनं कृतम् हस्तीनां जातिपरिचयश्चाप्यत्र विस्तरश: प्रदत्तोऽस्ति । यद्यपि अमरो दिग्गजानां ऐरावत पुण्डरीक:, वामन: कुमुद:, अञ्जन:, पुष्पदन्त:, सार्वभौम: सुप्रतीक: २, इत्थं नामनिर्देशमात्र कुरुते । केशवस्तु दिग्गजानां वंशजहस्तीनां वर्णनमपि कल्पद्रुकोशे करोति । अनेन तेषां ज्ञानं सुगमतया जायते ३ । अनेन कथयितुं शक्यते यदस्मिन् कोशे विस्तरेण सर्वमपि समुल्लिखितम्

---

१ कल्पद्रुकोश प्रारम्भे समाप्तौ च
२ अमर: १-२-५ ।
३ कल्पद्रुकोश: १८२-१८८ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दरत्नसमन्वयः

तञ्जावरस्य महाराष्ट्रनरेशेन शाहजीमहाभागेन कोशस्यास्य रचना कृता । छत्रपतेर्महाराजशिवाजिमहाभागस्यानुजस्य श्रीवेंकाजी (एकोजी) महोदयस्य ज्येष्ठपुत्रोऽयं शाहजी । तञ्जावरस्येतिहासे शाहजी महाराजस्य कालः[1] विद्याविलास-सुखसमृद्धिसुव्यवस्थितशासनकालः आसीत्-यदर्थमयं कालोऽस्तिविख्यातः । अयं स्वयमपि सरस्वतीसमुपासकः पण्डितानामाश्रयश्चासीत् । अस्य राजसभा षट्चत्वारिंशत्पण्डितैर्मण्डिता आसीत् । तानयं सर्वानेव विभिन्नविषयेषु ग्रन्थलेखनार्थं प्रेरयति स्म । अस्य पिता एकोजी महोदयस्तु तञ्जावरराज्यं संस्थापयामास । शाहजी महाराजः शासनमस्य सुव्यवस्थितञ्चकार । अनेन निर्मिताश्चत्वारो ग्रन्था: समुपलब्धा भवन्ति । एते सन्ति १ शब्दार्थसङ्ग्रहः, २ चन्द्रशेखरविलासः (नाटकम्) ३ अष्टपतिः (सगीतग्रन्थः), ४ शब्दरत्नसमन्वयश्च ५ ।

कोशकारस्य 'कालः' १६८४-१७१२ खीष्टाब्दाः । कोशस्यारम्भः श्लोकैरेभिर्ज्ञायते,

धात्वेशं चोलधरणी जानिना शाहभूभुजा ।
शब्दार्थसङ्ग्रहो बालव्युत्पत्त्यै सम्प्रणीयते ॥
वक्ता बृहस्पतिः श्रोता शक्रः कालोऽयुतं समाः ।
तथापि यावच्छब्दोपन्यासो नासीदिति श्रुतम् ।
तथाप्येष यथाशास्त्र यथामति सतां मुदे ।
द्वि-त्र्यक्षरादिक्रमतो दिङ्मात्रेण प्रदर्शयते ।"

अयं नानार्थकः कोशः । अस्य शब्द चयनप्रणालिर्नवीना । सामान्य दृष्ट्याऽन्तिमवर्णानुसारमस्य शब्दसङ्ग्रहो दृश्यते परन्तु प्रत्येकस्मिन् वर्गाभ्यन्तरेऽक्षरक्रमतः शब्दानां विन्यासो दृष्टुं शक्यते यथा 'क' तृतीयवर्गे तेषां शब्दानां सङ्ग्रहोऽस्ति येषु ककारस्तृतीयो भवति यथा जनकः, जल्पाकः जम्बुककुवेकः, कुशिकः, कूपकः इत्यादयः शब्दाः अनेन वर्गाणामन्तेऽपि चाकारादि-क्रमेण शब्दसंस्थापनं कृतम् । इदं वैशिष्ट्यं संस्कृतकोशेषु क्वाचित्कमेव । अयं क्षकारं पृथगेव स्वीकरोति तदनुसारञ्च क्षकारादि-शब्दसन्निवेशोऽन्ते विहितः । अस्मिन् त्रिसहस्रमिताः शब्दाः सन्ति । शब्दचयनं

१ गायकवाड़ ओरियण्टल सीरिज स. ४५६-१६३२ खी. ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नितान्तव्यापक प्रामाणिकञ्चास्ते । एकशब्दस्य विभिन्नवर्णाभिनिवेशोऽस्मिन् कृतः । अस्यैव द्वितीयं नाम राजकोशोऽपि वर्तते । अस्य कोशस्य रचनयैष ख्यातिमाप्तवान् । महाराष्ट्रनरेशाश्च नवीनकोशनिर्माणार्थमपि प्रायेण प्रसिद्धाः सन्ति । शाहजी महोदयस्य पितृव्यचरणाः श्रीशिवाजीमहाभागा अपि पारस्यशब्दानां संस्कृतानुवादं स्वविज्ञपण्डितैः कारयामास यत्रैते शब्दाः सङ्कलिताः तद्ग्रन्थनाम राजव्यवहारकोशोऽस्ति । शाहजी परम्परामेनामाश्रितवान् । शब्दार्थसङ्ग्रहोऽप्यस्यैव कोशस्य नाम वर्तते ।

राजकोशनिघण्टुः

राजव्यवहारकोशः

रघुनाथपण्डितप्रणीतोऽयं कोशः इति एकस्याः पाण्डुलिप्या अध्ययनेन प्रतीयते यथा –"इति श्रीशिवछत्रपति प्रियामात्येन नारायणाध्वरिसूनुना रघुनाथ पण्डितेन शिवराज नियोगतः कृते राजव्यवहारकोशे पण्यवर्गो दशमः समाप्तः ।" परन्तु तस्यामेवाग्रे –

व्यासान्वयादिचन्द्रेण लक्ष्मणव्याससूनुना ।
कोशोऽयं ढुण्ढिराजेन रघुनाथमुदे कृतः ॥
यथामति विचार्यैव नामान्यस्यानुसारतः ।
वितानीयं मया कार्यमार्यैरत्रमनो मनाक् ॥

अनेन श्लोकेनैकेन प्रतीयते यदयं कोशः ढुण्ढिराजेन कृतः । अथापरस्मिन् श्लोके पुनरपि रघुनाथनामोल्लेख एव । यथा

माता यस्य सती गुणार्चितगुणा राजायिनाम्नीहनू-
मद्वंशाभरणं पिता द्विजरिवरो नारायणाख्यः सुधीः ।
तेन श्री शिवसार्वभौम नृपति प्रेमैकधाम्ना समा-
म्नातोऽयं रघुनाथ नाम विदुषा तोषाय कोशः सताम् ॥

प्रमाणद्वयेन रघुनाथ पण्डित एव कोश निर्माता रघुस्तु शिववीरस्यामात्य आसीत् । सम्भाव्यते यदयं कोशः ढुण्ढिराजेनैव प्रणीतो भवेत् रघोरधिककार्यकलापव्यापृततया नामाङ्कनन्तु रघोरप्यावश्यकमुभाभ्यां वा सहयोगेन निर्मितो भवेत् । मुद्राराक्षसटीकाकार एव ढुण्ढिराजोऽयं १७ शतकस्य खीष्टाब्दानां भवेत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मिन् कोशे सङ्ग्रहीतानां शब्दानां संकलनमनेन प्रकारेण भवति,

राजा ज्ञेयः पादशाहः स्वामी साहेब ईरितः ।
अन्तःपुरन्तु दरुणीत्याहुर्यवनभाषया ।
युवराजा परिज्ञेयो बलीयहदनामकः ।
शाहजादा राजपुत्रः प्रधानः पेशवा तथा ।
स्यादन्तर्द्वारपालस्तु हरवंकिप्रकीर्तितः ।
दौलत्वङ्की महाद्वारपाल इत्यभिधीयते ॥

उपोद्घातस्यान्ते:-

श्रीमद्व्यासकुलोद्भवेन ढुण्ढिराजेन रघुनाथस्याज्ञया विरचिते राजकोशे उपोद्घातप्रकरणम् समाप्तम् । अस्यैवापरं नाम राजव्यवहारकोशोऽपि वर्तते ।

नाममातृका निघण्टुः

वरदराजाचार्यविरचितोऽयं निघण्टुः । किमर्थमयं निघण्टुर्विरच्यते तदिदमाह कोशकारः,

'सर्वशास्त्रेषु ये शब्दाः सुप्रसिद्धाः प्रयोगतः ।
तच्छब्दाश्च समाहृत्य क्रियते नाममातृका ॥
स्वर्गो नाकः सुरावासः स्वैरिको भोगभूमिका ।
देवा जयन्जयाः सूर्याः निलिम्पा मरुतो बुधाः ।

शब्दनियोजनम्

वैश्ये धरास्पृशोऽप्यार्य शूद्रे गङ्गासहोदरः ।
मालश्चाण्डालके प्रोक्तो मन्दाको नीचवाटिका ।

पुष्पिका-

इतिश्रीमद्वरदराजाचार्यस्य कृतौ नाममातृका निघण्टुः समाप्तः । अयं श्रीवरदराजाचार्य एको वैदिकब्राह्मणो दाक्षिणात्य आसीत् । कालोऽस्य १७ दशतमः ख्रीष्टाब्दीयः शतकः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दचिन्तामणिनिघण्टुः

व्यासविठ्ठलाचार्यप्रणीतशब्दचिन्तामणिनिघण्टु पाण्डुलिपिरूपेणैव प्राप्यः। अस्यारम्भिकश्लोकयुगलम् :-

श्रीमदानन्दतीर्थाय तीर्थपादाय योगिने ।
नमस्कृत्वाथ नानार्थशब्दचिन्तामणीर्यते ।
वसुन्धरा धरायाञ्च शक्तिमत्यां निगद्यते ।
कुमारः पार्वतीसूनौ मन्मथे च कुशध्वजे ।

अन्तिमश्लोकः

वैकुण्ठो विष्णुलोके च विष्णौ सूर्ये च मारुते ।
ऋषिवृक्षे च दूर्वायां व्रीहावपि निगद्यते ।।

पुष्पिकाः—इति श्री व्यास विठ्ठलार्यविरचितशब्दचिन्तामणिनिघण्टुः समाप्तः।

अयं व्यासविठ्ठलो दक्षिणभारतस्य माधवब्राह्मणोऽभूत्। सम्भवतोऽयं खीष्टाब्दानामष्टादशतमवत्सरेऽभूत्।

नाममञ्जरी

अस्य कोशस्य निर्माता हनुमान्नामकः- दक्षिणभारतीयो माधव ब्राह्मणः। निर्मातुरयं मंगलाचरणश्लोकः-

श्री राममानम्य गुरून् वाल्मीकिप्रमुखानृषीन् ।
सर्वलोकोपकारार्थं क्रियते नाममञ्जरी ।।
कवीन्द्रजीविताः सर्वे व्याकरणशिक्षिता ।
शब्दा मया प्रयुक्तास्च सन्त्यत्र निघयो भुवि ।

कोशस्यास्य पाण्डुलिपिः तेलुगुलिप्यां विद्यते। मध्ये मध्ये तेलुगुभाषायां टिप्पण्योऽपि वर्तन्ते।

यथा – त्रिविक्रमाचार्यलु सेसिनव्याख्यानमन्दुया श्लोक द्वय्यानुकुन्नु अर्थं व्यक्तमुगा तेलियुचुन्नदि।

फलोदयः सुरावासः स्वर्गो नाकस्त्रिविष्टपम् ।
बोधायनं महीयीम दिवसावासभूमिका ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाण्डुलिप्या अन्तिमश्लोकः-

पाश्चात्या यवना नीचास्तुरुष्का अपि हिंदुकाः तुरुष्कुलु ।
म्लेच्छास्तु बाल्हिका कीर्णा अजात्यास्तु प्रकीर्तिताः जातिलेनिवाङ्गलु ।

पुष्पिका - "इति हनुमदीये मनुष्याधिकारः पञ्चमस्तरङ्गः ।" अनेनात्र तरङ्गपञ्चकमित्यपि विज्ञायते । उल्लिखितविवरणेनाष्टादशतमशतकस्य खीष्टाब्दीयस्यायं भवितुं शक्नोति पाश्चात्यादिशब्दप्रयोगात् ।

शब्दकल्पद्रुमः

राज्ञा राधाकान्तदेवेन विनिर्मितः । खीष्टाब्दानामेकोनविंशतितमे शतके संस्कृतकोशाणां निर्माणे नूतनो विकासक्रम आरब्धः । अस्यैव क्रमस्यानुसारं सर्वप्रथमं विशालतमस्यास्य कोशस्य प्रणयनं जातम् । राजाराधाकान्तदेवोऽस्य प्रकाशनमनेकेषां विदुषां कोशविद्यापारङ्गतानाञ्च साहाय्येनानेक-खण्डेषु १८२२ - १८५८ खीष्टाब्देषु-अकरोत् ।

अस्मिन् शब्दानां सङ्ग्रहो वर्णानुक्रमेण वर्तते पुराणधर्मशास्त्रादि-प्रमाणग्रन्थेभ्यश्च पर्याप्ताऽवश्यका च सामग्री समाहिताऽस्ते । अनेनायं कोशः- विश्वकोशगणनायामायाति । संस्कृतस्यानेककोशेभ्यः सकलशास्त्रेभ्यश्च तत्र तत्र प्रयुक्तानां संस्कृतशब्दानां व्युत्पादनं, विग्रहप्रदर्शनं, पर्यायदानञ्चेति सर्वमप्यत्र प्राप्तुं शक्यते । कः शब्दः कुत्र कस्मिन्नर्थे वा प्रयुक्तोऽभूदित्यपि शब्दाज्ञानविषयकं विश्लेषणं कोशेऽस्मिन् विहितं वर्तते ।

अस्य तृतीयसंस्करणं पूर्णशुद्धतया १९६९ खीष्टाब्दे ३२१८ पृष्ठेषु पञ्चभागेषु च प्रकाशमायातम् । कोशस्यास्य सम्बन्धे तत्कालीनोत्तरप्रदेशस्य राज्यपालः श्रीबरामकृष्ण राव महाभागोऽपि स्व विचारान् प्रकाशयत् "There is absolutely no doubt about the value of these publications for the Preservation and promotion of Indian Culture and learning". १

---

१ चौखम्बा सं. सी. आफिस वाराणसी सू. सं. ८२ पृ. १४५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्री सुखानन्दविरचितः । स्वपरिचयमसौ पद्यैरेभिर्ददाति :—तत्राह श्री जगदानन्दनाथः :—

श्रीमद्गौडकुले नितान्तविपुलेऽद्गीचप्रथोल्येऽतुले ।
जातः पुष्करराज इत्यभिधया ख्यातो धरामण्डले ।
यत्सौजन्यसुधासरित् पतितरङ्गादोलनानन्दिता
विद्यौदार्यदयादिशेवधिपराः सर्वे बभूबुर्जनाः ॥

श्रीनन्दलालः सुकृते विशालस्तलादिरामस्सुमनोऽभिरामः ।
तदात्मजावप्रतिम प्रभावौ श्रीरामरामानुज नैजभावौ ।

श्री नन्दलालपत्नी सुषुवे सूनु-त्रय सुतामेकाम् ।
प्रथमस्तु शम्भुनाथोऽन्तरजो राम प्रसादाह्वः ॥
मोतीरामोऽवरजः सर्वे सकलार्थतत्वज्ञाः ।
देवी सुलक्षणासीद् याहि सती शीलसम्पन्ना ॥

विद्वत्तुलारामसतो भवानी शङ्करोऽभवत ।
ज्येष्ठाश्रेष्ठमतिर्नीति संसारासक्तमानसः ॥
द्वितीयः सम्भूतो धनपति पुरो राज इति यम् ।
कुलीनानामेनं जगति कृतवन्तो मुमुदिरे ॥
प्रकृत्याऽजन्माऽसौ विरलतर कर्मातिरसिको ।
ह्यगादप्रत्यक्षं ... ... एकः शिवपुरीम् ॥

त्रिचन्द्राब्दायुष्मान् परमपरतत्वं विविदिषुः ।
पठित्वा शास्त्राणि प्रतिहरिहरानन्दपदतः ॥
प्रतीतं नाथाढ्यं निखिलनिगमार्थैकसुधियम् ।
गतोऽयं योगीन्द्रं कुशलमवधूतं कुलगुरुम् ।

प्रीत्या नमस्या सन्तुष्टः सद्गुरुः करुणानिधिः ।
त्वं सुखानन्दनाथोऽसि-इत्याचष्ट हि यथोचितम् ॥
ब्रह्मावधूतपदवीं प्राप्य देशाननेकतः ।
गाहं गाहं बहुविधान् दर्शं दर्शं जनव्रजान् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्वालामुखीं महादेवीं जालन्धरनिवासिनीम् ।
जग्मिवान् सुषमं पश्यंस्तत्र स्थितिमुपाश्रयत् ॥

यात्रा प्रसङ्गतोऽस्मिन् भज्जीदेशाधिपस्तदा गतवान् ।
रापादिरुद्रपालोऽमृतपाल सुतो – महोदारः ॥
पर्वतराजश्चतुरश्चतुर्षु यत्नेषु दीक्षितो विद्वान् ।
श्रीरुद्रमणेः शिष्योऽमुं विचरन्तं यदा द्राक्षीत् ॥

आहूय श्रुतवाणीजनितश्रद्धो निनीषुरनुकूलः ।
शुश्रूषया स्वदेशं तं प्रार्थ्यानीनयत् यथायोग्यम् ॥
सोऽय प्रसन्नहृदयो महाशयाऽहैतुकीभक्त्या ।
अर्पितरणभद्राख्यं तत्पुत्र पाठयन् न्यवसत् ॥

निश्चिन्तो विरले समन्तत उपेतेष्टाथ सिद्धिस्तत -
श्चिन्तां तत्र समासदद् द्विजकुले दृष्ट्वा कलेरापदाम् ।
मौनं तस्य तु शान्तये निखिलशास्त्रार्थोज्जिहीर्षुर्मुदा ।
व्यास्थत् कोशकलाधरं कलिहरं शब्दार्थचिन्तामणिम् ॥

गंगातीरे रुद्रपाले शिवेन शिवतां गते ।
ज्ञात्वा नैमित्तिका भाव निमित्ताभावसङ्गतो ॥
इन्द्रप्रस्थ पुनः प्रत्यागन्ता मनसि चिन्तयन् ।
कथमेतस्य कोशस्य स्यात्प्रवृत्तिर्निरन्तरा ॥

प्रस्तुतश्रीनन्दलाल दौहित्रो श्रेय - प्राश्रयो ।
कोविदो व्यवहाराणां प्रायः स्रुघ्न निवासिनो ॥
चुन्नीलालाग्रजो घासीरामनामा प्रतापवान् ।
धनिमान्यो राजमान्यः स्वभुजार्जितसद्यशाः ।

वालप्रवासिनं दैवेनोदितो दूरदर्शिनम् ।
स मातुलमनुप्राप्य कृत्वालाप मनोगतम् ॥
कोशप्रशंसां प्रस्तावे श्रुत्वा तस्योत्सुकं मनः ।
तन्मुद्रीकरणायाशु यदात्यर्थमवोभवीत् ।
परेश्वरकराङ्कैकमिते १८६४ विक्रमहायने ।
तदैव मुद्रितो भाग प्रथमः साङ्गमित्यभूत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तमश्लोक शिष्येण श्रीपादाम्बुजसेविना ।
धर्म्मीसारस्वते नैमिरिन्द्रप्रस्थनिवासिना ।
जगदानन्दनाथेन पारम्पर्यानुवर्तिना ।
जगदीशोपनाम्नैषा श्लोकैरुद्घाटिता कृतिः ॥

शब्दार्थचिन्तामणिर्नाम कोशोऽयं विशालकायो भागचतुष्टयात्मकः । कोशेऽस्मिन्-अकाराद्यक्षरानुक्रमेण शब्दसङ्कलनम् । लिङ्गत्रयोल्लेखं पश्चात् शब्दानां व्युत्पादनाय पाणिनिसूत्राणि, शब्दार्थास्तेषां संसाधनाय चानेकग्रन्थ-प्रमाणानि, विशिष्टशब्देषु—अनेके ग्रन्थोदाहरणानि समुपन्यस्तानि । अस्य पृष्ठसंख्या ३१६३ मिता । लेखकोऽस्य सर्वमपीदं स्पष्टयति ।

"गीर्वाणभाषाशेषशास्त्रानेककोषादिभ्यः सङ्ग्रहीतानामकारादिअनु-क्रमेण विन्यस्तानां शब्दानां तत्तच्छब्दप्रस्तावागतवेदाङ्गस्मृतिपुराणा-गमेतिहासादिप्रयोगैः, सूदशिल्पसंगीतादिशास्त्रीयविषयाणां वर्णनैः शस्त्रास्त्र-धातु–रत्नादि परीक्षाभिर्ग्राम्यारण्यपशुपक्षि आदिलक्षणैर्दगार्गलेन, सजलनि-र्जलभूमिपरिज्ञानेनोद्यानवृक्षायुर्वेदेन, द्रव्यगुणरोगनिदानादिभिरलङ्कारछन्दः प्रभृतिनामलक्षणोदाहरणैश्च संयुक्तोऽखिलशास्त्रमताभिद्योतकः सहृदयहृदया-ल्हाददो ग्रन्थः ।

एकविंशत्यधिकोनविंशतितमे १९२१ वैक्रमाब्दे आगरेति साधारण-तया विख्याते स्नूघ्नपुरे आदिगौड़ श्रीघासीराम कनहियालालयो व्ययेन तयोर्निज संस्कृतयन्त्रालये श्रीरामप्रसाददृष्ट्या मुद्रालिप्याऽभिव्यक्तः "

आभ्यां समुद्धरणाभ्यां स्पष्टं भवति यदयं कोशकारो विविधशास्त्रपारं-गतोऽपि भूरिश्रमेण ग्रन्थमिमं समाम्नातवान् ।

अस्य कोशस्य निर्माणं हिमाचलस्य पावनधरायां जातम् । भज्जीराज्यं शिमलानगरात् उत्तरदिशि नातिदूरे वर्तते । भज्जीराज्यस्य राजधानी सोनीत्युपनगरे तप्तपानीयसरोवरसमीप एव । तत्रत्य राणा रुद्रपालः सुखानन्दमहाभागं स्वराजधानीमानैषीत् । रणभद्राख्यं राजकुमारमयं पाठितु-मारेभे तच्छिक्षाप्रसङ्गेनैवायं सुखानन्दः कोशमिम प्रणिनाय ।

अथावसानमायाते विद्वद्वत्सले रुद्रप्रतापे, विद्या-विद्वद्व्यसनिनां राजपुत्राणाञ्चाभावे स्वनिवास-सौविध्यमनालोक्य स्थानमिमं तत्याज श्रीसुखानन्दः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिमाचलस्य प्रशान्तोपत्यकायां कोशनिर्मितिस्तु जाता परं कथमस्य प्रकाशनं कृत्वा सर्वविद्वज्जनसौविध्यं स्यादित्यपरा चिन्ता चिन्तामणि-विषयका निर्मातु र्हृदये समुत्पन्ना । तथापि तच्चिन्ता कोशस्य प्रकाशनेन फलिताऽभूत् । कोशेऽस्मिन् गौडभाषाया हिमाचलीयसंस्कृतनिष्ठोपभाषा-याश्च शब्दा अपि यत्र तत्र विकीर्णाः सन्ति । इदानीं कोशोऽयं दुर्लभोऽस्ति सञ्जातः ।

य

वाचस्पत्यम्

श्री तारानाथतर्कवाचस्पतिप्रणीतम् । अयं वंगस्य प्रख्यातो विद्वान् । अभिधानेऽस्मिन् वेद - ब्राह्मण-छन्दो- व्याकरण-साहित्यकाव्यनाटक -चिकित्सा-ज्योतिषादि — सकलशास्त्रशब्दानामकारादि वर्णक्रमेणार्थाव्युत्पत्तयश्च सरलसंस्कृतभाषायां विद्यन्ते वाचस्पत्यकोशस्य निर्माणं १८७३ खीष्टाब्दात् १८८४ खीष्टाब्दं यावत् श्रीतारानाथभट्टाचार्येण विंशति - भागेषु विहितम् अस्मिन् वैदिकशब्दा अपि विद्यन्ते वृत्युदाहरणसहितं पाणिनीयलिङ्गानु-शासनम्, पाणिनीयप्रत्ययपरिनिष्ठितरूपं पूर्वोत्तर-पदेषु परिवृत्तिसहत्वास-हत्वादि-यथेष्टसामग्री - भूमिकादिकमस्मिन् वर्तते । चार्वाकादिसमस्तदर्शन-समस्तश्रौतसूत्र - गृह्यसूत्र - स्मृति - पुराणादि - रामायण - महाभारत - आयुर्वेदवास्तुशास्त्र - राजशास्त्र - शकुनशास्त्र - तन्त्रनीतिपाक - धनुर्वेद-गन्धर्व - वेद - छन्दोऽलंकारादिशास्त्रेषु प्रयुक्तशब्दानां लिङ्गविग्रहव्युत्पत्ति-विभिन्नार्थपर्यायोदाहरणसहितं शब्दानां विषये यथा सम्भवमधिकतमा सामग्री समुपकल्पिता कोशेऽस्मिन् । अत एव विस्तृततमोऽयं कोशग्रन्थ अत एव विश्वकोशत्वमावहति । अस्य वृत्तीयसंस्करणस्यैवान्तर्गतमेकतः पञ्च-भागं यावत् ५,५०० मिता पृष्ठसंख्या । कोशस्य प्रकाशनं पश्चात् भारतस्य परममाननीयैः प्रथमराष्ट्रपतिभि श्री राजेन्द्रप्रसादमहाभागैः कथितमासीत् "अनेन संस्कृतसाहित्यं समृद्धं बभूव" १ ।

—

१ चौखम्भा साहित्यस्य १९६९ खीष्टाब्दीयं प्र० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाङ्मयार्णवः

पण्डितरामावतारेण कृतः। रामावतारशर्मणो बाल्यादेव कोशसङ्कलने शब्दसञ्चये चाभिरुचिरासीत्। १८७७ ख्रीष्टाब्दप्रभृति १९२९ पर्यन्तं प्राप्तजीवनेनानेन १९११ ख्रीष्टाब्दे कोशस्य रचनायाः प्रक्रमो व्यधायि। आजीवनञ्च तद्विरचनविश्लेषण-परिष्करण - निरतैरस्थायि। कोशविद्यायाः खलु स पारगामि विद्वानासीत्।

निस्सन्देहमयं वाङ्मयार्णवः संस्कृतभाषाया प्रयुक्ताप्रयुक्तशब्दानामाकरो रत्नाकरः इह धैर्येणान्वेषणेन दुर्लभानि वहुमूल्यानि च रत्नानि शक्यन्ते समधिगन्तुम्। दिवंगतस्य ग्रन्थकारस्य सञ्जातान्यष्टत्रिंशद् वर्षाणि। एवं तावद् सुदीर्घव्यवधानानन्तरं १९६७ ख्रीष्टाब्दे प्रकाशितोऽयं तदीयग्रन्थस्तन्नूनमेवामरत्वं प्रापयिष्यति

एष कोशः पादोनसप्तसहस्र संख्याकैर नुष्टुब्भिर्निबद्धोऽमरसिंहविरचितलिङ्गानुशासनशैली सङ्काशः श्लोकानामस्य संख्या ६७९६ मिता। ग्रन्थारम्भे षोडषपद्यानामुपक्रमः अन्ते चोपसंहारात्मिका षड्श्लोकी। नामलिङ्गानुशासनपरम्पराकेषु कोशेषु मूर्धाभिषिक्तः सार्वभौमश्चायं कोशो मन्यते। संस्कृतस्य समानार्थकनानार्थक - कोशेषु नानार्थकोऽयं भवति। कोशनिर्माणस्य नूत्नां वर्णानुक्रमां पुरातनाञ्च काव्यमयीं पद्धतिमनुकुर्वाणोऽस्य निर्माता नवीनप्राचीनयोः समन्वयात्मकमिदमनुकरणीयं सततञ्चानुस्मरणीयमेव कार्यमकरोत्। यद्यपि द्वादशख्रीष्टाब्दीयः केशवस्वामिमहाभागो नानार्थार्णवसंक्षेपाभिध. कोशं पद्धतिमिमामेवाश्रित्य विनिर्ममे। परन्तु तस्य कोशः पदानुक्रमेण प्रवृत्तो यदायं वर्णानुक्रमेण विनिर्मि :। संस्कृतस्यान्यकोशानामिवेहापि शब्दाः स्वविशिष्टलिङ्गे प्रथमान्ताः प्रयुक्ताः, अर्थद्योतनाय सप्तमीप्रयोगः। लिङ्गानां विशिष्टसूचनार्थं ना, स्त्री, अस्त्री नपुं इत्येतेषां सङ्केतानां प्राचुर्यण सञ्जातः प्रयोगः कोशेऽस्मिन्। द्वितीयमस्य वैशिष्ट्यमस्ति वैदिकशब्दानां लौकिकशब्दैः सह समुचितसन्निवेशः। वैदिकशब्दानधिकृत्य न कोऽपि कोशो द्वादशशताब्द्याः ख्रीष्टाब्दानां वैजयन्तीमपहाय प्रवृत्तः। तत्रापि स्वल्पा एव वैदिकशब्दाः। कोशेऽस्मिन् ते किञ्चिदाधिक्यभजन्ते। कोशकार स्वयमेवेदं विश्वकोशः, इति नाम दत्तवान्। अतो नायमपि साधारणः कोशः। यथाह ग्रन्थकारः स्वयम् : –

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्णानुक्रमविन्यस्तैर्लोकवेदोभयोद्धृतैः
पद्यबद्धैः सपर्यायै र्नानार्थो घटितो महान् ।
विशेषशास्त्रायुर्वेदप्रभृतीनां पदैर्युतः ॥
सोपयुक्तोदाहृतिभिष्टिप्पणैः समलङ्कृतः ।
सचित्रः प्रचुरार्वाच्यो वैज्ञानिकपदोच्चयः ।
परिशिष्टैश्च बहुभिः कोष एव परिष्कृतः ।

परन्तु कोशकारेच्छानुसारमस्य प्रकाशनं नैव जातम्. पण्डितवर्याणां महत्त्वपूर्णटिप्पणानामपि प्रकाशनं नात्रसुलभं जातं बहुविधविघ्नबाधावशात् । तच्छिष्याणां प्रसिद्धलेखकगवेषकाणां श्री बलदेवोपाध्यायप्रभृतीनां संस्कृतसंसारस्य विख्यातविदुषामभिमतं यत्कोशकारोऽत्र भाषाशास्त्रीयटिप्पणी-सङ्कलनाय नावाप्तवानवसरम् तथात्वे तु कोशोऽयमद्वितीयोऽभविष्यत् ।" आदर्शरूपमत्र तस्यैका टिप्पणी प्रस्तूयते,

"धेनुः" यद्यपि शब्दोऽयं सद्यः प्रसूतगोवाचकस्तथाप्येतस्यान्ये विलक्षणाः प्रयोगाः संस्कृतभाषायामुपलभ्यन्ते । कस्यचिदपि पशोः स्त्रीव्यक्तिबोधनार्थमपि तेन शब्देन सहास्य प्रयोगो दृश्यते । एतस्य शब्दस्य मौलोऽर्थोऽस्ति पयस्विनी गौः । ततो गोमात्रेऽस्य व्यापक प्रयोगो जातः । तदनु स्त्रीमात्र वाचको जातः । यथा –'अश्वधेनुः बड़वा: गजधेनुः- हस्तिनीति । खड्गधेनु. गोधेनु, बड़वा-धेनुरित्यादिषु शब्देषु धेनुशब्दस्त्रीत्वस्यैव बोधकः । एवमेवाङ्गल भाषायामपि Elephant Rhinoceros इत्यादिभिः शब्दैः सार्धं प्रयुक्तः Cow इति शब्दः स्त्रीत्वबोधक कदाचिच्चायमेकक एव हस्तिन्या बड़वायाश्च बोधको जायेत यथा "धेनुः किशोरेण" इति मनूक्त्या किशोरस्य अश्वशिशोः संयोगेन धेनुशब्दोऽश्वधेनुवाचकः- एकाक्यपि । "धेनुका स्त्रीकरेण्वा तु. इति कोशवचनेन धेनुकाया अर्थः करेणुरिति । सामान्य स्त्रीवाचकतया धेनुशब्दप्रयोगः कस्यचिदपि पदार्थस्य लघु रूपद्योतनार्थमपि प्रयुज्यते संस्कृतवाङ्मये । छुरिकायाः पर्यायवाचकेष्वमरनिर्दिष्ट – असिधेनुकाशब्दो विशेषेण ध्यातव्यः । "स्याच्छस्त्री चासिपुत्री च छुरिका चासिधेनुका ।"१ इहधेनोऽल्पार्थद्योतको धेनुकेति शब्दः धेनुरेव

---

१ अमरः २-८-९२ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धेनुका, स्वार्थे कः 'प्रत्ययः । 'फलतोऽसिधेनुका' इत्यस्यार्थे । लघ्वसिः छुरिकेति । इह धेनुर्धेनुका वा शब्दोऽल्पार्थद्योतनाय प्रयुक्तः । दानावसरे गोदानस्थाने घृततिलादीनां गोसदृशाकार रूपेण दानस्य विधानं पुराणधर्मशास्त्रेषूपलभ्यते घृतधेनुः, तिलधेनुः जलधेनुः- इत्यादयः शब्दाः एतादृशा एव प्रसङ्गे प्रयुज्यन्ते । एवमेव वामा वामिः वामी चेति त्रय एव स्त्रीत्वद्योतकाः शब्दाः । ''अथोष्ट्रवामी शतवादितार्थम्'' इति रघुवंशस्य पञ्चमे सर्गे । कालिदास प्रयुक्तस्योष्ट्रवामीत्यस्यार्थः- उष्ट्रस्त्रीति पुरा तूर्ण-सन्देशाः उष्ट्रवाम्यारोहणशीलसन्देशहरद्वारा प्रेष्यन्ते स्म भारवाहनार्थञ्च बलवत्त्वादुष्ट्रवाम्य एवोपयुज्य ते स्म । कोशनिर्दिष्टस्य वामी शब्दस्य बड़वा इत्येवार्थस्वीकारे तूष्ट्रशब्देन सह न तत्सम्बन्धे भवितुमर्हति । इत्यय शब्दोऽपि धेनुशब्दवत् – स्त्रीमात्रद्योतकः ।"

अनया टिप्पण्याः कोशकारस्य विविधशास्त्रज्ञता गम्भीरञ्च पाण्डित्य कोशरचनायामस्यां द्रष्टुं शक्यते वाङ्मयार्णवस्य ।

ऐतिहासिक संस्कृत—शब्द-ज्ञानकोशः

संस्कृतस्य शब्दानामैतिहासिकज्ञानकोशस्य परमावश्यकताऽनुभूयते स्म । तत्पूर्त्यर्थमेवायं ज्ञानकोशः प्रकाशितः ।

विविध- ज्ञान-शाखागतानां १५०० ग्रन्थरत्नानां पर्यालोचनं विधाय परिशीलनोत्तरं तत्रत्यानां शब्दानां एककोटिमितपत्रिका (Slips) सिद्धीकृताः विचारार्थम् स्वीकृतेष सार्धसहस्र ग्रन्थरत्नेषु वेदभाष्यटीकादि ग्रन्थानां (तेष्वधीतेष्वपि) गणना नास्ति ।

कोशे संगृहीतानां विशेषशब्दानां विविधार्थच्छटाः सोदाहरणं, साधारं समूलञ्च विवेचिताः सन्ति ।

अवतरणोल्लेखसमये लोक प्रसिद्धसुभाषितानां विषये दत्तचित्तत्वात् तत्र सुभाषितानां सन्दर्भकोशः सहजतया कोशाङ्गत्वेन सिद्धः ।

कोशरचना ऐतिहासिकतत्वानुसारिणी । तस्मात् शब्दार्थानां विविधानां १. २. ३ इति प्रथमं विभागान् कृत्वा ततः ए. बी. सी. इति उपविभागान् पुनश्च सूक्ष्मभेदेषु आवश्यकेषु सत्सु निर्देष्टुम् उपविभागेन चार्थविभागाः ते सर्वे कालक्रमानुसारेण निर्दिष्टाः सन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनेन रचनाविशेषेण कश्चन शब्दः केनार्थविशेषेण कस्मिन् वाङ्मये सर्वप्रथमं कदोपयोजितस्तत्सर्वं स्पष्टी भवति। यथा — "अंश" शब्दस्य नैकार्थकता तत्र भाग इत्यर्थः ऋग्वेदात् - आरभ्य तथा घटीपञ्चात्मकः (Two hours) एकः कालविभाग इत्यर्थः जैमिनीयोपदेशसूत्रस्थः। इति कथनं शक्यम्।

समासः संस्कृतस्य वैशिष्ट्यम् तस्य दर्शनं पूर्वतन - कोशेषु दुर्लभम्। कोशेऽस्मिन् पदद्वयात्मिकानि सामासिक - पदानि संग्राह्याणि इति निश्चित्य अपि सामासिकपदसंख्या वृद्धिं गता।

अस्य कोशस्य महत्वप्रकाशनायास्य प्रथमखण्ड एव प्रमाणम् तत्र २१६ पृष्ठेषु 'अ' शब्दात् 'अक्षिनाशनः' पर्यन्तं शब्दाः संकलिताः सन्ति। एतावत् शब्दानां कृते बोथलिङ्क रोथकोशस्य केवलं दश पृष्ठानि, मोनियर-विलियम्सकोशे च केवलं त्रीणि पृष्ठानि पर्याप्तान्यासन्।

डा० सुमित्रमङ्गेशकत्रे प्रेरणया वर्षाणां विंशतेः पूर्वं प्रारब्धस्य कोश-कार्यस्य कृते नेकैः सहकार्यं कृत्वा संकलिताः कोटिशः शब्दाः। ततश्च डा. अ. मा. घाटगे-प्रधान सम्पादकत्वेन प्रारब्धमर्थनिश्चयादिविवरणम्। अस्य कोशस्य प्रथमखण्डप्रकाशनं तद्विमोचनं च भारतराष्ट्रपतिना कृतं ३ जून दिवसे १९७६ खीष्टाब्दे।

कविजन शेवधिः

आदित्यनाथ कविश्चास्य प्रणेता।

मङ्गलाचरणम्:

श्रीमद्बाणाधिपतये प्रत्यूहदमनाय च।
नमस्कृत्वादिनाथेन क्रियते कविशेवधिः॥

शब्द नियोजनम्:

शिवस्त्रिलोचनः शम्भुः मार्तण्डः क्रमभैरवः।
विषमाङ्गः खड्गवत्सः सर्वश्रीः प्रियदर्शनः॥
गोरक्षकः कुमटकू वसुकन्या कलेश्वरः
शूद्रः शङ्करजो भृत्यः पल्लिकः पादजोऽङ्घ्रिजः।
मालस्तु पञ्चम शून्यो महर स्यादवाच्यकः।
तुरुष्को यवनो नीचो बौद्धा सर्वेश्वराः स्मृताः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुष्पिका: इति श्रीमदादित्यनाथकविवर्येण विरचितः कविजनशेवधि-निघण्टुः ।

कविजीवन निघण्टुः

धर्मराज निघण्टुः

धर्मराज-कृतः ।

मङ्गलाचरणम्:

कल्याणैकनिवासाय जानकी जानये नमः ।
आसीदनुचरो यस्य शब्दब्रह्ममयोऽनुजः ॥

प्रयोगान् बहुधा वीक्ष्य शब्दान् संगृह्य सर्वतः ।
कविना धर्मराजेन कथ्यते कविजीवनम् ॥

शब्दनियोजनम्:

वसुन्धरा धरा रामा श्यामा धामा पुराणिका ।
मध्ये तस्या वर्तुलः स्यात् करीषस्तु दोहलः ॥
गोमहिष्यादिकं जीवधनं स्यात् पादबन्धनम् ।

पुष्पिका:

इति श्री धर्मराजकविविरचितधर्मराजीय निघण्टुः समाप्तः । अस्यैवापरं नाम धर्मराजीयनिघण्टुरपि वर्तते ।

कविदर्पणनिघण्टुः

अस्य लेखको रामः । अथ कोऽयं रामः कः कालश्चास्येति वक्तुं न पार्यते । अस्य कोशस्यापि पाण्डुलिपि स. म. पुस्तकागारे भवति । अस्यारम्भ-श्लोकाः—

कल्याणैकनिवासाय जानकीजानये नमः ।
आसीदनुचरो यस्य शब्दब्रह्ममयोऽनुजः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इति मङ्गलाचरणं विधाय स्वकोशविषये—आह लेखकः :—

प्रायः सन्दर्भयोग्यानि पदान्याहृत्य कोशतः ।
ततस्ततः सदालोकः क्रियते कविदर्पणः ॥
कोशान्तरेषु दृष्टानि संगृहीतानि च स्वतः ।
उचितानि पदान्यत्र पश्यन्तु कविपुङ्गवाः ॥
नानार्थास्तत्र चिन्त्यन्तां शब्दलिङ्गार्थरूपतः ।
प्रायो विशेष्य निघ्नानां भेदः सम्प्रतिपद्यताम् ।
विस्मृतः श्लोकसन्दर्भं व्याजाच्चेलिङ्गनिर्णयः ।
ऊह्यतां कस्य वा न स्यात् व्यासङ्गेन तु विस्मृतिः ॥

त्वन्ताथादिकमध्वानमनुसृत्यामरोदितम् ।
निघण्टुरुच्यते मार्गं कस्त्यजेत्पूर्वकल्पितम् ॥
विशेष्यनिघ्नशब्दानां स्पष्टो लिङ्गत्रयान्वयः ।
अन्यलिङ्गविभेदश्च सावधानैर्विचिन्त्यताम् ।
बहुनात्र किमुक्तेन नानार्थरसिका जनाः ।
निक्षिप्तार्थसमान् शब्दान् पश्यन्तु कविदर्पणे ॥
आद्यन्तनियतान् शब्दान् संग्रहानिह धीमताम् ।
दर्शयामि यथाबोधं सज्जनाल्हादकांक्षया ।
कैश्चित्कृतोऽन्त्य नियमकैश्चिदादौ यथारुचिः ।
ततो विशेषं दृष्ट्वेह तुष्यन्तु कविपुङ्गवाः ।
कः पद्मसम्भवे सूर्ये वायावात्मनि पावके ।
अर्केऽर्कपर्णस्फटिक ज्येष्ठभ्रात्रीन्द्रभानुषु ।

स्थाने नपुंसकक्रूर दृष्टौ चेद् वाच्यलिङ्गकः । इतिक्षान्त वर्गः ।

इदानीं स्वविषये निर्दिशति कोशकारः –

श्री मच्चोक्वरुपाध्यायश्रीरामेण महर्षिणा ।
यान्ताद्याः दर्शिताः सम्यङ् नानार्थाः कविदर्पणे ॥
जानन्ति कवयो भावमिति मत्वा क्वचित् क्वचित् ।
औचित्यापेक्षया ख्यात्या न कृतो लिङ्गनिर्णयः ।
कविलोकप्रमोदाय निर्मितः कविदर्पणः ।
यत्र पश्यन्ति रूपाणि त एव प्रौढवीक्षया ।
नान्धाः पश्यन्ति मुकुरे रूपं यदि सुनिर्मले ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुकुरस्यास्ति को दोषस्तत्कर्तुर्वा विचिन्त्यताम् अस्मिन् कोशे ककारात् क्षकारं यावत् वर्गसन्निवेशः ।

गीर्वाण भाषा भूषणम् ।

अस्य निर्माता त्रिविक्रमाचार्योऽस्ति अस्यारम्भिक श्लोकाः—

एकैक शब्द एव स्यात भाषायोषाविभूषणम् ।
तान् गृहीत्वार्थगीर्वाणभाषाभूपणमुच्यते ।
स्वर्गं महामहे च स्यात् इन्द्रे विक्रमदर्शनः ।
अग्नौ कीलालकः सूर्यो विप्रवर्य-इतीर्यते ।

समाप्तिश्लोकः-

शूद्रः सदारकश्चारुवाको विष्णुपदोद्भवः ।
यावनाद्यति नीचेषु म्लेच्छा इति निगद्यते ।

पुष्पिका-

इति त्रिविक्रमाचार्यविरचितभाषाभूषण-निघन्टुः समाप्तः ।

अत्र त्रिविक्रमाचार्यस्य कालोऽविज्ञात एव ।

दशदीपनिघण्टुः

निर्माता वेदान्ताचार्यः ।

मङ्गलाचरणम्

जगत्कल्याणपोषाय हेषा यस्य प्रशस्यते ।
कलयामि तमश्रान्त कन्धरोपरि सैन्धवम् ।

शब्दनियोजनम्—

एकैकस्य पदार्थस्यार्थान् दशधा कल्पयन् बुधान्
मोदाय रचये कोशं दशदीपकनामकम् ।

यथा—

सुधः सुधाकरे १ वृक्षभेदे धर्मव्रतेऽपि च ।
सुधाक्षीरे ४ लताभेदे ५ विद्याया ६ भिक्षुवाचके ७ अमृते ८
चूर्णं फलकेस्यात् ९ सुधामाध्वीक किट्टके १०
मपिभेदे पुण्डरीकं १ सिताम्भोजे २ जलाशये ३ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

077708



शिक्षकः पंकज । त्वं वद यत् रेखा बिन्दुमध्ये कोऽन्तरालः ।

पंकज — श्रीमन् ? रेखा तु मम गृहसमीपे प्रतिवसति बिन्दुश्च विद्यालये कार्यं करोति ।

★ ★ ★

शिक्षकः — (क्रोधेन) त्वं गणिते अनुत्तीर्णः हिन्दी विषये अनुत्तीर्णः आंग्लभाषायां अनुत्तीर्णः ।
अहं पृच्छामि यत् अन्यदपि किंचित् आगच्छति ।

टीनू — बाढं-आगच्छति

शिक्षकः — किम् ?

टीनू — श्रीमन् भवन्तं दृष्ट्वा स्वेदः ।

★ ★ ★

शिक्षकः — (रमेशं प्रति) वद तिहाड़ कारागारात् कः अधावत् ।

रमेशः — (भयेन) श्रीमन् । अहं तु न अधावत् । कुत्रचित् रविसु नासीत् । सः सदैव गृहात् विद्यालयाय पलायितो भवति ।

★ ★ ★

न्यायाधीशः — अहं निर्णयं करोमि यः सभायां वदिष्यति स बहिर्निष्कासयिष्यते ।

एकः अपराधी — श्रीमन् अहं वदामि मह्यं बहिर् निष्कासयतु ।

— शशि कान्त शर्मा
आचार्य, ओ. टी, रिसर्च स्कालर
रा. मा. विद्यालय हारसी
जि० कांगड़ा (हि. प्र.)

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्माकम् वैदिक-संस्कृतिः

आचार्य सुरेश भारद्वाजः

अस्माकम् वैदिकसंस्कृतिः कर्तव्यस्य सच्चारित्र्यस्य प्रेरणास्रोतः धर्मस्य मूलञ्च वर्तते । यथा च स्वयं मनुनाऽपि प्रकीर्तितम्—

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मन स्तुष्टिरेव च ॥ (मनु० २-६)

बहूनां जन्मनामन्ते प्राप्तं नरजन्म तस्य सार्थकतायै कथं कीदृशं माचरितव्यम्—

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥

(ऋक्०)

शुभसंकल्पवान् मे मनः ! कथं भवेदिति वेदे ।

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति ।
दूरं गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ॥

(यजु०)

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु
यस्मादृते किंचन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु ॥

(यजु०)

अस्माकम् प्रतिदिनविहितसदसद् कर्मणां साक्षी परमतेजोमयः लोकत्रयस्य स्थावरजंगमस्य च प्रकाशयिता भगवान् सूर्यः, तदुदिते सति सर्वेषां प्राणिनां दिनचर्यारम्भा भवति अस्तं गते च समाप्ता भवति अतः तदेवोक्तं...

"चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावा पृथिवी अन्तरिक्ष सूर्य आत्मा जगतस्तस्थुषश्च ॥

(ऋ. सू. संग्रह)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हे सृष्टेः प्रकाशक आदित्य देव ! अस्मान् निन्द कर्मभ्य प्रवतु ।

अद्या देवा उदिता सूर्यस्यनिरंहसः पिपृतान्निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

(ऋ. सू. सं.)

अस्माकम् भारतीयानां वैदिक संस्कृति ऽ केवलं धार्मिक प्रवृत्तिप्रदायक चारित्र्य प्रेरका अपितु भारतीयान् एकताया सूत्रेऽपि बध्नाति यथा—

सह नाववतु सहनौ भुनक्तु सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ।

वयम् परस्परं द्वेषभावनां विहाय भ्रातृभावनया जीवनयापनं कुर्मः निर्धनानां असहायानां पीडितानां साहाय्यं अस्माकम् कर्तव्यम्—

संगच्छध्वं संवदध्वं सं वोमनांसि जानताम् ।
देवाभागं यथा पूर्वे संजानाना उपासते ॥

(ऋक्.)

— बरयाड़ी जिला सोलन (हि. प्र.)

संस्कृतमहाविद्यालयपरिषदः निर्वाचनम्

प्रधानः डा० मस्तराम शर्मा	...	रा. सं. म. वि. नाहन
उप-प्रधान आचार्य जीवन लाल	...	,, ,, ,, क्यार्टू
महासचिवः आचार्य लीलाधरः	...	,, ,, ,, सुन्दरनगर
सचिव आचार्य रामानन्द शर्मा	...	,, ,, ,, शिमला
कोषाध्यक्षः डा. लेखराम आचार्यः	...	,, ,, ,, सोलन
का. सदस्याः डा. प्रेमलाल गौतमः	...	,, ,, ,, नाहन
आचार्य परशुराम चन्देल	...	,, ,, ,, सुन्दरनगर
आचार्य नत्थी प्रसाद	...	,, ,, ,, सोलन
आचार्य मदन मोहन	...	,, ,, ,, शिमला
आचार्य देवराम शर्मा	...	,, ,, ,, क्यार्टू

विशेषपरामर्श दाता डा. नागदत्त डिमरी, डा. हरिदत्त शर्मा ।

रा. सं. म. नाहन एवं सोलन (हि० प्र०)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महाभारते पुरुषार्थः

आचार्यः कर्म सिंहः

★

वेदाः विश्वस्य प्राचीनतमाः ग्रन्थाः सन्ति, सिद्धान्तोऽयं सर्वसम्मतः । महर्षिदयानन्दस्य मतानुसारं वेदेषु सर्वाः विद्याः सन्ति, मूलत इति । तेषां मते विज्ञानं, कर्म, उपासना, ज्ञानञ्चेति वेदस्य चत्वारः प्रमुखा विषयाः वर्तन्ते । येषु समग्रविश्वस्याधिभौतिकमाध्यात्मिकञ्च सर्वविधं ज्ञानं समुपदिष्टमस्ति । वेदेषु पुरुषार्थोऽपि अनेकेषु मन्त्रेषु वर्णितोऽस्ति । पुरुषार्थचतुष्टये धर्मार्थ-काममोक्षाणां विवेचनमस्ति यजुर्वेदे ।

हे ईश्वर दयानिधे ! भवत्कृपयाऽनेन जपोपासनादिकर्मणा
धर्मार्थकाममोक्षाणां सद्यः सिद्धिर्भवेन्नः ।

इत्यस्मिन् मन्त्रे उपासकः मोक्षस्याभिलाषां करोति । यजुर्वेदस्य चत्वारिंशत्तमेऽध्याये मोक्षप्राप्त्यर्थं कर्म कर्तुं चोदयति परमेश्वरः ।

कुर्वन्नेवेह कर्माणि जिजीविषे शतंसमाः । एवं त्वयि नान्य-
थेतोऽस्ति न कर्म लिप्यते नरे ॥

यजुर्वेदः

अस्मिन् मन्त्रे मानवीयजीवनस्य चरमोत्कर्षं लक्ष्यं प्राप्तुं समुपदिष्ट-मस्ति । अयमेव मन्त्रः पश्चात्वर्तिनि साहित्ये 'पुरुषार्थ' इति नाम्ना व्याख्यातः ।

सृष्टादावेव कर्मणः बीजांकुरणं भवति यत् कालान्तरे पुरुषार्थमुपेत्य वृक्षरूपमाकलयति महाभारते अयमेव पुरुषार्थः पाणिवाद नाम्ना व्याख्या-तोऽस्ति व्यासमतेन कर्म एव मानवस्य लक्षणम् । यथा

प्रकाशलक्षणा देवा मनुष्या. कर्मलक्षणाः ।

(अश्वमेध ४३-२७)

अतः एव भारतीयभूमिरियं कर्मभूमिरित्याख्यायते

वस्तुतः मानवस्योन्नायकं तत्त्वमपि पुरुषार्थ एव अयमेव पुरुषार्थः महर्षिव्यासेन पाणिवादेति नाम्ना व्याख्यात. ।

अहो सिद्धार्थता तेषां येषां सन्तीहपाणयः शान्ति १८०-११,१२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्यादिषु श्लोकेषु इदमेवास्ति निगदितं यत् येषां पाणयः सन्ति तेषां सर्वाणि कार्याणि सिद्धानि भवन्ति । अयमेव सिद्धान्तः वैयक्तिके, पारिवारिके सामाजिके राष्ट्रीये जीवने आचरणीयं यतोहि पाणिनां ऐक्यैनैव राष्ट्रस्यैक्यम् विधातुं शक्नोति व्याख्यातं । "महाभारतेऽयमेव पुरुषार्थः कर्मवाद" नाम्ना वर्णितः । यथा

येन येन यथा यद्यत् पुराकर्म सुनिश्चितम् ।
तत्तदेवोत्तरं भुंक्ते नित्यं कर्मविहितमात्मना ॥

अर्थात् मनुष्य यन्नाम कर्म करोति तद्वदेव फलमाप्नोति पूर्वस्मिन् जन्मनि कृतानि सुकृत्यानि दुष्कृत्यानि वापि अस्मिन् मानवदेहे प्राप्यानि भवन्ति । अन्यत्रापि —

यथा धेनुः सहस्रेषु वत्सो विन्दति मातरम् ।
तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥

महाभारते १२-३२२

अर्थात् यथा वत्सः स्वमातरं धेनुं सहस्रेषु धेनुषु परिचिनोति तथैव पूर्वकृतं कर्म अपि कर्तारम् प्राप्नोति येन जीवः सुखी दुःखी वा भवति ।

इत्थं कर्मप्रवाह पीडितो जीवः नात्मवशः । स कर्मणामेव बन्धनैरावृतोऽस्ति । महाभारते कर्मबन्धं विवेचयता महर्षिव्यासेन कर्मणः विभाग इत्थं कृतः । कर्म, अकर्म, विकर्म चैते त्रयः भागाः सन्ति कर्मणः । एते एव सात्विक-राजसिकतामसिकरूपेणाप्यभिधीयन्ते । अयमेव कर्म विपाकः संचितप्रारब्ध-क्रियमाणरूपेऽपि स्वीक्रियते । संचितानि कर्माण्येवास्मिन् जन्मनि संस्काररूपेण प्रतिफलितानि भवन्ति । येन मानव स्वजीवने दुःखानि सुखानि वा प्राप्नोति । क्रियमाणानि कर्माण्येवेतादृशानि सन्ति यैः योगक्षेममाचरन् अस्मिन् जन्मनि, जन्मान्तरे वा भगवद् प्राप्तिः कर्तुं शक्यते । कर्मभोगचक्रमेतत् ज्ञानं दुष्कारं खलु । अतोक्तम् गीतायाम् —

कर्मणो गहना गतिः ।

अर्थात् कर्मरहस्यं सारल्येन ज्ञातुं न पार्यते महाभारते रागोपादानकर्माभिमानपर्यन्तं कर्मबन्धो भवति । यथा —

शुभानामशुभानाञ्च नेहनाशोऽस्ति कर्मणाम
पूर्वदेहकृत सर्वमत्तश्यमुपभुज्यते ।

अश्वमेधपर्व १८-१२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्मणां फलानि अवश्यमेव भोक्तव्यानि भवन्ति । तेषां विनाशो न जायते । अतः पुरुषार्थः परमावश्यकः खलु ।

पुरुषार्थः

धर्मार्थकाममोक्षश्चेति पुरुषार्थः । प्राक् मनुष्यः धार्मिको भवेत् धार्मिको भूत्वा अर्थस्योपार्जनमाचरेत् अर्थञ्च प्राप्य कामान् प्राप्नुयात् कामानां भोगं कुर्वन् च निष्कामो भूत्वा मोक्षमनुगच्छेत् । मोक्षे च प्राप्ते परममानन्दमधिगच्छति । अस्य सर्वाणि दुःखानि च निर्मूलानि च जायन्ते ।

१०२ ६ ग्रैण्ड होटल
शिमला

— — —

अ. भा. संस्कृतमहासम्मेलनम

दिल्ली । सम्मेलनमिदं गतवर्षेभ्योऽनवरतं संस्कृतभाषाया उपरि समागतसंकटनिराकरणे सततं संलग्नम् । प० विमल–देव भारद्वाजः सततमनशनं करोति तत्र । बहुबारं च प्रशासनेन साकं वार्तालापोऽपि प्रचलति । बहुविध–गोष्ठयः समायोज्य ते यत्र भारतस्य विभिन्नप्रान्तेभ्यः संस्कृतहितेच्छुकाः भागं गृह्णन्ति सहयोगञ्चात्र कुर्वन्ति । निम्नलिखितानां विदुषामत्र सहयोगः

प्राचार्य बुद्धिबल्लभ शास्त्री - हरिद्वार ... डा. घनीराम शास्त्री-जम्मू
प्राचार्य रामकिशोर शर्मा - खुर्जा ... पं. रामकृष्ण शर्मा-जालन्धर
यशोदानन्द शास्त्री-दिल्ली ... सन्त रामशरण दास-वाराणसी
आचार्य रामनाथ सुमन-दिल्ली ... पं. युगलकिशोर चतुर्वेदी-जयपुर
डा० श्याम सुन्दर दास हरिद्वार — प्राचार्य श्यामानन्द-दिल्ली
श्याम सुन्दर रतरा — पं० श्री कण्ठ शास्त्री-दिल्ली
सर्वज्ञ मुनि, गंगेश्वरधाम — पं० रामरत्न शास्त्री
बुध देव शास्त्री शम्भुदत्त गौड — श्री जगदीश मेहता,

(निगम पार्षद)

मास्टर श्री कृष्ण शर्मा (संयोजकः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथानिका:-

वि ड म्ब ना

विमला देवी शास्त्री, एम. फिल,

पद्मपुरास्थे एकस्मिन् ग्रामेका लघुपरिवारः सुखेन बसति स्म। किन्तु एतस्य सौख्यमध्ये दैवस्य कुटिलदृष्टिः प्रपातः। येन परिवारस्य प्रमुखजनस्य पितुरसमयैव मृत्युः सञ्जातः। एतद् दुर्वृत्तानन्तरं परिवारस्य माताऽप्य- साध्यहृदयरोगाक्रान्ता शीघ्रञ्च मृत्युञ्जता। इदानीं विंशतिवर्षीया ज्येष्ठा भगिनी, द्वादशवर्षीया मध्यमाभगिनी, अष्टवर्षीयः कनिष्ठो भ्राता च जगतः पातोत्पातं सोढुमवशिष्टाः। ज्येष्ठा भगिनी सुधाऽतीव बुद्धिमती व्यवहार- कुशला दूरदर्शिनी च कन्याऽसीत्। तया विचारितम् एतयोर्द्वयोः भगिनी- भ्रात्रोर्मया तत्सर्वं कर्तव्यम् येनै तयोर्जीवने सुखं भवेत्। अहं सीवनस्य कार्यं सम्यग् जानामि। अद्य प्रभृति अनेनैव कार्येण अयाणां जीवन- निर्वाहो भविष्यति। एतयोर्द्वयोर्विद्यालयस्य शुल्कादिकस्य व्यवस्थापि मया कार्या। पठनेनैवैतेषां भविष्यं सुरक्षितमुज्ज्वलञ्च भविष्यति। कदापि कस्यप्यभावस्य प्रतीतिर्न भवेदेवं मया यतनीयम्। अहर्निशं तया सीवनस्य कार्यं समारब्धम्। अनेकबारं स्वयं क्षुधार्तयाऽपि तया स्वकीयद्वयो- र्भगिनीभ्रात्रोर्वस्त्रभोजनपठनादिसम्बद्धअपेक्षाः पूर्णतां नीताः। किन्तु तया पराजयो नैव स्वीकृतः। तया चिन्तितं यत् यदि मम जीवनदानेनैतयोर्जीवने सौख्याऽवाप्तिर्भवेत् तदा मम कृते सर्वोच्चपुरस्कृतिर्जन्मलाभो वा।

एवं स्वानुजयोर्विकासाय सुधाया अनेककष्टानि सहमानाया अनेकानि- वर्षाणि व्यतीतानि। शनैः शनैः तस्या भ्राता स्नातककक्षाया विद्यार्थी जातः। भगिनी च स्नातकोत्तरकक्षायां पठितवती। एतयोर्द्वयोः शिक्षारुचित्वात् सुधाऽऽनन्देन सर्वां श्रान्तिं विस्मरति स्म। सुधया विशेषयोग्यतायै विशि- ष्टाचार्या अपि समये समये पाठनाय नियुक्ताः येनोत्तमोत्तमफलप्राप्तिः सरला जाता। विनयःस्वाध्ययनस्यानन्तरं सर्वकारस्य (आई. ए. एस.) प्राशासनिक- अधिकारी संजातः। प्रियाऽप्यध्ययनस्यानन्तरमेकस्मिन् विद्यालये नियुक्ता। हर्षयेवं आत्मन उद्देश्यं सफलमवलोक्य सुधाया मनसि हर्षः चरमकोटिं प्राप्तः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदानीम् एतयोर्यथाशीघ्रं विवाहः करणीयः—इति सा निश्चयं चकार। तस्याः स्वकीयविवाहस्य प्रश्न एव नासीत्। यतोहि तस्या अवस्थैतदनुरूपं नासीत्। अनुजयोर्जीवनोल्लासेव तस्याः सर्वस्वमासीत्। योग्यपात्रप्राप्तये तया सम्बन्धिनां समाचारपत्रादीनां साहाय्यमधिगतम्। अन्ततः प्रियायाः कृते गौरवनामको योग्यो वरः समधिगतः। स धनाढ्यः, शिक्षितः, प्रियदर्शनश्चासीत्। प्रियायाः सौन्दर्यप्रभावितेन गौरवेनाऽन्यत् किमपि न विचारितम्। अस्य परिवारस्य निर्धनता सुधायाः साधारणकार्यद्वारा निर्वाहः च तस्मै न रोचते स्म। किन्तु रूपराशिलोभिना गौरवेन मौनत्वमेवाचरितम्। इत्येवं शीघ्रमेवैष विवाहः सम्पन्नः। विनयेन स्वकीयां भगिनीं धनिकस्य गृहे गतवतीमवलोकयता स्वयमपि धनाढ्यकन्याप्राप्तये निर्णयः कृतः। स्वल्पप्रयासेनैव दीपिका ऽऽख्यायाः कन्यायाः पितुः पक्षात् विवाहप्रस्तावोऽधिगतः। सर्वमनुरूपं विचार्य विनयेनैव प्रस्तावो मुदाऽभिनन्दितः इत्येवं तस्यापि विवाहो धनाढ्यपरिवारे जातः। सुधया स्वानुजयोः स्पृहाविरुद्धं कमपि न कथितम्। सर्वं तया तयोर्हर्षानुरूपमनुमोदितम्।

अनन्तरम् गृहे सुधा विनयो दीपिका च आसन्। सुधया विचारितं यत् इदानीं मम सुखस्य दिवसाः समारब्धाः। सा निश्चिन्ता इव जाता। सप्तदशवर्षाणां श्रमस्यानन्तरं तया तादृशाः सौख्यवहा दिवसा अवलोकिताः। भविष्ये सा सुखेन जीवनं यापयिष्यति यतोहि दीपिका वधूगृहे समागता विनयश्च 'अधिकारी' जातः इत्येतादृशया विचारणया सा प्रफुल्लितवदना बभूव। विवाहस्य विचारः तस्या मनसि नैवासीत् किन्तु सुखेन जीवनयापनस्य प्रवृत्तिरवश्यमासीत्।

दीपिकाऽऽधुनिककन्या इव नवनववस्त्रालंकृता, पत्रिकादिपठनसंलग्नाऽऽसीत् गृहकार्यं प्रति क्वापि तया प्रवृत्तिर्न दर्शिता। सुधया विचारितं-नवोविवाहोऽस्ति, शनैः शनैः सर्वमेषा विधास्यति। किन्तु अनेके मासाः व्यतीताः, दीपिका तथैव स्वोत्कर्षविचारभरिता गर्वोन्नतेव समालोकिता। तया सुधायाः साधारणत्वं प्रति स्वकीयोपेक्षाऽपि प्रदर्शिता। सा उच्चगृहस्य कन्याऽऽसीत्। स्वभर्तुः साधारणभगिनीं प्रति सम्मानव्यवहारः तस्यै न रोचते स्म। विनयः प्रतिदिनं भगिनीचरणस्पर्शेन आशीर्वादं प्राप्नोति स्म। शनैः शनैः तया गृहे कलहोऽपि समारब्धः। अन्तर्दुःखेन पीडिताऽपि सुधा मौनत्वमेवाचरति स्म। विनयो दीपिकाया धनादिकैः प्रभावितः तस्या चाटुकारः, आज्ञानुवर्ती निष्ठावान् पतिरिव जातः। सुधयैतत् सर्वमनुभूतम्। तस्याः कृते गृहे वासः कठिनो जातः। कनीयसी भगिनी अपि दूरं गता।

(शेषः ३० पृष्ठे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



कथय कथम्

सुश्री सन्तोष वर्मा

युवतेजो विना युवकोजो विना,
योगक्षेमं भवेत् कथयस्व कथम् ।
योगक्षेमं भवेत कथयस्व कथम् ?

मातृमान विना भ्रातृभाव विना
ऐक्यभावं भवेत् कथय स्व कथम् ?
ऐक्यभावं भवेत् कथय० कथम्

राष्ट्रभक्ति विना राष्ट्रसन्धि विना,
राष्ट्रभक्तिर्भवेत् कथय० कथम् ?
राष्ट्रशक्तिर्भवेत् कथय० कथम् ।

ब्रह्मभूति विना, क्षात्रसूति विना,
जयज्योतिर्भवेत् कथय० कथम् ?
जयज्योतिर्भवेत् कथय कथम् ।

धैर्यधृति विना युक्त्यौचित्यं विना,
सिद्धिसाध्यं भवेत् कथय० कथम् ।
सिद्धिसाध्यं भवेत् कथय० कथम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुण्यवरणं विना पापहरणं विना,
शुद्धाचरणं भवेत् कथय॰ कथम् ।
शुभाचरणं भवेत् कथय॰ कथम् ।

ज्ञानस्फुरणं विना प्रेम — प्रवणं विना,
स्नेहस्रवणं भवेत् कथय॰ कथम् ?
स्नेहस्रवणं भवेत् कथय॰ कथम् ।

मातृचरणं विना धातृशरणं विना,
भवतरणं भवेत् कथय॰ कथम् ?
भवतरणं भवेत् कथय॰ कथम् ।

रामरमणं विना शरणगमनं विना,
तमोऽपसरणं भवेत् कथय॰ कथम् ।
तमोऽपसरणं भवेत् कथय॰ कथम् ।

गुरुशरणं विना ध्यानधारणं विना ।
सदाचरणं भवेत् कथय॰ कथम् ।
सदाचरणं भवेत् कथयस्व कथम् ।

अध्यक्षा, संस्कृत विभाग
गान्धी आदर्श कालेज
समालखा करनाल)
हरियाणा

(शेषः २८ पृष्ठस्य)

तस्या अपि धनसम्पन्नता सुधा जानाति स्म । तस्याः कृते शनैः शनैर्जीवनमेव भारस्वरूपं जातम् । अनेकाभिश्चिन्ताभिः सा रात्रौ अपि न स्वपिति स्म । तस्या वर्णः पाण्डः कायः च नितरां कृशो जातः किन्तु तस्याः कुशलं न कश्चित् पृच्छति स्म । एकस्मिन् दिने सा गृहं परित्यज्य अज्ञातस्थलं प्रति प्रस्थिता । सा एव न जानाति स्म यत् कुत्र तया गम्यते ? एतद् विज्ञाय दीपिका भृशं मुदिता । स्वल्पचिन्तानन्तरं विनयोऽपि सामान्यो जातः । सुधा कदापि न प्रत्यावर्तिता तस्याः किं जातं नैव कश्चिज्जानाति स्म । एवमपरेभ्यः श्रुतं यत् सुधया स्वयं विषपानं कृतम् ।

केन्द्रीय विद्यालय नं २
(डी. सी. डब्ल्यू) पटियाला
(पंजाब) ४७००१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्वाचन-सूचना

संस्कृत शिक्षक परिषद खण्ड नादौन (हि. प्र.)

श्रीजगन्नाथशास्त्रिण: अध्यक्षतायामिदं निर्वाचनं जातं यत्र निम्न-पदाधिकारिण: निर्वाचिता:—

१	प्रधान	श्री विश्वनाथ	रा० उ० वि० सेरा
२	महासचिव	,, राम प्रकाश आचार्य	,, किठपल बदारन
३	उप प्रधान	,, कृष्ण चन्द	रा० मा० पा० चोड़
४	सह सचिव	,, त्रिलोक चन्द	रा० उ० वि० गौना
५	कोषाध्यक्ष	, जगदीश चन्द	रा० मा० वि० हथोल
६	लेखाकार	, जगदीशचन्द	रा० व० मा० वि नादौन

कार्यकारिण सदस्या:

१	श्री कृष्ण देव	रा. व. मा. विद्यालय नादौन
२	,, जगदीशचन्द	रा. व वि. धनेठा
३	, पुरुषोतम दत्त	रा. उ. वि जोल सप्पड़
४	,, सोम राज	रा० व० मा० वि० कांगू
५	,, भागीरथ	रा. व. मा. वि. गलोड़
६	, निक्का राम	रा. मा. वि. पन्साई

मण्डल प्रतिनिधय:

१	श्री तीर्थ राज	रा. उ. वि. जलाड़ी
२	,, देश बन्धु	रा क. मा. वि. धनेटा
३	,, रत्न चन्द	रा. उ. वि. कश्मीर

नौहराखण्ड संस्कृत शिक्षक परिषद्

अस्या निर्वाचनं श्रीजियालालशास्त्रिण: पूर्वप्रधानस्य अध्यक्षतायां अक्तूबर १९८९ काले जातम्। एवं पदाधिकारिण: निर्वाचिता:

१	प्रधान	श्री जियालाल शर्मा	रा. उ. वि. बोगधार
२	उपप्रधान	,, शंकरदत्त शर्मा	रा. उ वि. भवाई
३	महास चव	, रमेश अत्रि	रा. मा. पा हरिपुरधार
४	मुख्यालय सचिव	,, धर्मचन्द कोण्डल	रा उ. वि नौहराधार
५	कोषाध्यक्ष	,, मोहनचन्द त्रिपाठी	रा प्रा. वि. चोकर

मण्डलप्रतिनिधय:

१	श्री ओमप्रकाश राही	रा. उ. वि. बोगधार
२	,, जियालाल शर्मा	रा. मा वि सेरतन्दीवला
३	,, बाबूराम शास्त्री	रा. मा वि. घाण्डूरी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वास्तव में हमारे नेता विदेशी शिक्षा-दीक्षा प्राप्त हैं वे भारत के मान चिन्हों को नहीं पहिचानते हम अब गलती न करें, वोट उसे दें जो संस्कृत शिक्षा अनिवार्य करे।

संस्कृत आन्दोलन का संक्षिप्त इतिहास

१ संस्कृत शिक्षा अनिवार्य हो-इसके समर्थन में भारत भर से सवा लाख हस्ताक्षर एकत्र किये गये हैं।

२ २६ दिसम्बर को शास्त्री भवन पर १२०० संस्कृत प्रेमियों ने धरना दिया एवं संस्कृतार्थ संघर्ष का बिगुल बजा दिया।

३ २० फरवरी को नई दिल्ली के वोट क्लब पर 'विशाल संस्कृत रैली' का आयोजन किया गया, जिसमें सरकार को सशक्त चुनौती दी गई—दूरदेश से लोग आये एवं बलिदानों का संकल्प लिया गया

४ १० मार्च को नई दिल्ली के विठ्ठल भाई पटेल भवन में 'संस्कृत रक्षा सम्मेलन' का आयोजन किया गया तथा लोकसभाध्यक्ष को संस्कृत सम्बन्धी ज्ञापन दिया गया संस्कृत प्रेमियों के विशाल जुलूस को पुलिस ने रोका एवं जबर्दस्त संघर्ष हुआ अनेक बसों को क्षति पहुंची। सैंकड़ों लोगों ने गिरफ्तारियां दीं।

५ १० मार्च से ही पं० विमलदेव भारद्वाज के नेतृत्व में जन्तर-मन्तर संसद मार्ग पर संस्कृत महासम्मेलन द्वारा धरना जारी है समर्थकों का तांता बधा रहता है।

आवाहन

★ आप भी धरना स्थल पर आकर अपना समर्थन व्यक्त करें।

★ जो सम्भव हो उस बलिदान के लिए नाम लिखवाएं

★ आंदोलन के सचालन के लिए धन की सहायता करें।

★ अपने नगर में संस्कृत रक्षा सम्मेलन करे।

★ अपने स्थान से धरना स्थल की ओर पद यात्रा करें।

— निवेदक

विमलदेव भारद्वाज

अ. भा. संस्कृत महासम्मेलन

आर ६६-२ माडल टाउन दिल्ली-११०००६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

नवीनं संस्कृतमण्डलम्

मानवसंसाधनविकासमन्त्रालयान्तर्गतं यन्नवीनं संस्कृतमण्डलं उपराष्ट्रपतिमहाभागानां अध्यक्षतायां गठितमभूत् तेन नीचैर्गच्छन्मनोबलं संस्कृतहितेच्छुकानां किञ्चिदुन्नतं जातम् ।

अस्मिन् मण्डले संस्कृतस्य प्रख्यातपण्डिताः सन्ति । एते प्रशासकोयमनुभवं जनमानसज्ञानं चापि पर्याप्तं धारयन्ति । एवं सति वयं आशां कुर्मः — यत् - संस्कृतयोजना केन्द्रीयप्रशासनेन याः प्रचालनीयाः सन्ति ताः प्रचलिष्यन्ति - इति सुनिश्चितम् । उपराष्ट्रपतिमहाभागाः स्वयं संस्कृतस्य परमहितेच्छुकाः संस्कृतमहत्वज्ञातारश्च सन्ति । अतः संस्कृतसंस्थाकार्यकर्तृभिः संस्कृतविद्वद्भिः संस्कृतहितेच्छुभिश्च मण्डलाध्यक्षाः उपराष्ट्रपतिमहाभागाः पत्रैः प्रार्थनीयाः दलैः साक्षात्कर्तव्याः संस्कृतहितसम्पादनाय च प्रेरणीया । आशासे समस्तभारतविद्वांसः— अत्र गम्भीरतया विचारयिष्यन्ति यथाकर्तव्यञ्च करिष्यन्ति ।

———

अ० भा० संस्कृतसम्मेलनं दिल्ली

चिरात्—पं० विमलदेव भारद्वाजानां अथकप्रयासाः सम्मेलनमाध्यमेन संस्कृतहितसम्पादनाय दिल्यां प्रचलन्ति । अस्माभिः पूर्वमपि बहुबारमत्र नीतिनैपुण्य प्रयोगाय प्रार्थितं पुनरपि च प्रार्थ्यते यद्दिल्याः प्रशासने केन्द्रप्रशासने च ये प्रभावशालिजनाः सन्ति ते संस्कृतसम्पर्केण योज्याः । तेषां सहयोगश्च संस्कृतरक्षायै ग्राह्यः । यतोहि संस्कृतसमाजे स्वल्पाः सहयोगकर्तारः- अधिकाश्च समस्योत्पादकाः समालोचका वा सन्ति । अस्माभिः गतचत्वारिंशत् वर्षेभ्यः समस्तजीवनं संस्कृतायार्पित परन्तु कश्चिदपि संस्कृतज्ञस्तन्मूल्यं न गणयति । सर्वे स्वार्थलिप्सवः तत्रैव लीनाः । अतः — वैय्यक्तिकप्रभावेन यापि संस्कृतसेवा दिल्लीस्थसंस्कृतज्ञैः कर्तुं शक्यते सा कार्या । अनया देशस्य कल्याणं भविष्यति । —

नववर्षारम्भः

अनेनाङ्केन साकं भवतामस्य मासिकस्य ३४ तमो वर्षः प्रारभते । भवतां सर्वेषां लेखकपाठकहितचिन्तकानां - अभिनन्दनं करोमि कालेऽस्मिन् । अनेन सहैव पूर्ववत् सहयोगदानाय प्रार्थये । यतोहि समस्तदेशे कर्गज - मसि - मूल्यानि दशगुणितवृद्धिमापुः । मुद्रणन्तु महार्घमस्ति - एव । अस्यां परिस्थितौ संस्कृतपत्रचालनं केवलं भवदायत्तमेवेति शम् ।

— केशव शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R.N. 6384/57 Registered No. 10

त्वर्यताम् त्वर्यताम् त्वर्यताम्

★★★ ★★★ ★★★

जातक फलादेशस्य दुर्लभो ग्रन्थः

फलादेश कल्पतरुः

राष्ट्रपतिसम्मानितप्रख्यातविद्वान्सेवानिवृत्तप्राचार्य श्रीमदाचार्य-दिवाकरदत्तशर्मप्रणीतो हिन्दी-आङ्ग्लटीका सहितः चिरप्रतीक्षितः फलादेशकल्पतरुः प्रकाशितोऽभूत् ।

अस्मिन् ग्रन्थे द्वादशभावफलम्, दशाफलम्, आधुनिकाः शुभाशुभयोगाः, नारीणां जातकफलम्, सन्तानप्राप्तिबाधानिवारण-प्रयोगाः, अनिष्टदशाफलशमनोपचाराश्च निर्दिष्टाः ।

सोऽयं ग्रन्थः श्रीमदाचार्यपादानां चत्वारिंशद्वर्षाणां ज्योतिष-शास्त्रसेवाया अनुसन्धानपूर्णानुभवस्य च दुर्लभा कृति विद्यते ।

स्वनामधन्यानां श्रीमार्तण्डपञ्चाङ्गप्रवर्तकानां विश्वविख्यात ज्योतिर्विदां श्रीमदाचार्यमुकुन्दवल्लभ मिश्र ज्योतिषाचार्य महा-भागानां प्राक्कथनेन च समलङ्कृतः ।

महर्घताबशात्स्वल्पा एव प्रतयो मुद्रिताः । मूल्यमपि केवलं कर्गलमुद्रणादिव्ययपूरकं डाकव्ययसहितं सप्तति (७०) रूप्यकाणि निर्धारितम् । फलादेश कल्पतरोः भारते विदेशेषु च, दैवज्ञैरपूर्वं स्वागतं कृतम् स्वल्पाः प्रतयः अवशिष्टाः सन्ति । द्वितीय संस्करणप्रकाशने विलम्बो भविष्यति । मूल्यं निम्नसंकेते धनादेशद्वारा प्रेष्यताम् ।

सचिव, संस्कृत शोध संस्थान, भारती विहार
मशोबरा शिमला-७
171007 (हि. प्रदेश)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

संस्कृतस्य सचित्रमासिकम्

यदि कश्चित् मां पृच्छेत् यदस्मा
बहुमूल्यतमं रिक्थं किमस्ति
तदाऽहं सगर्वं कथयामि यत
संस्कृतभाषा, यस्या माध्यमे
समस्तसंसारेऽस्माभिः एव बिश्व
गुरुत्वं स्थापितम् ।

(Discovery of India
— श्री जवाहरलाल नेहरूः

शिमला, नवम्बर १९८९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमः

क.	विषय	लेखक	पृष्ठ
१.	संस्कृत कोशवाङ्मयम् (क्रमश)	प्रो. केशव शर्मा, सम्पादकः	१
२.	नमस्तुभ्यं शम्भो	ओम प्रकाश राही	२१
३.	अम्बिका स्तोत्रम्	लोक नाथ मिश्रः	२३
४.	हसन्तुतराम्	डा० जीत सिंह खोखर	२८
५	समाचाराः	सम्पादकः	२६
६	साहित्य सरिता		३०
७	सम्पादकीयम्	प्रधान सम्पादक	३१

दिव्यज्योतिः

हि० क० सं०भा० अकादमी प्रदत्तानुदानसाहाय्यम् । पत्रिकागतमुद्रणदोषाणां सम्पादकीयनीति-विषये च अकादमीदायित्वं नास्ति ।

हिमाचल प्रदेश—पंजाब-हरियाणा-जम्मूकश्मीर - मध्य प्रदेश—राजस्थान—महाराष्ट्र उत्तरप्रदेश शासन-स्वीकृतं केन्द्रशासनपुरस्कृतं सचित्रं संस्कृतमासिकम् ।

पत्रस्य उद्देश्यानि तथा नियमाः

सरल—सरस-सुबोध-साधनैः सर्वस्मिन् संसारे संस्कृतस्य प्रसारः, साहित्यान्तर्गतानां सकलकलानां समन्वेषणं, संसारस्य हितसम्पादनम्, एवं लौकिक - अलौकिकस्वातन्त्र्यस्य प्राप्तिः ।

"दिव्यज्योतिः" प्रतिमासं पञ्चदशतारिकायाम् (आङ्ग्लमानेन) प्रकाशितं भवति

पत्रस्य वार्षिक मूल्य ३० रु० अर्धवार्षिकं १५ रु० एकस्याङ्कस्य च रु० २-५० भवति ।

वर्षारम्भः अक्तूबर—मासतः भवति ग्राहकः कस्मादपि मासाद् भवितुं शक्नोति ।

ग्राहकैः, "सम्पादक, दिव्यज्योतिः, भारती विहार, मशोवरा, शिमला-१७१००७ हि० प्र०" इति संकेते धनादेशेन वा. शु. प्रेषणीयम् ।

परिचयः

संस्थापकाः तथा आद्यसम्पादकाः आचार्यश्रीदिवाकरदत्त शर्माणः, — दूरभाषः 78459

प्रधानसम्पादकः— आचार्य केशव शर्मा एम. ए., एम, फिल, साहित्यरत्नम् „ 8 200

सम्पादकः- श्रीमती सूनृता गौतम एम. ए (संस्कृत हिन्दी)

दिव्यज्योतिः कार्यालयः भारती विहारः, मशोबरा, शिमला-७ (हि. प्र.)

मुद्रकः प्रकाशकः—

भारतीमुद्रणालय भारती विहार, मशोबरा-१७१००७ शिमला (हि. प्र,)

स्वामी - श्रीमती आचार्य रत्नकुमारी शर्मा

नवम्बर. १९८९ मार्गशीर्षः २०४६ — वर्षम्—३४ अङ्कः २

वार्षिक मूल्यम् ३० रु०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतकोशवाङ्मये

फलभेदे ४ व्याघ्रदन्ते ५ शिला ६ भेदे स्थलान्तरे ७ ॥
खड्गपात्रे ८ सुराभाण्डे ९ भृङ्गवक्रे घनोपले १० ।

पुष्पिका इति वेदान्ताचार्यविरचितो दशदीपनिघण्टुः समाप्तः ।

कोशकारविषये नान्यत्किमपि विज्ञायते अस्यापि शब्दार्थप्रदानपद्धति नूनमेव मोदकरा यथा षडर्थनिर्णये त एव शब्दाः सङ्गृहीताः येषां षडर्था भवन्ति तद्वत् कोशेऽस्मिन् एवं विधाः शब्दाः सन्ति येषां दश अर्था भवन्ति ।

देश्य निघण्टुः

अस्य कोशस्य निर्माता राजचन्द्रो वर्तते । कीदृशोऽयं देश्यनिघण्टुरिति स्वयमेव रचयिताऽस्य निम्नपद्येन स्पष्टयति । यथा –

"देश्यान् शब्दान् समाहृत्य प्रयोगांश्च विशेषतः ।
क्रियते राजचन्द्रेण नित्यं देश्यनिदर्शनम् ॥

शब्दा यथा

दुने दारौ वजीरश्च भूपे स्यात् क्षत्रियेऽपि च :
राहुत्तशूरसामान्ये हंवीर इति कथ्यते ॥
छलिका चपला प्रोक्ता रगड़ा संगति कथा ।
तरला मालिका भेदे रत्नभेदेऽपि कथ्यते ॥

पुष्पिका–

"इतिराजचन्द्रविरचितदेश्यनिदर्शननिघण्टुः समाप्तः ।"

अस्या कालादिविषये लेखकस्य विषये वा न किमपि वैशिष्ट्येन विज्ञायते । कोशेऽस्मिन् देशीयशब्दानां पर्यायाः संस्कृतेऽनुष्टुप् छन्दसि प्रदत्ताः सन्ति ।

नाम सङ्ग्रह निघण्टुः

भार्गवाचार्यप्रणीतोऽयं कोशः ।

मङ्गलाचरणम्ः

वन्देऽहं कुन्दमन्दारसन्दोहं ललिताकृतिम् ।
शंकरं भार्गवाराम माधवं माधवान्वयम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोशकारः

पदानि कानि संगृह्य सर्वशास्त्रप्रयोगतः ।
भार्गवाचार्यवर्येण क्रियते नामसङ्ग्रहः ।।

शब्दनियोजनम्

ब्रह्मा सुरेशः सर्वेशः स्वयम्भूश्चतुराननः ।
कलावती पुरीनाथः सुरज्येष्ठः पितामहः ।
नारायणः पद्मनाभः श्रीपतिश्च श्रियः पतिः ।
रुद्रः पशुपतिः शर्वः कङ्कटीक उमापतिः ।
भेरुण्ड गण्ड भेरुण्डौ द्विमुखो गजवक्त्रकः ।
महा पक्षः खड्गदंष्ट्रः सुपर्णो हिमसम्भव ।

पुष्पिका इति भार्गवाचार्यकृतो नामसङ्ग्रहनिघण्टुः समाप्तः ।
भार्गवाचार्यस्य विषयेऽधिकं न स्पष्टं किमपि ज्ञायते ।

नैघण्टुकाध्यायः

लेखको वाल्हिकेय मिश्र ।

मङ्गलाचरणम्:

सर्वशब्दमयीं वाणीं भारतीं परमेश्वरीम् ।
हृदि ध्यात्वा वाल्हिकेयमिश्रेण क्रियते कृतिः ।।

कीदृशीयं कृतिस्तदाह

अथ केषाञ्चिदर्थानां व्यवहारोपयोगिनाम् ।
अभिधानानि कतिचित् संगृह्यन्ते यथा श्रुतम् ।

शब्दसंग्रहः

वसुन्धरा वसुमती रत्नगर्भामधूद्भवा ।
सर्वं सहा विश्ववहा मा मही पर्वतस्तनी ।
हिन्दोलश्चापि सारङ्गो मसलः कुसुमातिथिः ।
रुतिपक्षो हरिद्रास्यो द्विरूपोमधुमत्तकः ।

पुष्पिका –

"इति वाल्हिकेय विरचितो नैघण्टुकाध्यायः । पूर्वोत्तर भागौ समाप्तौ ।"
एवं प्रतीयते यदस्मिन् कोशे भागद्वयमस्ति । पूर्वभागः-उत्तरभागश्च ।
शब्दसंग्रहश्च पथक् २ लिङ्गप्रकरणाधारमाश्रित्य कृतः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नृत्यरत्नकोशः

महाराजः कुम्भकर्णः संगीतराजनामकं विशालमेकं ग्रन्थं विरचयाम्बभूव । तस्यैवैकभागोऽयं नृत्यरत्नकोशोऽस्ति कोशेऽस्मिन् नृत्यविषयकप्रमेयाणां निर्देशोऽस्ति । संगीतराजस्यांशरूपेणास्य विशालकायग्रन्थस्यैको विशिष्टभागो हिन्दूविश्वविद्यालयकाशीतः प्रकाशितोऽभूत् । नृत्यरत्नकोशस्य सम्पादनं रसिकलाल पारीख – प्रियबालाशाहादिभिः कृतम् । राजस्थानपुरातनग्रन्थमालायाञ्चास्य प्रकाशनं जातम् १ । अस्यापि कालोऽनिर्णीतः ।

पदमञ्जरी

कविभल्लट विरचिता ।

स्वपरिचयं प्रयच्छन् कोशकारो लिखति —

लक्ष्मीबुद्धनृपालेन यं प्राप्ताकविभल्लटम् ।
तेन काव्यदृशा प्रोक्ता सपाशा पदमञ्जरी ।

शब्दनियोजनम्ः

शुकः शुकं वकः च स्यात् बकं रकमितीरितम् ।
त्रिकं त्रिकस्त्रिकाः प्रोक्ता शकश्चाप्यकमित्यपि ।।
पिकः पिकी शुकीति स्यात् कृको वृक इतीरितः ।
लोकः पाक श्लोकनाकौ रेकः कोकश्च शोकवत् ।।
दक्षो रुक्षस्तथाप्यक्षं कुक्षिः पक्षी च वृक्षवत् ।
ऋक्षं रक्षस्तथाद्राक्षो ध्वाङ्क्षं ध्वाङ्क्षश्च कथ्यते ।।

पुष्पिका इति भल्लटविरचिता पदमञ्जरी समाप्ता । अयं कश्मीरदेशीयः कोशकारोऽस्ति ।

प्रयुक्तपदमञ्जरी

ईश्वरकृष्णकालिदासनिर्मिता ।

मङ्गलाचरणं प्रयोजनञ्चः

नमस्कृत्य कलां वाणीं कालिकां श्यामलां तथा ।
क्रियते कवि-संग्राह्या प्रयुक्तपदमञ्जरी ।।

१ संस्कृत शास्त्रों का इतिहास, बलदेव उपाध्यायः पृ ३६१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दनियोजनम् ।

ऊर्ध्वलोकः स्वयं लोकः सैलिको भोगभूमिकाः ।
अमर्त्यभवनं स्वर्गः सुरकोकस्त्रिविष्टपम् ।।

स्यादुत्पलं कुवलयं कुवालं कुवलं तथा ।
कूमुद्वती कुमुदिनी तथा कैरविणी स्मृता ।
नन्दिन्यां पद्मिनी प्रोक्ता कुडाकिन्यब्जिनी तथा ।
नालिकं नलिनं पद्मं श्रीवर्णं भोगवर्णकम् ।।

पुष्पिका: इति श्री ईश्वर कृष्णकालिदासस्य कृतौ
प्रयुक्तमञ्जर्यां द्वादशः परिच्छेदः ।
इति प्रगदिता मया निहितधीर शङ्कामया ।
कवीन्द्र बहु लालिता कलितबुद्धिभिः पालिता ।।
प्रयुक्त पदमञ्जरी बुधमरन्दभृगजञ्जरी (१)

द्वादशपरिच्छेदात्मिका - इयं प्रयुक्तपदमञ्जरी । पूर्वं विदुषामेव विचार आसीदयं सांख्यकारिका प्रणेता ईश्वर कृष्णो वर्तते परन्तु-साम्प्रतं विलुप्तोऽयं विचारः । ईश्वरकृष्णस्यास्य कालोऽविज्ञातः ।

बाल प्रबोधिका

नक्कीरकविप्रणीता ।

मङ्गलाचरणम्ः

ज्ञानप्रसूनकलिकाम् – नमस्कृत्य महेश्वरीम् ।
बालप्रबोधिका नाम क्रियते शब्दशासनम् ।

शब्दनियोजनम्ः

पक्षी पतत्रिपतगौ विहङ्गो र्विविहङ्गमः ।
पिल्लाकः पक्षिपोते स्यात् हंसो धूमललोचनः ।
मराल श्शुक्लपक्षश्च मानसौकास्सितच्छदः ।
परिप्लावी चक्रदेहस्सूचिको जालपादकः ।

(चतुर्दशोपदेशतः)

प्रतीहारी तु राजावं सम्भावयति नापदा ।
आशीन्यन्तः पुरप्रेष्या नाप्तभोगकुमारिका ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुष्पिका: इति नक्कीर कविविरचितायां बालप्रबोधिकायां पञ्चदशतमोपदेशः।
निघण्टुश्च समाप्तः।

अस्य कोशस्य शब्दावलिर्विकसिता सुव्यवस्थितोपदेशविभक्ता च। नक्कीरविषये कालादिकनिर्णयो नास्ति जातस्तथापि तमिलभाषायाः नक्कीरनाम्नो लेखकस्य कवेर्वा कृतिरेषा - इति विदुषां विचारः। अयं नक्कीरब्राह्मण आसीत्।

भुवनप्रदीपिका

सार्वभौममिश्रविनिर्मिता।

प्रयोजनम्:

भवनं सत्कवीन्द्राणां भुवनं पदसाधनम्।
तद्दर्शनाय क्रियते दीपवन्नामशासनम्॥

शब्दनियोजनम्:

अजो रुद्रे पशुपतौ विष्णौ धातरि नारदे।
मेषे लोकान्तरे धाम्नि दन्तेऽपि च निगद्यते॥

अयो मणिस्त्वयस्कान्ते शणसूत्रमणावपि।
घनसारस्तु कर्पूरे जले मृगमदेऽपि च।

पुष्पिका: इति श्री सार्वभौममिश्रेण विरचिता भुवनप्रदीपिका समाप्ता।

शब्द प्रदीपिका

कविवर कुम्भीनसनाथ कृता। यथाह स्वयं निर्माता—

'भ्रान्त्यापशब्दतिमिरे राजमार्गमजानताम्'
शब्दप्रदीपिकां दत्ते कविकुम्भीनसाधिपः॥

अयं स्वकोशविषये एवमाह—

"प्रायः सन्दर्भयोग्यानि पदान्याहृत्य कोशतः।
यतस्ततः समालोक्य क्रियते शब्ददीपिका॥

विस्मृतश्लोकसन्दर्भे व्याज्जाच्चेल्लिंगनिर्णयः।
ऊह्यतां कस्य वा न स्यात्ब्यासङ्गेन तु विस्मृतिः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नानार्थास्तत्र चिन्त्यन्तां शब्दलिङ्गार्थरूपतः ।
प्रायो विशेष्यनिघ्नानां भेदः सम्प्रतिपद्यताम् ॥
स्वस्तिकः सर्वभेदे च बाहुबन्धे च वक्षसि ।

सम्यक:— स्याद्दृषो खड्गे स्थासको बुद्बुदेऽपि च ।
सर्वलोकप्रमोदाय निर्मिता शब्ददीपिका ।
तत्र पश्यन्ति रूपाणि त एव प्रौढवीक्षणाः ॥

पुष्पिका—इति श्रीविष्णुसञ्ज्ञान्वयायप्रसिद्धेन सत्यसन्धेन कविकुम्भीनस प्रणीता शब्दप्रदीपिका प्रकाशते । निघण्टुः समाप्तः ।

कोशेऽस्मिन् नानार्थकशब्दा लिङ्गनिरूपणपूर्वकं प्रारम्भिकान्तिमवर्णानुक्रमेण सङ्ग्रहीता एवं किल प्रतीयते अयमपि लघुकोश एवा ऽथवा खण्डमात्रमेवास्योपलब्धम् ।

कोशकारस्य कोशस्य वा कालादिकमनिर्णीतम् ।

नानार्थपदसङ्ग्रहनिघण्टुः

अविज्ञात लेखककोशोऽयमपि । अस्य पाण्डुलिपिरपूर्णा-एव प्राप्यते [1]

अस्याः केचन श्लोकाः—
यमेव वप्तो वर्त्मनि शोभायां सितवः प्रकीर्तितः ।
करवारिणि प्रभाणि स्यान्मस्तके ब्रह्मणे स्मृतम् ॥
कुः स्त्री भूमौ गर्हिते स्यात् - अर्के स्याच्चण्डतेजने
आखण्डले च स्फटिके ज्येष्ठे भ्रातरि तावुके ।

अन्तिमश्लोकौ पाण्डुलिप्याः—
तन्तुवायेऽपि सिद्धान्ते यन्त्रं बन्धनलेखयोः ।
तत्र गलति का रज्जु वेदांशे ग्रन्थि वापि च ।
अङ्घ्रिस्याद्बुध्नके पादे व्याघ्रः श्रेष्ठे मृगादने ।
व्याघ्रशार्दूल दोषा स्यात् श्रेष्ठस्त्री कण्ठकारिका ।

अत्रापि क का किकी-आदि वर्णानामर्थप्रकाशनं परिज्ञायते कोशेऽस्मिन् ।

---

१ स. म. पु. तञ्जावर ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नानार्थसङ्ग्रहः

लेखकोऽस्यापरिज्ञातः अस्यारम्भः श्लोकेषु न भवति परन्तु शब्दसंग्रहण-प्रणालिरस्य भिन्ना । तद्यथाः—

अर्थइति—

विषये मोक्षे, शब्दवाच्ये, प्रयोजने, व्यवहारे घने, शास्त्रे, वस्तुनि हेतौ, निवृत्तौ च वर्तते ।

अर्क इति । अर्कपर्णे स्फटिके, सूर्ये, ज्येष्ठ भ्रातरि च ।

अविरिति । पर्वते, मोक्षे सूर्ये च ।

प्रघण इति लोहे मुद्गरे च ।

प्रियङ्कु इति । कृकलासे वृक्षभेदे च ।

पेचक इति ।

गजस्य पुच्छे गजपुच्छमूले च ।

नानाविधनिघण्टुवचनम्

अपूर्णस्याविज्ञातलेखकस्य कृतेः पाण्डुलिपिर्लभ्यते १ ।

कोशेऽस्मिन् अमरात् वैजयन्ती कोशादथचान्येभ्योऽपि कोशेभ्यः शब्द-समाहरणं कृत्वा विषयानुसारं सङ्कलनमकारि लेखकेन । परन्तु संग्राहकस्य परिचयो नावाप्यते ।

निघण्टुसंग्रहः

अस्य पाण्डुलिपि तञ्जावरमहल पुस्तकालयेऽवाप्यते । कोऽस्य लेखकस्त-दविज्ञातमस्ति । पाण्डुलिपिरियमपूर्णा । ततः केचिदंशाः :—

रक्षः—कैकयसेया . वायुः, हरिः, महाबलः, झञ्झावातः सवृष्टिवात्या, वासना सुगन्धिका, धनी, द्युम्नं, द्रविणम् । रा. स्वर्णं स्व - वसु, विभवः । निक्षेपः उपनिः शेवधिनिधिः ।

---

१ स. म पु. तञ्जावरम ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाप्तौ चायं श्लोकः—

पर्यङ्कः शयनं शय्या तल्पं च तलिमं स्मृतम् ।
अपटीकाणापटी स्यात् प्रतिसीरा यवनिका तिरस्करणी ।

शब्दसारनिघण्टुः

लेखकोऽविज्ञातः । अस्यारम्भश्लोकः

'स्वर्गे सुखञ्च वेगः स्यात् सिता तु सुरदीर्घिका ।
अर्कः सुरेश्वरश्चापि सुधायां कञ्जमित्यपि ।

पाण्डुलिप्या १ आरम्भिकश्लोकोपरान्तमत्रास्य समाप्तौ यः श्लोको वर्तते स एवं भवति : -

उदकञ्चाप्युत्पले स्यात्
कुमुद्वत्यनुमोदिनी ।
नालिका नालमित्युक्तं
पद्मं पद्मे तु तूणिका ।

पुष्पिका—इति शब्दसारनिघण्टुः समाप्तः ।

सर्वसङ्ग्रहनिघण्टुः

अस्यापि लेखकोऽविज्ञातः । अस्य पाण्डुलिपिर्लभ्यते २ ।
शब्दसंग्रहः

कक्ष्या बृहतिकायां स्यात्
कान्त्या मध्येभबन्धने ।
हर्म्यादीनां प्रकोष्ठं च
कार्यहेतौ प्रयोजने ।

अनेन कोशकारेणान्यकोशेभ्यः शब्दसङ्कलनं कृत्वा कोशोऽयं विनिर्मितः ।

---

१ त. स. म. पु. जेञ्जोर ।
२ स. म. पु. तेञ्जावरम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निष्कर्षः

लौकिककोशाः विभिन्नदृष्ट्या वैदिककोशेभ्यो भिन्नाः । वैदिककोशेषु यत्र शब्दसंग्रहः शुष्कस्तत्र लौकिककोशेषु शब्दसङ्कलनमतीव सरसं पद्यमयं विविधवैचित्र्यपूर्णञ्च । कोषनिर्मातार एते वैयाकरणाः शाब्दिकाः कवयश्च बभूवुः ।

अमरात् प्राक्कालीनकोषकाराणां कोशेषु केचित् कोशाः नामसंग्रहात्मका आसन् इतरे च लिङ्गानुशासनात्मकाः । अमरकोशे नाम्नां लिङ्गानाञ्चानुशासनमुभयमेवाभूत् । अत एवास्य नाम नामलिङ्गानुशासनमित्यपि वर्तते । संस्कृते लिङ्गनिर्धारणमति कठिनं भवति । अत एव कोशकारैर्लिङ्गानुशासनव्यवस्थाऽकारि । लिङ्गनिर्धारणपद्धतिश्च कोशकाराणां रुचिरा । ना, पुंसि, स्त्री, अस्त्री, नपुं- इत्यादिशब्दानां सङ्केतामाम्वा प्रयोगो लिङ्गनिर्देशनाय क्रियते । अर्थप्रदर्शनाय सप्तमी प्रयोगोऽपि कोशकारप्रियः ।

समानार्थकाः नानार्थकाश्चापि कोशाः सन्ति । उभयविधा अपि । इत्थमियं संस्कृतलौकिक-कोश-निर्माण - पद्धतिः नानारूपाणि धारयति । एकाक्षरकोश णालिरपि चारुतमाऽऽश्चर्यकरी च । अक्षराणां वर्णानाञ्च सर्वेषामप्यर्थाः सन्ति इति कोशैरवगम्यते । विश्वभाषासु यद्यप्येकाक्षरार्थप्रदर्शकाः कोशाः सन्ति परं संस्कृतकोशकारैरेकाक्षरार्थप्रदाने विजिता विश्वकोशकारा नात्र संशयः ।

कान्त - खान्त - गा तादिपद्धतिरपि संस्कृतकोशकृद्भिरेवोद्भाविता । इयं च एकाक्षरखान्ताः, द्वयक्षरखान्ताः त्र्यक्षर - चतुराक्षर - पञ्चाक्षर - षडक्षर - सप्ताक्षरगान्ताः अनेन प्रकारेण षडक्षरं यावत् क्वचिच्च सप्ताक्षरदशाक्षरपर्यन्तमपि विस्तृता भवति ।

एवमेव देशीकोशनिर्माणपद्धतिरपि स्वीयं पृथग्वैशिष्ठ्यमावहति । ये लोकप्रिया - देशीभाषाशब्दा आसन् तेषामपि कोशनिर्माणं संस्कृतकोशकाराणां संस्कृतस्य सर्वोपयोगित्वनिर्माणाय तद्रक्षार्थं च परां निष्ठां व्यनक्ति ।

अक्षरवर्णक्रमानुसारिसंस्कृतकोशानां निर्माणमपि द्वादशतमखीष्टीयशतकात् प्रभृति वर्तमानकालं यावत् - उत्तरोत्तरं चरमोत्कर्षमवाप्नोत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संसारस्यान्यभाषाकोशेषु संस्कृतकोशपद्धत्यवलोकनं दुष्करम् केवलं तत्राक्षरवर्णानुक्रम एवावलोक्यते । परन्तु संस्कृते इदमक्षरवर्णानुक्रममपि काव्यमयमिति केषां वा सुधियामाश्चर्याय न स्यात् ।

विशालतमा विश्वकोशा अपि संस्कृतेऽद्य विराजन्ते वाङ्मयार्णवसदृशाः । अस्मिन् एव ख्रीष्टाब्दीयशतकस्य वर्तमानवर्षे संस्कृतशब्दानामैतिहासिककोशप्रकाशनमपि जातमित्येतत्सर्वमध्ययनेनानेन परिज्ञायते । अध्ययनेऽस्मिन् - एकस्य कोशस्य विभिन्ननामसंकलनमेकत्रैव कृतं येन नामभ्रान्तिर्न भवेत् ।

इति आचार्य श्री केशवशर्मणा निर्मितस्य संस्कृतकोशवाङ्मयस्य विशेषपरिचयाख्ये द्वितीयभागे लौकिककोशसम्बन्धश्चतुर्थः काण्डः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानं विज्ञानञ्च विभिन्नशास्त्रेषु विस्तरेण विकीर्णं व्याख्यातञ्च वर्तते । एभिः शास्त्रैः सह सम्बद्धाः कोशाः शास्त्रकोशसञ्ज्ञां भजन्ते । एवं विधानामेव कोशानामत्र परिचयोपन्यासः क्रियते ।

येषां कालादिविषयकं किमपि ज्ञानमुपलभ्यते ते कोशाः कालक्रमेण सन्निहिताः—इतरे वर्णाक्षरानुक्रमेण च ।

मातृका निघण्टुः

नन्दनभट्टेन कृतः ।

मङ्गलाचरणम्:

ओंकारं वर्तुलस्तारं वामश्च हंसकारणम् ।
मन्त्राद्य प्रणवः सद्यं बिन्दुशक्तिस्त्रिदैवतम् ।

शब्दनियोजनम्

नेत्रयुग्मं तथा वौषट् शक्रदैवतमेव च ।

इति वौषट्

शस्त्रास्त्रौ फट् छोटिका स्यात्
अङ्गान्तोऽसुरवाचकः ।

इति फट्

पुष्पिका: इति नन्दभट्टविरचितं मातृकाभिधानं सम्पूर्णम् ।

कोशोऽयं मन्त्रशास्त्रसम्बद्धो वर्तते । अतोऽस्य विशिष्टं महत्वम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धन्वन्तरि निघण्टुः १

आयुर्वेदशास्त्रस्य कोशेषु धन्वन्तरि विनिर्मितोऽयं धन्वन्तरिनिघण्टुः प्राचीनतमः कथ्यते अन्येषामायुर्वेदनिघण्टूनां प्रणयनमेनमाधारी कृत्यैव जातम्। निघण्टुरयं नवसु खण्डेषु विभक्तो विद्यते।

"अमरः स्व वनौषधिवर्गसंकलने धन्वन्तरिनिघण्टुसाहाय्यमग्रहीत्।" 'बालपत्रोयत्रासः खदिरश्चेति द्वयर्थेषु धन्वन्तरिपाठमदृष्ट्वैव बालपुत्र भ्रान्त्या ग्रन्थकृद्बालतनयमाह, बालतनयो खदिरोद तथावन"२ इति क्षीरस्वामिनां मतम्। अस्य टीकाकारस्याभिमतेऽमरस्य पाठोऽशुद्धोऽस्ति।

अनेन स्पष्टं यद्धन्वन्तरिनिघण्टुः—अमरात् प्राक्कालीनः। अस्मिन् औषधादीनां नामपरिचयात्मकञ्च विवरणं विद्यते।

पर्य्यायमुक्तावली

मुक्तावली

आयुर्वेदनिघण्टुषु पर्य्यायमुक्तावली नामककोशस्यापरं नाम मुक्तावली अपि वर्तते। एषोऽपि वैद्येषु विशेषतः बंगप्रदेशे प्रख्यातः। अस्य कोशस्याधारः माधवकरस्य रत्नमालैव।

अस्य निर्माता श्रीहरिचरणसेनो वर्तते। सेनशब्दस्य बहुप्रयोगादयं बंगप्रदेशीयः। सर्वतः प्राचीना पाण्डुलिपिरपि चास्य वंगलिप्यामेव प्राप्ताऽभूत्। तृतीयञ्चेदमपि कारणमत्र विद्यते यदयं कोशो प्रान्ते प्रसिद्धः। माधवकरस्य पर्यायरत्नमालां क्रमविहीनामालोक्य तद्दूरीकरणप्रयासेऽयं कोशमिमं प्रणिनाय यथास्यान्तिम-पद्येन परिज्ञायते,

"निगूढार्थां बहूवीममररचितां माधवकर -
प्रणीतां पर्यायावलिमपि विहीनक्रमवतीम् ॥

---

१ राजनिघण्टुसाकं-आनन्दाश्रमसंस्कृत सीरिज पूनातः प्रकाशितम् १८९६ खी।
२ अमरः २-४-४९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परं खिन्नं दृष्ट्वा सुमननधियां मूढभिषजाम् ।
निबध्नाति स्मेमां हरिचरणसेनो विमलधीः ॥

कोशोऽयं त्रयोविंशतिवर्गात्मकः विशिष्टौषधनामोल्लेखो वंगभाषयामपि विद्यते । अस्य कालो नवमदशमशतकयोर्मध्ये खीष्टाब्दानां भवति ।

निघण्टुशेषः

अभिधानचिन्तामणि–अनेकार्थसंग्रहादि - लौकिककोशनिर्मातुर्हेमचन्द्रस्यैवैषा कृति निघण्टुशेष इति । अस्य कालः १०८८ ११७५ खीष्टाब्दाः ।

कोशोऽयमायुर्वेदशास्त्रस्य षट्सु च काण्डेषु विभक्तो वर्तते । अयं ३९६ पद्येषूपनिबद्ध एकः परिशिष्टग्रन्थोऽस्ति । अस्मिन् वृक्ष - गुल्म-लताशाक-तृण - धान्यनामककाण्डेषु शब्दविभाजनं कृतमस्ति । अनेन वनस्पतिवर्गपरिचये विशिष्टसहयोगोऽवाप्यते ।

सिद्धमन्त्रः

अयमायुर्वेदकोशो भवति । अस्य रचयिता केशवः । अस्य टीका केशवस्य पुत्रेण कृता । अस्य टीकाकर्तुर्नाम गोपदेव आसीत् । अयमपि संस्कृतस्य प्रकाण्डो विद्वान् ।

अस्य गोपदेवस्य कालः खीष्टाब्दानां १२७०-१३०९ पर्यन्तं भवति । अतोऽस्यायुर्वेदकोशस्य कालस्त्रयोदशशतको भवेदिति प्रतीयते ।

राजनिघण्टुः

अस्य निर्माता नरहरिः अयं सर्वेषु आयुर्वेदनिघण्टुषु विशालः । नरहरिः कश्मीरवास्तव्य आसीत् । ग्रन्थारम्भे स्वाधारग्रन्थेषु मदनपारिजातस्यापि समुल्लेखोऽस्ति । अनेनास्य ग्रन्थकर्तुः कालः १३७४ खीष्टाब्दोत्तरमेव सिद्ध्यति । अस्यैव नाम - अभिधानचूडामणिरप्यस्ति । विषयदृशा परिपूर्णः प्रामाणिकश्चायमायुर्वेदकोशः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मदनपालनिघण्टु:

कोशोऽयमायुर्वेदशास्त्रसम्बद्धः। अस्य निर्माता नृपो मदनपालः वर्तते। अस्य कोशस्य तृतीयावृत्तिः १९८६ सम्वत्सरे तदनुसारञ्च १९३० ईशवीयाब्दे प्रकाशिताभूत्। प्रकाशकश्चास्य गंगाविष्णुश्रीकृष्णदास, लक्ष्मीवेङ्कटेश्वर-वाष्पमुद्रणालय (Steam Press) स्वामी, मुम्बापुरीस्थः।

कोशोऽयं भाषाटीकासहितः अस्य भाषाभाष्यकारः वैद्यरत्नायुर्वेदोद्धारकवैद्यपञ्चाननपण्डितरामप्रसादवैद्योपाध्यायो राजवैद्यः पट्टालय-(Patiala) स्थ। अस्य हिन्दीभाष्यस्य नाम "भाषातत्वप्रकाशिनी"—इति वर्तते।

अस्य निर्माता दिल्ली स्थानस्योत्तरे काष्ठानामकनगर्यां राज्यमकरोत्। अस्य शुभं नाम मदनपालोऽभूत्। अयं पण्डितानामाश्रयदाता वासीदेव परं स्वयमपि आयुर्वेदस्य प्रकाण्डपण्डितः आसीत्। अस्य सम्मानमभिनवभोजः पण्डितपारिजातः एभि सम्मानोपाधिभिर्विहितम्। अस्यैव निघण्टोः द्वितीयं नाम "मदन विनोद" इत्यप्यस्ति। १ अस्य रचना १३७४ ईशव्यामभूत्। अस्मिन् २२५० श्लोकाः सन्ति। अयं चतुर्दशवर्गेषु विभक्तोऽस्ति। विषयस्य व्यापकतया कोशोऽयं वैद्येषु नितान्तं प्रसिद्धः। औषधीनां नामगुणवर्णने महाराष्ट्रियभाषायामप्यनेके, शब्दाः मिलन्ति - अनेनेदमपि प्रतीयते यदस्य कोशस्य निर्माता कश्चित् महाराष्ट्रियो विद्वान् भवेत्।१

ग्रन्थावलोकनेन ज्ञायते यदस्मिन् केवलं त्रयोदशवर्गाः सन्ति। ते च (१) अभयादिवर्गः (२) शुण्ठ्यादिवर्गः (३) कर्पूरादिवर्गः (४) सुवर्णादिवर्गः (५) वटादिवर्गः (६) फलादिवर्गः (७) शाकवर्गः (८) पानीयवर्गः (९) इक्षुकादिवर्गः (१०) धान्यगुणवर्गः (११) धान्यकृतान्नादिवर्गः (१२) मांसवर्गः (१३) मिश्रकवर्गः, अनेन प्रकारेण सन्ति १।

ग्रन्थकर्तुश्च परिचयोऽस्ति निम्नप्रकारेण यथा—

टीकान्वये महति भूमिभुजां विशुद्धे काष्ठेति नाम नगरं जयति प्रसिद्धम्।
यद्वेधसा विहितमादरतः स्वसृष्टे- रुत्कृष्टतातिशयपुञ्जदिदृक्षयैव।

---

१ संस्कृतशास्त्रों का इतिहास पृ. ३६३ बलदेव उपाध्यायः।

१ मदनपाल निघण्टु विषयानुक्रमणिका पृ. ९—२०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्र-श्रीरत्नपालः समजनि जनतानन्दवृन्दैककन्दः ।
कुन्देदुः स्वच्छकीर्तिः परमददलनोद्दानदीक्षकदक्षः ।
यस्याकर्ण्य प्रभूत प्रथितगुणगण कर्णसाफल्यभाजो ।
दैवं निन्दन्ति लोका नयनविफलताखेदमावेदयन्तः ।।

जननयनसुधांशुस्तस्य शुद्धस्तनूजो जगति भरणपालः क्षोणिपालो बभूव ।
सकल सकल वाञ्छा सिद्धिहेतोर्विधाता सुरतरुमपि चक्रे यत्करच्छद्मनैव ।।

हरिश्चन्द्रस्तस्मात् समजनि जनानन्दजननो ।
हरिश्चन्द्रो लोके परपुरुपरीतापदलनः ।
परं विश्वामित्रेष्वहितमयमाधत्त मतिमान् ।
विशिष्टो नैतस्मात् जगति महतोऽन्यः सुकृतिनः ।

तस्मादभूदद्भुतकृत्यमान्यः साधारणो भूमिपतिर्वदान्यः ।
दारिद्र्यमुन्मूल्य पुनः स्ववैरिष्वस्थापि कामं कृपयैव येन ।

कामो धर्ममहेशमान्य उदयो नास्तं प्रयातः क्वचित् ।
नो दाने विरतः सुहृत्तनुमनः सन्तापहृच्छूरता ।।
सच्चक्राति विचित्रमित्रसुखिता बुद्धिप्रदा चन्द्रता ।
चातुर्येण महेन्द्रता कविमना: किञ्चिन्न यस्याद्भुतम् ।।

अजनि सहजपालस्तस्य पूर्वस्तनूजः सकलगुणनिधानः शास्त्रधर्मैकवेत्ता ।
प्रथितपुरुषरत्नं यं समालोक्य लोको बहुविधिषु विधातुः कान्ततां मन्यते स ।
यो राज्ञां मुखतिलक कटारमल्ल, स्तेन श्रीमदननृपेण-निर्मितेऽत्र ।
ग्रन्थेऽस्मिन् मदनविनोदनाम्नि पूर्णो वर्गोऽयं गुणगणमिश्रमिश्रकोऽयम् ।

अस्य रचनाकालश्च १४३१ विक्रमाब्दो वर्तते । तच्चान्तिमश्लोकेन ज्ञायते यथा —

अब्दे ब्रह्मजगद्युगेन्दुगुणिते श्रीविक्रमार्क प्रभौ
माघे मासि महर्क्षपेन ललिते षष्ठ्यां सुधांशोर्दिने ।
दीनानां परितापशापशमनं ग्रन्थं निघण्टुं किल ।
श्रीदः श्रीमदनो व्यधत्त चतुरः सच्चक्रचूडामणिः ।१

---

१ मदनपालनिघण्टुः पृ. २९८ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्य हिन्दी व्याख्याकारश्च स्व. वै श्रीरामप्रसादोऽपि प्रसिद्ध आयुर्वेदज्ञो बभूव। स च टीकामिमां १९९६ वैक्रमाब्दे मार्गशीर्षसिते पक्षे पूरयामास। यथा—

रसर्तुनवचन्द्रेऽब्दे मार्गशीर्षसिते दले।
वैद्यरामप्रसादेन नृगीर्भिः समलंकृतः॥ १

अस्यैव टीकाकर्तुः- पुत्रोऽस्ति स्व श्री शिवशर्मा आयुर्वेदाचार्य यो हि न केवलं भारतवर्षं एवापितु विभिन्नेषु विदेशेषु आयुर्वेदस्य प्रचारं चकार अयं महानुभावो वहुबारं अ. भा आयुर्वेदसम्मेलनस्याध्यक्षतामलंचक्रे। अमेरिकादेशे तत्रत्य एलोपेथिविशेषज्ञानयं आयुर्वेदस्य महत्त्वप्रकाशनेन नितान्तं प्रभावयामास। पौर्वात्य पाश्चात्योभयविधचिकित्सा विज्ञानविद्वानयमाधुनिकभारते आयुर्वेदस्य पुनः प्रतिष्ठापक एव। लङ्कायामयं कतिचिद् वर्षाणि यावत्—आयुर्वेदपद्धतिपरामर्शदातृकार्यमप्यकरोत्।

भावप्रकाशः

अयमायुर्वेदस्य सुप्रसिद्धो ग्रन्थः। अस्य परिगणनमायुर्वेदस्य लघुत्रय्यां भवति अस्य प्रणेता भावमिश्रोऽस्ति स चायं श्री मिश्रलटकस्य पुत्रोऽभूत्। भावप्रकाशस्यैका प्राचीना प्रतिः लभ्यते सा चेयं १५५८ ईशवीयाब्दस्य विद्यते। अतोऽस्य संरचनाकालोऽपि तत्समीपवर्ती - एवास्ति। अस्मिन्-ग्रन्थे फिरंगरोगस्योपवर्णनात् सिद्ध्यति यदस्य निर्माणमनुमानतः पञ्चदशतमशतके जातमिति विदुषां मतम् १ अस्मिन् ग्रन्थे खण्डत्रयी वर्तते पूर्वमध्यउत्तरभेदैः।

अस्य विशालग्रन्थस्य प्रथमखण्डमेवास्माकं निघण्टुश्रेण्यामायाति। अत एव भावप्रकाशनिघण्टुरित्यप्ययं ग्रन्थः समुच्यते। अत्र चतुर्थप्रकरणं यावत्-आयुर्वेदोत्पत्त्यादिकमुपवर्णितम् ततश्च ऋतुचर्यादिकं तत्र लिखितम्। पञ्चमप्रकरणात् विभिन्न - औषध - गुणदोष - प्रयोगादि - वर्णनं प्रारभ्यते।

यथा — अथ यवान्या नामानि गुणाश्च
यवानिकोग्रगन्धा च ब्रह्मदर्भाऽजमोदिका।
सैवोक्ता दीप्यका दीप्या तथास्याद्यवसाह्वया॥

---

१ मदनपालनिघण्टु पृ. २८६
२ संस्कृत साहित्यकोश: पृ. ३४६ डा राजवंशसहाय हीरा।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यवानी पाचनी रुच्या तीक्ष्णोष्णा कटुका लघुः ।
दीपनी च तथा तिक्ता पित्तला शुक्रशूलहृत् ।।
वातश्लेष्मोदरानाह गुल्मप्लीहकृमिप्रणुत् ।

यवानिका, उग्रगन्धा, ब्रहनदर्भा, अजमोदिका, दीप्यका, दीप्या आदीनि संस्कृतनामानि ।

१ हिन्द्याम् अजवाइन; २ वंगभाषायाम् - यमानी, ३ महाराष्ट्र्याम् - ४ गुर्जर्याम्-यवान; ५ कन्नडभाषायाम् - ओंइू, ६ तामिलभाषायाम् - अमन ७ तेलुगुभाषायाम् - वामु; ८ पारस्याम् - नानख्वा - बुरानीकतिया, १० आंगल्याम् - विशप्स वीडसीड १. 'लैटिन भाषायाम् - पटीचोटीस अजवान २ ।

विवरणम्— अजमोदिकायाः क्षुपाः चतुष्पदोच्चा । कृषकैः क्षेत्रेषु समुप्यते । लघुपत्राणि कंटकाकाराणि । क्षुपेषु छत्रवत् समाच्छन्नता भवति । तत्र च श्वेतपुष्पाणि समुत्पद्यन्ते यदा च तानि छत्राणि पक्वानि भवन्ति तेष्वजमोदिकोत्पद्यते । कुट्टितमिदञ्चोलूखलेषु लघु-कुट्टनपात्रेषु वा लघु-वीजानि परित्यजति । तदेवाजमोदिकेति कथ्यते ।

अनेन प्रकारेण भावप्रकाशस्य निघण्टुभागोऽयमेकादशभाषाकोशो भवतीति तदिदमस्य वैशिष्ट्यम् अत्र विभिन्न-भाषाशब्दप्रदानम् पर्यायदर्शनञ्चा आयुर्वेदकोशकृते परमावश्यकमेवापरिहार्यम् । येन सर्वप्रान्त-सर्वदेशजौषधीनां सम्यक् प्रकारेण ज्ञानं भवेत् । अतो महत्वपूर्णोऽयं भावप्रकाशनिघण्टुरिति ।

---

१ Bishops weedseed भाव प्रकाशः पृष्ठ १५० ।
२ Ptychotis ajwan. भाव प्रकाशः पृष्ठ १५० ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवकोश: १

अस्य कोशस्य रचयिता श्रीशिवदत्तमिश्रोऽस्ति । अयं कर्पूरवंशीयः । अत एव कर्पूरीय - इतिविशेषणेन मण्डितोऽस्ति । अस्मिन् - वंशे वैद्यक शास्त्रपारंगता अनेके विद्वांसो जन्म लेभिरे । तदर्थमेव वंशोऽयं नितान्तं प्रख्यातः अस्यैव शिवदत्तमिश्रस्य पितृपादाश्चतुर्भुजमिश्राः "रसकल्पद्रुमम्" इत्यायुर्वेदस्य प्रसिद्धग्रन्थं विरचयामासुः । एवमेव गोबिन्दार्नमितस्य रसहृदयस्य टीकाकर्ताऽप्ययमेव । शिवदत्तस्य पुत्रः कृष्णदत्तो त्रिमल्लस्य द्रव्यगुणशतश्लोकीग्रन्थस्य टीकां लिलेख । शिवकोशं विरच्य शिवदत्तेन तस्य विस्तृता टीकापि लिखिता २।

अस्यां टीकायामेव "मतिरामाश्रमाः" एवं लिखति । अनेन ज्ञायते यदयं भट्टोजिदीक्षितस्य पुत्रं भानुजिदीक्षितं तत्कृताञ्चामरटीकां सङ्केतयति । रामाश्रमस्य कार्यकालः १६००-१६५० खीष्टाब्दाः । शिवकोशस्य संरचना १५९९ शकाब्देषु १६७७ खीष्टे च जाता ।

एतद्विषये ग्रन्थकारस्य निर्देशो दृष्टव्यः

नवग्रहतिथिप्राप्ते हायने हालभूभुजः ।
चक्रे चातुर्भुजः कोशं शिवदत्तः शिवाभिधम् । ३

परिणामतो लेखककालः १६५०-१६७७ खीष्टाब्देषु सिद्ध्यति । डा० उपाध्याय गोडे-आदीनां विदुषां विचारेणायं काशीनिवासी-आसीत् अथवा तत्र निवासञ्चकार ।

अस्य कोशस्याध्ययनेन स्पष्टं प्रतीयते यदयं विभिन्नकोशानां ज्ञाता विभिन्नकवीनां काव्यमर्मज्ञश्चासीत् । स्वग्रन्थेऽनेन कालिदासभवभूत्यादीनामुद्धरणानि प्रदत्तानि ।

---

१ धन्वन्तरि निघण्टुसाकमेवः आनन्दाश्रम सं. सी पूना १८९६ खी. प्रकाशितः ।

२ डा० हर्षे सटीककोशस्य प्रमाणिकं संस्करणं दक्षिणा महाविद्यालय पूना-१९५२ खी. ।

३ शिवकोशस्य ४२ पृ. ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिवकोशस्तु नानार्थको औषधिकोशो वर्तते। अर्थादस्मिन् कोशे एवं विधाः औषधिवाचकाः— शब्दाः येषामनेकेऽर्था लभ्यन्ते। शब्दानां चयनञ्चान्तिम-वर्णमभिलक्ष्य विहितम्। यथा विश्वमेदिन्यादीनां वर्तते। निघण्टुरयं सुविस्तृतो विशदः— प्रामाणिकश्चास्ते। व्याख्याकारेण शब्दानामर्थोऽस्य कोशोद्धरणैः परिपोषितः। अनुमानतोऽत्रशतोत्तर संख्यक-ग्रन्थानामुद्धरणानि सन्ति। इत्थमयं स्वीयं विशिष्टं महत्वं धारयति।

वर्गनिघण्टुः [1]

भिक्षानन्देन संगृहीतः। अस्य पाण्डुलिपि. वि. वै. शो. संस्थाने खण्डित-तावस्थायां वर्तते। आदिभागः "............ हीबस्तिशिरः पीडोदरज्वरान्।

ब्रह्मश्वास कफानाह कासकुष्टञ्च मारुतान्।
तत्फलं भेदनं स्वादुः क्षारमुष्णं समीरनुत्॥

अरलू

स्योनाको दीपनः पाके कटुस्तु वरको हिमः।
ग्राहि तिक्तोऽनिलोश्लेष्मा पित्तकासामनाशनम्॥

हीवेर

हपुषा दीपनी तिक्ता कटूष्णा तुवरा गुरुः।
पित्तोदरसमीरार्शो ग्रहणी गुल्मशूलजित्॥

पुष्पिका

इति श्री भिक्षानन्द सुसंग्रहीते वर्गनिघण्टौ उष्माण वर्गः समाप्तः। ग्रन्थः। सम्वत् १९५६ आश्विन-कृष्णा ८ भौमवासरे। एवं किलास्य संकलनकालः १८६९ खीष्टाब्दाः भवन्ति।

---

1 वि. वै. शो. सं. होशिआरपुर, पञ्जाब।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यक्षशारीरम्

प्रत्यक्षशारीरस्य प्रणेताऽयुर्वेदस्य प्रकाण्डपण्डितो बभूव । अयं वैद्यावतंसो विद्यानिधिकविभूषण कविराज श्री गणनाथसेनः, 'एम. ए., एस. एम. एस.' इत्युपाधिधारिरासीत् । अयमप्यायुर्वेदमहासम्मेलनस्याध्यक्षस्तथा चायुर्वेद-महामण्डलस्यापि - अध्यक्षपदवीमलञ्चकार । अयं किल बंगप्रान्तस्य राढा-भूमिसौरभभूतस्य श्री पुरस्य वास्तव्यः- आसीत् तदिदमस्य ग्रन्थरत्नं १९१३ ईशवीयाब्दे कालिकातातः प्रकाशितमभूत् ।

अयमायुर्वेदस्य शरीररचनाकोशो विद्यते अस्य भूमिका प्रथमं संक्षेपेणां-ग्लभाषायां १९१३ ईशवीयाब्दस्य दिशम्बरे मासि सप्तादशपृष्ठेषु समाप्यते । संस्कृते चास्योपोद्घातः सुविस्तरेण समुल्लिखितः । अस्य पूर्ति हि ७८ पृष्टेषु भवति ।

अयमुपोद्घातः सर्वतो गवेषणापूर्णः परममहत्वपूर्णश्च । अस्मिन् संस्कृतो-पोद्घाते आयुर्वेद-साहित्यस्य संक्षिप्त इतिहासोऽपि सन्निवेशितः । श्रीगणनाथ-सेनोऽयमायुर्वेदशास्त्रस्य प्रगाढं पाण्डित्यं धारयन्नपि कियान् विनम्रस्तदिदं निम्नश्लोकेन स्पष्टं भवति—

"आ - कश्मीर - कुमारिकं १ कृतधियाम् - आचट्टल २ द्वारकम् ।
येषां पत्रशतैरिहास्म सुतरां प्रोत्साहिता दुर्गमे ॥
येषाञ्चाथ नियोगतः श्रममिमं सत्यं लघुं मन्महे ।
तेषामेव कृतित्वमत्र न तु नोऽनुज्ञावहा वै वयम् ॥

श्लोकोऽयमुपोद्घातान्ते विद्यते । अयं किलैक भाषिक एव कोशः । अस्य कोशस्य च वर्णनशैली प्राचीनायुर्वेदग्रन्थानुसारिणी ।

यथा-

अर्थात शरीरपारिभाषिकीयमध्यायं व्याख्यास्यामः । त्वचः, कलाः, पेश्यः स्नायवः, सिराः, धमन्यो, रसायन्यो, नाड्यो, धातवो रसादिशुक्रान्ता-श्चेति शरीरोपादानसमुच्चयः । आशयाः श्वसनान्न-विपाचनादि क्रियाकरा

---

१ कुमारिका नाम कन्याकुमारिकाख्यो भारतस्य दक्षिणतम प्रान्तः केरलेति प्रसिद्ध इदानीम् । कश्मीर उत्तरतमः ।

२ चट्टलश्चट ग्रामो भारतस्य पूर्वतमः प्रान्तः, द्वारका तु पश्चिमतमा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नमस्तुभ्यं शम्भो

नमस्तुभ्यं शम्भोः ? त्वमसि जगदीशैकपरमः,
समग्रेयं सृष्टिः सुखदपरिणामस्तव विभो ।
त्वमेवास्याः स्रष्टा त्वमसि जगधाता जगहरः,
नमस्तुभ्यं तुभ्यं सकलसुखदातर्जगपितः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जटाभिस्ते गंगा वहति विमलाथापि सुजला,
शशाँकाधः मौलौ परमरमणीयस्तव शिवः ।
त्रिशूलस्ते पाणौ विषधरविशेषास्तवगले,
नमस्तुभ्यं शम्भो सकलसुखदस्त्वजगपिता ॥

त्वया सार्धं गौरी परमसुखदात्री शिवकरा,
स्वभक्तानां वर्गं धनबलसुखान्यच्छति सदा ।
गणेशस्ते पुत्रः सततसुखदः मङ्गलकरः,
नमस्तुभ्यं शम्भो सकलसुखदस्त्वजगपिता ॥

जनिं लब्ध्वेह स्याँ जगति जनसेवापररतः,
मया कार्यं कस्मै कृतमहितकारी नहि भवेत् ।
तथा ध्यानं कुर्यां निजमरणकाले तव विभो,
नमस्तुभ्यं शम्भो सकलसुखदस्त्वजगपिता ॥

शास्त्री ओमप्रकाश 'राही'
आचार्य, एम. ए , एम. फिल.
रा उ. वि. बोगधार,
सिरमौर (हि० प्र०)

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अम्बिका–स्तोत्रम्

भुण्डाख्येन मखेन हर्षितवतीं भण्डासुशक्द्रिनीम् ।
श्यामांगीं कमलद्वयं विदधतीं रक्ताम्बरैः शोभिताम् ।।
पंच स्थान चतुष्ठहैरि संहितां रामेण संसेविताम् ।
निर्मुण्डाधिनिवासिनीं भगवतीं श्री अम्बिकां संस्मरे ।।

कमक्षाख्या देवी त्रिमुख — ममलेशः पशुपतिः ।
दिवा भूषा सूर्यस्तदनुरमते ऽ त्रिप्रियसुतः ।।
चतुः स्थानीयाः ये शुभकलशरूपाः सुरगणाः ।
विराजन्ते मातः प्रचलित — मखे हर्षितमनाः ।।

षडैश्वर्यः शम्भुः धुमुख — विवुधश्चापि वरदा ।
शिवा क्षेमाकाली दुरित–शमनी पावनकरी ।।
नृसिंहोदैत्यारिः ठहरिवर — देवाश्चतुरिमे ।
विराजन्ते मातः प्रचलित — मखे हर्षितमनाः ।।

धनाहा चेवड्चोस्तदपि च डगेणा वरसुरी ।
द्रहाखेगस् दुर्गाः पुनरपि सुनैरी भगवती ।
गुमाकण्डी फर्शे नडलटुडसाख्ये महिसुरैः ।
विराजन्ते मातः प्रचलित मखे हर्षितमन. ।।

महा भीमा काली तदपि तव रूपं विकसितम् ।
पुरा भण्डादैत्यं हनन – करणार्थं परिवृतम् ।।
रवीं पोथौ नाम्ना भवति नरमण्डे प्रतिमखे ।
तवाह्वानं मातश्चलति परिपाटी सुनितराम् ।।

भराड्यः सप्तांकाः प्रकटनिजरूपां वडकुयाम् ।
तवांशाः सप्तीमाः ललित — वरग्रामान् कृतपदाः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवान्योऽस्मिन् खण्डे विदित गुणरूपा उपचिताः ।
प्रकाशन्ते नित्यं दिशि विदिशि मातस्तव यशः ।

सुरोटूं कश्चम्भुस्तदनु च किशोलौ जनपदे ।
शिवो रुन्दल् संज्ञो लघुतम ढरोपा स्थलरतः ।।
समुदभूतास्त्वेते वड्कुश्कभूम्याः किल पुरा ।
प्रसेवन्ते मातश्चरण — कमलं ते निशिदिनम् ।।

त्वदीयात् भण्डाराज्जनित — सुरमान्यो निवसति ।
भढारालुर्देवः प्रमुदितमनाः कोटकवने ।।
सुराः सत्यन्येऽपि त्वदुपरिकृताः भक्तिविमलाम् ।
प्रकाशन्ते नित्यं दिशि विदिशि मातस्तव यशः ।।

नृमुण्डस्येशाने नयनगिरशृंगे रमगढे ।
नृपर्षिर्नाताली निवसति हि तस्मिन्नहि तनुः ।।
अनावृष्टिं वृष्टिं समयमनुकूलं प्रकुरुते ।
महच्छक्त्या युक्तोऽप्यनुसरति नागस्तव वचः ।।

बनादेवश्चण्डी निवसति च लक्ष्मीपति सुरः
तथा भूताधीशो दखिनि हरदेवोऽपि च पुनः ।
नृमुण्डस्था पंचस्थलिन उपदेवाः जननि ये ।
त्वदीयाज्ञां मत्वा नगरजन रक्षां विदधति ।।

जहार पीरः शम्भुः गुरु परशुरामस्य वसति ।
हिडिम्बा हूडीको मखमवनकर्तुं निवसतः ।।
बड़ादेवो विष्णुः रचयति शुभं पावनमखम् ।
पृथग्जाग्राख्यं वै तदपि तव कीर्तिं वितनुते ।।

यदा भुण्डो यज्ञः प्रचलति नृमुण्डे तव शिवे ।
तदा वृद्धः शम्भुः वहति विबुधो वा सहचरैः ।।
निराकर्तुं बाधाः सुसुखधनधान्यान्युपचये ।
द्विकोशात्मं क्षेत्रं हि परिकुरुते मोदित मनाः ।।

सुर द्विड्भण्डाख्य दनुजमभिहन्तुं खलु पुरा ।
परित्रस्तैः देवैः सुरभितवने चाति गहने ।।
स्वयं प्रादुर्भूता सहविहितयागे भगवती ।
ततः कालान्मातस्तव कथित पीठं वरमिदम् ।।

 CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वर्गाच्चुड़ी कतिपयः कथयन्ति लोकाः ।
सत्याश्चमुण्ड — पतनेन समुद्भुतापि ।।
जाल्पाम्बिके च सनुतः तव नाम मातः ।
आद्या कुमार्यपि पदेन त्वमेव वाच्या ।।

ख्यालीति संज्ञा विबुधैस्तु प्रोक्ता ।
कृष्णाननेति प्रवदन्ति भक्ताः ।।
उक्ता बुधैस्त्वं भुवनेश्वरीति ।
श्री रेणुका नाम तवैव चास्ति ।।

युगे त्रेतायां वै हननमभिधाय क्षितिभृताम् ।
इहागत्यावांच्छद् ऋषि परशुरामः सुविहितुम् ।।
यदा वाजीमेधं परमशुभदं चातिगहनम् ।
त्वया मातायागं सुपरिहरितं वै तदपरम् ।।

पुनश्चासौ रामः प्रियतरवचोभिस्तव शिवे ।
महाशक्ते यागं सुविहित विधानेन जननि ।।
चतुः स्थानीयानां हरिवर देवैश्च सहितः ।
समाप्यास्मिन् स्थाने निजपद महेन्द्रं चलितवान् ।।

समासीनो दक्षे मनसिजसुरः सृष्टिजनकः ।
कृतान्तो वामे संसृति हरण कर्ता विकसितः ।।
महेन्द्रे शृंगे वै कलित चिपलूणावनिगतः ।
त्रिधामा ते रामः त्रिगुणतनुधारी विहरति ।।

पुरायाता व्याधिर्नगर — पुरतः पश्चिम दिशि ।
त्वया सा रुद्धासीद् भगिनि कथयित्वा सुवचनैः ।।
मम त्वेते जाताः कलभसमुदायाः किल शिवे ।
महाग्रीष्मे काले व्यथित करणीयाः कथमिह ।।

पुरा केचिद् विप्राः कलह कृतवन्तः कुमतयः
सुमर्यादाभंगो नगर वसुधायां समजनि ।।
तदाख्यातुं दुःखं स्वसुरधिपदं कांगड़गता ।
हिडिंबानीता संहरणमपि कर्तुं खलजनान् ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संवौरीयो राणा महिष इव मत्तः समभवत् ।
पयः पानार्थं सः महिसुरवधूनां गृहितवान् ॥
तदा तद्धातार्थं चटकमङणीका तनुधृता ।
महत्त्रस्तो राणा झटिति सुरलोकं व्रजितवान् ॥

मनाक् राणा दैत्याः स्वमधिकृतिपूर्णाः प्रतिपदम् ।
कृतं अत्याचारं मनुजसुर विप्रेष्वपि च तैः ॥
त्वया तेषां मातः हनन विहितं वै सहरुषा ।
ततः ख्याली कुंजे पुनरपि बलं दर्शितवती ॥

कपीनां संघातः पुलरचनकृत्यैः गृहितवान् ।
यथा दीर्घाः ग्रावाः प्रमुदितमनाः सागरतटे ॥
त्वया दत्ते स्थैर्ये जननि परहस्तं गतमपि ।
तथानीतं धान्यं खदिरपुखनीभ्यां तव सुतैः ॥

अन्ते काले सकलभुवने धारणान्मातृरूपा ।
सृष्टेरादौ सृजन जननी कथ्यसे देवयूथैः ।
अन्ने पूर्णे कथयति ऋषिः अन्नपूर्णेति नाम्ना ।
वीमा सौभाग्यं सुसुतवरान्मोहरूपेण माया ॥

काले कालेऽसुरवधकृते उच्यसे कालिकेति ।
लक्ष्मी सम्पत्तिसुवितरणाद् भारती बुद्धियोगात् ॥
नानारूपैः त्वमसि वजड़े भक्तलोकैरुपास्या ।
बुद्ध्या हीनं कुसुतमिह मां रक्षमातस्त्वमेव ॥

नरो खजोऽशक्तः सुपदगतिवान् याति तरसा ।
विहीनो नेत्राभ्यां सकलरचनां पश्यति हरे ॥
दरिद्रो मर्त्यो वा सपदि लभते भूपतिपदम् ।
महामूर्खः सद्यो भवति कृपया ते श्रुतनिधिः ॥

महापापात्मावान् भवति जगदम्बे सुविमलः ।
महाक्षुब्धात्मावान् भवति जगदम्बे सुखिमनाः ॥
इति ज्ञात्वा मातश्चरणकमलन्तेऽहमधुना ।
निरालम्बोऽऽयातो झटिति कुरु रक्षां जननिमे ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा बाल्ये जातं भ्रमयति हि माता करधृतम् ।
परश्चासौ वालो भवति चलितो वत्प्रमुदितः ॥
तथेमांच्छलोकांस्त्वं वडजननि कारितवती ।
ममाप्येदं चित्तं ह्यनुभवति नित्यं वहुसुखम् ॥

त्वदीय स्तोत्रं वै पठति मनुजो यः प्रतिदिनम् ।
त्वया तस्मै देयं प्रचुरधनधान्य भगवति ॥
तथा पुत्रावाप्तिर्भवतु नितरां तन्नरकुले ।
कुबुद्धिर्नश्येद्वै मनसि परितोषं च लभताम् ॥

मनोभावहीनं विना मात्रया वा ।
विसर्गानुस्वाराक्षरभ्रष्टपाठम् ॥
महामाइ ज्ञात्वा सुतं मां स्वकीयम् ।
सुवात्सल्यदृष्ट्या क्षमस्वापराधम् ॥

नन्दनेत्रे च विंशत्यां वैक्रमे सूर्यवासरे ।
फाल्गुने पूर्णिमायां हि स्तोत्रेदं पूर्णमाम्बिकम् ॥

रचयिता परिचयः

हिमाचल गते रम्ये नृमुण्डस्य निवासिना ।
काशिकस्नातकेनेद लोकनाथेन निर्मितम् ॥

वार्षिकशुल्कं कृपया त्वरया प्रेष्यताम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

'जानाति कोऽपि न'

डा. जीतसिंह: 'खोखर:'

★

स्नेहं करोति संसारः,
परं जानाति कोऽपि न ।
करोति कवितां लोकः
परं जानाति कोऽपि न ।१।
नहि वदामि नामापि,
करोमि प्रणयं यथा ।
चित्ते सदैव ममासीना
हसामि इति चिन्तया ।२।
तव मम च एका वार्ता,
निलीनस्तत्र कोऽपि न ।
स्नेहं करोति संसारः
परं जानाति कोऽपि न ।३।
सन्ध्याकाले च प्रभाते
द्विवारं सा हि संसारे ।
मिलति वल्लभा मे हि,
'पञ्जाबी' भोजनालये ।४।
सा भेजे च अहं पीठे,
परं वदति कोऽपि न ।
स्नेहं करोति संसारः,
परं जानाति कोऽपि न ।५।
सुतप्तं हृदयं तस्याः,
वाष्पं मुञ्चति सर्वदा ।
गृह्णामि सततं तां हि,
स्मितं करोति सा सदा ।६।
माहं करोमि चिन्तां हि,
भासो भवति कोऽपि न,
स्नेहं करोति संसारः,
परं जानाति कोऽपि न ।७।
श्रुत्वा चित्तेषु सर्वेषु,
जातं कथं कुतूहलम् ।
सा सर्वेषां तु प्रियास्ति,
नहि मे ... मम केवलम् ।८।
तव मम च एका वार्ता,
पृच्छकस्तत्र कोऽपि न ।
स्नेहं करोति संसारः,
परं जानाति कोऽपि न ।९।
श्रुत्वा मे प्रेयसी नाद,
करिष्यथ हि करध्वनिम् ।
'पञ्जाबी' गृहशालायां,
'चाय'—कान्त्या तु मेलनम् ।१०।
सन्तु हि मया सार्धम्
प्रतिबन्धोऽस्ति कोऽपि न
स्नेहं करोति संसारः,
परं जानाति कोऽपि न ।११।

— राजकीय सं. म. नाभा (पटियाला)

Digitized by Arya Samaj Foundation Chennai and eGangotri



हिमगिरि दशशती
(संस्कृते)

लेखकः— श्री चक्रधारी शास्त्री, सा. आचार्यः,
प्राप्तिस्थानम् :-शक्ति प्रेस, नूरपुर (हि. प्र.)
मूल्यम् :- २० रूप्यकाणि ।

श्री चक्रधारी शास्त्री संस्कृतस्य तु सबलः सफलश्च कविरस्त्येव अनेन सहैवाय हिन्दी भाषाया अपि प्रख्यातकाव्यकारः । 'हिमगिरि दशशती, पुस्तके कवेरस्य चतुश्चत्वारिंशत् विषयोपरि कविताः सन्ति । एताः प्राचीननवीनोभयविध-काव्यावलिसम्वलिताः- विद्यन्ते । एवमेव नवीनप्राचीनविषया अपि - अस्मिन् - पुस्तके काव्यरूपेण उपस्थापिता कविना ।

पुस्तकस्यानन्दः पठनेनैवाधिकः प्राप्तुं शक्यते । रचनातीव सरला विषयाश्च दैनिकसमस्यासम्बद्धा अपि सन्ति इत्थं किल पुस्तकं सर्वविधोपयोगितां धत्ते । आशासे गुणग्राहिणः संस्कृतज्ञाः समादरमस्य पुस्तकस्य करिष्यन्ति । ——

शब्दविवर्तः
(हिन्द्यां)

लेखकः— लछमन सिंह अग्रवालः ।
प्राप्तिस्थानम् :-५४/१ सिहीगेट, बल्लभगढ़- १२१००४ फरीदाबाद-हरियाणा ।
मूल्यम् :- २० रूप्यकाणि ।

पुस्तकेऽस्मिन् -संस्कृतांग्लभाषयोस्तुलनात्मकाध्ययनं कृतमस्ति । अनेन सहैव सम्यक् प्रकारेण विदुषा स्पष्टी कृतं यदांग्लभाषाशब्दभाण्डार— सज्जीकरणे संस्कृतस्य कियान् योगः ? यथा Father पितृ Mother मातृ Cow गौः, Widow विधवा एवमेवानन्दशब्दः । लेखकः स्वीकरोति सर्वेऽपि च विद्वांसः- जानन्ति अकेवलं संस्कृताधारिता एवांग्लभाषा नास्ति परन्तु तथापि न केवलं संस्कृतस्य योगदानं – आंग्लभाषासमृद्धि करणे एव अस्ति परन्तु ग्रीक - लैटिन - जर्मन-भाषासमृद्धावपि संस्कृतस्य भागधेयमस्ति अस्य - एव विषयस्य लेखकेन भाषावैज्ञानिकाध्ययनं पुस्तकेऽस्मिन् - कृतमस्ति । संकलनीयमिदं पुस्तकं हिन्द्यामस्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाचाराः

राजकीय-उच्चैविद्यालय औहरे संस्कृत समारोहः

सितम्बर मासे १९८९ खीष्टीये उल्लिखितविद्यालये संस्कृतस्य सेवानिवृत्त-प्राध्यापकस्य सौजन्यात् विद्यालये समस्तकक्षासु संस्कृतविषये प्रथमस्थानप्राप्तवतां छात्राणाँ कृते पुरस्काराः- वितीर्णाः । (विक्टोरिया क्रास) विक्टोरिया चक्र विजेता श्री भण्डारीराम: पुरस्कारान् - ददौ :

षष्ठ कक्षायां विजयकुमार:	—	९९/-	प्रतिशतं
सप्तम्यां अजय कुमार:	—	९४/-	,,
अष्टम्यां कुमारी रेखा	—	६२/-	,,
नवम्यां शशि	...	८०/-	,,
दशम्याञ्व पंकजकुमार:		९३/-	,,

अंकान् प्रापु: ।

श्री भंडारीराम: छात्रान् - परीक्षासु अनुकरणकरणात् - निषेधयामास । स्वसंस्कृतिरक्षाकरणस्य च प्रेरणां दत्तवान् आर. आर. पाल विद्यालयस्य प्रधानाचार्य छात्रान् प्रबोधयामास यत् - भवद्भिः सत्यस्य शुद्धाचरणस्य च पालनं करणीयम् । श्री प्रेमलाल: शास्त्री संस्कृतविषयमनिवार्यकरणाय प्रदेश-प्रशासनं धन्यवादैरभिनन्दयामास । आध्यात्मिक शान्त्यै देशस्य एकतायै च संस्कृतस्योच्चाध्ययनमावश्यकमिति - स प्रावोचत् । रोशनलाल शर्मा भाषाध्यापक.-मञ्चसंचालनमकरोत् ।

- मुख्याध्यापक:

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

श्री वीरभद्रसिंहमहाभागानां गृहे पुत्ररत्नम्

श्री वीरभद्रसिंह महाभागाः दिव्यज्योतिषः आजीवनसंरक्षकाः, हि. प्र. संस्कृतसाहित्यसम्मेलनस्य च अध्यक्षा सन्ति। इदानीं यावत् – तेषां गृहे पुत्राभावः आसीत्। मातुर्जगदम्बिकायाः कृपाप्रसादेन मनोरथोऽयमपि पूर्णः। अत्र समस्तसंस्कृतजगत् हर्षं व्यनक्ति। आशासे हि० प्र० मुख्यमन्त्रिणो वीरभद्र सिंह महाभागा अग्रेऽपि सततं संस्कृतसंरक्षणं करिष्यन्ति।

हिमाचल संस्कृत शिक्षक परिषद्

केषाञ्चन युवकानां विशेषतः श्री दुर्गादत्तः शास्त्री, श्री सीतारामः शास्त्री, श्री प्रेमलालः शास्त्री—एतेषां प्रबलेच्छानुसारमदम्यमुत्साहञ्च दृष्ट्वा उक्तपरिषदः गठनं जातमासीत्।

परिषदः गठनस्य सुपरिणामा अपि समक्षं समायाताः। परन्तु प्रदेशस्य-षट् पञ्चसंख्यकसंस्कृतक्षेत्राणां परस्परं सामञ्जस्यमद्यापि न दृश्यते। पाठशालानां संस्कृताध्यापकाः (राजकीयाराजकीयउभयविधाताः) संस्कृत-महाविद्यालयानां (राजकीयाराजकीयानाम्) अध्यापकाः राजकीयाराजकीयस्नातकस्नातकोत्तरमहाविद्यालयानां संस्कृताध्यापकाः, हि. प्र. विश्वविद्यालयस्य संस्कृतविभागीयअध्यापकाः सर्वविधसंस्कृतविद्यालयानां महाविद्यालयानां विश्वविद्यालयानाञ्च संस्कृतछात्राः, विभिन्नसंस्कृतसंगठनानि, एतदस्ति षड्विधं क्षेत्रं संस्कृतज्ञानाम्। परन्तु अत्र नास्ति पारस्परिकं संगठनं, सहयोगः मैत्रीभावश्च। एतेषु सर्वेषु परस्परं विरोधः, संघर्षः अविश्वासश्च प्रतिदिनमेधते एवं सति कथं संस्कृताभ्युदयः भवितुमर्हति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथं वा संस्कृतयुवकानां कल्याणं भविष्यति । केवलं ये ये यत्र यत्र सेवासु संलग्नाः सन्ति तेषामेव केवलं कल्याणमस्ति । भाविसन्ततिकृते ते सर्वेऽपि गभीरं घोरं च गर्तं निखनिष्यन्ति यदि परस्परं सहयोगं न करिष्यन्ति । अतः सर्वैः सम्मिल्य संस्कृतरक्षोपाया करणीयाः ।

संस्कृतज्ञानपरम्परायां उपरि—आघाताः

प्रदेशे यत्र संस्कृतोत्थानस्रोतस्तत्र किल एवं विषप्रयासा जायमानाः सन्ति यैः संस्कृत ज्ञानपरम्परा शनैः २ क्षीयमाणा एकस्मिन् दिने शून्यतामेष्यति । मया ते सर्वेऽपि ये किल संस्कृतमुत्फुल्लं द्रष्टुमिच्छन्ति प्रार्थ्यन्ते यदत्र एव प्रयासाः अविलम्बं प्रारब्धव्याः । अपरः करिष्यति अमुकः—करिष्यति - इयं विचारधारा किल सर्वनाशकरी ।

अतः संस्कृतहितेच्छुभिस्त्वरया प्रयासास्तादृशाः करणीया येन संस्कृतं सुरक्षितं स्यात् । भवतां प्रतिक्रियामपेक्षमाणोऽस्मि ।

देशस्य प्रधानामात्यद्वयी

नववर्षांके श्रीमती इन्दिरागांधिमहाभागायाः चित्रं तस्याः स्मृतिमालक्ष्य प्रकाशितम् । अनया संस्कृतस्य गौरवं अ० भा० संस्कृतसाहित्यसम्मेलनस्य अध्यक्षपदमलंकृत्य वर्धितम् । वाराणसेय संस्कृतविश्वविद्यालये दीक्षान्तसमारोहे समुपस्थितिः स्वीया प्रदत्ता एवञ्च संस्कृतज्ञानां मानवर्धनमकारि । अक्तोवरमासे इमं नृशंसैः केश्चित्—आरक्षिभिरेव कथानिः शेषतां प्रापिता इत्यहो दुर्भाग्यं देशस्य । दिव्यज्योतिः परिवारः एनां मासेऽक्तोवरे सादरं सस्मार ।

चतुर्दश नवाम्बरः श्री नेहरू महाभागस्य जन्मदिवसरूपे सर्वत्रदेशे मान्यते । अनेनापि संस्कृतप्रसाराय विकासाय च स्वशासनकाले संस्कृतायोगगठनं कृत्वा महत्त्वपूर्णं कार्यं कृतमासीत् । अद्य संस्कृतस्यावहेलना यदि देशे भवति तर्हि तत्कृते संस्कृतसमाज एवाधिक्येन उत्तरदायित्वं वहति । अद्यापि पारस्परिककलहेन ग्रस्तः सस्कृतसमाज एकीभूय न किमपि कर्तुमुत्सहते केवलं इर्ष्याद्वेषपङ्के मग्नः संस्कृतस्य आगामिसन्ततेश्च हानि - करणे संलग्नः । विद्वांसोऽत्र विचारयिष्यन्ति ।

— केशव शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्थानस्य प्रकाशनानि

१. भारती स्तोत्रम् सटीकम्
२. सहस्रशीर्षा सूक्तम् सभाष्यम्
३. वेदान्त प्रश्नोत्तर माला
४. विष्णुस्तोत्रम् सटीकम्
५ शान्तिसुखसोपान
६ ध्यान साधना
७. संस्कृत कोशवाङ्मयस्य सामान्य परिचयः ।
८ सूनृता (काव्यम्)
९ पथ्यापथ्य विनिर्णयः (आयुर्वेदस्य)
१०. हिमाचल प्रदेशे संस्कृतस्य प्रसारो विकासश्च ।
११. दिव्यज्योति संस्कृत मासिकम् १९५६ तः अविरतं प्रकाशते ।
१२. फलादेशकल्पतरुः (ज्योतिष ग्रन्थः, हि. अं. टी. युतः)
१३. झञ्झा (नाटकम्)
१४. वैजयन्ती काव्य (हिं.)
१५. विचारामृत १-२ भाग (हिं.)

मुद्रणालयस्थानि

१. गान्धी वचनामृतम् ।
२. अथर्ववेदस्य दुर्लभखण्डम्
३ आप्लवशकटिकम् (नाटकम्)
४ प्रबुद्धभारतम् (संगीतिका)
५. सुधा (संस्कृतगीतानि)
६. वैद्यकल्पतरुः
७ कक्षपुटम्
८. शिवप्रोक्त कायाकल्प विज्ञानम्
९. रसायनतन्त्र विज्ञानम्
१०. वृत्त रत्नावली
११. तीन एकांकी (हिं.)
१२. आचार्य जी के पत्र (हिं.)
१३ मधुरिका (खण्डकाव्य)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R.N. 6384/57 Registered No. 10

त्वर्यताम् त्वर्यताम् त्वर्यताम्

*** *** ***

जातक फलादेशस्य दुर्लभो ग्रन्थः

फलादेश कल्पतरुः

राष्ट्रपतिसम्मानितप्रख्यातविद्वान्सेवानिवृत्तप्राचार्य श्रीमदाचार्य-दिवाकरदत्तशर्मप्रणीतो हिन्दी-आङ्ग्लटीका सहितः चिरप्रतीक्षितः फलादेशकल्पतरुः प्रकाशितोऽभूत् ।

अस्मिन् ग्रन्थे द्वादशभावफलम्, दशाफलम्, आधुनिकाः शुभाशुभयोगाः, नारीणां जातकफलम्, सन्तानप्राप्तिबाधानिवारण-प्रयोगाः, अनिष्टदशाफलशमनोपचाराश्च निर्दिष्टाः ।

सोऽयं ग्रन्थः श्रीमदाचार्यपादानां चत्वारिंशद्वर्षाणां ज्योतिष-शास्त्रसेवाया अनुसन्धानपूर्णानुभवस्य च दुर्लभा कृति विद्यते ।

स्वनामधन्यानां श्रीमार्तण्डपञ्चाङ्गप्रवर्तकानां विश्वविख्यात ज्योतिर्विदां श्रीमदाचार्यमुकुन्दबल्लभ मिश्र ज्योतिषाचार्य महाभागानां प्राक्कथनेन च समलङ्कृतः ।

महर्घतावशात्स्वल्पा एव प्रतयो मुद्रिताः । मूल्यमपि केवलं कर्गलमुद्रणादिव्ययपूरकं डाकव्ययसहितं सप्तति (७०) रूप्यकाणि निर्धारितम् । फलादेश कल्पतरोः भारते विदेशेषु च, दैवज्ञैरपूर्वं स्वागतं कृतम् स्वल्पा। प्रतयः अवशिष्टाः सन्ति । द्वितीय संस्करणप्रकाशने विलम्बो भविष्यति । मूल्यं निम्नसंकेते धनादेशद्वारा प्रेष्यताम् ।

सचिव, संस्कृत शोध संस्थान, भारती विहार, मशोबरा शिमला-७ 171007 (हि. प्रदेश)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

अस्माभिर्विशेषरूपेण-संस्कृतस्याध्ययनं कार्यं यतोहि प्रागैतिहासिककालाज्जीवनस्य सर्वविधविकासस्य सम्बन्धः संस्कृतभाषाधीनोऽभूत् ।

— डा० राजेन्द्र प्रसादः
भारतस्य प्रथमराष्ट्रपतिः

शिमला दिसम्बर, १९८९

संस्कृतस्य सचित्रमासिकम्
वर्षम् ३४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमः

क्र.	विषय	लेखक	पृष्ठ
१.	संस्कृत कोशवाङ्मयम् (क्रमशः)	प्रो. केशव शर्मा, सम्पादकः	१
२.	हसन्तुतराम्	डा० जीत सिंह खोखर	२१
३.	तस्मै पाणिनयेनमः	श्यामलाल शर्मा	२२
४.	अखण्डानन्द स्तवः	श्री चक्रधारी शास्त्री	२५
५.	शान्तेः नोबलपुरस्कारः	डा० लेखराम	२६
६.	ब्रह्मचर्येण तपसा देवामृत्युमपाघ्नत		२८
७.	सम्पादकीयम्	प्रधान सम्पादकः	३२

दिव्यज्योतिः

हि० क० सं०भा० अकादमी प्रदत्तानुदानसाहाय्यम् । पत्रिकागतमुद्रणदोषाणां सम्पादकीयनीति-विषये च अकादमीदायित्वं नास्ति ।

हिमाचल प्रदेश--पंजाब-हरियाणा-जम्मूकश्मीर - मध्य प्रदेश--राजस्थान--महाराष्ट्र उत्तरप्रदेश शासन-स्वीकृतं केन्द्रशासनपुरस्कृतं सचित्रं संस्कृतमासिकम् ।

पत्रस्य उद्देश्यानि तथा नियमाः

सरल—सरस-सुबोध-साधनैः सर्वस्मिन् संसारे संस्कृतस्य प्रसारः, साहित्यान्तर्गतानां सकलकलानां समन्वेषणं, संसारस्य हितसम्पादनम्, एवं लौकिक - अलौकिकस्वातन्त्र्यस्य प्राप्तिः ।

"दिव्यज्योतिः" प्रतिमासं पञ्चदशतारिकायाम् (आङ्गलमानेन) प्रकाशितं भवति ।

पत्रस्य वार्षिक मूल्य ३० रु० अर्धवार्षिकं १५ रु० एकस्याङ्कस्य च रु० २-५० भवति ।

वर्षारम्भः अक्तूबर—मासतः भवति । ग्राहकः कस्मादपि मासाद् भवितुं शक्नोति ।

ग्राहकैः, "सम्पादक, दिव्यज्योतिः, भारती विहार, मशोबरा, शिमला-१७१००७ हि० प्र०" इति संकेते धनादेशेन वा. शु. प्रेषणीयम् ।

परिचयः

संस्थापकाः तथा आद्यसम्पादकाः आचार्यश्रीदिवाकरदत्त शर्माणः, — दूरभाषः 78459

प्रधानसम्पादकः— आचार्य केशव शर्मा एम. ए., एम, फिल, साहित्यरत्नम् — „ 8200

सम्पादकः- श्रीमती सूनृता गौतम एम. ए. (संस्कृत हिन्दी)

दिव्यज्योतिः कार्यालयः भारती विहारः, मशोबरा, शिमला-७ (हि. प्र.)

मुद्रकः प्रकाशकः—

भारतीमुद्रणालय भारती विहार, मशोबरा-१७१००७ शिमला (हि. प्र.)

स्वामी:- श्रीमती आचार्य रत्नकुमारी शर्मा

दिसम्बर. १९८९ पौषः २०४६ – वर्षम्–३४ अङ्कः ३

वार्षिक मूल्यम् ३० रु०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहवः। पञ्चज्ञानेन्द्रियाधिष्ठानानि। पञ्च कर्मेन्द्रियाधिष्ठानानि। नव द्वाराणि। ललाटभ्रूगण्डादीनि चोपाङ्गानि इति प्रत्यङ्गावयवसमासः। तत्र—

त्वचो नाम—सर्वदेहावरणरूपा भूमिः स्पर्शेन्द्रियस्य स्रोतसाञ्च स्वेदवहानां, रोम्नामपि सरोमकूपानाम्। ताः स्थूलदृष्ट्या स्तरद्वयविभक्ताः। बहिस्त्वग्भागोऽन्तस्त्वग्भागश्चेति। तत्र बहिस्त्वङ् नामातीवतन्वी कृष्णगौरादि वर्णाधारा बहिस्पर्शेन प्लोषपिडिकाव्यञ्जना च। अन्तस्त्वङ् नाम स्थूला शरीराभिरक्षिणी स्नेहादिकर्षणी च। सैव प्रधानायतनं स्पर्शस्य स्वेदस्रुताञ्च मार्गाणाम्।

प्राञ्चस्तु सूक्ष्मदृष्ट्या क्षीरस्येव सन्तानिकाः सप्त षड् वा त्वचो मन्यन्ते। तासु प्रथमा अवभासिनी नाम, तस्या बाह्य त्वग् भागेनाभेदः। अपरा सान्तु अन्तस्त्वग् भागे ऽनुप्रवेशः।

इत्थमयं कोशस्तु विस्तरेण शब्दार्थप्रकाशकः। न चात्राकारादिक्रमेण शब्दानां सङ्कलनम्। यतोहि शरीराङ्गभागानुसारमेवात्र नामकरणं तत्क्रमेणैव च तेषां सन्निवेशोऽत्र विद्यते। अत एवायं वर्णनात्मक एव कोशः पादटिप्पणैरलङ्कृतोऽप्ययम्। निबन्धकोशोऽपि कथयितुं शक्यते। यथा लेखकः स्वयमपि स्पष्टयति—

"धन्वन्तरीयमतमाकुलतामुपेतं स्वच्छं पुनर्विदधता मृतकान् परीक्ष्य
अग्रन्थि सम्प्रति मया नवको निबन्धो बोद्धाश्रमस्य यदि तं शिरसा नमामि।"

तथापि विद्वद्भिर्न चिन्तनीयमिदमेव यदयं निबन्धः प्रबन्ध एव वा साधारणः। सनिश्चयमेवायं वर्णनात्मकोऽस्ति कोश इति न तच्चिन्तनीयम्।

कैय्यदेव निघण्टुः [1]

पथ्यापथ्यविबोधकः

कैय्यदेवनिघण्टुरपि वैद्यक कोशः। यस्यापरं नाम पथ्यापथ्यविबोधकोऽप्यस्ति। कैय्यदेवः स्वपरिचयमस्मिन् प्रददौ। आयुर्वेदस्यायमभूतपूर्वः

---

[1] लवपुरतः प्रकाशितवरः। प्रकाशकः मिहिरचन्द्रलक्ष्मणदासः। सम्पादकः श्री सुरेन्द्रमोहनः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोशः। विषय दृशा विभिन्ननिघण्टुभ्यः सुव्यवस्थितोऽयम्। अस्मिन् गुणदोष वर्णनं विस्तरशः कृतमस्ति। मधुनो भेदैः सहैव तदिदमपि कोशेऽस्मिन् समुपवर्णितं यत् कीदृशीभिर्मक्षिकाभिः कस्य वर्णस्य मधु निर्मितं भवति। न केवलं वर्णनिर्माणस्यैव वर्णनमपितु स्वादविषयेऽपि मधुनः पूर्णविवरणमत्रोपलभ्यते। अनेन सहैव विभिन्नभाषासु पर्यायाः वानस्पतिक नामधेयान्यौषधीनाम्, द्रव्याणां वृक्ष-लता गुल्मादिरूपआकृति, उत्पत्तिस्थानम् पर्यायाणां शब्दार्था भावार्थाश्च, मात्रा, व्यवहारविधिः चूर्ण-क्वाथ-लेहादिरूपा, शास्त्रेषु—अमुकामुकद्रव्याणामुल्लेख कस्मिन् २ योगे प्राप्यते, लब्धनुभूत योगाश्चत्वारिंशत् पृष्ठात्मिका भूमिका, रस-वीर्यविपाक-निघण्टुपरिभाषाविषयाणामुल्लेखः सर्वमपीदं सविस्तरमस्मिन् निघण्टौ प्राप्तुं शक्यते। ५०० पृष्ठात्मकोऽयं ग्रन्थो विद्यते

गणमञ्जरी

कविभल्लट कृता

आरम्भः

गणप्रयोगसिद्ध्यर्थं कविजीवनसाधनम् ।
विना विभक्तितोऽस्माभिः कथ्यते गणमञ्जरी ॥
आदिमध्यावसानेषु यरता यान्ति लाघवम् ।
भजसा गौरवं यान्ति मनौ तु गुरुलाघवम् ॥

अन्तिम भागः

करजो जलजञ्चेति गिरिजं वनजं तथा ।
लवजं सहजोऽपिस्यात् करटोविकटोवटुः ।
कमठो जरठश्चापि द्रुहिणो वरुणो वटः ।
प्रघणः सरणिश्चाथ मसृणं घुसृणं स्मृतम् ।

पुष्पिका · इतिनगणः। इति श्री मद्क्षारामनाथ वरप्रसाद लब्धसकल भाषा-कवितानिर्वाहककविभल्लट विरचिता गणमञ्जरी समाप्ता।

कोशेऽस्मिन् जगणः ठगण टगण-नगणादिभेदतः शब्दसङ्कलनम्। विना विभक्तित एवात्र शब्दसंग्रहः। ——

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्याय्यरत्नमाला

पर्यायावलिः

रत्नमाला

विभिन्न नामभिरुच्चार्यमाणस्यास्य पर्याय रत्नमाला कोशस्य लेखको माधवकरोऽस्ति । अयमायुर्वेदकोशः । बंगदेशस्य कोशस्य विशेषप्रचारः । अस्यैवापरं नामद्वयं पर्यायावलिः रत्नमाला चेति प्रसिद्धम् १ ।

मातृका निघण्टुः २

अयमप्यायुर्वेद कोशः पाण्डुलिपिरूपेण प्राप्यते । अस्य हस्तलिपिरेषा २२३ वर्ष पुरातना १७५ पृष्ठात्मिका १८१० वैक्रमाब्दे लिपिकृता । अआकारादि—अक्षरवर्णानुक्रमेण शब्दसङ्कलनम् । वामतः शब्दा दक्षिणतश्चार्था हिन्द्यां हिमाचलोभाषायाञ्च मिश्रितरूपेण दृश्यन्ते । वर्णानुसारमेव चास्मिन् वर्गसन्निवेशः । यथा—

अभया—हरड़ै ।
अतिविषा—पतीस ।
अमृता — गिलोई ।
हरितशाक - मूली ।
हममरी—कानीयर ।
हारपना—मूली ।

शब्दरत्नप्रदीपः ३

काशीरामविरचितः । अस्य कोशस्यापि पाण्डुलिपिः वि. वै. शोधसंस्थानेऽवाप्यते । अस्यादिमौ श्लोकौ :—

तत्सुतो नामदेवस्तु वैद्यो वैद्यगणाग्रणीः ।
प्रख्यातो भूमिपालस्य गोपालस्य समीपगः ॥

---

१ संस्कृत शास्त्रों का इतिहास पृ. ३६२ उपाध्याय ।
२ सं. शो सं. शिमला । म. स्वी. ग्र. ।
३ वि. वै. शो. सं. होशियारपुर पञ्जाब ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मात्कल्याणदासस्तु प्रादुरासीत्प्रतापवान् ।
यत्कीर्त्या शौर्यदानातिभूतयापूरितं जगत् ॥

अन्तिमे:—

क्षीरसन्तानिका क्षीरजालिकायाम् तथा मर्कटी जाले इति क्षकारादि-वर्गः समाप्तः ।

"कल्हणो मल्हणश्चैव विप्रौसारस्वताभिधौ ॥
भारद्वाजीतिजातीयौ जातौ पश्चिममण्डले ॥
तद्वंशे गुरुदासस्तु—अर्गलायां वसन्पुरा ।
तत्सुतो मथुरादासः काशीरामश्चतत्सुतः ।
विख्यातो मथुरा देशे वैद्य विद्या विशारदः ।
तेन कल्याणदासस्तु पाठितो यदुमण्डले ।
नामदेवसुतः श्रीमान् पौत्रो लक्ष्मीधरस्य तु ।
तेन वैद्योपकाराय शब्दरत्नप्रदीपकः ॥
काशीरामेण गुरुणा कारितः सद्भिषक् प्रियः ।
सौन्दर्ये शशितुल्यतामुपगतः सूर्योपमस्तेजसा ।
पाठे वेदपुराण शास्त्र कवितानामेव वाचस्पतिः ।
सौन्दर्ये वासव जामदग्निसदृशो गाण्डीवितुल्योऽथवा ।
जीव्याद् ब्रह्म दिनावधेरपि परं कल्याणदासः क्षितौ ॥

पुष्पिका: ०

इति श्री नामदेवसुतकल्याणदास कारिते काशीरामविरचिते शब्दरत्न प्रदीपे सर्वाक्षरवर्गः समाप्तः ।

कोशऽयमाद्यक्षर वर्णानुक्रमपद्धत्या विरचितः प्रतीयते ।

—

ज्योतिषशब्दकोशाः

षट्सु शिक्षादिषु वेदाङ्गेषु ज्योतिः शास्त्रमप्यन्यतमम् इति नाविदितं विदुषां । तच्च वेदपुरुषस्य नयनमुच्यते तदुक्तं मुण्डकश्रुतौ पाणिनीय-शिक्षायां च—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'द्वे विद्ये वेदितव्ये परा चैवापरा च, तत्रापरा-- ऋग्वेदो यजुर्वेदः सामवेदो ऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषम् इति ।'

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ इति ।

अनधीतज्योतिः शास्त्रो वेदविषयेऽन्ध इव भवतीति शास्त्रकृतामभिप्रायः वेदवाटिकारामणीयकं ज्योतिर्ज्ञानिन चक्षुष्मतैवानुभवितुं शक्यते, नान्येन. अथेदं किञ्चिदिव विवियते --एकत्र श्रुताविदमाम्नायते-

कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति ।
त आ ववृत्रन् सदनादृ ऋतस्यादिद् घृतेन पृथिवी व्युद्यते '

अयमस्यार्थः- सूर्यरश्मयो जलं धारयित्वा द्युलोकमायान्ति, ते कृष्णे नियाने दक्षिणायने द्युलोकात् पर्यावृत्य मेघरूपेण मध्यममन्तरिक्षलोकं प्राप्नुवन्ति, यश्च ऋतस्य सदनम्=अपां गृहमित्युच्यते, ततो वृष्टिर्भवति अथ कोऽसौ दक्षिणायनाख्यः कालो यत्र वृष्टिर्जायते? एतत् सर्वं ज्योतिषशास्त्रादेवावगन्तुं शक्यम् । अथायमपरो मन्त्रस्तत्रभवतां पाठकानां पुरस्तादुपस्थाप्यते-

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ।'

अत्र मन्त्रे समस्तं खमण्डलं चतुर्दिगवस्थितैश्चतुर्भिर्नक्षत्रैश्चतुर्धा विभक्तमुपदिष्टम् । इन्द्रशब्देन चित्रानक्षत्रं गृह्यते, तैत्तिरीयशाखानुसारेण चित्रानक्षत्राधिपतिरिन्द्र एव । भारतस्य ग्रीसादिदेशान्तरस्य च प्राचीनेषु नक्षत्रचित्रेषु चित्रानक्षत्रचित्रं लम्बकर्णोलूकाकारमुपलभ्यते, मन्ये तद 'वृद्धश्रवाः' इतिमन्त्रोक्तेन्द्रविशेषणाधारेणैवोत्प्रेक्षितम्, अथवा चित्रानक्षत्रे ताराणां तादृशः सन्निवेश एव तादृगाकृतिकल्पने मूलम् कौशिक इतीन्द्रोलूकयोः समाना संज्ञा 'निनाय बिम्यदिदवसानि कौशिकः' इति शिशुपालवधे माघकव्युक्तावपि कौशिकशब्देनोभयोः प्रतिपादनम् अस्ति । 'पूषा' इति पदेन रेवतीनक्षत्रमभिप्रेतम्, पूषैव तस्य देवता देवतानामभिरपि नक्षत्रनिर्देश इति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राचां पन्था अद्याप्यनुवर्तत एव । अग्निमनक्षत्रत्वाद् अस्य विश्ववेदत्वं मन्त्रे प्रोक्तम् । तृतीयं नक्षत्रं श्रवणनामकं तार्क्ष्यशब्देनात्रोपक्षिप्तम् । 'नक्षत्रेषु बहूनि तारासमूहरूपाण्यपि भवन्ति, श्रवणायामपि सन्ति तिस्रस्तारा:, तिसृणां ताराणां समूह: सम्प्रसारणादिव्याकरणप्रक्रियया तृक्ष इत्युच्यते । तिसृणामृचां समूहस्तृचमिति यथा। तृक्ष एव स्वार्थिकेन ष्यञा तार्क्ष्य इति भवति। अपि च तार्क्ष्य इति गुरुडस्यापि सञ्ज्ञा, अनया संज्ञयात्र गुरुडध्वजो विष्णु: संकेत्यते । 'गरुडवाहनो' विष्णुरिति पुराणविदां प्रसिद्धि: । श्रवणनक्षत्राधिपश्च विष्णुरिति ज्योतिर्वित्सु प्रथते अतोऽपि तार्क्ष्यशब्देन श्रवणखेट एवात्र मन्त्रदृष्ठुरभीप्सित इत्यत्र नास्ति सन्देह: । अरिष्टनेमिरितिविशेषणेन सूचितं यदिदं श्रवणनक्षत्रं मरीचिमालिन क्रान्तिवृत्तस्यान्तिमां सीमामधितिष्ठतीति। चतुर्थनक्षत्रमिह पुण्यनामकं बृहस्पतिशब्देनोल्लिखितम् । बृहस्पतिर्हि तस्य देवता। देवताभिधानैर्नक्षत्रोल्लेख इति ज्योतिर्विदां शैलीति पुरस्तादुक्तमेव। अज्योतिषज्ञ: कथमस्य मन्त्रस्यार्थं विदांकरोत्विति साधूक्तं विद्वद्भिर्यज्ज्योतिर्विज्ञानशून्यो वेदार्थविषये सर्वथान्ध एवेति ।

किञ्च यथा बीजं काले समुप्तं सिक्तं च क्रमशस्तरुरूपतां धत्ते यथाकालं पुष्पयति फलति च तथैव लौकिकानि वैदिकानि च सर्वाण्यपि कर्माणि काले कृतान्येव फलानि प्रसवितु प्रभवन्ति। अकालकृतं सर्वं विफलतामेति कालज्ञानं च ज्योतिषज्ञानाधीनम्। कृत्तिकास्वग्नीन् आदधीत इति वेदस्याज्ञा, 'काश्च ता: कृत्तिका:' इति पञ्चाङ्गविद एव जानीयु पञ्चांगगणनायां च ज्योतिर्विद एव प्रभव: । 'देवतारामवाप्यादिप्रतिष्ठोदङ्मुखे खौ' इति शास्त्रमुदङ्मुखे खौ (उत्तरायणे) देवतादिप्रतिष्ठामनुशास्ति कदा रविरुदङ्मुखो भवतीति तत्त्वतो ग्रहगणितज्ञ एवावबुध्यते । तदेवं ज्योतिर्ज्ञानं वेदार्थ कालादि जिज्ञासोर्नितान्तमपेक्षणीयमिति निर्विवादम् । चतुर्लक्ष ज्योतिषं शास्त्रमिति विदां प्रसिद्धि: । तच्च सिद्धान्तसहिता होराख्यैस्त्रिभि: स्कन्धैस्त्रिधा विभक्तमस्ति। तत्र सिद्धान्तस्कन्धे पाटिगणित बीजगणित रेखागणितादिकं सर्वविधं सिद्धान्तरूपं गणितं निरूपितं विद्यते । संहितास्कन्धे भूकम्पोल्कापातावग्रहवर्षणातिवर्षण— सुभिक्ष — दुर्भिक्षादि योगा:, स्वचक्रपरचक्रादिकं च प्रतिपादितम् । स्वर—शकुन सामुद्रिक—शास्त्राणि चात्रैवान्तर्भवन्ति। होरास्कन्धे तु जातक—ताजिककेरलीयप्रश्न— मुहूर्तादिकमन्त भवति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदेवमतिमहतोऽस्य परमोपयोगिनो ज्योतिः शास्त्रस्य पारिभाषिकाणां शब्दानां कोषो नाद्य यावत् केनचिल्लिखितः लिखितोऽपि चेन्नाद्यापि विज्ञातः, केनचिद् विज्ञातोऽपि चेन्नाद्यावधि प्राकाश्यमुपनीत इति विचार्य विदुषां तोषाय, ज्योतिः शास्त्राध्येतॄणामुपकाराय, स्वान्तः सुखाय च ज्योतिर्महार्णवपारङ्गतेन, शास्त्रानुशीलनशीलेन कोशशास्त्रसलावगाहिना विलोलदवानीर जान्हवीतीर-मुपाश्रिते गढ़वालप्रदेशान्तर्गतग्राममण्डलमण्डनायिते खण्डनाम्नि ग्रामे निवसता, बड़थवालोपाह्वेन महाविदुषा मुकुन्ददैवज्ञेन विनिर्मितोऽयं ज्योतिष-शब्दकोषो भारतशासनशिक्षामन्त्रालयदत्तद्रव्यसाहाय्येन मुद्रितः (प्रकाशितः). अनेकग्रन्थप्रणेतुरस्य शब्दकोषकृच्चूडामणेरेष द्वितीयो ग्रन्थः, यो भारतशासनशिक्षामन्त्रालयेन द्रव्यसाहय्यं दत्वा प्रकाश्य च सम्मानितः।

अत्र ग्रन्थे पञ्चाङ्ग काल-वर्षप्रभृतय एकोनविंशतिवर्गाः सन्ति। तत्र दृष्ट्यादिपर्यायफलोदाहरणवर्गे दृष्टेः स्थितेश्च बहवः पर्यायाः संगृहीताः सन्ति। तत्प्रयोगोदाहरणान्यपि प्राञ्चि तत्र तत्रोक्षाहृतानि। यौगिकशब्दानां योगार्थप्रदर्शनार्थं शब्दव्युत्पत्तिवर्गोऽप्यत्र निर्माय सन्निवेशितः, यच्छब्दसंबन्धेन यौगिकशब्दा निर्मितिसताः, तत्संबन्धिशब्दास्तत्पर्याय समीप एव समुद्धृता दृष्टव्याः। एकादिसंख्यावाचकशब्दानां पर्याया अपीतस्ततः समुद्धृत्य सन्निवेशिताः सन्ति।

आशासे ग्रन्थोऽयं न केवलं ज्योतिर्विदां किन्तु, सर्वेषामपि संस्कृतवाङ्मयानुरागिणां रुचिकरो भवेत्। ज्यौतिषशब्दकोषमिमम् उद्भाव्य यत्सत्यं ग्रन्थकृता सुरभारतीवाङ्मये चिरादनुवर्तमाना न्यूनतैका परिहृतेति नातिजितं वचः।

ग्रन्थ अधीत्य जातसंतोषः पं० श्री परमेश्वरानन्दः स्वान्तः सुखाय कोष-लेखनप्रवृत्तस्य यदृच्छालाभसंतुष्टस्य ग्रन्थकर्तुर्विदुषः एकं प्रशस्तिपद्यं विलिखति।

१ गङ्गौघमज्जननिरस्तसमस्तकोष २ जालोऽपि कोषरचनानिरतः सदा यः। कस्तस्य चित्रचरितस्य मुकुन्दसूरेर्वक्तुं गुणान् सुतनुवाग्विभवः प्रभुः स्यात्। अस्य संकलनं पूर्णतः वैज्ञानिकं ज्यौतिषविदुषां कृते च परमसाहाय्यप्रदमिति निम्नोदाहरणेन स्पष्टं भवति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१ पञ्चाङ्गपर्यायाः-पञ्चाङ्गम् पञ्जिः पञ्जिका, पञ्जी, तिथिपटम्, तिथिपत्रिका तिथिपत्री ।

२ पञ्चाङ्गावयवभेदाः- तिथिः, वारः, नक्षत्रम्, योगः, करणम्चेत्येते पञ्चाङ्गस्य पञ्चभेदाः स्युः । तदुक्तम् -

तिथिर्वारश्च नक्षत्रं योगः करणमेव च ।
पञ्चाङ्गस्य फलं श्रुत्वा गङ्गास्नानफलं लभेत् ॥ इति

अपि च—

वीरो हरति दुःस्वप्नं नक्षत्रं पापनाशनम् ।
तिथिर्भवति गङ्गायां योगः सागरसङ्गमः ।
करणं सर्वतीर्थानि श्रूयते यत्र पञ्जिका ॥

इति शब्दार्थ चिन्तामणिः । १६-२-१ ।

सामान्यकालपर्यायाः अनुवेलम्, अनेहा (स्) अपष्ठुः, अवसरः आमतिः, कर्माहः, कालः, क्षणः, जहः, तिथिः, दिष्टः, पीथः, पीयुः, मः, मतिः, वारः, वेला समयः, सर्वमूषकः इति ।

पर्वपर्यायाः उत्सवः, उद्धर्षः, क्षणः,
(एते पुंसि) पर्व अन्) महः (पु)

अस्याभिनव-ज्योतिष कोशस्य प्रथमावृत्तिप्रकाशनं १९६७ तमे खिष्टाब्दे ऽथ च १८८९ शकाब्दे सञ्जातम् ।

अस्य कोशस्य निर्मातुर्जन्म १९४४ विक्रमाब्दे मार्गशीर्ष कृष्णाष्टम्यां भौमवासरे जातम् । अस्य पितृपादाः श्रीखण्डग्रामे गढ़वालस्य (बिन्दलाढ़ांगू पट्टी) स्थाने निवसन्ति स्म । अस्य पितामहोऽपि महीयान् विद्वानासीत । अस्य पितुर्नामासीत् श्रीरघुवरदत्तः अस्य माता च कीर्ति देवी परमसंस्कारशीला महिला बभूव । अनेन संस्कृतेऽतुलं साहित्यं विनिर्मितम् ।

बहुकालादेवानेन महनीयं कार्यमेकं सम्पादितम् । एतत् -कार्यञ्च संस्कृतस्य विशालकायकोश. निर्माणस्य विद्यते । अनेन विदुषा वृद्धावस्था-

---

१ म. म बि. भा. पं० परमेश्वरानन्दः । ज्योतिष शब्दकोश भूमिका ।
२ कोषजालमिहास्मयादिकोशसमूहः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यामपि तदिदं कार्यं त्रिंशत् वर्षाणामथकपरिश्रमेण सम्पादितं यस्य निर्माणे पण्डितानां मण्डलमपि क्षमं न स्यात्। अस्य कोशस्य संक्षिप्तपरिचयदानमपि सुकरं नास्ति। अस्मिन् प्रत्येकशब्दस्य प्रत्येकपर्यायस्य कोशस्य चाविकलं मूलपाठः। पाठान्तरम्, अनेकार्थवाचकाः शब्दाः, अनेकार्थकोषाणाञ्च मूलपाठोऽप्यविकलः सर्वमिद प्रदत्तम्। यतोहि भ्रष्टपाठसंशोधनमपि विदुषाऽनेन महत्वपरिश्रमेणाकारि। प्रत्येककोशानां प्रत्येकशब्दस्य सर्वेषां मूलपाठानामेकीकरण-पाठभेद-अर्थभेद-टीकाकाराभिमत-लेखक-संशोधनपूर्णाभिमतादिकं सर्वमपि महासागरेऽस्मिन् निर्मथ्य रत्नान्वेषणसदृशोऽगाधश्रम एवाकारि। प्राचीन-कोशास्तुप्रायेणाप्राप्याः परन्तु तेषामुद्धरणानि-यत्र तत्र विभिन्नग्रन्थेषु मिलन्ति अनेन विदुषा एवंविधोदाहरणानि सङ्कलय्य तेषामेकत्रीकरणं कृतम्।

अस्मिन् मुकुन्दकोशे समस्तपदार्थ-वस्तु-गुणद्रव्यादीनां विशदं विवरणं प्राप्यते। धर्मशास्त्र-कर्मकाण्डकामशास्त्र-संगीत-नीतिशास्त्र-ज्योतिषायुर्वेद-युद्धविद्यामहाभारत-भागवतगता समस्तपात्र-नदी-नद-ग्राम-पर्वत-तीर्थ-मुनि-आदीनामथ च रामायणस्य व्यक्ति-कथाविषय-राज्यव्यवस्थादीनाञ्चापि वर्णनं कोशेऽस्मिन् पुराणकालादाधुनिकं युगं यावत् प्राप्यते। इत्थंञ्चास्मिन् कोशे १०५ वर्गाः सन्ति।

परं खेदावहोऽयं विषयो यदधुना यावदपि सर्वस्याप्यस्य कोशस्य प्रकाशनं नाभूदिति। आधुनिक-संस्कृतकोशनिर्माणकर्मणि विदुषोऽस्य नूनमेव महनीयं स्थानमस्तीति नात्र काप्यतिशयोक्तिः।

ज्योतिषशब्दकोशश्चायमस्यैव मुकुन्दकोशस्यांशभूत एव।

कविदर्पणकोशसङ्ग्रहः

अस्य कोशस्यापि निर्मातुर्विषये न किमपि वैशिष्ट्येन परिज्ञायते। पाण्डुलिपि-समारम्भ आभ्यां श्लोकाभ्यां भवति—

नाटिका चतुरङ्कास्यात् स्त्रीपात्रबहुला तथा।
श्री कारिणी प्रकरणं नाटकान्तर्गता मता।
इति वृत्तकथावस्तु-शब्दाः पर्यायवाचकाः।
वस्तुशब्दः कथावाची पात्रवाची क्वचित्स्मृतः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाप्तौ चायं श्लोको-भवतिः-

सर्वं विज्ञाय मतिमान्- नाम्नां भेदमिमं कविः ।
पश्यन् सुखी प्रयुञ्जीत बुद्ध्या दर्पणभूतया ॥

पुष्पिका:

इति कविदर्पण कोशसङ्ग्रहः सम्पूर्णः ।

नक्षत्रनिघण्टुः १

केन कदा वा विनिर्मितोऽयं कोश इति तु न विज्ञायते। अस्य खण्डिता पाण्डुलिपि वि. वै, शो. संस्थाने प्राप्यते।

आदिः—शुभमस्तु । भवत्वश्विनीनक्षत्रम् । ...... दृ. मं आद्यं तुरगं तुरंगमश्वी वाजी हयो हयः ।

भरणी स्याद्यमं याम्यं - अन्तकं मृत्युभं तथा ।

कृत्तिका वहला ..... षंणक्षेत्रं (१) हुताशनः ।

अन्त: —

स्वातीशशांक पितृ तारकमैत्र्यभानि प्र. (? पु.) ऋक्षमस्ति यदि वा वनिता च ऋक्षा। तेषां दिना ...... स च यस्य तस्य ह्यत्यन्तमिष्टफलदं मुनयो वदन्ति ।

द्विधर्म षष्ठाष्टक कष्ट रज्जु । द्विर्द्वादिशे राक्ष संयोषितो वा
एकाधिपत्यं उभयो स्सुहृत्वम् पाणिग्रहो मंगलमातनोतु ।

---

१ वि. वै. शो. सं. होशियारपुर, पञ्जाब ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुराणकोशाः

संरक्षितभारतीयसंस्कृतिनिर्यासो व्यासो भारतीयसाहित्यसंरक्षकेषु प्रमुखः। महाभारतस्य युद्धज्वालासु यदा वीराः शूराः साहित्यसेविनश्च विद्वांसः सम्पूर्णतया समाप्तास्तदा कविताकामिनीहासो महर्षिव्यासः- एकतो वेदानामपरतश्च- इतिहासपुराणयोरुद्धारञ्चकार । वेदत्रयी ज्ञानकाण्डस्य सम्बर्धनायोपयुक्ता जाता । इतिहासपुराण - पठनपाठनाभ्याञ्चार्यवीरत्व- सुरक्षा कृता। अनेनास्माकं संस्कृतिः सुरक्षामवाप । साहित्यञ्च सुसम्पन्नं सुसमृद्धञ्च जातम् । पुरापि तदिदमभूदेव । एकदा द्वादशवर्षानावृष्टिकारणेन् ऋषिमण्डलमुपयुक्तशरीरसाधनसमन्वेषणे इतस्ततो विकीर्णोऽभूत्तदा वाग्देव्या वरदसूनुर्वाच्यायन सारस्वतो विलुप्तज्ञान विज्ञानोद्धारञ्चकार ।

भारतीयावेदानेव निखिलधर्ममूलमिति स्वीकुर्वन्ति । अखिलमपि वाङ्मयम् तेभ्य एव विनिःसृतम् । मनुर्हि वेदानुकूल शास्त्राण्येव प्रामाणिकानि मनुते । स चाह –"वेदश्चक्षुः सनातनम्" वेदोऽखिलो धर्ममूलम् "इतिहास पुराणाभ्यां वेदं समुपबृंहयेत्" एवम् किल महर्षिव्यासः- इतिहासपुराणादिकं वेदसमुपबृंहण कर्मणि कारणमाह। यो हि - इतिहासपुराणविद्वान् नास्ति, स वेदानवगन्तुमनर्हः । भारतेऽस्मिन् वर्षे - इतिहासस्य पुराणानाञ्च विद्वांसः पुराकालादेवायान्ति । एते किल ऐतिहासिकाः, पौराणिकाः, पुराविदः, वंशविदः— इत्यादिनामभिरुच्यन्ते । त एवैतेऽथर्वागिरसोऽपि भवन्ति । आथर्वणमिदं न केवलं पौरोहित्यमात्रमासीत् अत एव कौटिल्योऽपि - अथर्वाङ्गिरसान्, धर्मशास्त्रप्रवक्तारः, इतिहासज्ञाः, पुराणविदः, इति विविधसम्बोधनैर्बोधयति ।

पुराणानि भारतस्य विश्वकोशाः (Ensyclopaedia) एषु विश्वकोशेषु च समयानुसारि परिवर्तनमपि भवति । तत्र नूतनज्ञानस्य समावेशोऽपि विद्यते तदिदमेव च पुराणानां विषयवस्तुजातमपि । भविष्यपुराणे आंग्लशासनं यावत् घटनानां सन्निवेशोऽस्ति विहितः। पुरानवम्- पुराणम् इत्युच्यते । पुराणः पुरातनं नूतनं जायते । पुरा+ न=पुराणमित्यपि कश्चिद्व्युत्पादयामास । अस्यायमेवार्थो भवितुं शक्नोति यत् पुराणे पुराणं नास्ति । तद्धि प्राचीनस्य नवीनं कलेवरम् एताभ्यः परिभाषाभ्यः—एव कोशजनिरभूत् । व्यासश्च पुराणलक्षणं लक्षयन्नेवमाह—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
ऋषीणां चरितञ्चैव पुराणं पञ्चलक्षणम् ।।

सर्गः—सृष्टि-उत्पत्तिः, प्रतिसर्गः— उत्पत्यनन्तरं सृष्टेर्विस्तारः, वंशोऽर्थात् राजर्षीणां चरितम्, मन्वन्तरम्- कालविज्ञानम्, ऋषीणाञ्चरितम्-तदिदमेवाध्यात्मिकनिधिभूतम्। अस्मिन् पुराणलक्षणे रक्षणे वा ज्ञानविज्ञानयोरुभयोरेव समावेशः यो न जानाति पुराणं स कथं वेदविद्भवितुमर्हति ?

अत्रापि महर्षिः- व्यासोऽलिखत् ।
'विभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति'

यो हि-अल्पश्रुतो भवति न बहुश्रुतः, यो नूनमेव ज्ञानविज्ञानप्रवेशविहीनः सृष्टिविद्याज्ञानरहित, पुराकालीनस्वर्णसभ्यतानभिज्ञ, राज्ञां ऋषीणां च चरितज्ञानहीनस्तस्माद् वेदो बिभ्यति। क्वचिदयमल्पश्रुतो मां न मारयेदिति। अत एव - इतिहासपुराणज्ञानं वेदार्थपरिज्ञानायावश्यकम्। मनुर्हिवेदमेव चक्षुरित्याह चक्षुर्हि दर्शनसाधकम्। इन्द्रियेषु चक्षुरिन्द्रियस्य प्रधानता एतदर्थमेवास्ते यदयं दर्शयति। यो हि दर्शनशून्यः स कथं कर्तव्यं कर्तुमर्हः ? पुराणस्येयं महत्ता तद्गतं विषयानुसारमास्ते। एभिरेव वैदिकालोकोऽस्माकं समक्षे संस्थापयिष्यते।

यैर्हि पुराणानामालोकनं पर्यालोचनं च विहितं ते जानन्ति यत् पुराणेषु ज्ञानविज्ञानयो कियती सामग्री सन्निहिता वर्तते। इदानीम् - पुराणानां संख्याऽष्टादशमिता, परन्तु कदाचित्तेषां संख्या पञ्चाशन्मिताऽसीत। महर्षिव्यासः स्वशिष्यं रोमहर्षणं पुराणसंहितायाः ज्ञानमकारयत्। 'एषु पुराणेषु केचन विषयाः - यथा सृष्टिविद्या मन्वन्तरज्ञानञ्च कतिपयाख्यानान्यपि समानानि। ऋषीणां राज्ञाञ्च चरितानि न्यूनाधिकमात्रायां समानि ऋषीणां राज्ञाञ्च चरितानि न्यूनाधिकमात्रायां समानि ऋषीणां राज्ञाञ्च चरितानि न्यूनाधिकमात्रायां समानि - एव। अध्यात्मज्ञानेनेमानि ओतानि च प्रोतानि च। अस्माकमतीतस्य सामाजिकार्थिक - राजनयिक सांस्कृतिक - अभिव्यक्तिपूर्णा सामग्री या किल पुराणैरस्माकं कृते संरक्षिता साऽद्य सर्वप्रकृष्टधनमस्ति देशस्यास्य १।

---

१ डा० मुन्शीराम शर्मा डिलिट, पुराणसन्दर्भ कोशः भूमिका -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनेन सर्वमपि सम्यक्तया सुस्पष्टं भवति यत् पौराणिक - कोशानां कियती महत्ताऽद्य देशेऽस्माकम् । यतोहि वैदिकज्ञानं किल पौराणिकज्ञानालोकाभावे प्रणश्यदेव प्रतीयते । वेदानां सार्वकालिकी समुपयोगिता । परन्तु यथा पूर्वमेव प्रतिपादितं यद्यदि पौराणिकमेव ज्ञानमस्माकं प्रणष्टं भवेत्तु वेदानां ज्ञानं कथं कारमपि सुलभं न भविष्यत्यस्माकं कृते । तदेतस्य पौराणिकज्ञानस्यावाप्तये पौराणिककोशानामद्य महतीयमावश्यकता । अत एवास्या आवश्यकतायाः पूर्त्यर्थमेव कैश्चिन्महानुभावैर्हि पौराणिककोशनिर्माणकर्मणि स्वकीयाऽभिरुचिः प्रकटिता तदनुसारञ्च कोशानां निर्माणमकारि ।

पुराणसन्दर्भकोशः

कोशेऽस्मिन् पुराणेषु प्रयुक्तानां विशिष्टशब्दानां व्याख्या वर्तते । एते विशिष्टशब्दाः- अत्राकारादिक्रमेण सङ्कलिताः सन्ति । यथा—

"अ" अयं भारतस्य सर्वासां भाषाणां प्रथमाक्षरोऽस्ति । स्वरोऽपि कथ्यते अस्याक्षरस्यानेकेऽर्थाः सन्ति । यथा-विष्णुः, ब्रह्मा, शिवः, युद्धमिति-एवम् ।

'अ" कामदेवः ।

'अङ्गः"— (१) षष्ठमन्वन्तरस्य मनुचाक्षुषस्य पौत्रः । चिरायापि निःसन्तानोऽसौ यज्ञं कृत्वा पुत्रमेकमवाप । पुत्रस्य दुष्टताया विरक्तो भूत्वा राज्यं परित्यज्य स तपस्तप्तुं वनमभिजगाम । (२) ययातिवंशजस्य राज्ञो बलेस्तत्पत्न्याः सुदेष्णाया षट्सु पुत्रेष्वेकः । अयं स्वनाम्ना अङ्गराज्यं संस्थापयामास । अस्य पुत्रः धनपानः— आसीत् (३) अंगराज्यं यदधुनातन भागलपुरसमीपमासीत् । अर्जुनस्तीर्थयात्राप्रसङ्गेनाङ्गराज्ये गतः । देव्याः सीतायाः समन्वेषणार्थमङ्गराज्ये प्रविष्टाऽभूत्— वानरसेना ।

अंगदः- (१) किष्किन्धाया राज्ञो वालेः तारायाश्च पुत्रः, बालेः— मृत्योरनन्तरं स यौवराज्यपदमलञ्चकार अयं रामसुहृद रामदूतपदमवाप्य च रावणस्य समीपमधिगतः । अयं शूरो वीरश्चासीत् । रामरावणयुद्धेऽनेकान् राक्षसान् जघान । (२) श्रीरामस्यानुजस्य शत्रुघ्नस्य तत्पत्न्याः श्रुतिकीर्तेश्च पुत्रः । श्रीरामचन्द्रस्य महाप्रयाणानन्तरं शत्रुघ्नः स्वपुत्रमङ्गदमङ्गरा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्यस्य सिंहासने ऽभिषेचयामास। (३) कौरवपक्षस्य - एको वीरः। (४) श्री कृष्णस्य भ्रातुः गदस्यैकः पुत्रः। (१)

एवमकारात् क्षकारं यावत् - अस्मिन् कोशे शब्दसङ्कलनं कृतम्।

अस्य लेखिका सुश्री पद्मिनी मेनन महाभागा वर्तते। सा किल स्व-विषये स्वयमेवेत्थम् लिलेख—

"ममायं प्रथमः प्रयासो ग्रन्थस्यैवं विधस्य लेखनस्य कतिचित्वर्षेभ्यो न किमपि कुर्वाणामित्थमेव रिक्ता स्थिता आसम्। स्वज्येष्ठभ्रातुः प्रेरणया ग्रन्थस्यास्य लेखनमारब्धम्। अहं जाने यत्पुराणेषु प्रयुक्तानां शब्दानां कोशनिर्माणकार्यं न सुकरम्। आधुनिकभारतस्य तथाकथितसुशिक्षित परिवाराणां बालाः—आंग्लमाध्यमविद्यालयेषु प्रेष्यन्ते। परिणामतश्च ते स्वशिक्षासमाप्तावपि स्वदेशस्य प्राचीनपुराणपुरुषाणां तीर्थानां श्रेष्ठव्यक्तीनाञ्च विषये न किमपि जानन्ति। अतोऽस्य ग्रन्थस्य लेखनेऽयमेवोद्देशो मामकीनो यदेतादृशा युवानो' युवत्यश्चास्याध्ययनेन किञ्चिद्ज्ञानमाप्नुयुः। नायं कोशो विदुषां कृते विनिर्मितोऽस्ति। पौराणिक - व्यक्तीनां वार्तानाञ्च नात्र सन्दर्भप्रदानमभूत्। नात्र पुराणनामनिर्देशोऽपि विहितः। विभिन्न-पुराणेषु विभिन्नयुगेषु च पौराणिकदेवानां पुरुषाणाञ्च नामसु स्वल्पभिन्नता दृश्यते'......

तदिदं सत्यमस्ति यत्कोशस्यास्याध्ययनेनाधुनिकाः भारतस्य भारतीयानाञ्च विषये पर्याप्तं ज्ञानं लब्धुमर्हाः। न केवलं युवका युवत्य एव वा तदिदं प्राप्तुमर्हा अपितु विद्वांसोऽपि लाभान्विताः— भवन्ति— अनेन नात्र कोऽपि संशयः नूनमेव चायं पुराणानामभिधानआख्यान - ऐतिहासिकोपलब्धि - लौकिकतत्त्वपरिज्ञानार्थम् — वस्तुत एव सन्दर्भकोशोऽस्ति नात्र संशयः। लेखिका च कठिनश्रमेणास्य निर्माणञ्चकार।

अस्य कोशस्य निर्माण-काले संस्कृतशब्दानां नाम्नां च स्थान-कथानकादीनाञ्च वर्णनं हिन्दीमाध्यमेन विहितम्। अतो द्विभाषिकोऽयं कोशः।

पुराणसन्दर्भकोशस्यास्य प्रकाशनमीशबीयेऽब्दे १९८९ तमे देशाम्बरे-मासि च जातम्। इदं किलास्य प्रथमसंस्करणम्। अस्य प्रकाशकोऽस्ति

१ पुराणसन्दर्भकोशः, पद्मिनी मेनन, पृ. १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"ग्रन्थम् रामबाग, कर्णपुरम् (कानपुर)– १२ मुद्रकश्च (संघसाथी प्रेस) कर्णपुरम् (कानपुर-१२) आवरणमुद्रकश्च मनोहरमुद्रणालयः कर्णपुरम्-१२ उत्तर प्रदेशः ।

प्रतिपृष्ठमस्मिन् भागद्वयं शब्दार्थौ विभाजितौ स्तः । शब्दानामङ्कनं गाढ़कृष्णाक्षरेषु वामतः कृतमस्ति तेषामर्थांश्च स्वल्पकृष्णाक्षरेषु दक्षिणतो मुद्रिताः सन्ति । मुद्रणं शुद्धम् । स्थूल-कर्गज-पट्ट - (गत्ता) विनिर्मितबन्धनेनालङ्कृतम् पुस्तकमिदम् । तदुपरि च कलापूर्णं कर्गजावरणमस्मिन् शोभते

—==—

पौराणिककोशः

कोशेऽस्मिन् पुराण-पात्राणां, स्थानानां कथानाञ्च परिचयः प्रदत्तोऽस्ति । प्रमुख-पात्राणां परिचयोऽत्र विस्तारेण साधारणानाञ्च परिचयः संक्षेपेण प्रदत्तोऽभूत् । ग्रन्थस्य कलेवरोऽपि महीयान् न वर्तते । पात्राणां विस्तृत परिचयपरिज्ञानाय ग्रन्थनाम, अध्याय-श्लोक-संख्यासमुल्लेखश्च कृतो वर्तते । कतमा कथा क्व क्व केषु केषु ग्रन्थेषु च विद्यतेऽस्याप्युद्धरणम् प्रदत्तमास्ते ।

अस्य कोशस्य परिशिष्टमपि महत्वपूर्णम् । परिशिष्टमिदञ्च क - ख - भागान्तर्गतं नवखण्डेषु विभक्तमस्ति । अस्मिन् परिशिष्टे ऽ प्रचलित - भौगोलिक नाम्नामकारादि क्रमेण सव्याख्या सूचिः, संक्षिप्त - व्याख्या सहिता च बौद्ध जैन - इस्लाम - ईशवीय - (ईसाई) पारसीक - धर्माणां प्रचलितशब्दाः कौरव - पाण्डवानां वंश-वृक्षम् चन्द्रवंशीयक्षत्रियाणां वंशवृक्षश्च एवमेव च सूर्यवंशीयक्षत्रियाणां वंशचित्रम्, कालिदासस्य वर्णनानुरूपञ्च श्रीरामचन्द्रस्य वंशानुक्रमः सर्वमपीदं वर्णितमस्ति संक्षेपतः ।

अत्र शब्दानां सङ्कलनमकारादिक्रमेण बिहितम् । अकारात् हकारं यावत् - च शब्दाः अत्र सन्निविष्टा । संस्कृतशब्दाः— गाढ़कृष्णाक्षरेषु पृष्ठस्य वामतस्तेषामर्थाश्च हिन्दी भाषायां दक्षिणतः समुपवर्ण्य निवेशिताः । तदित्थमयं कोशोऽपि द्विभाषिको भवति । अत्र शब्दानां व्याख्या विद्वत्तापूर्णा कठिनपरिश्रमपरिपाकपरिणामभूता च ।

यथा "अंगजः" (पु. सं,)

हिन्द्याम्— कामदेवस्यैकं नाम । स्त्रीपुरुषसंयोगप्रेरकः- एकः पौराणिको देवः रति· अस्य पत्नी बसन्तोऽस्य सुहृद कोकिलश्च वाहनम् शस्त्रमस्य च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुष्पविनिर्मितं धनुर्वाणादिकम् । उन्मादनम्, शोषणम्, तापनम् सम्मोहनम्, स्तम्भनम्, एते चास्य पञ्चसायकाः । देवैरयं श्री शम्भोः समाधिभंगकरणाय प्रहितः प्रासीत् । प्रतिषेधितोऽपि यदा नायं विरराम, तदा प्रभृति कामदेवस्य नामानङ्गमिति प्राचलत् (भाग० ०-१२-२९; मत्स्य, ७-२३; २३-३०; १५४-२७२; २६१-३२; वायु १०४-४८) तदुपरान्तं रतिविलापेन तस्याः प्रार्थनया च प्रसन्नः शम्भुरस्यै वरमयच्छत् । परिणामतश्चास्य पुनर्जन्म श्री कृष्णस्य सूनोः प्रद्युम्नस्य गृहे द्वारिकायामभूत् । अत एव प्रद्युम्न सुतोऽनिरुद्धा कामस्यावतार एव मन्यते (ब्रह्म पु० कामदहनम्)

विशेषोऽत्र आंग्लभाषायाः "क्यूपिड" शब्देनायमेव कामदेवो ज्ञेयः । यत्रायं पट्टिकया पिहितलोचनः पक्षयुगलधरश्चित्रितोऽभूत् । स्वशस्त्रेण धनुर्बाणेन चालङ्कृतोऽयमाकाशे समुड्डयनं करोति । पट्टिकापिहितलोचनतया चायं पात्रमपरिज्ञायैव तस्मिन् स्वकीयबाणं परिचालयति । अस्य-अस्याः क्रीडायाः कारणेनैव चाशोभनयुगलदर्शनमेव प्रायेण भवतिआंग्लमतानुसारमितिशेष १ ।

अस्य कोशस्य प्रकाशनं वाराणस्या ज्ञानमण्डलसहकारिसंगेन कृतम् । प्रथममस्य संस्करणम् २०२८ वैक्रमाब्दे १६७१ खीष्टाब्देषु प्रकाशितमभूत् । अस्यापि मुद्रणं शुद्धम् । आवरणं स्थूलकर्गजपट्टविनिर्मितम् । तदुपरि स्थूल चिक्वण कर्गजमावेष्टितम् तदिदञ्चावरणं सुषमापूर्णं सुदृढञ्च ।

कविरहस्यम् १

हलायुधेन विरचितम् । अस्य निर्माणं -- शैली-आख्यातचन्द्रिकातः पृथगेव वर्तते एषोऽपि क्रियाकोश एव भवति । अस्मिन् लघुकोशे विभिन्नभागेषु पठिताः समानाकाराः धातव एकत्र सङ्गृहीताः । संग्रहश्च ललितललितेषु पद्येषु निबद्धो वर्तते । यथा विद्धातुर्विभिन्नगणेषु भिन्नभिन्नार्थेषु प्रयुक्तः । वर्तमानकालिकरूपेषु तस्य प्रदर्शनं कण्ठस्थकरणायातीवोपयोगी सिद्ध्यति यथाः-

"धूनोति चम्पकवनानि
धुनोत्यशोकम् ।

अस्य काल खीष्टाब्दानां दशम शतकम् अधुनाऽप्राप्यग्रन्थेषु प्रायो भवति ।

---

१ राणा प्रसाद शर्मा; पौराणिककोश, पृ. १ ।

२ मुम्बापुरीतः प्रकाशितम् ।

३ संस्कृतशास्त्रों का इतिहास पृ. ३५१ उपाध्याय ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आख्यातचन्द्रिका १

भट्टमल्लविरचिता । अस्य देशकालादिपरिचयोऽपि स्पष्टो नास्ति । मल्लिनाथस्तु बहुत्र स्वव्याख्यासु - आख्यातचन्द्रिकामुदाहरणस्वरूपेण संस्थापयति इतोऽपि प्राचीमतमोल्लेखस्तु सर्वानन्देनामरटीकाकारेण कृतः । सर्वानन्दः ११५९ खीष्टाब्देषु - अमरकोशटीकां टीकयाञ्चक्रे । अतोऽयं ११५९ खीष्टाब्दादर्वाचीनः कथमपि भवितुं न शक्नोति ।

आख्यातचन्द्रिकापि त्रिकाण्डोपनिबद्धा । प्रतिकाण्डञ्चास्यामनेके वर्गाः । आख्यातचन्द्रिकेयं क्रियाकोशो भवति । कोशोऽयमपि न सुगमतया प्राप्यः ।

उणादिनिघण्टुः

वेंकटेश्वरविरचितः । अयमपि वेंकटेश्वरः कश्चिद् दाक्षिणात्यपण्डितः । स्वीयकोशमयमनेन प्रकारेणारभते :—

वन्दे धामविचित्रं तत्प्रत्यूहध्वान्तशान्तये ।
यन्नरद्विरदाकारं लालयं वामार्धजानिना ।

शातकोटिककोटीर कुटीरमणिकोटिभिः ।
आटीकिताङ्घ्रिनिकटं निकोटीश्वरमाश्रये ॥

अस्ति तञ्जापुरं नाम हस्तिवाजिकुलाकुलम् ।
अशेषचोलधरणीविशेषकमनोहरम् ।
अमरावतिकाबद्धसमरागार मञ्जुलम्
इन्दिरा. नर्तकी नृत्तमन्दिरायतमायतम् ।
तत्रास्ति शाह-नृपतिः सुत्रामसमवैभवः ।
प्रतापतपनस्फूर्ति — प्रकाशितदिगन्तरम् ॥
कीर्तिकेलिपराभूतः कार्तिकेन्दुपरम्परः ।
वासनीकृतकन्दर्पः कामनीयकदुर्मदः ॥
धिषणोत्तरप्रज्ञाकषणोक्तिविशारदः
अंहति ख्यात - कल्पादि संहती कृत्य वैभवः ।

---

१ चौखम्भा, काशीतः प्रकाशिता द्वि. सं. सं. १९९२ वि. ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यनीककिरीटाम्बु- नित्यमीराजिताङ्घ्रिकः ।
तेन साहित्यसर्वस्वनिधिना कविवन्धुना ॥
भोसलाम्बुधिचन्द्रेण दीपाम्बाभाग्यराशिना ।
नियुक्तः करुणापूर्णं नितरां प्रीति शालिना ।
पुत्रः श्री दक्षिणामूर्तेः गङ्गापावितवर्ष्मणः ।
रामभद्रमखिश्रेष्ठ दयासर्वस्वभाजनम् ॥
वेदश्रौतनिधिः शब्दशास्त्रमार्गाद्ध्वनीनधीः ।
कौण्डिन्यकुलमूर्धन्यः सुमतिर्वेङ्कटेश्वरः ।
निघण्टु पण्डितप्रीत्यै निवध्नाम्येष नूतनम् ॥
उणादिपञ्चपाद्यां ये शब्दाः पूर्वैरुदाहृताः ।
व्युत्पादित - क्रमेणैव सविमर्शं वदामि तान् ।
प्रत्यन्ते दुष्करेऽप्यस्मिन् भवाम्यहमकातरः ।
श्रीरामभद्रमखिनां देशिकानामनुग्रहात् ॥
भ्रान्तेः पुरुषधर्मत्वात् - अत्र दोषो भवेदपि ।
वीक्ष्यैनमनुगृह्णन्तु सन्तो निर्धूतमत्सराः ।
निघण्टौ सुखबोधार्थं परिभाषात्र गद्यते ॥
पुं स्त्री क्लीवं क्वचिद् – ज्ञेयं सामीप्याद्रूपभेदतः ॥

समाप्तिश्लोकाः

कल्याणे स्यात्तद्वति तु वाच्यलिङ्गं भवेद्ध्रुवम् ।
एवं शब्दः परेऽनुक्ताश्चाप्यूह्या लक्ष्यदर्शनात् ॥
प्राचीनैः पञ्चपाद्यां ये शब्दा व्युत्पाद्य दर्शिताः ।
तानेकार्थाननेकार्थान् - नानालिङ्गानलिङ्गकान् ॥
स तान् क्रमाज्ज्ञापयितुं कवीनां वेंकटेश्वरः ।
निघण्टुं कृतवान् विद्वत् - कविसञ्जीवनामृतम् ॥

पुष्पिका:

श्री वेंकटेश्वरकृतौ शाब्दिकविद्वत् कविप्रमोदकरे अभवदुणादिनिघण्टौ पूर्णः पञ्चमपरिच्छेदः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनेन निघण्टुरयं पञ्चपरिच्छेदात्मको भवति। वेंकटेशोऽयं तञ्जोर-निवासी विद्यते स्म शाहजीशासनकालीनः एतदस्योल्लिखितपद्यैः स्पष्टमभिज्ञायते। शाहजीकालः १६८४-१७१० खीष्टाब्दाः। अस्य गुरुः रामभद्र-दीक्षितो विद्यते स्म उभयोर्मिथः कश्चित्सम्बन्धोऽपि आसीत्। अस्य पिता दक्षिणामूर्तिरभूत्। एवं प्रतीयते यदयं वेंकटेशः स एवास्ति यस्य टीका रामभद्रस्य पतञ्जलिकारिकोपरि विद्यते। उणादिसूत्रेषु ये शब्दा विवेचितास्तेषां सर्वेषां सङ्कलनमुणादिकोशेऽस्ति।

लिंगानुशासनवर्गः

प्राप्तिस्थानम् - श्री मुकुन्दशर्मा, मुकुन्दाश्रमः ज्योतिस्तत्त्वकार्यालय, पो. ऑ. अमोल गढ़वाल, उ. प्र.

भारत — शासनशिक्षामन्त्रालयदत्तद्रव्यसाहाय्येन सुश्लक्ष्णपुष्टकर्गदे सुव्यक्तस्पष्ट—मुद्राभः मुद्रितं ग्रन्थिकर्त्रा प्रकाशितमिदं पुस्तकम् संस्कृतविदुषां सन्तोषाय प्रभवति। अत्र पुंलिङ्गानुशासनं स्त्रीलिङ्गानुशासनम्, नपुंसकलिङ्गानुशासनम् पुंस्त्रीलिङ्गानुशासनम् पुन्नपुंसकलिङ्गानुशासनम्, स्त्रीनपुंसकलिङ्गानुशासनम्, त्रिलिङ्गानुशासनम् अभिधेयवल्लिङ्गानुशासनं, लिङ्गानुशासनपरिशिष्टम पुस्तकोद्धृतग्रन्थादीनां नाम्नां सूची, शब्दानुक्रमणिका-टिप्पणीस्थ - शब्दानुक्रमणिका शुद्धिपत्रम्, स्वनामतः प्रसिद्धकोशानां नामावली, कोशकारतामतः प्रसिद्धकोशानां नामावली, द्वित्रिप्रणेतृनिर्मितानां कोशानां नामावली, निघण्टुनामावली प्रणेतृनामतः प्रसिद्धानां लिङ्गानुशासतानाम् नामावली अमरटीका—काराणां नामावली, ग्रन्थकारविरचितग्रन्थनामावली प्रभृतिप्रकरणविवेचना वर्त्तते अत्युपयोगितोऽस्य-ग्रन्थस्य मूल्यम् संस्कृतविदुषामार्थिक — दशानुकूलञ्चेत् स्यात् तदा समीचीनं भवेत्। ग्रन्थस्यास्य विषये केन्द्रसंस्कृतमण्डलस्य भूतपूर्वसदस्यानां विद्याभास्कराणां महामहोपाध्यायानां श्री परमेश्वरानन्दानां निम्नोद्धृत सम्मतिः सर्वथार्थगौरवमावहति।

"काचनजातिः किमपि राष्ट्रं वा यथायथोन्नतिपथमारोहति तथा-तथास्या अस्य वा वाङ्मयमप्युपक्रमते। वाङ्मयवृद्धौ तद्भाषाशब्दानामपि वृद्धिर्नैसर्गिकी। नवनवार्थेषूदीयमानेषु नवनवास्तद्वाचकाः शब्दा अपि उदयन्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्थं क्रमेण शब्दसागरे परिवर्धमाने तदवगाहनसौकर्याय च कोषा अप्याविर्भवन्ति । अतिपुरातने वैदिककाले निघण्टुनामानः शब्द-कोषा आसन् । इमे, कोषाः एकदेशिनः केवलं वैदिकानेव शब्दान् समगृह्णन् न पुनरलौकिकानपि । तदनुक्रमेण लौकिकभाषाशब्दसंग्राहका अपि निरमियत, इयं तदानीन्तनी लौकिकभाषा देवभाषा आसीत् यां वयमिदानीं "संस्कृतम्" इत्याचक्ष्महे ।

इमे संस्कृतभाषाशब्दकोषा अर्थान् वर्गान् प्रकल्प्य तत्क्रमेणैव पद्येषु व्यरच्यन्त, न पुनराधुनिकशैल्या अथवर्गप्रक्लृप्तिमकृत्वा उदर्थंश्रृङ्खलम् आकारादिवर्णक्रममाश्रित्य । वर्गक्रमेण निर्मितेषु कोशेषु एकार्थवाचका शब्दाः एकत्रोपलभ्यन्ते । तेन लेखकैः प्रसंगोपयोगिशब्दानां विचयः साधु शीघ्रञ्च कर्तुं शक्यते वर्णमात्रक्रमेण प्रणीतेषु कोषेषु तु समानार्थानां शब्दानां यत्र तत्र विकीर्णत्वात् एकत्रानुपलम्भात् तथा कर्तुं न पार्यते । शीघ्रं शब्दार्थमात्रजिज्ञासा शान्तयै तु वर्णक्रमेणैव रचिता कोशा उपयोगिन इति निर्विवादम् ।

अद्यत्वे वर्गक्रमेण ग्रथिता अमर-केशवयादव -हलायुधत्रिकाण्डशेषादयः त्रिंशत् पञ्चत्रिंशाः संस्कृतशब्दकोशाः उपलभ्यन्ते सर्वेऽपि लघुकायाः सन्ति । व्याडिर्नाम कश्चित् प्राचीनो विद्वान् लक्षश्लोकात्मकं संस्कृतभाषाकोशं निर्ममे इति श्रूयते, परं न स इदानीमुपलभ्यते पातञ्जले महाभाष्ये चर्चितः संग्रहनामको व्याकरणग्रन्थोऽपि व्याडिनैव कृत इति शब्दशास्त्र-विदो विद्वांस आहुः, सोऽपि च ग्रन्थो लक्ष - श्लोकात्मकः एव चाद्यत्वे नाप उपलभ्यते लक्षसंख्याप्रियाविमौ कोशकार-संग्रहकारावुभावपि । व्याडी किमेकैव व्यक्तिः ? उत द्वे व्यक्ती ? इति न निश्चित्य वक्तु शक्नुमः ।

अलमनया अप्रकृतचिन्तया, प्रकृतमनुसरामः । अमरविश्वादयः कोषाः अत्यल्पशब्दधना न कवीनाकृष्टुं क्षमाः, शब्दकल्पद्रुमादयो बृहत्कायाः कोषा अपि वर्गक्रमेणाप्रणीतत्वात् न कवीन् न वा लेखकान् आकर्षन्ति — इतिकञ्चन विपुलशब्दराशि संग्राहकं पद्यात्मकं वर्गक्रम- वन्तं कोषं विरचयितुमनसः ज्योतिर्विदां मूर्धन्याः नैकेषां लघीयसां महीयसां च ज्योतिःग्रन्थानां प्रणेतारः गढ़वाल मण्डलान्तर्गतसुरतरङ्गिणीतीर — विराजित-खण्डग्राम—वास्तव्याः द्विजकुलजेगीयमानयशश्चक्रबालवड़ेथवालवंशविभूषकाः श्रीमुकुन्दपादारविन्दमधुव्रताः विद्वद्गणगीतमहिमानः श्री मुकुन्दरामशर्माणः त्रिंशद् वर्षाण्यविरत परिभ्रम्य अद्य यावदुपलब्धान् सर्वान् निपुणमधीत्य वृद्ध वपुषं मुकुन्दकोषं विरचितवन्तः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



रक्षक पुरुषः चौरं सहित्वा मार्गे अगच्छत् । चौरेण अभितम् श्रीमन् । तिष्ठ अहं सत्वरं धूम्रवर्त्तिका क्रीत्वा आगच्छामि । रक्षक पुरुषेणोक्तम् — माम वञ्चसि त्वं अत्र तिष्ठ अहं क्रीत्वा आगच्छामि ।

●

एकेन वृद्धेन छात्रमपृच्छत् छात्रः त्वं कस्यां कक्षायां पठसि । छात्रेणोक्तम्-श्रीमन् अहं स्नातकोत्तर कक्षायां पठामि । वृद्धेन पुनरोक्तम् त्वं माध्यमिक कक्षा उत्तीर्णः न—वा ।

●

पुत्रः— जननी ! अद्य अहं विद्यालयं न गमिष्यामि ।

जननी किमर्थं ?

पुत्रः जननी ! चन्द्रवासरे शिक्षकेन अपाठयत् यत् चत्वारा, चत्वारः अष्ट भवन्ति । भौमवारे अपाठयत् षष्ठ द्वौ अष्ट भवन्ति । अद्यश्च अपाठयत् सप्त—एकः अष्टभवन्ति । अतः यावत पर्यन्तं शिक्षकः न अनिष्चयत् अहं विद्यालयं नैव गमिष्यामि ।

●

रूग्णः वैद्यराज । कियन्तं कालं मामू इमानि कटुतीक्ष्णकषायक्वाथान पाययसि भवान्, कदाहं सुस्वादुमधुरं भोजनं भक्ष्ये ?

वैद्य :— यावदिम अशेष शुल्कं न दास्यति ।

●

— शशि कान्त शर्मा
आचार्य, ओ. टी. रिसर्च स्कालर
रा. मा. विद्यालय हारसी
जि० कांगड़ा (हि. प्र.)

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मै पाणिनये नमः

आचार्य श्यामलाल शर्मा
व्याकरणाचार्य एम. ए. संस्कृत,

नाविदितमस्ति केषाञ्चिदपि विषश्चितां यत् संस्कृतभाषा अखिलभारतीय-भाषाणां जननी अस्ति। संस्कृतभाषा सर्वेषां जननी, अतः जननीव समादरणीया अस्माभिः। अस्याः भाषायाः व्याकरणं सर्वभाषाव्याकरणेषु सूत्रात्मकं पाणिनिना प्रोक्तं पाणिनीयं व्याकरणं एव सर्वाङ्गपूर्णमुपलभ्यते। यद्यपि अस्माकं धार्मिक-प्राचीनग्रन्थेषु नव व्याकरणानां उल्लेखो मिलति। यथा रामायणस्योत्तरकाण्डे—"सोऽयं नवव्याकरणार्थवेत्ता"। गीतासार नामके ग्रन्थेऽपि नवव्याकरण चर्चा निरूपितमस्ति। यथा—

गीतासारमिदं शास्त्रं गीतासारसमुद्भवम्।
अत्र स्थितं ब्रह्मज्ञानं वेदशास्त्रसमुच्चयम्। ।५५।

अष्टादशपुराणानि नव व्याकरणानि च।
निर्मथ्य चतुरो वेदान् मुनिना भारतं कृतम्। ।५७।

तत्र जायते जिज्ञासा यत् किं नामकास्ते नव व्याकरणग्रन्थाः? श्री तत्व विधि नामके वैष्णव ग्रन्थे सुस्पष्टमेव भणितमस्ति। यथा—

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्। ।।इति।

एषु सर्वेषु संस्कृतभाषायाः व्याकरणेषु महर्षि पाणिनिः एव सुपरिचितः सर्वाधिकख्यातिप्राप्तो महान् विवेचको विद्वानासीत्। पाणिनिः कथं उच्यते? इति विषये व्याकरणमतं इत्थं वर्तते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पणोऽस्यास्तीति पणिः। (पणम् वा पणिः) तस्यापत्यं पुमान् पाणिनः। पणिनस्य पणे वा गोत्रापत्यं पाणिनिः। इति व्युत्पत्यानुसारं पाणिनेः पितुर्नाम पणिनः, माताचास्य दक्षकुलोत्पन्ना दक्षस्य कन्या दाक्षी आसीत्, पाणिनेर्गुरोर्नाम आचार्य उपवर्ष आसीत्, महेश्वरोऽप्येकोऽस्य गुरुः श्रूयते। व्याडिरस्य मातुलः। छन्दशास्त्रस्य प्रणेता पिङ्गलश्च कनीयान् भ्राता।

स्कन्द पुराणे स्पष्टमेव प्रतिपादितं अस्ति यत् पाणिनिना हि हिमालयस्य गोमन्त पर्वते तपस्तप्तं, तपः प्रभावादेव वैयाकरणेषु प्रमुखता प्राप्ता-यथा—

गोपर्वतमिति स्थानं शम्भोः प्रख्यापितं पुरा।
यत्र पाणिनिना लेभे वैयाकरणिकाग्रता। इति॥
(अरुणाचल महात्म्यस्योत्तरार्धे – २-६८)

अनुमियते यत् पाणिनेरनेकेऽन्ते वसन्त आसन्। तस्य कुलमपि अत्यन्तं सुसमृद्धमासीत्। तेन व्याकरणाध्येतृभ्यः छात्रेभ्यो भोजनस्य व्यवस्थाऽपि कृतासीत्। तत्र विद्यया सह भोजनमपि लभ्य स्मः। इत्यस्य तात्पर्यमुद्घोषितु महामुनि पतञ्जलिना स्वकीये व्याकरण महाभाष्ये—यत् – "ओदनपाणिनीया" १-१-७३। भारतीयभाषानां सूक्ष्मविवेचन परिपक्क ज्ञानस्याद्भुत प्रतिभायाश्च पाणिनीयं व्याकरणमनुपमं विद्यते। एतेनामरवाणी परमं गौरवान्विता। विश्वेऽस्मिन् कस्यापि भाषाया एवंविधं सुव्यवस्थितं परिष्कृतं च व्याकरणं नाद्यावधि समुपलभ्यते अस्माभिः।

किं विस्तरेण – उग्रतपसा समाराधितं महेश्वर प्रसादिकृतं पाणिनियव्याकरणमेव मूर्धन्यतमो वर्तते सर्वेषु व्याकरणेषु इतितु सुनिश्चितम्। पराशरीय पुराणे उक्तञ्चापि यत्—

पाणिनीयं महाशास्त्रं पदसाधुत्व लक्षणम्।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन॥ इति॥

कस्यापि व्याकरणस्य सम्पूर्णतायै पञ्चाङ्गानि अपेक्षितानि भवन्ति। (१) सूत्रपाठः (२) धातुपाठः (३) गणपाठः (४) उणादि पाठः (५) लिङ्ग पाठः। पाणिनियं व्याकरणं सर्वप्राचीनं पुष्टं व्यवस्थितं चास्ति। परं खेदस्य विषयोऽयं यत् पाणिनेः जीवनवृत्तं नोपलभ्यते अन्यत्, मात्र पञ्चतन्त्र नामके नीति ग्रन्थे प्रसङ्गतः कस्माच्चित् प्राचीन ग्रन्थात् पद्यमेकं उद्धृतमस्ति, येन पाणिनेः जैमिनेः पिङ्गलस्य च मृत्युकारणमुल्लेखो वर्तते। तद्यथा-

सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः
मीमांसाकृत मुन्ममाथ सहसा हस्ती मुनिं जैमिनिम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

Digitized by Arya Samaj Foundation Chennai and eGangotri

छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलम्,
अज्ञानावृत चेतसां मतिरुषां कोऽर्थस्तिरश्चां गुणैः । इति ॥

किं अति बाहुल्येन–पाणिनेः व्याकरणं हि संस्कृत भाषाशिक्षाया अपूर्वसाधनं अस्ति । अस्य समक्षे नेदानीमपि विश्वस्य कस्यापि भाषायाः व्याकरणं अग्रे गता । भगवतः पाणिनेः व्याकरणस्य स्थानं संस्कृतजगति सर्वोत्कृष्टतमं वर्तते ।

अष्टाध्यायी नामकस्यास्य ग्रन्थस्य तावत्पर्यन्तं अस्तित्वं स्थास्यति यावत्कालं विश्वेऽस्मिन् संस्कृतस्याध्ययनाध्यापन प्रवाहो प्रचलिष्यति । अष्टाध्याय्यां चतुःसहस्राणि सूत्राणि सन्ति । तथाचेयमष्टसु अध्यायेषु विभक्ताऽस्ति, यत्र प्रत्येकं चत्वारः पादाः सन्ति ।

पाणिनिः प्रथमो वैयाकरणोऽस्ति येन लौकिक संस्कृत भाषायाः अपूर्वं विश्लेषणं कृतं भगवतः शिवस्य अपार कृपया । भगवत् आशुतोषस्य (शिवस्य) प्रसादेन लुप्तप्राय अस्य माहेश व्याकरणस्य चतुर्दश प्रत्याहारसूत्राणि अधिगतानि । एवं पाणिनिना प्रत्याहारसूत्राणां रचना न कृता, अपितु माहेश्वर प्रसादादेवतानि लब्ध्वा तदाधारेण स्वं व्याकरणं प्रणीतम् । माहेश्वर व्याकरणस्य चतुर्दश प्रत्याहारसूत्राणि संप्राप्य पाणिनिना अष्टाध्यायी सूत्राणि निर्मितानि । किं बहुना–पाणिनीय व्याकरणस्य साक्षाद् सम्बन्धो माहेश्वर सम्प्रदायमधिकृत्यैव वर्तते । तद्यथा–"इति माहेश्वराणि सूत्राणि अणादि संज्ञार्थानि" इति सुस्पष्टम् । अस्य विषये किंवदन्त्यपि साहाय्यं तनोति । यथा—

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुं कामः सनकादि सिद्धानेतद्विमर्शे शिवसूत्र जालम् । इति ।

इत्थं माहेश्वराणि चतुर्दशप्रत्याहारसूत्राणि एव पाणिनेरष्टाध्याय्याः प्रमाणभूतानि सन्तीति निर्विवादम् । अतः अष्टादश सूत्राणि अनादिदेव निर्दिष्टानि सन्तीति सुस्पष्टम् । भर्तृहरित आरभ्यः भट्टोजिदीक्षितपर्यन्तं सर्वेषां वैयाकरणानां मतमस्ति यदिमानि प्रत्याहारसूत्राणि महेश्वर कृपया लब्धानि पाणिनिना । किं बहुनाशिक्षायामप्युल्लिखितमस्ति यत् एतत् व्याकरणमूलभूत चतुर्दश सूत्राणि परमकारूणिकेन माहेश्वरेण पाणिनये उपदिष्टानि सन्ति —

येनाक्षर समाम्नाय मधिगम्यमहेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः । इति ॥

— श्री वसिष्ठ संस्कृत विद्यापीठ
तुङ्गेश पत्रालय चयोग, जिला शिमला
(हि० प्र०)

—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अखण्डानन्दस्तवः

चक्रधारी शास्त्री साहित्याचार्यः
कल्पद्रुम सम्पादक।

१ अखण्डानन्दरूपाय गुरवे परमात्मने ।
दण्डिने स्वामिने तस्मै वयं कुर्मो नमो नमः ॥
२ यः पूर्वं काश्यां जातस्तत्रैव कृतवास्तवः ।
विद्याभ्यासं पुनः कृत्वा विचचार महीतले ॥
३ कल्याण, विविधान् विषयान् शास्त्रीयान् सुविचारणः ।
लेखयामास वर्षाणि यावद्गार्हस्थ्यमाचरत् ।
४ गार्हस्थ्ये निष्ठां त्यक्त्वा वीतरागः जितेन्द्रियः ।
शान्तनुः व्रजभूमौ सः विचचार वने वने ।
५ उड़ियानामसंस्थाने पुनर्निर्माय वाटिकाम् ।
कुटीमेकां च निर्माय संन्यासव्रततत्परः ॥
६ लब्धवान् दण्डसंन्यासं शंकराचार्यपीठतः ।
श्रीमद्भागवतादेशं श्रावयामास कानने ॥
७ आनन्दकाननं तत्र रचितं व्रजधामनि ।
ज्ञान विज्ञानसहितमुपदिष्टं महात्मना ।
८ नैतादृशो महावक्ता दृष्टो नाद्यावधि श्रुतः ।
यादृशोऽखण्ड स्वामी सः भारते समुपागतः ।
९ उपनिषदां च यज्ज्ञानं यच्च भागवतोद्भवम् ।
तत सर्वं कण्ठे न्यवसत् तस्याखण्डस्वामिन ॥
१० वहूनां निजग्रन्थानां प्रकाशनमपि कृतम्
मुम्बय्यां धर्म विस्तारः वहु वर्षाणि वै कृतः ॥
११ विपुले, मलवाराख्ये सिन्धुधामसमाह्वये
न्यवसद् वहुवर्षाणि भक्तिज्ञानप्रसारकः ।
१२ यदा ज्ञानं प्रवदति भक्ति चापि प्रयच्छति
विद्वांसो मुग्धाः यान्ति नित्यश्रवणतत्पराः ॥
१३ अद्य भारतवर्षोऽयं ज्ञानभक्तिप्रसारकम्
तत्याज स्वामिनं शान्तमखण्डानन्द रूपिणम् ।
१४ व्रजभूरद्य विरक्ता जाता विबुधाः निराश्रयाः सन्तः
उड़ियास्थानं शून्य शून्याः शून्याः व्रजारण्यविहाराः ।
१५ चक्रधारी कविरार्त्तः गुरुविच्छेद वियोग हृतशान्तिः
गुरुरद्यासौ ब्रह्मीभूतो यातः व्रजे हृतक्लान्तिः ॥

– नूरपुरम् कांगड़ा हि. प्र.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शान्तेः नोबलपुरस्कारः

डा० लेखराम शास्त्री

१९८९ तमे वर्षे शान्तेः नोबलपुरस्कारः दलाईलामा महाभागाय दास्यत इति ओस्लो नोबलसमित्या समुद्घोषितः । वार्तया अनया विश्वस्मिन् सहसा समुल्लासः समुत्पन्नः । समितेः प्रस्तावस्यायं निरन्तरं तृतीयं वर्षमासीत् । अस्मै महामहिम्ने पंचपंचाशतसहस्राधिकं चतुर्लक्षं अमेरिकीयडालराणि सम्मानरूपेण समर्पयिष्यन्ते । समित्यनुसारं दलाईलामामहाभागेन अहिंसाशान्तिभ्यां त्रिविष्टपस्य स्वातन्त्र्याय उल्लेखनीयं कार्यं विहितम् । गतवर्षे अमेरिकायाः संसदि अनेन संधिप्रस्तावः प्रस्तुत आसीत् । अस्य आशय आसीत् यत् त्रिविष्टपं चीनदेशस्य स्वायत्तशासितं राज्यं स्यात्, विदेशविभागश्चास्य चीनाधीन एव स्यादिति । समितिः प्रशस्तिपत्रे समबोधयत् यत् अयं महानुभावः अन्ताराष्ट्रिय विवादानां, मानवाधिकाराणां विश्वपर्यावरणस्य च समस्यानां समाधानाय रचनात्मकान् प्रस्तावान् प्रस्तुतवान् । त्रिविष्टपस्वातन्त्र्यार्थं सः सदा हिंसायाः विरोधमकरोत् । सः त्रिविष्टपसंस्कृतेः संरक्षणाय परस्परसम्मानाश्रितस्य शान्तिपूर्णसमाधानस्य प्रस्तावमकरोत् ।

दलाईलामा महाभागस्य जन्म १९३५ ईसव्यां अभवत् । अस्य बाल्यं नाम तेनजिन ग्यात्सो आसीत् । अयं तथा चास्य एकलक्षसंख्यकाः समर्थकाः १९५९ ईसव्यां त्रिविष्टपात् भारतं प्रत्यायाताः । अत्र एते हिमाचल प्रदेशस्य धर्मशालानाम्नि नगरे निर्वासितस्य सर्वकारस्य स्थापनाञ्चकार । महात्मागान्धिवत् सः त्रिविष्टपदेशे लोकतंत्रस्य स्थापनार्थं काञ्चिदपि राजनीतिकं भूमिकां त्यक्तुकामः विराजते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्थानस्य प्रकाशनानि

१. भारती स्तोत्रम् सटीकम्
२. सहस्रशीर्षा सूक्तम् सभाष्यम्
३. वेदान्त प्रश्नोत्तर माला
४. विष्णुस्तोत्रम् सटीकम्
५. शान्तिसुखसोपान
६ ध्यान साधना
७. संस्कृत कोशवाङ्मयस्य सामान्य परिचयः ।
८. सूनृता (काव्यम्)
९. पथ्यापथ्य विनिर्णयः (आयुर्वेदस्य)
१०. हिमाचल प्रदेशे संस्कृतस्य प्रसारो विकासश्च ।
११. दिव्यज्योति. संस्कृत मासिकम् १९५६ तः अविरतं प्रकाशते ।
१२. फलादेशकल्पतरुः (ज्योतिष ग्रन्थः, हि. अं. टी. युतः)
१३. झञ्झा (नाटकम्)
१४. वैजयन्ती काव्य (हिं.)
१५. विचारामृत १-२ भाग (हिं.)

मुद्रणालयस्थानि

१. गान्धी वचनामृतम् ।
२. अथर्ववेदस्य दुर्लभखण्डम्
३. आप्लवशकटिकम् (नाटकम्)
४. प्रबुद्धभारतम् (संगीतिका)
५. सुधा (संस्कृतगीतानि)
६. वैद्यकल्पतरुः
७. कक्षपुटम्
८. शिवप्रोक्त कायाकल्प विज्ञानम्
९. रसायनतन्त्र विज्ञानम्
१०. वृत्त रत्नावली
११. तीन एकांकी (हिं.)
१२. आचार्य जी के पत्र (हिं.)
१३ मधुरिका (खण्डकाव्य)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R.N. 6384/57 Registered No. 10

त्वर्यताम् त्वर्यताम् त्वर्यताम्

★★★ ★★★ ★★★

जातक फलादेशस्य दुर्लभो ग्रन्थः

फलादेश कल्पतरुः

राष्ट्रपतिसम्मानितप्रख्यातविद्वान्सेवानिवृत्तप्राचार्य श्रीमदाचार्य-दिवाकरदत्तशर्मप्रणीतो हिन्दी-आङ्ग्लटीका सहितः चिरप्रतीक्षितः फलादेशकल्पतरुः प्रकाशितोऽभूत् ।

अस्मिन् ग्रन्थे द्वादशभावफलम्, दशाफलम्, आधुनिकाः शुभाशुभयोगाः, नारीणां जातकफलम्, सन्तानप्राप्तिबाधानिवारणप्रयोगाः, अनिष्टदशाफलशमनोपचाराश्च निर्दिष्टाः ।

सोऽयं ग्रन्थः श्रीमदाचार्यपादानां चत्वारिंशद्वर्षाणां ज्योतिषशास्त्रसेवाया अनुसन्धानपूर्णानुभवस्य च दुर्लभा कृति विद्यते ।

स्वनामधन्यानां श्रीमार्तण्डपञ्चाङ्गप्रवर्तकानां विश्वविख्यात ज्योतिर्विदां श्रीमदाचार्यमुकुन्दवल्लभ मिश्र ज्योतिषाचार्य महाभागानां प्राक्कथनेन च समलङ्कृतः ।

महर्घतावशात्स्वल्पा एव प्रतयो मुद्रिताः । मूल्यमपि केवलं कर्गलमुद्रणादिव्ययपूरकं डाकव्ययसहितं सप्तति (७०) रूप्यकाणि निर्धारितम् । फलादेश कल्पतरोः भारते विदेशेषु च, दैवज्ञैरपूर्वं स्वागतं कृतम् स्वल्पाः प्रतयः अवशिष्टाः सन्ति । द्वितीय संस्करणप्रकाशने विलम्बो भविष्यति । मूल्यं निम्नसंकेते धनादेशद्वारा प्रेष्यताम् ।

सचिव, संस्कृत शोध संस्थान, भारती विहार,
मशोबरा शिमला-७
171007 (हि. प्रदेश)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

संस्कृतस्य सचित्रमासिकम्

प्रधानमन्त्रिपदभारग्रहणानन्तरं मया प्रायेण सर्वविधसंस्थाभिः सह सम्बन्धः समापितः परन्तु अ. भा. संस्कृत सा. सम्मेलनस्याध्यक्षतां निर्वहिष्यामि ।

— श्री लालबहादुर शास्त्री
भा. पू. प्रधानमन्त्री

शिमला जनवरी, १९६०

वर्षम् २०

अंकः ४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमः

क्र.	विषय	लेखक	पृष्ठ
१	संस्कृत कोशवाङ्मयम् (क्रमशः)	प्रो. केशव शर्मा, सम्पादकः	१
२	विषकुम्भं पयोमुखम्	पिपठिषुः संस्कृतप्रचारकमिति पत्रतः साभारम्	२१
३.	दिवङ्गतः सच्चिदानन्दो	डा. रूपनारायणपाण्डेयः रा.इ का. नैनीतालम्	२२
४.	दिव्यज्योतिः दिवं ययौ	श्री जगत्रवि शास्त्री कश्मीर	२५
५.	हिमाचल कला, संस्कृति...	हि. कला. भाषा अकादमी, संगरमल भवन- क्लिफ-एन-एस्टेट, शिमला-१	२७
६	समाचारा		२९
७.	रक्तहीना क्रान्तिः	प्रा हरिश्चन्द्र रेणापुरकरः	३१
८.	सम्पादकीयम्	प्रधान सम्पादकः	३२

दिव्यज्योतिः

हि० क० सं०भा० अकादमी प्रदत्तानुदानसाहाय्यम् । पत्रिकागतमुद्रणदोषाणां सम्पादकीयनीतिविषये च अकादमीदायित्वं नास्ति ।

हिमाचल प्रदेश – पंजाब-हरियाणा-जम्मूकश्मीर – मध्य प्रदेश – राजस्थान – महाराष्ट्र उत्तरप्रदेश शासन-स्वीकृतं केन्द्रशासनपुरस्कृतं सचित्रं संस्कृतमासिकम् ।

पत्रस्य उद्देश्यानि तथा नियमाः

सरल – सरस-सुबोध-साधनैः सर्वस्मिन् संसारे संस्कृतस्य प्रसारः, साहित्यान्तर्गतानां सकलकलानां समन्वेषणं, संसारस्य हितसम्पादनम्, एवं लौकिक - अलौकिकस्वातन्त्र्यस्य प्राप्तिः ।

"दिव्यज्योतिः" प्रतिमासं पञ्चदशतारिकायाम् (आङ्गलमानेन) प्रकाशितं भवति ।

पत्रस्य वार्षिक मूल्य ३० रु० अर्धवार्षिकं १५ रु० एकस्याङ्कस्य च रु० २-५० भवति ।

वर्षारम्भः अक्तूबर—मासतः भवति ग्राहकः कस्मादपि मासाद् भवितुं शक्नोति ।

ग्राहकैः, "सम्पादक, दिव्यज्योतिः, भारती विहार, मशोबरा, शिमला-१७१००७ हि० प्र०" इति संकेते धनादेशेन वा. शु. प्रेषणीयम् ।

परिचयः

संस्थापकाः तथा आद्यसम्पादकाः आचार्यश्रीदिवाकरदत्त शर्माणः, — दूरभाषः 78459

प्रधानसम्पादकः— आचार्य केशव शर्मा एम. ए., एम. फिल, साहित्यरत्नम् - „ 8200

सम्पादकः- श्रीमती सूनृता गौतम एम. ए. (संस्कृत हिन्दी)

दिव्यज्योतिः कार्यालयः भारती विहारः, मशोबरा, शिमला-७ (हि. प्र)

मुद्रकः प्रकाशकः—

भारतीमुद्रणालय भारती विहार, मशोबरा-१७१००७ शिमला (हि प्र.)

स्वामीः- श्रीमती आचार्य रत्नकुमारी शर्मा

जनवरी. १९९० माघः २०४६ – वर्षम्–३४ अङ्कः ४

वार्षिक मूल्यम् ३० रु०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गताङ्कादग्रे

संस्कृतकोशवाङ्मये

अस्य महाकोषस्य भागद्वयं वर्तते-पर्याय-भागश्च अनेकार्थ भागश्चेति । तत्र पर्याये पञ्चाधिकशतं (१०५) वर्गाः सन्ति अनेकार्थ भागे च द्वौ वर्गौ वैद्यकानेकार्थवर्गः साहित्यानेकार्थवर्गश्चेति ।

इत्थं सप्ताधिकशत (१०७) वर्गात्मकोऽयं महानभिधानसंग्रहोऽद्य यावत् प्रकाशितान् सर्वानप्यभिधानसंग्रहान् प्रतिशेते ।

अस्य महाग्रन्थस्य केवलमेकः पञ्चाधिक शततमोऽयं (१०५ वां) लिङ्गानुशासनवर्गः भारतशासनमस्यान्यावशिष्टान् अपि भागान् प्रकाशयितुं साहाय्यं वितरिष्यति ।

अस्मिन् लिङ्गानुशासनवर्गे हेमचन्द्राचार्यादिविरचितानि लिङ्गानुशासनानि संकलय्य ग्रन्थकृता स्वकृतया विमलाख्यया व्याख्यया सोदाहरणं व्याख्यातानि ।

ग्रन्थकर्तु -विद्वद्वरस्यास्य कोशाध्ययनमत्यन्तप्रियम् । स्वयमेवायमाह-मुकुन्दस्य प्रतिज्ञे द्वे-कोषगंगा च नत्यजेत्-इति । एतेनैव पाठका एतदनुमातुमर्हन्ति यदेतन्महाकोशप्रणयने ग्रन्थकृता कियन्मनो-योगेन कियत्परिश्रान्तं भवेदिति एतेन कोशेन संस्कृतभाषायाः तदुपनिवद्धस्य वाङ्मयस्य च श्री वृद्धिर्भविष्यतीत्यसंशयं बचः अन्ते च प्रार्थ्यते—

मुकुन्द इव लोकोऽयं मुकुन्द - विदुदीरितः ।
मुकुन्द - कोषः सततं जायतां विदुषाम्मुदे ।

अव्ययसङ्ग्रहनिघण्टुः
शाकल्यमल्लुभट्टविरचितः ।

मङ्गलाचरणम्

प्रणम्य शिरसा देवं भद्रादिनिलयं हरिम् ।
प्रशाव्ययानि कतिचित् संगृह्यन्ते यथाश्रुतम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अःस्याद्‌भेदे निषेधार्थे स्वल्पे चाप्यनृतार्थके
आस्तु सन्तापने कोपेऽप्याङ् च स्यादीषदर्थके ।
समन्ततः सर्वतोऽर्थे शोभनान्तसुधान्तयोः ।
उपान्ततः पुरोऽर्थे च स्यादाद्यर्थेऽग्रवाचके ॥

पुष्पिकाः— इति चतुर्भाषाकवितापितामहाङ्कुशाकल्यमल्लुभट्टविरचिताव्ययसङ्ग्रह निघण्टुः समाप्तः ।

कोषोऽयं चतुर्षु-अध्यायेषु पूर्यते ।

यथा—१. एकाक्षराध्यायः. २. द्व्यक्षराध्यायः. ३, त्र्यक्षराध्यायः, ४. चतुरक्षराध्यायः। अयं दक्षिणभारतीयो विद्वानासीत् । कालादिकमविज्ञातम् ।

क्रियापदनिघण्टुः

अस्य लेखकोऽप्यविज्ञातः ।

भवत्यर्थे भवत्यस्ति जायते विद्यते तथा ।
सम्पद्यते निष्पतति निष्पद्यत उदञ्चति ॥
कषत्यास्फालयति संघट्टयत्यथ सीव्यति ।
वयति व्यजते दोग्धि- जुहोति जुषते मुदा ।

अन्तिमश्लोकः

गुणाभिरामश्रीसूक्तिमौक्तिकोदरविम्बितः ।
क्रियानिघण्टुसञ्ज्ञोऽयं ग्रन्थसन्दर्भ ईदृशः ॥

पुष्पिकाः— क्रियानिघण्टुः समाप्तः ।

पुनरप्यग्रे :—

क्रीणाति जानाति पुनाति पुष्णात्यश्नाति—
मुष्णाति लुनाति चैवम् ।
क्लिश्नाति बध्नाति गृणाति मथ्ना—
त्यतश्च गृह्णाति तथा वृणीते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इतिश्नु विकरणिनः

तनोति तनुते चैव क्षिणोति कुरुतेऽपि च । अस्यैव कोशस्य या पाण्डुलिपिमद्रप्रदेशीयसर्वकारस्य प्राच्यहस्तलिखितपुस्तकागारे प्राप्यते तदनुसारं कोशोऽयं भट्टोजिदीक्षितेनसह सम्बद्धः प्रतीयते । तत्र तादृशी पुष्पिकाऽव लोक्यते ।

शब्दभेदप्रकाशः

लेखकोऽविज्ञातः । अस्य पाण्डुलिपिः खण्डिता । अस्य प्राप्तांशस्यारम्भः श्लोकाभ्यामाभ्यां भवति :—

प्रबोधमाधातुमशाब्दिकानाम्
कृपामुपेत्यापि सतां कवीनाम् ।
कृतो मया रूपमबोधशब्द—
भेदो प्रकाशोऽखिलवाङ्मयाब्धे ।।

प्रायो भवेद्यः प्रचुरप्रयोगः
प्रामाणिकोदाहरणप्रतीतः ।
रूपादिभेदेषु विलक्षणेषु ।
विचक्षणो निश्चिनुयात्तमेव ।।

विद्यादगारमारगार मपगामापगामपि ।
अरातिमारातिमथो श्रम आमश्चकीर्तितः ।।
तथा ह्यपश्यददाक्षीदित्यत्रार्थे क्रियापदम् ।
... ... — दित्यन्यत्र पदद्वयम् ।

इति शब्द भेद प्रकाशः ।

इयं पाण्डुलिपिः स. म. पु. वर्तते । मद्रप्रदेशीयसर्वकारस्य प्राच्यपुस्तकालयस्य विवरणात्मकपाण्डुलिपि अध्ययनेन ज्ञायते यत् कोशोऽयं भट्टोजिदीक्षिताय समर्पितो वर्तते ।

संस्कृतसाहित्यकोशः

कोशस्यास्य निर्माता श्री राजवंशसहाय हीरेत्युपनामा (डॉ०) अस्ति । अयं १६५५ ईशवीयाब्दात् सच्चिदानन्द (सिन्हा) महाविद्यालये बिहार-प्रदेशस्य औरङ्गाबादस्थाने प्राध्यापककार्यं कुर्वाणो विराजते । संस्कृते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिन्द्याञ्च समुत्तीर्ण— (एम ए.) परीक्षोऽयम् । सहैव विद्यावाचस्पतिरपि (Ph. D.) । कोशस्यास्य प्रणयनप्रयोजनमयं स्वयमेवामुखे ऽनेन प्रकारेण वर्णयामास ।

विगतशताब्देभ्यो भारतीयैस्तथा च पाश्चात्यविद्वद्भिः संस्कृतविषयक यदपि शोधकार्यं कृतमस्ति ततः अन्यच्च हिन्दीमाध्यमेन संस्कृतस्य यदनुशीलनं जातं तत्सर्वं संगृह्य एकस्य एवंविधस्य सन्दर्भग्रन्थस्य निर्माणावश्यकताऽसीत् - यस्मिन् अकारादि क्रमेण सम्पूर्णविषयस्य नियोजनं मूल्याङ्कनं च कृतं स्यात् । अतः संस्कृतसाहित्यकोशेनास्यैवाभावस्य सम्पूर्त्यै एव लेखकेनायं प्रयासो विहितः, विषयस्य महत्वं विशालताञ्चाकलय्य कोशस्यास्य संरचना योजना त्रिषु खण्डेषु विभाजिताऽस्ते । अस्य एकोऽपि खण्डः स्वात्मनि परिपूर्णः स्वतन्त्रश्चास्ति । प्रथमखण्डे—

संस्कृतस्य लेखकाः प्रमुखकृतयः, संस्कृत साहित्येतिहासस्य विभिन्नयुगाः, विभिन्नधाराश्च समुपवर्णिताः । द्वितीयखण्डे संस्कृतसाहित्यशास्त्रस्य विभिन्नानामङ्गानां पारिभाषिकशब्दानाञ्च व्याख्या ऐतिहासिको विकासश्च प्रदर्शितः । तृतीयखण्डोऽस्य भारतीयदर्शनशास्त्रसम्बद्धः । प्रथमखण्डस्य विषयसूची एवमस्ति-वैदिकसाहित्यम् (चत्वारो वेदाः ब्राह्मणानि, आरण्यकानि, उपनिषद, वेदाङ्गानि शिक्षाकल्पनिरुक्त - ज्योतिष व्याकरण छन्दः शास्त्राणि प्रतिशाख्यानि, अनुक्रमणी ग्रन्थाश्च) रामायणम्, महाभारतम्, गीता, पुराणानि उपपुराणानि, स्मृतिग्रन्थाः, धर्मशास्त्रम् राजनीतिशास्त्रम्, निबन्धग्रन्थाः) कामशास्त्रम्, संगीत-शास्त्रम्, व्याकरणम् कोशाः आयुर्वेदः अर्थशास्त्रम् ज्योतिषम्, दर्शनानि (चार्वाक बौद्ध - जैन - सांख्यन्यायः मीमांसा - वैशेषिक योग - वेदान्त - वैष्णव - पाञ्चरात्र - तन्त्ररूपाणि) काव्यशास्त्रम्, महाकाव्यानि, खण्ड - गीति - मुक्तक - सन्देश - ऐतिहासिक-चम्पूकाव्यानि नाट्यसाहित्यम्, गद्यसाहित्यम्, कथाकाव्यम्, प्रमुखपाश्चात्य संस्कृत विदुषाञ्च परिचयः ।

कोशस्य प्रतिपादनशैली निम्नक्रमेण वर्तते ।

१ कस्यापि विषयस्य विवरण प्रदानकाले तद्विषयक - अद्यावधिकृतानामनुसन्धानानां विशेषविवेचनानाञ्च समावेशं कृत्वा यथासम्भवमद्यतना सामग्री प्रदत्ता सन्दर्भ संकेतश्च विहितः ।

२. संस्कृतसाहित्यस्य सर्वासु शाखासु समुपलब्धांग्ल हिन्दी - ग्रन्थानां सारं समाहृत्य विवरण टिप्पण्यादीनां पूर्णतया निर्माणस्य प्रयासो विहितः ।

CC-0. In Public Domain, Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३. कस्यापि विषयस्य विवरणप्रदाने च सर्वेषामाधारग्रन्थानां - सूची प्रदत्ता वर्तते।

४. यथासम्भवमत्रानुवादकानां प्रकाशकानाञ्चापि नामनिर्देशोऽस्ति - विहितः। क्वचित् - अन्यभाषानुवादकानां नामान्यपि निर्दिष्टानि।

५. अस्मिन् - च संस्कृतस्य प्रमुखग्रन्थकाराणां, ग्रन्थानां, प्रवृत्तीनां विचाराणां प्रतिमानानाञ्च संक्षिप्तविवेचनमस्ति। गौणविषयाणां टिप्पण्यः प्रदत्ताः सन्ति नामोल्लेखञ्च विहितमस्ति।

६. उपयोगिता-दृशा ललितसाहित्यस्य विस्तृतं विवेचनं कृतमस्ति। दर्शन-व्याकरण - ज्योतिष - आयुर्वेद - संगीतस्य प्रमुखग्रन्थानामेवञ्च ग्रन्थ-काराणां परिचयोऽस्ति प्रदत्तः।

७. कोशस्यास्य माध्यमेन तदिदमपि ज्ञायते यत् हिन्दीभाषायां संस्कृतस्य सर्वासु शाखासु कति ग्रन्थाः सन्तीति।

अस्मिन् - संस्कृतलेखकानां संस्कृतग्रन्थानाञ्च समावेशो ऽकारादि - क्रमेण विहितोऽस्ति। यथा—

अकालजलदः

अयं महाराष्ट्रिय - कविचूडामणिराजशेखरस्य प्रपितामहोऽस्ति। अस्य जन्मकालः ८०० ईशवीयाव्दः। यद्यप्यस्य न कापि रचना लब्धा तथापि शार्ङ्गधरपद्धतिप्रभृति - सूक्तसंग्रहेषु अस्य "भेकैः कोटरशायिभिः" श्लोकोऽयं समुपलभ्यते। राजशेखरस्य नाटकेषु - अस्योल्लेखोपलभ्यते तथास्य सूक्ति-मुक्तावल्यामपि अकालजलदस्य प्रशस्ति वर्तते। सा चेयमनेन प्रकारेण विद्यते—

अकालजलदेन्दोः सा हृद्या वचनचन्द्रिका।
नित्यं कविचकोरैर्या पीयते न च हीयते [1]।

इन्दुलेखा

इयं किल संस्कृतस्य कवयित्री। परमस्या विषये न किमपि विशेषतो ज्ञायते। केवलमेकोऽस्ति श्लोको बल्लभदेवस्य सुभाषितावल्यां प्राप्यते—

---

१ सूक्ति मुक्तावली ४-८३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एके वारिनिधौ प्रवेशमपरे लोकान्तरालोकनम्
केचित् पावकयोगिरां निजगदुः क्षीणेऽन्हि चण्डार्चिषः ।
मिथ्याचैतदसाक्षिकं प्रियसखि प्रत्यक्षतीव्रातपं ।
मन्येऽहं पुनरध्वनीन रमणी चेतोऽधिशेते रविः ॥

अयमस्ति संकलनक्रमोऽस्य कोशस्य ।

निष्कर्षः

अध्यायेऽस्मिन् यच्छास्त्रकोषाध्ययनं प्रस्तुतं तदन्तर्गताः- आयुर्वेदज्योतिष-पुराण-व्याकरण- संस्कृतसाहित्यकोशाः प्रमुखतया समायान्ति ।

यत्रायुर्वेदकोशाः---मानवस्वास्थ्य-औषधखाद्यपेयलेह्यादिसर्वेषां पदार्थानां परिचयं प्रयच्छन्ति तत्रैव ज्योतिष -पुराणादिशास्त्रकोशा अपि तच्छास्त्रज्ञानप्रदाने महत्वपूर्णाः । व्याकरणकोशेषु शब्द चयनं काव्यभाषायां मनोहारिरूपेण मनांसि रञ्जयति शब्दशास्त्रसागरपारंगतानां विदुषाम् । कवीनां कृतेऽपि एते नितान्तमननीयाः प्रयोगार्हाश्च । एवमेव संस्कृतसाहित्य-कोशे संस्कृतविदुषां तत्कृतीनाञ्च परिचयोऽत्यन्तं महत्वपूर्णः शोधकार्यरतानां कृते च परमसाधनभूतो विद्यते ।

इति आचार्य श्री केशव शर्मणा निर्मितस्य
संस्कृतकोशवाङ्मयस्य विशेषपरिचयाख्ये
द्वितीयभागे शास्त्रकोशसम्बद्धः पञ्चमः
काण्डः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतकोशवाङ्मये
षष्ठकाण्डः
ग्रन्थ कोशाः

ग्रन्थकोषाणामपि सन्निवेशक्रमः पूर्वाध्यायानुवर्ति—एव। येषां कालः स्पष्टो वर्तते ते कालक्रमेणापरे च अक्षरवर्णक्रमेण संस्थापिताः। कोशविद्या-विकासेन सहैव ग्रन्थकोषनिर्माणारम्भो ऽभूत। प्रथमं एकस्मिन् - एव कोशे सर्वे शब्दाः यथा सम्भवं संकलनमाप्नुवन्। परन्तु इदानीं पृथक् २ ग्रन्थ-विशेषसम्बद्धकोषाः निर्मीयन्ते। एवंविधाः कोशा एवास्मिन् अध्याये वर्णिताः।

गरुड़पुराणविषयानुक्रमणी

अस्याः अनुक्रमण्याः प्रकाशनं वाराणसेयसंस्कृतविश्वविद्यालयस्य त्रैमासिक्यां सारस्वतीसुषमायां सञ्जातमस्ति। १९७२ ईशवीयाब्दीयेऽथ च मार्गशीर्षपूर्णिमायां वैक्रमीय २०२९ तमे सम्वत्सरेऽस्याः द्वितीयो भागः प्रकाशितोऽभूत् प्रथमांशश्चास्मात् पूर्वतमेऽङ्के प्रकाशमायातः। अस्याः संकलयिता पं० श्री मध्वाचार्योऽस्ति। अयं महानुभावस्तर्कतीर्थः, मीमांसा-वेदान्ताचार्यः सारस्वती-सुषमायाः सह-सम्पादकः १।

अस्यामनुक्रमण्यामपि शब्दसङ्कलनं-अकारादि-क्रमेण सञ्जातमस्ति। पूर्णं पृष्ठस्तु द्वयोर्भागयोर्विभक्तोऽस्ति। अकारादिक्रमेण मौलिकाः शब्दाः स्थूलकृष्णाक्षरमुद्रिताः सन्ति। शब्दानामर्थपरिभाषा रूपाश्च शब्दा एवमेव लघुश्वेताक्षरमुद्रिताः सन्ति। विषयसूचकशब्दानामन्तेऽङ्कानां त्रिधा लेखनम्।

यथा—

आमलकम्
अनेन विलिप्य स्नाने कृते विष्णुप्रीतिः
श्रीप्राप्तिश्च १-२१३-१२५ १२६

---

१. इदं पुराणं सात्विकम् यथा—
विष्णोः पुराणं भागवतं पुराणं सत्वोत्तमं गारुडं चाहुरार्याः।
(ग० पु० ३-१-५२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आमलकी
इयं पित्तला अनिलघ्ना च १-१७२-३५-३६
आमवातार्तिशूलम्
अस्य नाशकः - शुण्ठी गोक्षुरक्वाथः १-१७७-४२
आम्रास्थिचूर्णलेपः
सूक्ष्मकेशसाधकः १-१७६-४
आम्रास्थिमज्जामलकलेपः
केशानां बद्धमूल घन-दीर्घ
स्निग्धाद्यापादकः

इत्थमत्र प्रथमोऽङ्कः काण्डादिसूचकः द्वितीयोऽङ्कोऽध्याय सूचक स्तृतीयश्चाङ्कः श्लोकादिसूचको वर्तते ।

यद्यपि विभिन्नपुराणविषयानुक्रमणिका नारदपुराणेऽपि वर्तते परं न साकारादिक्रमेण विनिर्मिता । अतो हि विषयान्वेषणे किञ्चिदसौविध्यं तत्र भवति ।

अस्मिन् पुराणे आचारकाण्डम्; धर्मकाण्डम्, ब्रह्मकाण्डञ्चेति काण्डत्रयी विराजते । अस्यां विषयानुक्रमण्यां सहायकत्वेन संस्करणत्रयमाधारीकृतम् । प्रथमं श्री विद्यासागर सम्पादितम् कालिकाता संस्करणम् द्वितीयं श्रीरामशंकर भट्टाचार्य सम्पादितम् वाराणसी-संस्करणम्, तृतीयं श्री वेंकटेश मुद्रणालय-मुद्रितं मोहमयी संस्करणम् । कालिकाता-वाराणसी संस्करणयोराद्यं काण्डद्वयमेव वर्तते । तृतीय संस्करणं ब्रह्मकाण्डावधिकं वर्तते । गरुड़पुराणविषयानुक्रमण्यां तृतीयसंस्करणस्यानुकरणं कृतम्, यतः

१ आद्यांशं वै कर्मकाण्डं वदन्ति द्वितीयांशं धर्मकाण्डं तमाहुः ।
तृतीयांशं ब्रह्मकाण्डं वदन्ति तेषां मध्ये त्वन्तिमोऽयं वरिष्ठः ।

इति वचनात् ।

महाशिवरात्र्यां वि. सं. २०२९ तदनुसारं च ३-३-७३ दिवसे समारम्भोऽस्या अनुक्रमण्याः लेखनस्य ।

१. ग. पु. ३-१-४७-४८ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

- मत्स्यपुराणबिषयानुक्रमणी

इयं विषयानुक्रमणी-अपि संस्कृतस्य पौराणिककोशरूपा एव। अस्याः अनुक्रमण्या लेखकोऽस्ति वाराणसेयसंस्कृतविश्वविद्यालयेऽनुसन्धानसहायकः पं० श्रीरामगोबिन्द शुक्लः। अस्याः प्रकाशनं वाराणसेयसंस्कृतविश्वविद्यालयपत्रिकायां सारस्वतीसुषमायां त्रैमासिक्यां फाल्गुणपूर्णिमांके २०२९ वैक्रमाब्दे तदनुसारञ्च १९७३ ईशवीयाब्दस्य मार्चमासे १८ तिथौ सञ्जातम् क्रमशः।

अस्या अवतरणिकायां लेखकोऽनुक्रमण्या लेखनकारणमित्थमाह—

"पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिःसृताः ॥"

मत्स्य० ३-३-४ ।

इति वचनमनुसृत्य प्रथमं निर्मीयमाणासु पुराणविषयानुक्रमणिकासु मत्स्यपुराणस्येयं बिषयानुक्रमणिका भवतां करगता क्रियते। तत्रास्याः निर्माणे प्रकाशितयोर्द्वयोः संस्करणयोः समादरः कृतः। तत्र प्रथमं गुरुमण्डलग्रन्थमाला ५, (क्लाइव रोड) कालिकातातः प्रकाशितम् अपरञ्च खेमराजपुस्तकालयवम्बईतः प्रकाशितम्।

अत्र पुराण आदिराजेन मनुना सह मत्स्यस्य सम्वादो वर्तते। यथा

कथं ससर्ज भगवान् लोकनाथश्चराचरान् ।
कस्माच्च भगवान् विष्णुर्मत्स्यरूपत्वमाश्रितः ।
भैरवत्वं भवस्यापि पुरारित्वञ्च गम्यते
कस्य हेतोः कपालित्वं जगाम वृषभध्वजः ।

मत्स्य० १-७-८.

एषामेव प्रश्नानां समाधानमत्र पल्लवितं विराजते ।

यथा—

मात्स्यं कौर्मं तथा लैङ्गं शैवं स्कान्दं तथैव च।
आग्नेयञ्च षडेतानि तामसानि निबोध मे ॥

इति पद्मपुराणवचनेन तामसपुराणेष्वस्य गणना। गरुड़पुराणे त्वस्य सत्त्वाधमत्वं स्वीकृतम्। तथा च—

"सत्त्वाधमे मात्स्यकौर्मे तथाहुर्वायुं चाहुः सात्त्विकमधमञ्च"

ब्रह्मकाण्डे (१-५२)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा तथा वा भवतु। अस्य पुराणस्य धर्मशास्त्रनिबन्धेषु सर्वत्र समादरः दृश्यते। येनेदं धर्मशास्त्रज्ञानां विचारकाणाञ्चानुसन्धातॄणाञ्च महते मोदाय। मन्येऽनेन कर्मणा भगवान् व्यासोऽवश्यं तुष्टो भविष्यतीति विरमामि।"

अस्यामनुक्रमण्यां प्रतिपृष्ठं भागद्वय्यां विभक्तमस्ति। मूलशब्दाः कृष्णाक्षरेषु प्रथमं निर्दिष्टास्ततश्चाधस्तादेवश्वेतलघु-अक्षरेषु तदर्थास्तत्र सन्निवेशिताः। यथा—

अकपिः
सप्तर्षिः तामसे कल्पे ९-१५
अकल्मषः
तामसस्य मनोः पुत्रः ९-१७
अकार्पण्यम्
युक्तात्मगुणः। ५२-७-११
अकृताश्वः
संहताश्वपुत्रः, युवनाश्वादेः पिता १२-३४
अक्रूरः
जयन्तस्य पुत्रः, शैव्यस्य कन्याया रत्नायाः पतिः
अस्य पत्न्यः पुत्राश्च ४५-२८-३३

अत्रशब्दार्थानामग्रे प्रथमोऽङ्कोऽध्यायसूचको द्वितीयश्च श्लोकसूचकः। यथा ४-७३

एवं किलास्याअनुक्रमण्याः निर्माणमकारादिक्रमेण सञ्जातमस्ति। अस्या अनुक्रमण्याश्च विषयास्त एव सन्ति ये किल पुराणलक्षणेऽनुवर्णिताः। यथा

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
मन्वन्तरानुकथनं पुराणं पञ्च लक्षणम्॥

१. सर्गः- सृष्टिः सा च मानसी, प्राकृतिका शारीरिकी मैथुनी च।
२. प्रतिसर्गः- प्रलयः (खण्डप्रलयः महाप्रलयश्च)
३. वंशः- वंशः वंशानुचरितञ्च।
४. मन्वन्तराणि (काल-युग-मन्वन्तराणि कल्पाः)
५. मन्वन्तरानुकथनम्—(दान-धर्म-श्राद्ध-वर्णाश्रमेष्टापूर्तानि।)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्थं किल पुराणवाङ्मयस्य कोशसाहित्यनिर्माणकर्मणि प्रशंसार्हः प्रयासः वाराणसेयसंस्कृतविश्वविद्यालयस्यानुसन्धानसंस्थानस्य ।

इत्थमस्यां अनुक्रमण्यां शब्दानां संकलनमकारादिक्रमेण कृतमस्ति । तदिदञ्च सुविधाकरम् ।

श्री रामकोश: – खंड १, भाग १

सम्पादक प्रकाशक: – अमरेन्द्र लक्ष्मण गाडगील

श्री रामकोश मंडल, पुणे ३०

पृष्ठ संख्या २० + २६६ + २७, मूल्य ४० रु

कोश ग्रन्थ-निर्माणे महाराष्ट्रीयाणां महती रुचिः वर्तते । त्रयोविंशतिखण्डात्मकः डा श्री जयं. केतकरमहोदयैः संयोज्य संपादितः महाराष्ट्रीय-ज्ञानकोशः, पण्डितवरैः जोशीमहादेवशास्त्रिमहाशयैः संपाद्य प्रकाशमानः संस्कृति-कोशः पं० चित्राव सिद्धेश्वरशास्त्रिभिः रचिताः प्राचीन-मध्ययुगी-नार्वाचीन-कोशाः बहुप्रकारकाः संदर्भग्रन्था इति विद्वद्वर्येषु ख्यातिं गता एव । श्री गाडगील अमरेन्द्रशर्मभिः कतिपयेभ्यः वर्षेभ्यः प्राक् श्रीगणेशकोशः संपादितः अधुना तैः एव निज-गुरुपादानां पू० श्रीधरस्वामिवर्याणां प्रोत्साहनं प्राप्य षट्खण्डात्मकस्य श्री रामकोशस्य प्रकाशनसंकल्प कृतः । पूर्णतां गतेऽस्मिन् कोशे मर्यादा-पुरुषोत्तमस्य श्रीरामचन्द्रस्य संबन्धितानां सर्व-संस्कृतदेशीभाषाग्रन्थानां पर्यालोचनया समुपलब्धं श्रीरामकथेतिहास, शिल्प-मूर्ति विषयकं सर्वं इतिवृत्तं श्रीरामोपासनायाः समग्रं बर्णनं च पाठकानां हस्तगतं भविष्यति ।

आप्तप्रकाशेऽस्मिन् प्रथम-खण्डस्य प्रथमे भागे (१) नाम विभाग, (२) विषय बिभागः (३) परिशिष्टानि इति त्रयः अंशा वर्तन्ते ।

एतत् सर्वं श्रीमद्वाल्मीकिरामायणम् उद्दिश्य एव विवेचितं वर्तते । अयं भागः अभ्यासकानां हृदयानि भृशं समाकर्षयेत् इति निश्चितम् ।

११४७ सदाशिव, पुणे ३० । प्रा. ना. अ. गोटे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निष्कर्ष:

एतदध्यायान्तर्गतकोशाणामध्ययनेन एकं रुचिकरतथ्यं प्रत्यक्षीभूतम् । पूर्वतनकोशेषु विविधशब्दसङ्कलनमेकस्मिन्नेवाभिधाने यथासम्भवं क्रियते स्म । परन्तु कोशविद्याविकासेन सह-एवं विधकोशानामावश्यकताऽनुभूता-स्यात्-ग्रन्थानुसारिकोशनिर्माणं क्रियेत् । तदनुसारमेतेषां कोशानां सङ्ख्या नाधिका तथापि रुचिकरा येन ग्रन्थेन सम्बद्धा कोशा इमे सन्ति तद्विषय-कज्ञानसामग्रीजातमेषु प्राप्यत एव सुखेन सौकर्येण च । यद्यपि कोशानामेषां सङ्कलनं प्राचीनविभिन्नपद्धतिमनुसृत्य नैव जातं तथापि नूत्नाऽक्षरवर्णानु-क्रमप्रणालिरेवैतैः समनुकृता । पूर्वं ग्रन्थस्यैकस्य शब्दज्ञानाय विभिन्नकोशा-नामध्ययनमनिवार्यमासीत् । परन्तु साम्प्रतं यदि कस्यापि ग्रन्थस्य कोशः समक्षे स्यात्तु नान्यबिविधकोषाऽऽलोडनमावश्यकम् । इति महत्सुविधाकरम् । एवं विधाः कोशाः स्वल्पाः निर्माणाधीना श्च ।

इति आचार्यश्रीकेशवशर्मणा निर्मितस्य संस्कृतकोशवाङ्मयस्य विशेषपरिचयाख्ये द्वितीय-भागे ग्रन्थकोश सम्बद्धः षष्ठः काण्डः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतकोशवाङ्मये

सप्तमः काण्डः

विविधकोशाः

अस्मिन्--अध्याये ते कोशाः समायान्ति येषु संस्कृतं मुख्यं परन्तु तेन सह एक भाषा, भाषाद्वयी, त्रयी वा विविधा वा साकं सन्ति। अत्रापि पूर्ववदेव सन्निवेशक्रमो बोध्यः।

संस्कृतांग्लकोशः

कोशस्यास्य रचयिता श्री एम. एम. विलियम्सः वर्तते। अयमपि द्विभाषाकोशः। संस्कृतशब्दाः वामतः कृष्णाक्षरेषु संयोजिताः दक्षिणतश्चांग्लभाषायां शब्दार्थाः सन्ति। ध्वनिशास्त्रानुसारञ्च भारतीय - युवरूपीयसजातीयभाषाणामभ्युद्देशेन (Reference) पूर्वकमस्य कोशस्य निर्मितिर्जाता इत्थमयं कोशोऽपि महत्वपूर्णः।

आंग्लसंस्कृतकोशः

अय कोशोऽपि मोनियर विलिअम्स—(एम. ए.) महाभागेन सङ्कलितोऽस्ति। अयं महाभागः पूर्वभारतमहाविद्यालये हेलिवर्यां अध्यापक आसीत्। (Professor at the East-India College Hailay bury) इतः पूर्वञ्चायं अक्सफोर्ड-विश्वविद्यालये संस्कृतविद्वद्रूपेण कार्यमकरोत् (Formerly baden Sanskrit Scholar in the university of Oxford)

अस्य कोशस्य प्रकाशनं (East India Company) पूर्वभारतीयसभायाः संरक्षकत्वे सञ्जातम् १८५१ ईशवीयवर्षे। यद्यपि—अस्य कोशस्य निर्माणे अध्यापक एच. एच. विल्सनस्य संस्कृतांग्लकोशस्याधारो गृहीतस्तथा चान्येषामनेककोशानां साहाय्येनापि निर्माणमस्य कोश याभूत् तथापि विद्वान् अध्यापकस्तदस्य निर्माणेऽष्टवर्षाणां समयं ग्रहीतवान्। कोशकारोऽयं महता मनोयोगेन प्रा. विल्सनस्य संस्कृतांग्लकोशाध्ययनानन्तरं मनुस्मृतिं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुल्लूकभट्टकृताञ्च मनुस्मृतिटीकामथ च शब्दावलि वाग्रीतिञ्चाभ्यां ग्रन्थाभ्यां जग्राह । अस्यानन्तरं कोशकारोऽयं कालिदासस्य नाटकानि, रघुवंशस्य कांश्चिदंशानथ च रामायणं महाभारतं भट्टिकाव्यञ्च पपाठ । एवमेवायं कोशकारः (१) प्रा. बापस्य "ग्लोसारियम् संस्कृतम्" इत्यस्मात् कोशादपि सारं जग्राह । नवीनमपि संस्कृतसाहित्यञ्चायमधीतवान् । प्रा. जानसनः (२) अपि शब्दसूचिमेकां बहुमूल्यामस्मै प्रार्पयत् । प्रा. जानसनः सूचिमेनां मनोग्रन्थानामध्ययनेन, कुल्लूकभट्टस्य व्याख्यासमालोडनेन, मिताक्षराया दायभागपठनेन, विक्रमोर्वशीय शाकुन्तल मृच्छकटिक – मालतीमाधव मुद्राराक्षस-रत्नावली - उत्तरराम चरित - राजतरङ्गिणी - आदिनाटकसाहित्यस्य स्वाध्यायेन निर्मितवानासीत् । इत्थमयं द्विभाषिकोऽपि कोशः आंग्लभाषाविदुषां कृते परमलाभ-प्रदः ।

अत्र शब्दसंकलनम् रोमनलिपेर्हि-अकारादि क्रमेण विहितो वर्तते । तद्यथा –

Abased. PP. भग्नदर्पः—र्पा—र्पं । अपकृष्टः- ष्टा-ष्टं । पराभूतः ता-तं । अभिभूतः-ता त ।

Abashed. PP. लज्जितः- ता तं । त्रपितः तां तं ।

To Abash v.a. लज् in cause (लाजयति-लाजयितुन्) ह्री in cause (ह्रेपयति ह्रेपयितुम्) त्रप् in cause त्रपयति, त्रपयितुम् ।

Contractions: सं. सू.

P. P. Passive participal.

V. a-verb active.

कोशोऽयं विशालाकारे मुद्रितः । ८६० पृष्ठैरस्य कोशस्य पूर्तिः । भूमिका चास्य २२ पृष्ठेषु पूर्तिमेति । एवमयं आंग्लसंस्कृतकोशः सर्वथा महत्व-पूर्णः । कोशस्यान्ते महत्वपूर्णदैनन्दिननवीनशब्द - संवलितं परिशिष्टञ्चाप्यत्र महत्वपूर्णम् । समारम्भे च संकेतसूची ।

---

1. Professor Bapp. "Glossariam Sanskritam."
2. Professor Johnson.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्य कोशस्य निर्मातारौ स्तः स्वर्गीयः श्री चतुर्वेदी द्वारकाप्रसादः शर्मा पण्डिततारणीशझा व्याकरण वेदान्ताचार्यश्च । १३६० पृष्ठात्मकोऽयं कोशः ।

अस्य कोशस्य प्रथमसंस्करणप्रकाशनं १९२८ ईशवीयाब्दे जीवलायी—मासस्य २३ दिवसेऽभूत । द्वितीयं संस्करणं ततोऽनन्तरम् । अथास्य पश्चात् चतुर्थं संस्करणमस्य १६७३ ईशवीयाब्दे प्राकाश्यं गतः । अनेनैवास्य लोकप्रियताया अनुमानं कर्तुं शक्यते ।

कोशेऽस्मिन् शब्दसंचयनमकारादिक्रमेणैव वर्तते । वामतः कृष्णाक्षरेषु संस्कृतशब्दाः सन्ति दक्षिणतश्च हिन्दीभाषायां तदर्थाः धात्वादिनिर्देशश्चापि वर्तते यथा — १ अऋणिन् (वि०) [नास्ति ऋणं यस्य न० ब०] येन कस्मादपि ऋणं न गृहीतं स्यात् यस्योपरि कस्यापि ऋणं न स्यात्, (हि द्यामेवायमर्थोऽस्ति दत्तः कोशे) अत्र ऋ' व्यञ्जनात्मकत्वान्न-अन् प्रत्ययः । ऋ-इत्यस्य स्वरत्वे तु अनृणी प्रयोगो भवति । (एतदपि हिन्द्यामेव ।

ग्रन्थस्य समाप्तौ श्रीतारिणीश झा महाभागः श्लोकेनानेन कोशस्य वैशिष्ट्यं प्रकाशयति :—

रत्नान्यर्थमयानि यानि निहितान्यादौ हि वाचां पुरा ।
धातुप्रत्ययदुर्गमे पथि सरस्वत्या सुतस्यान्यहो ॥
अन्विष्यन्नुद्घाटयं कृततपोऽहं तारिणीशस्तथा ।
मोदाय प्रभवेद्धि कौस्तुभसमः कोशो गिरा चक्षुषाम् ॥

१९७३ ईशव्यां प्रकाशिते नवीनसंस्करणे महर्षीणां शब्दविज्ञानस्य स्पष्टीकरणस्य कार्यं कृतमभूत् परिणामतो देशस्य भाषाविषयिकामावश्यकतां जिज्ञासाञ्च विचारयता कोशकारेण संस्कृतस्य विशालशब्दभाण्डारः समन्वितरूपेण संस्थापितः । अस्मिन् संस्करणे षष्टि-सहस्रतोऽप्यधिकाः शब्दाः संयोजिताः वभूवुः ।

ग्रन्थान्ते परिशिष्टत्रयमपि प्रदत्तमस्ति । प्रथमपरिशिष्टे शास्त्रीयनैय्यायिकसूक्तिसंङ्कलनं विद्यते । उक्तीनामासां प्रयोगः स्वच्छन्दरूपेण साहित्येऽभूत् ।

द्वितीयपरिशिष्टे संस्कृतस्य कवीनां ग्रन्थकर्तॄणाञ्च परिचयोऽस्ति प्रदत्तः । अस्मिन् परिशिष्टे महर्षिवाल्मीकिव्यासानन्तरकालीन-प्रमुखकवीनामाचार्याणाञ्च सामान्यपरिचयोऽस्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयेऽथ परिशिष्टे संस्कृतसाहित्ये प्रचलितानां भौगोलिकनाम्नां संक्षिप्तपरिचयोऽस्ति।

कोशनिर्माणकाले तदिदमपि सावधानतया विचारितं यत् संस्कृतसाहित्यान्तर्गतसर्वासामन्तः कथानां तथा च तत्रत्यपात्राणां परिचयः प्रदत्तो भवेत्।

वाचस्पत्यम्, वामनशिवरामाप्टेमहाभागस्य च संस्कृतांग्लकोशोऽथ च मोनियरविलिअम्स महाभागस्य संस्कृतांग्लकोशोऽपि संस्कृतशब्दकौस्तुभस्याधारकोशाः सन्ति। अनेन कारणायं कोशो द्विभाषिकः।

पद्मचन्द्रकोशः

निर्माता म.म. श्रीगणेशदत्त शास्त्री। प्रेरकः व्ययवाहकश्च राजा राणा श्री पद्मचन्द्रः जुब्बलनरेशः। जुब्बलनामकं राज्यं शिमला नगरात्-अग्रे भवति। अत्रत्यः शासकः पद्मचन्द्रो विद्वान् विद्वत्प्रियश्चासीत्। महामहोपाध्यायानामनेन सह परिचय आसीत्। स जुब्बले राज्ञोऽस्य प्रेरणया कोशमिमं व्यरचयत्। अयं राणाऽतीवदानवीर आसीत्। एवमनुश्रूयते यद् यदा श्री शास्त्रिमहाभागोऽस्य पार्श्वे कोशस्य मुद्रणव्ययार्थमायातस्तदा कोशो रिक्त एवासीत्। रिक्तकोशमालोक्य राजाऽवोचत्, 'शास्त्रि महाभाग ? किञ्चित्कालमत्रैव स्थीयतां यावदर्थंप्रबन्धो विधीयते। द्वित्रिदिनेभ्यः कोशे धनमायातम्। राज्ञा सर्वमपि तत्तस्मै दत्तम्। कोशः प्रकाशितोऽभूत्। एतच्चरित्रं रघुकौत्सयोः कालं स्मारयति। अत एव चास्य नाम पद्मचन्द्रकोशोऽभूत्-यतोहि मुद्रणव्ययो निर्माणप्रेरणा चानेनैव राज्ञा प्रदत्ता।

कोशस्य प्रथमसंस्करणे २०००० विंशतिसहस्रमिताः शब्दा आसन्। अस्यैव च तृतीय-संस्करणे १०००० दशसहस्रमिताः शब्दाः पुनरत्र सङ्कलनमवापुः। प्रथमद्वितीयावृत्तिकायोरस्य पृष्ठसंख्या ४७५ आसीत् या वृद्धिमाप्य ६०० पृष्ठात्मिका सञ्जाता।

अस्मिन् प्रथमं वर्णानुक्रमेण स्थूल-कृष्णाक्षरेषु संस्कृतशब्दास्ततश्च हिन्दीभाषायां तदर्थाः सूक्ष्माक्षरेषु मुद्रिताः सन्ति। १९२८ खीष्टाब्देऽस्य प्रकाशनमभूत्परन्तु साम्प्रत दुर्लभोऽयं कोशः सञ्जातोऽस्ति। एवमयं व्युत्पत्तिविषयसहितः संस्कृतहिन्दीकोशो वर्तते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दार्थकल्पतरु: १

रचयिता मामिडिवेंकटार्य:

प्राप्तिस्थानम्.—

श्रीवासवीग्रन्थप्रचुरणसमिति:,

पछलीपट्टणम् (आं. प्र.)

अयं उत्तमोत्तम: संस्कृतान्ध्रनिघण्टु: अष्टादशशताब्दोत्तरभागे एकोनविंशशताब्द्यापूर्वभागे च प्रसिद्धेन पण्डितराजविरुदभाजा ग्रन्थकर्त्रा रचितोयं निघण्टु: संस्कृतभाषाया: सुसपूर्णं कोश: विराजते। अयं निघण्टुषु दुर्लभानां अनेकेषां शब्दानां अत्र उपलब्धिर्विद्यते। अस्य प्रस्यापि प्रस्तुतिं च प्रसिद्धनिघण्टुकर्ता ब्रौनमहाशयोपि अकरोत्।

अत्र च प्रथमत: नागरीलिप्यां शब्द: निर्दिश्यते, तदनु आन्ध्रलिप्या तदुच्चारण निरूप्यते। तत: अन्तर्विवरणं लिंगविशेषश्च प्रतिपाद्यते। तदनन्तरमर्थश्च संस्कृते नागरीलिप्यां निर्दिश्य तदुच्चारण आन्ध्रलिप्या अनूद्यते ततश्च आन्ध्रभाषाया: अर्थ: प्रतिपाद्यते। एतादृश्या प्रक्रियया अयं अपरिचितनागराक्षराणां आन्ध्राणां अतीवोपकरोति, त्रिभाषासूत्रबद्धानां औत्तराहाणां आन्ध्रभाषाभ्यासे अत्यन्तमुपकरोति। तेषां तु संस्कृतद्वारा आन्ध्रभाषाभ्यसने अयं अनुत्तम: अवलम्बो भवेत्। किं बहुना संस्कृतस्य संस्कृतार्थदर्शनेन सकले भारत एव न अपि तु सकलप्रपञ्चे च मान्यतां प्राप्स्यति।

अपि तु शतवर्षवृद्धस्य अमूल्यस्य अस्य कोशस्य परिशोधने, नागरीलिप्यादिप्रस्तारे च महान्तं श्रममङ्गीकृतवतां श्रीशुद्धचैतन्यस्वामिपादानां श्रीनारायणमूर्तेश्च कृते संस्कृतपण्डितप्रपञ्च एव कृतज्ञतासम्पर्क: भवति।

इदं तु विचार्यं यदत्र विनोबाभावे प्रभृतीनां केषांचन नामान्यपि परिष्कर्तृभिस्तदादरात् प्रवेशितानीति। अत्र सामान्याधुनातननिघण्टुवत् अक्षरक्रमनियम: अवलम्बित:। तेन साकं प्राचीनकोशेष्विव अन्त्याक्षरक्रम:

१ गैर्वाणी वर्ष—४ क्रमाङ्क—१, जनवरी १९६६
पृष्ठ स—२३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अक्षरसंख्या च प्रादत्ता । एतेन शब्दप्रत्यभिज्ञाने महत्सौकर्यं भवति । किं बहुना सर्वैर्गुणैः अयं कोशः संस्कृतप्रेमिणां कल्पतरुरेव ।

आन्ध्रदीपिका

अयमान्ध्रनिघण्टुः श्री मा. वेंकटार्येणैव रचितः श्रीशुद्धचैतन्यस्वामिभिः परिष्कृतः श्रीवासवीग्रन्थप्रचुरणसमित्या प्रकाशितश्च । अयमपि अनेनमहाशयेन प्रस्तुतः । अतः अतीव प्रमाणिकोयं कोशः । आन्ध्रपदानां बाहुल्येपि तत्समत्वेन वहूनां संस्कृतपदानामत्र समावेशः वर्तते । अतः अयं आन्ध्रसंस्कृतभाषयोः उपकारकः भवति ।

संस्कृत हिन्दीकोशः

कोशोऽयं छात्रीयसंस्कृतांग्लकोशस्याधारे एव संस्कृतहिन्दीभाषयो विलिखितो विद्यते । अस्य निर्माताऽपि आप्टे महाशय एव चास्ति । अस्य प्रथमं संस्करणं १९६६ ईशवीयाब्दे प्रकाशितमभूत द्वितीयं संस्करणञ्च १९६९ ईशवीयाब्दे प्रकाशमायातम् अस्य प्रकाशकः मोतीलालो बनारसीदासः, चौक, वाराणसी—१ (उ० प्र०) ।

अस्मिन् कोशे शब्दानां संयोजनमकारादिक्रमेण कृतमस्ति । किञ्चित्-स्थूलाक्षरेषु कृष्णाक्षरेषु च संस्कृतशब्दा सन्ति वामतो निर्दिष्टास्ततोऽपि लघुशुक्लेताक्षरेषु च हिन्द्यामर्थाः क्वचित् २ च व्युत्पत्तयोऽपि प्रदर्शिताः सन्ति । अन्यत् सर्वञ्च छात्रीयसंस्कृतांग्लकोशवदेवं विद्यते, तथापि तत्र त्रिविधं परिशिष्टं नास्ति यथा किल छात्रीय संस्कृतांग्लकोशे वर्तते ।

मुद्रणादिकं सर्वमपि यद्यपि शुद्धम्—तथापि अक्षराणां परमलघुता कष्टकरा प्रतीयते । १३६४ पृष्ठात्मकोऽयं ग्रन्थः ।

छात्रीयसंस्कृतांग्लकोशः
(The student's Sanskrit English Dictionary)

अस्य कोशस्य लेखकोऽस्ति श्रीवामन शिवराम आप्टे महाभागः । अस्य कोशस्य पूर्तिरनेन ईशवीयाब्दानां १८९० तमे वर्षे कृता फलवरीमासस्य १५ तिथौ पूनायाम् । परमयं कोशः संस्कृतहिन्दी - कोशरूपेण नैवास्मिन्नेव वर्षे पूर्णोऽपि तु संस्कृतांग्लकोशरूपेणास्य प्रथमा पूर्तिर्जाता । अस्य संस्कृतहिन्दी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्करणस्य प्रथमं प्रकाशनं १९६६ ईशवीयाब्दे सञ्जातम् । अस्मिन् कोशे सप्ततिसहस्रमिताः शब्दाः सन्ति ।

कोशस्यास्य लेखकस्यानुसारं कोशोऽयं छात्राणां कृते निर्मितोऽभूत् । अत एव नात्र वैदिक शब्दानामङ्कनं विहितम् । वेदेभ्यः पश्चवर्तिसाहित्यस्यैवात्र सङ्कलनमभूत् । तथापि रामायण—महाभारत—पुराण—स्मृति - दर्शनशास्त्र- गणित आयुर्वेद - न्याय - वेदान्त – मीमांसा - व्याकरण - अलंकार - काव्य - वनस्पतिविज्ञान - ज्योतिष - संगीतादिविभिन्नविषयाणां समावेशोऽत्र समजनि । वर्तमानकालीनकोशेषु स्वल्पैरेवं तादृशाः प्रयासाः विहिता यैर्जनिस्य विविधशास्त्राणां शब्दव्याख्या सम्यक्तया विहिताः स्युः । वाचस्पत्यकोशे ऽवश्यमेव तादृशाः प्राविधिकाः शब्दाः सन्ति परं तेऽपि स्वल्पदोषयुक्ताः । यस्य कोशस्य निर्माणं केवल छात्राणां कृते एव कृतं स्यात्...तस्मात्तस्यैषा आशा कर्तुं न शक्यते । कोशोऽयं - मुख्यतया गद्यकथाकाव्यनाटकयावदेव सीमितोऽस्ति । तदपि च नासत्यं यदस्मिन् व्याकरण – न्याय - विधि - गणितादि - विषयाणामनेके शब्दास्तदत्र सम्मिमिलुः । अतोऽत्र वेदवैदिकाः शब्दा नापि अवेयुस्तदाप्यस्य महत्व न कथंकारमपि स्वल्पं भवति ।

कोशस्य क्षेत्रं सीमितम्; तदिदं तु सिद्धमेव । अस्य शब्दयोजनाया इदमस्ति वैशिष्ट्यं यत्कोशान्तर्गतशब्दानां विशिष्टार्थप्रकाशकोद्धरणादि- साधिकासामग्री तेभ्यस्तेभ्य एव पुस्तकेभ्य गृहीता येषां पुस्तकानां छात्रैरध्ययनं क्रियते । सम्भाव्यते यत्कासुचिदवस्थासु समुद्धरणाण्येतानि - आवश्यकानि न प्रतीयेरन् - ततोऽपि संस्कृत छात्राणां कृते, विशेषतश्चारम्भकर्तृणां कृते समुचितपर्यायवाचिशब्दान्वेषणेऽथ च समानार्थकशब्दान्वेषणे सनिश्चयमेव परमलाभप्रदानि तानि भविष्यन्ति ।

अथापरमप्यस्य कोशस्य वैशिष्ट्यमेकं वर्तते । तच्चेदं यदस्यत्तावश्यक प्राविधिकशब्दानां, विशेषतश्च न्यायालयनाट्यशास्त्रशब्दानां व्याख्याऽस्मिन् यथास्थानं प्रदर्शिता वर्तते । उदाहरणार्थम् यथा - अप्रस्तुलप्रशंसा, उपनिषद सांख्यम् मीमांसा, स्थायिभावः प्रवेशकः, रसः, वार्तिकम् इत्यादयः शब्दाः । नाट्यशास्त्रपरिधौ साहित्यदर्पणः मुख्यो ग्रन्थः, अलंकाराणां कृते च काव्य- प्रकाशः, क्वचित क्वचिच्च चन्द्रालोकः, कुवलयानन्दः, रसगंगाधरश्चापि तदर्थं समाश्रितः । एवमेव महत्त्वपूर्णः शब्दचयः, वाग्धारा, लोकोक्तयः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विशिष्टाभिव्यञ्जकाश्च यथास्थानं कोशेऽस्मिन् द्रष्टुं शक्यन्ते । उदाहरणार्थम्-गम्, सेतुः, हस्तः मयूरः दा, कृ- इत्यादयः शब्दाः द्रष्टुं शक्यन्ते आवश्यकशब्दैः सह सम्बद्धानि पौराणिकोपाख्यानानि यथास्थानं निर्दिष्टानि । यथा-इन्द्रः, कार्तिकेयः, प्रल्हादः - विशिष्टशब्दानामेव व्याख्या यत्र तत्र प्रदत्ता यथा अतिथि —(अततिगच्छति, न तिष्ठति - अत + इथिन्. मनोरनुसारतत्र यात्रीशब्दार्थः "एकरात्रन्तु निवसन् - अतिथि र्ब्राह्मणः स्मृतः । अनित्य हि स्थितो यस्मात् - तस्मादतिथिरुच्यते ॥ मनु० ३-१०२ पुत्रः, जाया, हृषीकेशः । प्राविधिक शब्दातिरिक्तमन्यावश्यकशब्द नियोजनमप्यत्र कृतम् । काचन परमावश्यकाः लोकोक्तयोऽपि कोशेऽस्मिन् संकलिताः । कोशोऽयमधिकामुपयोगितां प्राप्नुयादिति कृत्वा-एवान्ते परिशिष्टत्रयी - अपि समुपवेशिताः । अत्र किल प्रथमपरिशिष्टे गणमात्रापरिभाषा आदिसहिता सर्वा सामग्री सन्निवेशिता वृत्तरत्नाकरस्य छन्दोमञ्जर्याश्चात्र साहाय्यं गृहीतमभूत् । माघभारविदण्डिभट्टि - आदि कविभिः प्रयुक्तानामपि छन्दसां सन्निवेशोऽत्र पश्यताम् ।

द्वितीयपरिशिष्टे कालिदासभवभूति-बाण-आदि - संस्कृतस्य-महाकवीनां कृतिपरिचया — जन्मविवरणादिकञ्चापि सम्यक्तया संस्थापितम् । एतदर्थञ्च लेखकेन (मेक्समूलर) मोक्षमूलरस्य (इण्डिया) भारतम् नामकपुस्तकादथच वल्लभदेवस्य सुभाषितावलित. साहाय्यं गृहीतम् ।

तृतीयं परिशिष्टं भौगोलिकशब्दानां संग्रहभूतम् । अस्य निर्माणार्थं (कनिंगहम्) लेखकस्य एन्श्येण्ट ज्याग्राफी) प्राचीनं भूगोलम् - इत्यस्य साहाय्यं गृहीतम् ।

'संस्कृत - मराठी - सुभाषित - कोशः'

गीर्वाणवाणीषु विशिष्ट - वुद्धयोऽपि केचन ये रसिकाः भाषान्तरलोलुपाः, तेषां कृते तुल्उपयुक्तो विभागद्वययुक्तो ग्रन्थः सत्यमेव मनोहारी । किमपि पृष्ठमुद्घाट्य, कमपि भागं पठन् वाचकः परमार्थत एव मुदं प्राप्स्यतीत्यत्र न कश्चिदपि सन्देहः । कस्या अपि भाषायाः अन्यस्यां भाषायामनुवादं कर्तुं मनस अग्रे द्वौ जटिलौ प्रश्नसंकटौ सर्वदा स्थितौ । यथार्थता, योग्यपदरचना च । किन्तु संस्कृत-महाराष्ट्र - भाषाद्वयस्यापि विदुषा अनेन ग्रन्थकारेण एतौ प्रश्नौ सम्यगुत्तरितौ । न केवलमेतत् किन्तु क्वचित् क्वचिदस्य रचना भाषान्तरस्य पारं गत्वा सर्जनान्तरं प्रतिसृष्टिरिवाभाति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषकुम्भं पयोमुखम्

पिपठिषुः

आङ्ग्लीदास्यसंलग्नैः संस्कृतैषा बहिष्कृता,
बदरिस्वादलोभेन नारिकेलं तिरस्कृतम् ।।१।।
संस्कृतसंश्रितः क्षुद्रः दृष्टः संस्कृतनाशकः,
स सर्वथा बहिष्कार्यः संस्कृतसत्रधर्मभिः ।।२।।
संस्कृता वाग्हि देवानां देवालयो हिमालयः,
संस्कृतरहितो देशो नूनं स्यादसुरालयः ।।३।।
भो ! देवा !! संस्कृतप्राणाः !!! संस्कृता दैत्यमर्दिता,
द्रुतं द्रुततरं धाव ! अमृताचान्यथा मृता ।।४।।
संस्कृतघातको लोके संस्कृतज्ञोऽपि जायते,
वियति संस्थितो मेघः सूते निम्नवहं पयः ।।५।।
विभागे संस्कृतेऽध्यक्षो विश्वविद्यालयङ्गतः,
हीनाञ्च धिक्कृतां ब्रूते संस्कृतां वै क्रमागताम् ।।६।।
मेकाले मनुते सत्यं दास्यभावविगर्हितम्,
भारतीयं किलाकृत्या त्यक्तसम्मानगौरवम् ।।७।।
आत्मबोधो न वा जातो बहुधा स्मारितोऽपि सन्,
प्रसूते कज्जलं दीपो भुक्त्वाऽपि स्नेहसौरभम् ।।८।।
संस्कृतद्रोहसंलग्नं संस्कृतलब्धजीविकम्,
वर्जयेन्मूलहन्तारं संतप्ते नकुलस्थितम् ।।९।।
भारते लब्धजन्माऽपि भारतमूलनाशकृत्,
कथं श्लाघ्यो भवेल्लोके मलीनश्चाधमो भुवि ।।१०।।
त्यजन्तु तादृशं मित्रं तत्त्वबोधविवर्जितम्,
संस्कृतनिन्दकं शिष्टं विषकुम्भं पयोमुखम् ।।११।।

— पिपठिषुः —
(संस्कृतप्रचारकमिति पत्रतः साभारम्)

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिवङ्गतः सच्चिदानन्दो हीरानन्दो वात्स्यायनः 'अज्ञेयः'

डा० रूपनारायणपाण्डेयः,

शनिवासरे चतुर्थे दिनाङ्के अप्रैलमासे भारतदेशस्य महान् साहित्यकारो ज्ञानपीठपुरस्कारभाक् राष्ट्रभाषाया अलङ्कारभूतः सच्चिदानन्दोहीरानन्दो वात्स्यायनः 'अज्ञेयः' दिवङ्गतः। तस्य महानुभावस्य संक्षिप्तः परिचयोऽत्र प्रस्तूयते।

स महापुरुष एकादशोत्तरैकोनविंशतिशततमे (१९११) खिष्टाब्दे, मार्चमासे सप्तमे दिनाङ्के उत्तरप्रदेशे देवरियाजनपदे स्वजन्मना भारतवसुन्धरामलञ्चकार। तस्य जनकः पण्डितवर्यो हीरानन्दः शास्त्री पुरातत्त्वविभागे प्राचीनलिपीनां विज्ञाताभूत्। तस्य शैशवं जनकस्य विविधस्थानेष्वाजीविकाकार्येषु संलग्नत्वात् पित्रा सार्धमेव कश्मीरबिहारमद्रासादिषु व्यतीतम्। बी. एस. सी. परीक्षामुत्तीर्य स आङ्गलभाषया एम. ए. कक्षायां प्रविष्टः क्रान्तिकारिणामान्दोलने निरतो बभूव। १९३० तमे वत्सरे गृहीतश्च चत्वारि वर्षाणि कारागारे न्यवसत्, वर्षद्वयं च सर्वकारसंयन्त्रणे चातिष्ठत्। तदनन्तरं कृषाणान्दोलनेऽपि भागो गृहीतः श्रीमता। सम्पादनकर्मकुशलेन भवता सैनिक-विशालभारत-प्रतीक-वाक्-दिनमानत्रयाप्रतीकपत्राणि सम्पादितानि। मान्येन कतिपयवर्षाण्याकाशवाणीकेन्द्रेऽपि व्यतीतानि। १९४३ तः १९४६ तमं वर्षं यावत् सेनायामपि सेवा कृता। विहरणशीलप्रकृतित्वात् अनेकदेशेष्वनेकशो विचरणमपि विहितम्।

अज्ञेयमहाभागेन यदा लेखनं प्रारब्धम्, तदा प्रगतिवादः प्रक्रान्तोऽभूत्। कविता छायावादप्रभावादुन्मुक्ता सती बाह्यजगदवलोकने प्रवर्तते स्म। प्रगतिवादिकाव्यस्यैव रूपमेकं प्रयोगवादिकाव्यान्दोलने

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रत्यफलत् । अस्य प्रवर्तनं तारसप्तकाभिधेन काव्यसङ्ग्रहेण माग्येनाज्ञेयेन विहितम् । काव्यसङ्ग्रहेऽस्मिन् सप्तप्रयोगवादिनां कवीनां कविताः सङ्गृहीताः । तारसप्तकस्य भूमिकास्य नतनान्दोलनस्य घोषणापत्रमिवाभूत् । अज्ञेयेन सूक्ष्मकलात्मकबोधेन, व्यापकजीवितानुभवेन, समृद्धकल्पनावत्या, सहजया किन्तु संकेतोपेतयाभिव्यञ्जनया परिचितभावानां नवीनान्यास्पृष्टानि रूपाणि विशदीकृतानि परम्परापोषितां राजनीतिं समुद्धारस्य सङ्क्रमणस्य च पुनरुक्तीन् उद्घोषान् च परित्यज्य तेन मानवीयजगतः प्राकृतिकस्य चापि स्पन्दनानि लोकव्यवहृतया भाषया वार्तालापे स्वगतशैल्यां च व्यक्तीकृतानि । इत्थं काव्यशिल्पे नूतनाधारा प्रवर्तिता ।

प्राकृतिकसुन्दरतायाः प्राचीनानि परम्पराप्रसिद्धान्युपमानानि विहाय नूतनानि स्वकल्पनावलोकितानि स्वीकृत्य विलक्षणानाज्ञेयेन स्वरचनासु पाठकानां मतौ प्रतिष्ठापिताज्ञेयतैव । प्रणयतत्त्वं वाल्मीकिव्यासभासकालिदासाश्वघोषभारविबाणमाघहर्षप्रभृतिभिः संस्कृतकविकबीरजायसीसूरतुलसीमीराकेशव — बिहारीभारतेन्दुहरिश्चन्द्रजगन्नाथदासहरिऔधमैथिलीशरणगुप्तजयशङ्करप्रसादसूर्यकान्तत्रिपाठिसुमित्रानन्दनपन्तमहादेवीवर्माप्रभृतिभिर्हिन्दीकविभिरपि बहुधा स्वकाव्येषु वर्णितम्, किन्तु अज्ञेयस्य धर्मं किमपि नूतनमिव प्रतिभाति । पश्यन्तु सुधियः :-

मैंने आहुति बनकर देखा —
...अपने जीवन का रस देकर जिसको यत्नों से पाला है—
क्या वह केवल अवसाद-मलिन झरते आँसू की माला है?
वे रोगी होंगे प्रेम जिन्हें अनुभव-रस का कटु प्याला है—
वे मुर्दे होंगे प्रेम जिन्हें सम्मोहनकारी हाला है,
मैंने विदग्ध हो जान लिया, अन्तिम रहस्य पहचान लिया—
मैंने आहुति बनकर देखा यह प्रेम यज्ञ की ज्वाला है।
... — ... ...
अब साधा तुझको है स्वाहा सब कुछ तप कर अंगार बने—
तेरी पुकार-सा दुर्निवार मेरा यह नीरव प्यार बने।

(पूर्वा)

(अहमाहुतिः भूत्वापश्यम् — स्वजीवितरसं दत्त्वा यद् यत्नैः पोषितम्, अपि सा केवलमवसादमलिना प्रस्रवन्त्यश्रुधारा? ते रोगग्रस्ता भवेयुः, यस्मै प्रेम भवत्यनुभवरसस्य कटुश्चषकाः ते च शवाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रमु:, यस्यै प्रेमाहित सम्मोहनकारिणी हाला। अहमाहुतिर्भूत्वापद्-यम्, अहं विदग्धः सन् ज्ञातवान्, रहस्यमवाप्तिम् प्रत्यभिज्ञातवान्-प्रेमेदमस्ति ज्वाला यज्ञस्य।...... भवो निखिलः (त्वयि समर्पीक्रियते, वरं तत्त्वाङ्गारः खलु भवतु। तवाह्वानमिव दुर्निवारं ममेदं नीरवं प्रेम भवतु।)

प्रतिभावैविध्योपेतोऽज्ञेयो न केवलं कविः, अपितु कथाकारः समीक्षकोऽध्येता, नाटककारः, पत्रकारः, चित्रकारश्चाप्यभूत्। तस्य लेखन्याभिलिखिता प्रसिद्धा ग्रन्थाः प्रणीताः—

आँगन के पार द्वार, अरी ओ करुणा प्रभामय, हरी घास पर क्षण-भर, इन्द्रधनु रौंदे हुए ये, पूर्वा, सुनहले शैवाल, कितनी नावों में कितनी बार, बावरा अहेरी, इत्यलम्, चिन्ता, पहले मैं सन्नाटा बुनता हूँ, 'शेखर' एक जीवनी, नदी के द्वीप, अरे यायावर याद रहेगा।

अज्ञेयस्य रचनाः खलु नूतनसाहित्यकारान् नूतनभावैः सम्पूरयन्त्य-चिरं यास्यन्ति। दिवङ्गतः सन्नपि सोऽस्माकं मध्ये स्वकीयग्रन्थैर्विलसति। साहित्यक्षेत्रे तस्याभावाद् अपूरणीया क्षतिर्जाता, तस्याः पूर्तिर्नावलोक्यते।

एतानि श्रद्धापुष्पाणि तस्मै समर्पयता मयायं परिचयात्मको लघुलेखः समाप्यते।

— पा. इ. का. सितारगञ्जः,
नैनीतालम्. (उ. प्र. २६२४०५)

वार्षिकशुल्कं कृपया त्वरया प्रेष्यताम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः दिवं ययौ

– श्री जगत्रबि शास्त्री कश्मीर

विश्वबन्धुर्विश्वप्राणो
विश्ववन्द्यो महामना ।
नवभारतनिर्माता सत्पुत्रस्ते वसुन्धरे ।१।

स्वातन्त्र्य – राज्यं निर्माय
स्वारुह्य च तव कृते
बलिवेद्यां प्रियाःप्राणान्
बिरलामन्दिरे जहौ ।२।

भारताङ्गल राज्यं तत् यत्रास्तं न गतो रविः ।
ग्रस्तं सोऽगमयत्सद्यः
कोटिसूर्यसमद्युति। ।३।

सत्याहिंसादिभिः शस्त्रै
र्ह्याङ्गलानां कुशासनम् ।
समाप्तिं नीतवान्सोऽयं कर्मयोगेन भारते ।४।

सुपुण्याहे सुनक्षत्रे पुरुबन्धरग्रामके,
गुर्जराख्ये पुरे धीमान् कर्मचन्द्र सुतः सुधीः ।५।

मोहनदास इति (नाम्ना) स बरमत्याश्रमेऽभूत् ।
द्वितीयेऽक्टोबरे मासे क्रिस्तेः पुण्य तिथौ भुवि ।६।

ऊनस्याधिकेऽष्टादशसंवत्सरे शते
प्रादुरासीन्महानात्मा प्राच्यां पूर्णेन्दुवाहिव ।७।

संभवेभ्यस्तविद्यो यो नीतिशास्त्रविशारदः ।
कस्तूरा बा सतीं भार्यां लेभे गाह यस्य जीवितम् ।८।

मातृभूमि विमुक्त्यर्थं सत्याहिंसाभिधं व्रतम्
चकाराभिनवां दीक्षां प्रविश्यानुचरैर्वृतः ।९

प्रजास्तम्यमिताहारो निर्जितरसनेन्द्रियः ।
कन्था कौपीन सर्वस्वो लवणेऽपि गतस्पृहः ।१०।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दलितोद्धारनिरतस्त्यक्तसर्वपरिग्रहः ।
सदाकूर्ति हृदि गृह्णन् सदाकलाश्रमे वसन् ।११।

सत्यं शौचं दया क्षान्ति स्त्यागः सन्तोषआर्जवम् ।
शमो दमः तपः साम्यं तितिक्षोपरतिः श्रुतिश् ।१२।
ज्ञानं विरक्तिरैश्वर्यं शौर्यंतेजो बलं स्मृतिः ।
स्वातन्त्र्यं कौशलं कान्तिः धैर्यं मार्दवमेव च ।१३।

प्रागल्भ्यं प्रश्रयः शीलं सह ओजो-बलं भगः ।
गाम्भीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोऽनहं कृतिः ।१४।
एते चान्ये च बहव नित्या यत्र महागुणाः ।
प्रार्थ्या महत्त्वमिच्छद्भिः नव्ययन्तिस्म कर्हिचित् ।२५।
एभिर्गुणैः समायुक्तः शृंगारणवते गतः ।
विहाय भूमिमासाद्य विरराम निजे गृहे ।१६।

विषतेच्छानय कोधः स्थितप्रज्ञो मुनिरिव ।
जवाहरगुरुः सोऽयं काश्मीराक्रमणे तदा ।
विलयं कारयामास कश्मीरं भारते स्वयम् ।१७।
पुरस्कृत्य सुनेतारं, सिंह कश्मीर संभवम्.
गणतन्त्र महापोतो मात्याऽकुलविचालितः ।१८।
भिन्न धर्मैः समाकृष्टः कांग्रेस यन्त्र वाहितः ।
कर्णधार जवाहरो कोटि सांयात्रिकंवृतः ।१९।
भारं नीतः स्वयं तेन. रामराज्य चिकीर्षुणा ।
अगाद्यो रामसायुज्यं राम राम जपन्मुनिः ।२०।

नाथूराम गोडसेन, व्याधेनैवार्जुनसखा ।
मारितः गोलिकाभिश्च जवाहरगुरुः सुधीः ।२१।
यद लीनो मातृभूः पुत्रो ज्योति दिनक्षये यथा ।
भवोऽवतारयद् भारं हिन्दु पाक् विभाजने ।२२।
साम्राज्य प्रघर्षैर्विन्यस्तं बीजं युद्धस्य भारते ।
हिन्दुपाकैः कृतंयुद्धं प्रभासे यदिवैरिव ।२३।
अष्टोत्तर नवाशिता दुसरैकोन विंशके ।
जन्वरी त्रिंशतिथो किस्तो दिव्यज्योतिर्दिवं ययौ ।२४।
यावत्सूर्यप्रभा भाति, तावद्भारतमण्डले ।
गांधी भारत संबन्धो गंगासागर संगवत् ।२५।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिमाचल कला, संस्कृति और भाषा अकादमी, शिमला- ७१००१

सूचना

१ हिमाचली लेखकों को पुस्तकों पर पुरस्कार:

अकादमी की साहित्यकार पुरस्कार योजना के अन्तर्गत पहाड़ी, हिन्दी, संस्कृत, उर्दू तथा अंग्रेजी भाषाओं के साहित्यकारों द्वारा लिखित तथा वर्ष १९८७—८९ की अवधि में प्रकाशित साहित्य, संस्कृति तथा कला से सम्बन्धित विषयों की पुस्तकों की प्रविष्टियां प्रत्येक पुस्तक की चार प्रतियों, लेखक के हिमाचल के स्थायी निवासी होने के प्रमाण पत्र सहित विचारार्थ आमन्त्रित की जाती है।

२. पुस्तकों की थोक खरीद:

वर्ष १९८७ से दिसम्बर, १९८९ तक की अवधि में प्रकाशित हिमाचली लेखकों की संस्कृति, साहित्य, कला, सृजनात्मक तथा शोधात्मक विषयों की पुस्तकों की दो प्रतियां अकादमी की पुस्तक थोक खरीद योजना के अंतर्गत सम्बन्धित साहित्यकारों—प्रकाशकों से विचारार्थ आमन्त्रित की जाती है। पुस्तकों के साथ लेखक का हिमाचल प्रदेश का स्थायी निवासी होने का प्रमाण पत्र संलग्न किया जाना वांछित है। प्रदेश से बाहर के लेखक भी हिमाचल प्रदेश से सम्बन्धित पुस्तकों को विचारार्थ भेज सकते हैं। पुस्तकों की थोक खरीद लेखकों के माध्यम से की जाएगी।

३. लघु पत्र-पत्रिकाओं को सहायतानुदान:

प्रदेश की लघु पत्र-पत्रिकाओं को प्रोत्साहन देने के उद्देश्य से पहाड़ी, हिन्दी, उर्दू, संस्कृत अथवा अंग्रेजी में प्रकाशित त्रैमासिक, अर्द्धवार्षिक, अथवा अनिश्चितकालीन साहित्यिक, सांस्कृतिक तथा कला सम्बन्धी पत्रिकाओं के सम्पादक-संचालक व प्रकाशकों से सहायतानुदान हेतु निर्धारित

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रपत्र पर आवेदन पत्र आमन्त्रित किए जाते हैं। पत्रिका का छोटा से छोटा आकार $5\frac{1}{2} \times 7\frac{1}{2}$ इंच तथा बड़े से बड़ा आकार $8\frac{1}{4} \times 10\frac{3}{4}$ इंच होना चाहिए तथा आवेदन की तिथि से पूर्व कम से कम 32 पृष्ठों की 500 प्रतियों के वार्षिक पत्रिकाओं की स्थिति में दो तथा अन्य पत्रिकाओं की स्थिति में चार अंक प्रकाशित हो चुके होने चाहिए। गत चार प्रकाशित अंकों की चार-चार प्रतियां आवेदन पत्र के साथ भेजना आवश्यक है। पहाड़ी तथा संस्कृत भाषाओं की मासिक पत्रिकाओं को भी विचारार्थ सम्मिलित किया जाएगा। निर्धारित प्रपत्र प्राप्त करने के लिए अधोहस्ताक्षरी से सम्पर्क करें।

४. अधिछात्रवृत्तियां:

अकादमी द्वारा हिमाचल के बोनाफाईड निवासी विद्वानों से हिमाचल की कला, संस्कृति और साहित्य के विषयों पर शोधात्मक कार्य हेतु एक हजार रुपए प्रतिमास की तीन अधिछात्रवृत्तियों के लिए प्रस्तावित शोध विषय की विस्तृत रूप रेखा सहित आवेदन पत्र आमन्त्रित किए जाते हैं। इन तीन अधिछात्रवृतियों के अतिरिक्त 700 रुपये प्रतिमास की दो अधिछात्रवृतियां मूर्तिकला, अष्टधातुकला, वास्तुकला, काष्ठकला तथा प्रदेश की अन्य पारम्परिक कलाओं पर शोध कार्य करने के लिये निर्धारित की गई है। इनके अन्तर्गत अधिछात्रवृति की अवधि दो वर्ष है।

उपर्युक्त क्रम संख्या १ से ४ तक योजनाओं से सम्बन्धित प्रार्थना पत्र अकादमी कार्यालय में प्राप्त होने की अन्तिम तिथि 31 जनवरी, 1990 है।

विशेष जानकारी के लिए अकादमी कार्यालय से सम्पर्क स्थापित करें।

— सचिव

हिमाचल कला, संस्कृति और भाषा अकादमी,
संगमरमर भवन, क्लिफ-एण्ड-एस्टेट, शिमला—१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्याभासः

शिमलामण्डलान्तर्गतसंस्कृतशिक्षक परिषदः निर्वाचनम्

आचार्य श्री देवराम सतीमहाभागस्य अध्यक्षतायां ९०-९१ वर्षयोः कृते जातम्—निम्नपदाधिकारिणः निर्वाचिताः—

प्रधानः सर्वश्री चेत राम भारद्वाज	...	रा. मा. पा. बडेव कोटखाई
वरिष्ठ उप प्रधानः ठाकुर लाल	—	,, सारीवासा रोहड़ू
उप प्रधानः हीरामणी	...	,, केलवी ठियोग
महासचिवः मतिधर	...	रा. उ. पा. खैरा सुन्नी
सहायक सचिवः लक्ष्मी नन्द	...	,, कुमारसैन
प्रचार सचिवः कलि राम	...	,, खुन्नी ननखरी
कोषाध्यक्षः बेली राम	...	रा. मा. पा. कुफरी शिमला
संयुक्त सचिवः हरी राम	...	,, कुगल बाल्टी
लेखाकारः अम्बादत्त	...	रा. उ. पा. रामनगर
प्रदेश प्रतिनिधि—		
सर्वश्री दुर्गादत्त शर्मा	...	रा. मा. पा. ग्रनाडेव
देवीराम सुमन	...	रा. उ. पा. माहोरी
गोबिन्द राम	...	,, फागली
केवल राम	...	,, सरोग
श्याम लाल शर्मा	—	,, ठियोग
सीता राम	...	रा. मा. पा. शांकली
वाचस्पति	—	,, श्यामलाघाट
देव राम सती	...	रा. सं. पा. क्याटूं
पमर सिंह सिगटा	—	रा. उ. पा. बैरवा
लीला नन्द	—	रा. वरिष्ठतम पा. मश्याना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हि. प्र. रा. सं. शिक्षकपरिषद् सिरमौर मण्डलम्

हि. प्र. रा. संस्कृत शिक्षक-परिषदः निर्वाचनं ५-११-८९ तिथौ श्री मित्रानन्द शास्त्रिणामध्यक्षतायां निम्न प्रकारेण जातम् —

प्रधानः श्रीयुत चन्द्रदत्त शर्मा

उप प्रधान श्रीयुत देवीचन्द शर्मा

महासचिव श्रीयुतबलिन्द्र सिंह पुण्डीर

सचिव श्रीयुत रमेश शर्मा

सहसचिव श्रीयुत गोविन्द राम शास्त्री

कोषाध्यक्ष डा० प्रेमलाल गौतम

प्रदेशस्तरीय प्रतिनिधि —

१. श्रीयुत देवीसहाय शास्त्री
२. ,, सत्यप्रसाद शास्त्री
३. ,, कृष्णचन्द्र शास्त्री
४. डा. सन्तराम पोड़

उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत

(संस्कृत छात्राः अपि I. A. S भवितुं समर्थाः)

★ अर्हता 1. न्यूनतः स्नातकान्तिमवर्षपरीक्षार्थी अथवा स्नातकः।

2. 21-26 वयःसु अवसर-त्रयम्

3. आंग्लभाषायाम् अभिव्यक्ति (लिखितरूपेण) सामर्थ्यम्।

4. गणित-भूगोल-विज्ञानेतिहास (भारतस्य विश्वस्य) राजनीतिशास्त्र-भारतीयसम्विधानादीनां सामान्यं ज्ञानम्।

★ प्रारम्भिक परीक्षा तिथिः— 10-06-90

✓ आवेदनार्थम अन्तिम-तिथिः- 30-01-90

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

★ आवेदनपत्रं- 16-12-89 दिने प्रकाशितम् ।
सूचना स्रोतः न-एम्प्लयमेण्ट न्यूज/रोजगार समाचार ।

★ प्राप्ति स्थानम्—स्थानीय-समाचार पत्र-विक्रेता अथवा रूप्यक-चतुष्टयस्य धनादेशं M.O. कुत्रापि प्रेषयत्

DELHI : M/S Panday News Agency, Distributor, Employment Behind Gulab Bhawani. Bhawn, Bahadur Shah Zafar Marg, New Delhi 110011

BOMBAY : M/s Gandhi News service, Tin wala Building, Tribhuvan Road, Bombay.

CALCUTTA : M/s K. K. Puri Newspaper Agent, 5 A, Earle Street, Calcutta 700026.

MADRAS : M/s Velvan Agencies 46, C. E. V. K. Sampath Road, Madras-600 007.

★ अग्रे मार्गदर्शनार्थं श्रीशङ्कर नारायण पाणिग्राही देयः दशरूप्यकात्मकं रेखाङ्कित— भारतीयपोस्टल- आर्डर - सह स्वकीय सान्दर्भिकीं विवरणीं विलिख्य निम्न-सङ्केते पत्रं प्रेषयतु -

---

संस्कृत - परिवारः, 119, गौतम नगरम्, नव देहली-110049

★ निवेदनम्—कृपया प्राचार्याः महाविद्यालयानां विज्ञापन-पट्टे 30-01-90 पर्यन्तं/प्रदर्शयत् ।

रक्तहीना क्रान्तिः

प्रा. हरिश्चन्द्र रेणापुरकरः

अस्मिन्महामहिमशान्तिविशालदेशे, शास्त्रैर्विनैव मतपेटिकया पुनश्च ।
क्रान्तिर्हि नूनमभवत्खलु रक्तहीना, यत्रैव पुनश्च समभूद् भुवि लोकतन्त्रम् ।१।
शोच्यां दशामतितरां निर्विशासनस्य, निष्प्रेक्ष्यद्गगनचुम्बिमहार्घतां च ।
भ्रष्टां च जीवनविधिं जननायकानां, स्पष्टं विलोक्य मतदानमकारि लोकैः ।२।
आसेतुशैलवितते निखिलेऽपि देशे, सर्वत्र शासकदलस्य विरुद्धमेव ।
बङ्गाम् विहाय मतदानमकारि लोकैः सत्तामदान्धमुखरांश्च विनेष्यमानैः ।३।
अज्ञानदैन्यदलितैरपि भारतीयैः, प्रौढैश्च राजनयतत्त्वदृशोपपन्नैः ।
स्वार्थैकदृष्टिजनदुःखपराङ्मुखानां, सम्यग् व्यधायि ननु शासनमग्रणीनाम् ।४।

(शेषोऽग्रिमांके)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

हिमाचल प्रदेशे संस्कृतज्ञेषु परस्परं सामञ्जस्याभावः

अस्माभिः—चिरात्कथ्यते प्रदेशे संस्कृतज्ञाः संस्कृताध्यापकाश्च परस्परं सम्मिल्य यावत्पर्यन्तं कार्यं न करिष्यन्ति तावत्ते रिक्तहस्ता एव भविष्यन्ति ।

देशे रजकानां, मार्जकानां वस्त्रक्षालकानां, श्रमिकानां सर्वेषां पारस्परिक-संगठनानि सुदृढानि सन्ति परन्तु प्रदेशे संस्कृतज्ञाः स्वभविष्यं प्रत्यक्षं दृष्ट्वापि तत्साधनाय, समाधानाय एकत्रिताः न भवन्ति । परस्परं विवदमाना भवन्तः मिथः अविश्वासभित्तिमुत्पादयन्तश्च स्वविनाशं प्रतीक्षमाणाः किम् कर्तव्य-विमूढाः जाताः ? अथवा कस्यामपि मोहनिद्रायां सुप्ताः अथवा कमपि विषं सेवयित्वा मूर्छिताः. अपि वा अकर्मण्याः अज्ञा वा सन्ति यतोहि एते तथा एव व्यवहारं कुर्वन्ति इति मयाऽनुमीयते ऽनुदिनम् ।

कार्यालये विश्वविद्यालयप्रभृति संस्कृतशिक्षकपरिषदः सदस्याः, संस्कृत-महाविद्यालयाध्यापकाः प्राध्यापकाश्च समायान्ति स्व स्व गाथां च कथयन्ति । अस्माकं सर्वेषां सेवायामिदमेव निवेदनमस्ति यत्ते सर्वेऽपि क्षेत्रे-ऽस्मिन् विज्ञानां सहयोगं गृहीत्वा संस्कृतस्य समुचितप्रसारविकासाय कार्यं कुर्युः ।

*

दुःखस्य विषयः

अयं किल परमखेदस्य विषयोऽस्ति यल्लोकाः स्वसमाजस्य कृते नित्यं नूतनाः सुविधाः प्राप्नुवन्ति एकयबलेन पारस्परिकसहयोगेन च परन्तु संस्कृतज्ञाः स्वहस्तगतमपि भोक्तुमनर्हाः जाताः, संस्कृत-अध्यापकैः प्राप्ता अपि सुविधाः—अकर्मण्यतया विनाश्यन्ते अत्रोदाहरणद्वयमेव पर्याप्तं भविष्यति ।

एकस्तु विश्वविद्यालयेन प्रदत्तः आचार्याणां कृते एम. फिल. परीक्षा-दानस्याधिकारः अपरश्च संस्कृतमहाविद्यालयानां कृतेऽन्यमहाविद्यालयवत्-सुविधा—स्तरादिअधिकार- यो हि प्रशासनेन स्वीकृतः लिखितरूपेण च कार्यालयेषु सर्वत्र प्राप्तः प्रेषितश्च तथा च उच्चन्यायालयेनापि - अधिकारो-ऽयं सर्वथा साधितः । एतद्द्वयं संस्कृतशिक्षकैः कथं न रक्ष्यते ।

किमु - सर्वेऽपि संस्कृत संस्थाधिकारिण - अत्र किमपि करिष्यन्ति अथवा युगानुयुगं पुनरपि पुनस्ता एव याञ्चः करिष्यन्ति याः पूरिताः सन्ति परन्तु संस्कृतविरोधिभिस्ताः समाप्तिं नीयन्ते ।

चिन्तनीयोऽयं विषयो भवद्भिः—

— केशव शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar.

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्थानस्य प्रकाशनानि

१. भारती स्तोत्रम् सटीकम्
२. सहस्रशीर्षा सूक्तम् सभाष्यम्
३. वेदान्त प्रश्नोत्तर माला
४. विष्णुस्तोत्रम् सटीकम्
५. शान्तिसुखसोपान
६ ध्यान साधना
७. संस्कृत कोशवाङ्मयस्य सामान्य परिचयः।
८. सूनृता (काव्यम्)
९. पथ्यापथ्य विनिर्णयः (आयुर्वेदस्य)
१०. हिमाचल प्रदेशे संस्कृतस्य प्रसारो विकासश्च।
११. दिव्यज्योति. संस्कृत मासिकम् १९५६ तः अविरतं प्रकाशते।
१२. फलादेशकल्पतरुः (ज्योतिष ग्रन्थः, हिं. अं. टी. युतः)
१३. झञ्झा (नाटकम्)
१४. वैजयन्ती काव्य (हिं.)
१५. विचारामृत १-२ भाग (हिं.)

मुद्रणालयस्थानि

१. गान्धी वचनामृतम्।
२. अथर्ववेदस्य दुर्लभखण्डम्
३. आप्लवशकटिकम् (नाटकम्)
४. प्रबुद्धभारतम् (संगीतिका)
५. सुधा (संस्कृतगीतानि)
६. वैद्यकल्पतरुः
७. कक्षपुटम्
८. शिवप्रोक्त कायाकल्प विज्ञानम्
९. रसायनतन्त्र विज्ञानम्
१०. वृत्त रत्नावली
११. तीन एकांकी (हिं.)
१२. आचार्य जी के पत्र (हिं.)
१३ मधुरिका (खण्डकाव्य)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R. N. 6384/57 Registered No. 10

त्वर्यताम् त्वर्यताम् त्वर्यताम्

*** *** ***

जातक फलादेशस्य दुर्लभो ग्रन्थः

फलादेश कल्पतरुः

राष्ट्रपतिसम्मानितप्रख्यातविद्वान्सेवानिवृत्तप्राचार्य श्रीमदाचार्य-दिवाकरदत्तशर्मप्रणीतो हिन्दी-आङ्ग्लटीका सहितः चिरप्रतीक्षितः फलादेशकल्पतरुः प्रकाशितोऽभूत् ।

अस्मिन् ग्रन्थे द्वादशभावफलम्, दशाफलम्, आधुनिकाः शुभा-शुभयोगाः, नारीणां जातकफलम्, सन्तानप्राप्तिबाधानिवारण-प्रयोगाः, अनिष्टदशाफलशमनोपचाराश्च निर्दिष्टाः ।

सोऽयं ग्रन्थः श्रीमदाचार्यपादानां चत्वारिंशद्वर्षाणां ज्योतिष-शास्त्रसेवाया अनुसन्धानपूर्णानुभवस्य च दुर्लभा कृति विद्यते ।

स्वनामधन्यानां श्रीमार्तण्डपञ्चाङ्गप्रवर्तकानां विश्वविख्यात ज्योतिर्विदां श्रीमदाचार्यमुकुन्दवल्लभ मिश्र ज्योतिषाचाय महा-भागानां प्राक्कथनेन च समलङ्कृतः ।

महर्घताबशात्स्वल्पा एव प्रतयो मुद्रिताः। मूल्यमपि केवलं कर्गलमुद्रणादिव्ययपूरकं डाकव्ययसहितं सप्तति (७०) रूप्यकाणि निर्धारितम् । फलादेश कल्पतरोः भारते विदेशेषु च, दैवज्ञैरपूर्वं स्वागतं कृतम् स्वल्पाः प्रतयः अवशिष्टाः सन्ति । द्वितीय संस्करणप्रकाशने विलम्बो भविष्यति । मूल्यं निम्नसंकेते धनादेशद्वारा प्रेष्यताम् ।

सचिव, संस्कृत शोध संस्थान, भारती विहार, मशोबरा शिमला-७
171007 (हि. प्रदेश)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

शिमला फरवरी, १९९०

र्षम् ३४ अङ्कः ५

संस्कृतस्य सचित्रमासिकम्

महाशिवरात्रिपर्व:

पुस्तकालय
विश्वविद्यालय
हरिद्वार

आदिदेव ! महादेव ! दीनानां परिपालक-
स्त्वमसि सर्वशास्त्राणां कलानां मूलकारणम् ॥
नमामि त्वां महाभाग ! दीने मयि दयां कुरु ।
कृपां कुरु प्रभो ! शम्भो ! दासोऽहं तव शंकर ॥

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमः

क्र.	विषया:	लेखका:	पृष्ठम्
१.	संस्कृत कोशवाङ्मयम् (क्रमशः)	प्रो. केशव शर्मा, सम्पादक:	१
२.	२६ जनवरी	जगत्रवि शास्त्री कश्मीर	२१
३.	रक्तहीना क्रान्ति.	डा. हरिश्चन्द्र रेणापुरकर: गुलबर्गा	२३
४.	सत्यं शिवं सुन्दरम्	प्रो. सुश्री सन्तोष वर्मा हरियाणा	२५
५	एव च अपि च	प्रो. निगमस्वरूप शास्त्री	२६
६	भारतस्य संस्कृत पत्रिका:	कार्यालय:	३०
७	सम्पादकीयम्	प्रधान सम्पादक:	३२

दिव्यज्योति:

हि० क० सं०भा० अकादमी प्रदत्तानुदानसाहाय्यम् । पत्रिकागतमुद्रणदोषाणां सम्पादकीयनीतिविषये च अकादमीदायित्वं नास्ति ।

हिमाचल प्रदेश—पंजाब-हरियाणा-जम्मूकश्मीर - मध्य प्रदेश—राजस्थान—महाराष्ट्र उत्तरप्रदेश शासन-स्वीकृतं केन्द्रशासनपुरस्कृतं सचित्रं संस्कृतमासिकम् ।

पत्रस्य उद्देश्यानि तथा नियमाः

सरल-सरस-सुबोध-साधनैः सर्वस्मिन् संसारे संस्कृतस्य प्रसारः, साहित्यान्तर्गतानां सकलकलानां समन्वेषणं, संसारस्य हितसम्पादनम्, एवं लौकिक - अलौकिकस्वातन्त्र्यस्य प्राप्तिः ।

"दिव्यज्योतिः" प्रतिमासं पञ्चदशतारिकायाम् (आङ्ग्लमानेन) प्रकाशितं भवति

पत्रस्य वार्षिक मूल्य ३० रु० अर्धवार्षिकं १५ रु० एकस्याङ्कस्य च रु० २-५ भवति ।

वर्षारम्भः अक्तूबर—मासतः भवति ग्राहकः कस्मादपि मासाद् भवितुं शक्नोति ।

ग्राहकैः, "सम्पादक, दिव्यज्योतिः, भारती विहार, मशोबरा, शिमला-१७१००७ हि० प्र०" इति संकेते धनादेशेन वा. शु. प्रेषणीयम् ।

परिचयः

संस्थापकाः तथा आद्यसम्पादकाः आचार्यश्रीदिवाकरदत्त शर्माणः, — दूरभाषः 78459

प्रधानसम्पादकः— आचार्य केशव शर्मा एम. ए., एम, फिल, साहित्यरत्नम् ,, 8 200

सम्पादकः- श्रीमती सूनृता गौतम एम. ए. (संस्कृत हिन्दी)

दिव्यज्योतिः कार्यालयः भारती विहारः, मशोबरा, शिमला-७ (हि. प्र)

मुद्रकः प्रकाशक.—

भारतीमुद्रणालय भारती विहार, मशोबरा-१७१००७ शिमला (हि प्र.)

स्व।मो.- श्रीमती आचार्य रत्नकुमारी शर्मा

फरवरी. १९९० फाल्गुनः २०४६ – वर्षम्–३४ अङ्कः ५

वार्षिक मूल्यम् ३० रु०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गताङ्कादग्रे

संस्कृतकोशवाङ्मये

श्लिष्टरचना, समासयोजना च एतद्विशेषद्वययुक्ता संस्कृतभाषा। तत्र श्लेषस्तु अनुवादे अपरिवर्तनीय एव। एवं भाषान्तरकारेण तेन श्लिष्ट-पदास्तत्र वहुधा प्रयुक्ताः। तेन एषु स्थानेषु मूलसंस्कृते यः सुधासमश्चिरंतनो रसः, सः प्रियाधरसुधारस इव मधुरोऽपि क्षणभंगुरः। समासविषये यो विधिरत्र स्वीकृतः स सत्यमेव चारुतरः संस्कृतेनाप्यनुकरणीय एव यथा—

"मरुल्लीलालोलल्लहरिलुलिताम्भोजपटली—
स्खलत्पांसुव्रातच्छरण विसरत्कौङ्कुमरुचिः॥

इत्यस्य स्थाने

ववौ वायुर्जलं जातं चञ्चलं कमलानि च।
तेभ्यो रजो यद्गलितं तेन पृष्टं सकुङ्कुमम्॥

इति प्रकारवती रचना स्याच्चित्, तथा समासमूढा वाचका न भवेयुः, अपितु सुखेनैव समासमूढा समासम् ऊढाः स्युः॥

एवं भूतोऽयं द्विखण्डात्मको ग्रन्थः। अनावश्यका अस्य प्रशंसा नहि कस्तूरिकामोदः शपथेन प्रकाश्यते।

"वाणी मामेव सरसा यदि रञ्जयित्री न प्रार्थये रसविदामवधानदानम्।" इति दण्डितराजदर्पोक्तिरपि ग्रन्थे एव शोभते न व्यवहारे।

छात्रीय आंग्लसंस्कृतकोशः

कोशोऽयमपि ५२० पृष्ठात्मकः १९६८ ईशवीयाब्दे आप्टेमहोदयस्यैव विनिर्मितः प्रकाशमायातः। नायं कोशस्तेषां कृते एव लाभदायकोऽस्ति येषां कृतेऽस्य निर्माणमभूत्। कोशोऽयं जनसाधारणलाभप्रदोऽपि विद्यते। तेषां कृतेऽप्ययं लाभदो भवति ये किल कस्यापि साधारणविषयसम्बद्धस्य खण्ड-स्यानुवादचिकीर्षवः स्युः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रयोगिक। संस्कृतांग्लकोश:

कोशोऽयं छात्रीयसंस्कृतांग्लकोशस्य बृहदाकार रूप: । अस्मिन् दशसहस्रमिता: शब्दा: अधिका: सन्ति । अर्थशास्त्रजैनबौद्धग्रन्थेभ्यस्तथा चान्येभ्योऽपि ग्रन्थेभ्य: शब्दानामेषां सङ्कलनमभूत् मोतीलाल बनारसीदासात् वाराणसीस्थितादेव-कोशा नामेषां प्राप्तिर्भवति । अस्य निर्मातापि - आप्टे महाभाग एव वर्तते । अस्य प्रकाशनमपि १९६८ ईशवीयाब्द एव समजनि ।

व्रतकथाकोश:

भट्टारकसकलकीर्ति: पञ्चदशशतकस्य प्रकाण्डपण्डितोऽभूत् । स हि संस्कृतभाषायामनेकग्रन्थान् लिलेख । एषु - आदिपुराणम्, धन्यकुमारचरितम्, पुराणसारसंग्रह: यशोधर चरित्रम्, बर्द्धमानपुराणम्, एते समुल्लेखनीया स्वविशिष्टप्रभावेणानेन एका नवीना भट्टारकपरम्परा एव संस्थापिता अस्यां परम्परायामनेके जिनदास-भुवनकीर्ति ज्ञानभूषण-शुभचन्द्र सदृशा:-विद्वांसो बभूवु: ।

एष व्रतकथाकोशस्तस्यैव रचनास्वेक: । अस्मिन् कोशेऽधिकास्तद्रचिता एव कथा: संस्कृते सन्ति । काचन कथा अभ्रपण्डितस्य रत्नकीर्तेश्चापि वर्तन्ते । सर्वा: कथा: संस्कृते सन्ति । भट्टारक: सकलकीर्ति: सुगन्धदशम्या: कथाया अन्ते स्वनामोल्लेखं निम्नप्रकारेण करोति: —

प्रशमगुणसमुद्रान् स्वर्गमोक्षाय हेतून् ।
प्रकटितशिवमार्गान् सद्गुरून् पञ्चपूज्यान् ।।
त्रिभुवपतिभव्यैस्तीर्थनाथादि — मुख्यान् ।
जगति सकलकीर्त्या संस्तुवे सद्गुणाप्त्य ।।

एषा प्रति: प्राचीना सम्भवत: १७ तमशतकस्येशवीयस्य भवेत् । कथाकोशेऽस्मिन् ५० कथा: सन्ति । १

---

१ राजस्थान के जैन शास्त्र भाण्डारों की ग्रन्थ सूची भू. पृ. ४६ शीर्षक 'प्राचीन एवं अज्ञात रचनाओं का परिचय'' ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्रतकथाकोश:

अस्मिन् व्रतकथानां संग्रहोऽस्ति। कथानां संख्या सप्तत्रिंशत्तोऽप्यधिका। कथाकार: पं दामोदरस्तथा च देवेन्द्रकीर्तिरस्ति। उभावपीमौ धर्मचन्द्रसूरे: शिष्यावास्ताम्। एवं प्रतीयते यत् देवेन्द्रकीर्ते: प्राचीनं नाम दामोदर: आसीत् अत: स्वगृहस्थाश्रमस्थेन तेन यासां कथानां लेखनमकारि तत्र दामोदरकृतिरियमेवं लिखितम्। साधुत्वग्रहणानन्तरञ्च यासां कथानां लेखनं कृतं तत्र देवेन्द्रकीर्तिरिति लिखितम्।

दामोदरोल्लेख: प्रथम - पृष्ठे - एकादश - द्वादश - चतुर्दश संख्यककथासु तदनन्तरञ्च-एकविंशतिकथा समाप्तौ विहितोऽस्ति।

कथाकोशोऽयं संस्कृतगद्ये वर्तते। भाषा भाव - शैलि - दृशा सर्वा अपि कथा: परमोच्चस्तरीया: सन्ति।

अस्य अपूर्णा प्रति: 'अ' भाण्डारे ऽस्ति। द्वितीया चास्यैवापूर्णा प्रतिरपि वर्तते। अस्यां ४४ कथा यावत् पाठोऽस्ति।

इयं प्राचीनाऽज्ञातरचनासु चैका वर्तते।[१]

द्राविड़ार्थ दीपिका—(स. म. पु.)

ताड़पत्रोपरि लिखितोऽयं कोश:, ग्रन्थलिप्यां सप्तपत्रेषु 14½×1 अंगुलाकारेऽस्ति। अपूर्ण:। लेखकोऽपि-अज्ञात:।

प्रारम्भशब्दा:—

मामल:—अ (ज) मोदकम्।

अम्बरम्—अजाज।

अश्मगर्भम्—अजा।

अमिका—अजाजी।

अर्धं — गुणा:।

---

१ राजस्थान के जैनशास्त्रभाण्डारों की ग्रन्थ सूची भू. पृ. ४६ शीर्षक—"प्राचीन एवं अज्ञातरचनाओं का परिचय"।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रबोधनि – प्रविगन्धिका ।

समाप्तिशब्दाः-

ककुभ—कषायी ।

कर्दभी – कदभासन पुष्प ।

कटपलाकम्—कर्मभासरम् ।

कर्षफला—कन्दतृणम्

करञ्जपूति-करभी तृणम् ।

करञ्जवलिम् - खरमञ्जरिका ।

समापकम्-

टिप्पणिः— अस्मिन् कोशे आयुर्वेदिक - औषध - (क्षुपजातिसम्बद्धानाम्) क्षुपाणां कृते ये संस्कृतशब्दाः प्रयुज्यन्ते तेषां तमिलपर्यायाः सन्ति । लेखकोऽस्याज्ञात एव ।

निष्कर्षः—

विविधकोशाध्यायस्याध्ययनं परमरुचिकरम् । विविधकोशाः- एतस्य प्रबलप्रमाणभूता यद्यापि संस्कृतभाषा सर्वोपरि भाषा वर्तते कोशविद्याया-मद्य नान्या कापि भाषा - अस्याः साम्यं कर्तु मर्हा । पालिप्राकृतापभ्रंशभाषा-कोशाः संस्कृतमेवाश्रित्य प्रवृत्ताः । संस्कृतकोश साहाय्येन एताः किञ्चित्का-लाय जनभाषात्वमापेदिरे । संस्कृत - उर्दू भाषाकोशा अपि तत्कालीनामाव-श्यकतां जनानां साधयामासुः । तत्पश्चादांग्लजर्मनादिभाषाभिः सह संस्कृत-कोशनिर्माणं प्रारब्धम् । स्वातन्त्र्यं पश्चात भारते या विविधाः प्रान्तीयभाषाः समुदितास्तास्वपि कोशनिर्माणं संस्कृतमेवाश्रित्य जातम् । अद्य हिन्दी-भाषासहितं विभिन्नभारतप्रान्तीयभाषाकोशाः- विनिर्मिताः सन्ति यत्र संस्कृतं प्राथम्येन प्रयुक्तम् । अनेन स्पष्टं भवति यद् विश्वस्य कियन्तो लोकाः संस्कृतकोशविद्या - प्रभाविताः ।

इति आचार्यश्रीकेशवशर्मणा निर्मितस्य संस्कृतकोशवाङ्मयस्य विशेषपरिचयाख्ये भागे विविधकोशसम्बद्धः सप्तमः काण्डः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतकोशवाङ्मये

द्वितीयपुस्तकस्य विषयाः

वैदिककोशाः

निघण्टुवर्गः

सं०	विषय		पृष्ट सं०
१	निघण्टुशब्दार्थः	...	१
२	निघण्टूनां बहुत्वम्	...	१
३	निघण्टोर्न निरुक्तत्वम्	—	२
४	निघण्टोर्विभाजनम्	—	३
५	निघण्टोः पाठद्वयम्	—	३
६	तत्र शब्ददृष्ट्या यथा	—	३
७	शैलीमाश्रित्य	...	३
८	यास्केन व्याख्यातः पाठः	...	४
९	पदसङ्कलने कः सिद्धान्तः ?	...	४
१०	निघण्टो कोशत्वेन योगः	...	५
११	प्रणेता	...	५

निरुक्तवर्गः

१२	निरुक्तम्	...	७
१३	निरुक्त बाहुल्यम्	—	८
१४	निर्वचनकोशत्वम्	—	८
१५	निर्वचनम्	—	९
१६	सिद्धान्तः	—	१०
१७	निरुक्तकारः	—	१०

अनुक्रमणी-वर्गः

१८	अनुक्रमण्यः	...	११
१९	विषयाः	...	११
२०	ऋग्वेदानुक्रमणी	—	११
२१	याजुषानुक्रमणी	...	१२
२२	सामवेदानुक्रमणी	—	१३
२३	अथर्ववेदानुक्रमणी	...	१३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२४ उपयोगः — १३
२५ शौनकः — १३
२६ कात्यायनः ... १५

—

वैदिककोशवर्गः

२७ भास्कररायस्य वदिककोशः — १६
२८ हंसराजीयकोशः — १७

आगमकोशवर्गः

२६ वैखानसागमकोशः — १८

वेदान्तकोशवर्गः

३० शांकरवेदान्तपारिभाषिककोशः ... २०

पदानुक्रमकोशवर्गः

३१ एकग्रन्थसम्बन्द्धाः — २१
३२ बहुग्रन्थीयाः अनुक्रमकोशाः — २२
३३ वैदिकपदानुक्रमकोशः ... २३
३४ लक्ष्यम् ... २३
३५ क्षेत्रम् ... २३
३६ व्यवस्थापनम् — २३
३७ विशिष्ट संकेत प्रयोगः ... २६
३८ अन्यद्वैशिष्ट्यम् ... २६
३९ इतिहास ... २६
४० ब्लूम फील्डीयोऽनुक्रमकोशः १ — २८
४१ वेन्फेमहोदयस्य सामवेदार्चिम् ... २८
४२ मेक्समूलरस्य वाह् वृची पदसूची १ ... २८
४३ शौनकाथर्वपदानुक्रमणी — ३०
४४ ऋग्वेदीय पदानुक्रमसूची ... ३१
४५ यजुर्वेदपदानामकारादिवर्णानुक्रमीया — ३१
४६ सामवेदपदाना— ... ३१
४७ सायमनीयकाठकयजुर्वेदीय— — ३२
४८ कीथमैक्डानलीय वैदिक— ... ३२
४९ तैत्तरीयसंहितायाः... — ३२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिककोशवर्गस्य परिशिष्टभाग:

५०	मधुसूददनस्य वैदिककोश:	—	३३
५१	विल्सनस्य ऋग्वेदकोश:	—	३३
५२	सेन्टपीटर्सवर्गकोश:	...	३४
५३	ग्रासमन्नीयोवाह् वृचकोश:	...	३६

वैदिक ग्रन्थसूची वर्ग।

५४	बेवेरस्य वैदिकसंस्कृत ग्रन्थसूची	...	३६
५५	श्लेगलस्य वैदिकग्रन्थसूची	...	३७
५६	औफ्रैक्तस्य सर्वाश्लेषी महासूची...	—	३७
५७	निष्कर्ष:	...	३८

अथ चतुर्थकाण्ड:

५८	लौकिककोशा:	—	४१
५९	अमरात्पूर्वकालीना:	...	४१
६०	अगस्त्यनिघण्टु:	—	४१
६१	अमरदत्त :	...	४२
६२	ऐन्द्रनिघण्टु:	...	४२
६३	जैमिनी निघण्टु:	...	४३
६४	पाणिनीयकोश:	...	४४
६५	भागुरि:	...	४४
६६	महाक्षपणक:	...	४५
६७	रत्नकोश:	—	४५
६८	व्याडिकोश:	...	४६
६९	वाचस्पति:	—	४७
७०	सकलग्रन्थदीपिका	—	४८
७१	संसारावर्त:/कविदीपिका	...	४८
७२	अमरकोश:	...	४९
७३	अमरस्य टीकाकारा:	...	५१
७४	अनेकार्थ समुच्चय: । शाश्वत:	...	५२
७५	संयमिनाममालिका	...	५४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७६	नाममाला /धनञ्जयः/प्रमाणनाममाला अनेकार्थमाला वा	...	५४
७७	अनेकार्थनिघण्टुः	—	५५
७८	नानार्थ शब्दानुशासनम्	—	५५
७९	पदचन्द्रिका	—	५६
८०	शब्द चन्द्रिका	—	५७
८१	सुप्रसिद्धपदमञ्जरी	—	५७
८२	नानादेशीयकोशः	—	५८
८३	अभिधानरत्नमाला /हलायुधः	...	५८
८४	वैजयन्ती	...	५९
८५	नाममालिका	...	६०
८६	नाममालिका/भोजनिघण्टुः	—	६१
८७	त्रिरूपकोशः	...	६२
८८	विश्व प्रकाशः	...	६२
८९	नानार्थ सङ्ग्रहः	—	६३
९०	त्रिकाण्डशेषः	—	६४
९१	हारावली	...	६५
९२	वर्णदेशना	...	६५
९३	एकाक्षरकोशः	—	६६
९४	अनेकार्थकोशः/मंखकोशः	—	६६
९५	अभिधान चिन्तामणिः/ हेमचन्द्रः	...	६७
९६	अनेकार्थ संग्रहः	—	७०
९७	देशीनाममाला	—	७१
९८	शब्दभेदनिर्देशः	—	७२
९९	द्विरूपकोशः	—	७३
१००	श्लेषार्थ पदसंग्रहः	—	७४
१०१	मेदिनीकोशः	...	७५
१०२	नानार्थार्णवसंक्षेपः	...	७६
१०३	शब्दरत्नाकरः/नानार्थ तिलकः अनेकार्थतिलकः/महिपः	—	७७
१०४	वस्तुरत्नकोशः	...	७७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतकोशवाङ्मये

अष्टमः काण्डः

सांस्कृतिकमध्ययनम् ।

संस्कृतिर्हि सम्पूर्णजीवनपद्धत्या द्योतिका भवति। आधुनिकः प्रसिद्धः समाजशास्त्रवेत्ता क्लखोनः इदमेव साधयति १ । हेस्कोविट्सः- अपि तदेव समर्थयते २ । समुपसर्गपूर्वककृधातोः भूषणार्थे सुडागमानन्तरं क्तिन् प्रत्ययेन संस्कृतिशब्दः सिद्ध्यति । अतो भूषणभूता सम्यक्कृतिरेव संस्कृतिः- भवति । संस्कृतिशब्दव्युत्पादनेन परिज्ञायते यल्लौकिक-पारलौकिक-सर्वाभ्युदयस्यानुकूलभूतौ - आचार - विचारावेव संस्कृतिर्भवति । अत एव-संस्कृतेराधारः शास्त्राणि धर्मग्रन्थाश्च भवन्ति । इयं संस्कृतिः-राष्ट्रस्य, समाजस्य जातेर्मानवमात्रस्य च प्राणभूता तदस्तित्वसाधिका च जायते

पूर्वकाण्डेषु संस्कृतकोशाणामैतिहासिकशाब्दिक - निर्वचनसम्बन्धि-अध्ययनं कृतमभूत् । काण्डेऽस्मिन् संस्कृतकोशेषूपलब्धानां सांस्कृतिक - तत्वानामध्ययनं विवेचनं च प्रस्तूयते । अध्ययनमिदं कालक्रमानुसारि । अनेनैकतस्तु कोशाणां भारतीयसंस्कृत्या सह कः सम्बन्धस्तदिदं ज्ञायतेऽन्यतश्चैको महत्वपूर्णविषयोऽपि स्पष्टो भविष्यति । सचायम् - यद् भारतीयसंस्कृतेर्धारा किमजस्ररूपेणाद्य पर्यन्तमविच्छिन्नरूपतया प्रवहमाणा वर्तते भारतीयजीवनेऽथवा सा क्वचित् त्रुटिता प्रस्फुटिता विलुप्ता वा जाता। साम्प्रतं तस्या का स्थितिः ? एवं किलाध्यायोऽयं रुचिकरो नवीनविषयोद्घाटकश्च भविष्यति ।

अत्र प्रथमं निघण्टु निरुक्तादयो वैदिकाः प्राचीनतमाश्च कोशा गृह्यन्ते। एतेष्वनेका अद्याप्राप्याः सञ्जाताः । अतो यास्कीयकोशमाधारीकृत्य किञ्चिद् विवेचनं क्रियते ।

---

१ क्लखोनः द साईन्स आफमैन इन द वर्ल्ड काइसिस । नागरी प्रचारिणी पत्रिका वर्ष ७७ । अंक १-४ । पृ. २८८ ।

२ हेस्कोविटसः मैन एण्ड हिजवर्क्स । ७७-१४ न. प्र. प. १-२८९ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतेर्मूलम्

वेदा हि भारतीयविश्वसंस्कृतिप्राणभूता: । निघण्टुनिरुक्तयोश्च तदर्थ-बोधनरूपं महत्वपूर्णकार्यम् । वेदरक्षासाधनरूपाणां सर्वविधानुक्रमण्यादि-कोशाणामपि संस्कृतिरक्षापरत्वमेव । इतोऽपि प्राचीना निरुक्त निघण्ट्वादयो भवेयुस्तेषु च तात्कालिकसंस्कृतितत्वानां स्पष्टसन्निवेशो भवेत् यतोहि यास्कीयकोशस्तु ऋषिपरम्पराया लोपकालीन: । यथा —

"साक्षात् कृतधर्माण ऋषयो बभूवु: ।

तेऽवरेभ्य: असाक्षात्कृतधर्मभ्य उपदेशेन सम्प्रादु: । उपदेशाय ग्लायन्तो-ऽवरे विल्मग्रहणाय इमं ग्रन्थं समाम्नासिषु: १ "

वाक्येनानेन प्रतीयते । निघण्टुनिरुक्तद्वारा न केवलं वैदिकमन्त्राणामान्-तरिकार्थप्रकाशनमेव भवति परं यास्कस्य देवतानिर्धारणविषयकं विवेचनम-पूर्वम् अस्य दैवतकाण्डो वैदिकधर्म - संस्कृति - इतिहासाधार: । यतोहि वैदिकदेवतावादमाधारीकृत्यालोचनात्मकदृष्ट्या निरुक्तमन्तरा न केनापि तत: प्राविकमपि उक्तम् । अयमेवात्र तादृश: प्रथमोपलब्धग्रन्थ: । अत: संस्कृतेराधारोऽपि कोशस्यास्योपरि वर्तते इति कियदाश्चर्यकरं महत्वपूर्णञ्च कार्यं संस्कृतकोशवाङ्मयस्य ?

अयं किल तादृशो विश्वस्य प्रथमो ग्रन्थो यत्र काचिज्जाति: स्वधर्म-विषये चिन्तनकरान् प्रक्षिपति ।

शिक्षा

कस्यापि राष्ट्रस्य जातेश्चाचारविचारसंस्कृत्यादीनां मूलं शिक्षैव भवति । तत्सम्बद्धवाक्यानीमानि भवन्ति –

"नावैय्याकरणाय । अनिदंविदे वा । नित्यं ह्यविज्ञात् विज्ञानेऽसूया । उपसन्नाय तु निब्रूयात् । यो वालं विज्ञातुं स्यात् । मेधाविने तपस्विने वा ।"

"असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम् "

य आतृणत्यवितथेन कर्णाविदु:ख कुर्वन्नमृतं सम्प्रयञ्छन् तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत् कतमच्चनाह । अध्यापिता ये गुरुं नाद्रियन्ते विप्रा

---

१ निरुक्तम् : श्री उमाशंकर शर्मा (व्या) वाराणसी । १९६६ खी.

पृ. ३३. अ. १।१. ६ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाचा मनसा कर्मणा वा यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत्। यमेव विद्या: शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम् । यस्तेन द्रुह्येत् कतमच्च नाह तस्मै मा ब्रूया निधिपाय ब्रह्मन् । १

एभिर्वाक्यैः विज्ञायते यत्तदानीं छात्राणा-माचार्याणाञ्च कृते विशिष्टेय-माचारसंहिता- आसीत् । गुणशीलसम्पन्नानामेव शिष्याणां शास्त्रविशेषाध्ययनेऽधिकार आसीत् न सर्वेषाम् । शिक्षाशास्त्र सम्बद्धानां येषां तथ्यविशेषाणामत्रोल्लेखोऽस्ति ते सार्वजनीना: सार्वकालीना अपरिवर्तनशीलाश्च विद्यन्ते । एवमेवाचार्यशब्दस्य निरुक्तिरपि तत्कालीनाध्यापकानां महत्तां प्रकाशयति यथा—आचार्य: —"आचारं ग्राहयति । आचिनोति अर्थान् । आचिनोति बुद्धिमिति वा २ ।" अर्थात् य: परम्परागतोपदेशं ग्राहयति, अर्थात् बुद्धिञ्च क्रमेण वर्धयति स आचार्यः । प्रस्तुतोदाहरणैः गुरुशिष्ययोः कौटुम्बिक-सम्बन्धोऽपि ध्वन्यते विश्वस्यादर्शमयोच्चतमशिक्षाया आचारसंहिता नियम-दर्शनमत्र जायते कोशेऽस्मिन् । ३ इयं शिक्षा च सम्बन्ध - अधिकारि - विषय-प्रयोजनरूपेणानुबन्धचतुष्टयेनातीव सफला सुफला चासीन्नात्र कोऽपि सन्देह: ।

आर्थिकमध्ययनम्

देशस्यार्थिकस्थितिरपि सांस्कृतिकघटकतत्वेष्वेका । निपातविवेचनायां यास्क ऋचमेकामुदाहरति ।

सा चेयम् :—

हविर्भिरेके स्वरित: सचन्ते
सुन्वन्त एके सवनेषु सोमान् ।
शचीमदन्त उत दक्षिणाभि—
र्नेज्जिह्मायन्त्यो नरकं पताम: ।।४

इयमसुरपत्नीनामुक्ति: । यास्ककालेऽपि यज्ञविधय: समारोहपूर्वकं भवन्तिस्म । स्वर्गनरकविश्वासो लोकेषु नितरामासीत् । तदिदमुल्लिखित ऋचा परिलक्ष्यते । एक मन्योदाहरणमपि भवति । तद्यथा –

१ निरुक्तम् । पृ. ४१ अ. २ पा. १
२ निरुक्तम् पृ. ७ अ. १ पा. २
३ सम्बन्धश्चाधिकारी च विषयश्च प्रयोजनम् ।
निरुक्तम् (ख) द्वि. अ. पृ. ५७
४ निरुक्तम् । अ. १ । पा. ३ । ऋ. ११ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निष्ट्वक्त्रासश्चिदिन्नरो भूरितोका वृकादिव ।
विभ्यस्यन्तो ववाशिरे शिशिरं जीवनायकम् । १

अनेन मन्त्रेण परिज्ञायते यत्तदानीमपि सन्ततिसीमितकरणस्य विचार आसीदेव यतोहि-अधिक - सन्तानोत्पादकानां समक्षे वस्त्र समस्या-आसीत् । शीतकाले ते शिशिरात् तथा विभ्यन्ति यथा किल वृकात् जना भयभीता: — भवन्ति । बहुसन्तानोत्पादनदोषैस्तदापि भारतीया: पूर्णपरिचिता आसन् तदुल्लेखञ्च ते लोकान् प्रशिक्षितुमकार्षु: ।

सुवसनप्रयोग:

"जायेव पत्य उशती सुवासा" इत्यादि ऋग् दर्शनादथ च 'कम्बल' शब्दस्य, कमनीयं भवतीति व्युत्पत्या तदानीं सुवसनप्रयोग. सिद्ध एव । सूक्ष्मोष्णवसन प्रयोगोऽप्यनेन ध्वन्यते ।

सामाजिकी स्थिति:

निरुक्तस्य तृतीयाध्यायस्य प्रथमपादेऽपत्यशब्दव्युत्पादनावसरे यास्को रुचिकरमेकं विषयं विवेचयति। अनया तात्कालिक समाजव्यवस्था पूर्णत: परिज्ञायते । अपत्यस्य सामान्योऽर्थ: सन्तति: । पुन्नाम नरकात्त्रायते इति पुत्र: । अनेकविधपुत्रेष्वौरस एव श्रेयान् । अत्र वैदिकमुपाख्यानमुपलभ्यते निरुक्ते । वशिष्ठस्य सर्वे पुत्रा: मृता: । स पुत्रं कामयमानोऽग्निं प्रार्थयामास । अग्निस्तमाह दत्तकक्रीतक कृत्रिमादिपुत्रेषु कमिच्छसि ? वशिष्ट:- औरसपुत्रस्य श्रेष्ठतां वर्णयामास । अनौरसान् स निनिन्द । अनेन प्रसङ्गेन सम्बद्धानां ऋचामुदाहरणं प्रददाति यास्क: अपरेणोत्पादितपुत्र कदापि न स्वीकार्य. स हि पिण्डदानाधिकारं न धत्ते । इयं मूर्खाणामेव धारणा यदन्योत्पादितपुत्रोऽपि-औरसपुत्रमिवाचरेत् । यथा --

"परिषद्यं ह्यरणस्य रेक्णो नित्यस्य राय: पतय: स्याम ।
न शेषोऽग्ने अन्यजातमस्त्यचेतानस्य मा पथोविदुस: २

सत्सु वहुषु पुत्रग्रहणविकल्पेषु वशिष्ठ:- औरसपुत्रग्रहणमेव श्रेष्ठतममिति-प्रार्थयामास ।

---

१ निरुक्तम् अ. १ पा. ३ ऋ. १० ।
२ निरुक्तम् अ ३, पा. १, पृ. ६८ . पृ. ६८ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"न हि ग्रभायारणः सुशेवोऽन्योदर्यो मनसा मन्तवा १
अधा चिदोकः पुनरित्स एत्या नो वाज्यभीषालेतु नव्यः ।।२
अथैतां दुहितृ दायाद्ये उदाहरन्ति ।

शासद्वह्निर्दु हितुर्नप्त्यंगाद् विद्वां ऋतस्य दीधितिं सपर्यान् ।
पिता यत्र दुहितुः सेकमृञ्जन्त्सं शग्म्येन मनसा दधन्वे ।।

अस्मिन्नेव प्रसङ्गे पुत्रवत् पुत्री अपि दायादाधिकारिणीति विषयोऽयमुत्थापितः अत्र केचनाचार्याः पुत्र्या दायादाधिकारं स्वीकुर्वन्ति । दुर्गाचार्यो दौहित्रमपि पौत्रवत् स्वीकरोति । अतः पुत्री अपि पुत्रवदेव दायादाधिकारिणी । यास्कश्च –"प्रजननयज्ञस्य, रेतसो वा अङ्गादङ्गात्सम्भूतस्य, हृदयादधिजातस्य, मातरि प्रत्यृतस्य, विधानं पूजयन् । अविशेषेण मिथुनाः पुत्राः दायादाः इति" ३ एवं किल पुत्रवदेव पुत्र्या अपि दायादेऽधिकारं स्वीकरोति ।

अन्ये केचनाचार्याः 'पुमान्दायादः अदायादा स्त्री' ४ मैत्रायणी संहितामेव प्रमाणत्वेन स्वीकुर्वन्ति । "तस्मात् स्त्रियं जातां परास्यन्ति न पुमांसम्" ५ इति च कथयन्ति । स्त्रीणां दानविक्रयातिसर्गाः विद्यन्ते नपुंसः । अत्रैव केचनापरे "पुंसोऽपीति कथयन्ति । शौनः शेपे दर्शनात् " अभ्रातृमतीवाद इत्यपरम् ।

विवेचनमिदं तत्कालीनराष्ट्रमूलभूतस्य परिवारस्य पूर्णं स्पष्टं च चित्रमुपस्थापयति । केचन सामाजिकाः कन्यापुत्रयो रिक्थाधिकारं समानमिति कथयन्ति स्म अपरे केवलं पुत्रस्यैवाधिकारं मानयन्ति स्म । अन्ये चाभ्रातृमत्या एव दायादेऽधिकारं स्वीकुर्वन्ति स्म । पुत्राणामपि विक्रयो भवतिस्म स्त्रीणाञ्च जलादिषु प्रक्षेपोऽपि अभ्रातृमतीनां विवाहसमस्याप्यासीत् । परमिदं कुप्रथाजातं कादाचित्कमेवासीदिति स्पष्टम् तच्च न गुप्तम् । सर्वमपि स्पष्टरूपेण संस्थापितम् । आर्येषु चेयं व्यवस्थाऽऽसीद्यत् पुत्रो दायादाधिकारी, पुत्री चान्यगृहे स्वामित्ववती । स्वगृहे ऽपि च तस्या

---

१ निरुक्तम् अ ३ पा. १. १ पृ ६९ ।
२ निरुक्तम् अ ६ पा १ पृ. ७० ।
३ निरुक्तम् अ. ३ पा. १ पृ. ७० ।
४ ,, अ. ३ पां १ पृ. ७२ ।
५ ,, अ ३ पा. १ पृ. ७२ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आदरस्थानं पूजास्थानञ्चासीत् । अभ्रातृमती च पितुः सम्पत्तौ अधिकारमाप्नोतिस्म यतोहि अपुत्रस्य तु दौहित्र एव पिण्डादिदानाधिकारवान् कथितः।

औरसपुत्रस्य श्रेष्ठता, परिवारसञ्चालनाय कुटुम्बस्य वा क्षयरक्षायै विविधपुत्रनिर्माणपद्धतिः. भ्रातृमत्याः - अलंकारधनदानपूर्वकं परकुलपरिबर्धनमभ्रातृकायाश्च स्व पितृकुलसम्वर्धनमित्यनेन प्रकारेण यास्ककालीनसमाजस्य सुप्रथाः. स्त्री-पुरुषयोर्दान-क्रय-विक्रयादिरूपा स्त्रीणां प्रक्षेपणापरिणयादिरूपा च कुप्रथाः स्पष्टरूपेण परिज्ञायन्ते ।

अग्रे मनुष्यनामगणनायां, "पञ्चजनाः मम होत्रं जुषध्वम्" १ । ऋगियमुदाहृता यास्केन । "चत्वारो वर्णाः, निषादः पञ्चमः" इत्यौपमन्यवः । तदानीं चतुर्णां वर्णानामस्तित्वमासीदेव । निषादाख्यः पञ्चमवर्णोऽपि भवेत् । अथवा आर्यावर्तान्तर्गता पञ्चजना आर्याणां विशिष्टकुलरूपा भवेयुः।

संख्यावाचिशब्दानां व्युत्पादनावसरे कृताः यास्कप्रयोगा दाशमिकपद्धतिप्रयोगस्तदा भवति स्मेति साधयन्ति । यथा —

"एका च दश च । दश च शतञ्च शतं च सहस्रञ्च । सहस्रञ्चायुतञ्च । अयुतञ्च प्रयुतञ्च । प्रयुतञ्च नियुतञ्च ।" इत्यादयः शब्दाः दाशमिकपद्धति-सम्बद्धाः सन्ति । अनेन भारतीयानां दाशमिकपद्धतिसमन्वेषणं सिद्ध्यति ।

यास्कस्य समये स्फोटवादः प्रचलित आसीत् । तदानीं वैय्याकरणानामपि सशक्तसमूहो विद्यतेस्म । शाकटायन-गार्ग्य - गालव - शाकल्यादिप्राचीनतमानां वैय्याकरणानामुल्लेखो निरुक्तकृता स्वयमेव कृतः। उपसर्गाणां विषये शाकटायन - गार्ग्यमतयोः समन्वयः यास्केन विहितः ।

अस्माकीनाः सर्वा अपि क्रिया भाषाधीना। । भाषाणां साङ्गोपाङ्गविवेचनञ्च भाषाविज्ञानस्य कार्यम् । अस्य विज्ञानस्य विशेष प्रचारो यद्यपि

---

१ निरुक्तम् अ. ३ पा. २ पृ. ७७
२ निरुक्तम् अ. ३ पा. २ पृ. ७८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाश्चात्यविद्वद्भिरिदानीं कृतस्तथापि नात्र नवीनता यथा किल बहूनां विदुषां विचार:। सहस्रवर्षाणि पूर्वमस्य विज्ञानस्याधारशिला भारते यास्कसदृशैः विद्वद्भिः समुपस्थापिता आसीत्। संस्कृतेनैव चास्याधुनिकरूपं निर्मितं मण्डितञ्च। सामान्यभाषाविज्ञानस्य सिद्धान्तानामितिहासस्य वा कश्चिदपि ग्रन्थो यास्कस्य पाणिनेश्च नाम विना नितान्तमपूर्णो भविष्यति। अनयोरुभयोरध्ययनेनैव पाश्चात्यमनीषिभिर्भाषाविज्ञानस्य सिद्धान्तानां विवेचनशैली शिक्षिता। अन्यदपि तत्सम्बन्धि वस्तुजातमाभ्यामेव प्राप्तम् ध्वनिविज्ञानम् (Phonology रूपविज्ञानम् (Morphology) अर्थविज्ञानम् (Semantics) वाक्यविज्ञानम् Syntax निर्वचनशास्त्रम्, Etymology, एतत्सर्वमपि यास्केन तदानीं यथामति विवेचितम्। एतद्विषये मोक्षमूलरोऽपि यास्कं प्राशंसत् १।

यास्ककाले संस्कृतं व्यवहारभाषा आसीत्। अस्या उपभाषासु स्वल्पमन्तरमप्यासीत्। भारतस्यैकप्रान्ते जना धातुं प्रयुञ्जतेऽपरप्रान्ते च धातुजशब्दं व्यवहरन्ति प्रयोगे। यथा "अथापि भाषिकेभ्यः धातुभ्य. नैगमाः कृतः भाष्यन्ते। अथापि नैगमेभ्यः भाषिकाः। अथापि प्रकृतयः एव एकेषु भाष्यन्ते विकृतयः एकेषु। शवति गतिकर्मा कम्बोजेष्वेव भाष्यते। विकारमस्यार्येषु भाषन्ते शव इति। दातिः लवनार्थे प्राच्येषु। दात्रमुदीच्येषु २ ' उद्धरणेनानेन संस्कृतस्य लोकभाषात्वमुपपन्नम्।

वेदानामाध्यात्मिकाधिदैविकार्थास्तदापि क्रियन्तेस्म। वेदेषु विभिन्नवैज्ञानिकाविष्कारसूत्राणि सन्ति। निरुक्तकारश्च कैश्चित्सुपरिचितः प्रतीयते। "व्याप्तिमत्वात्तु शब्दस्य" ३ यास्कः सूत्रेणानेन शब्दस्य नित्यत्वं प्रकाशयति तदेव.अ दूरभाष आकाशवाणी-दूरदर्शनादिभिः सत्यापितम्।

---

१ 'I doubt whether even at present, with all the new light which comparative Philology has shed on the origin of words, questions like these could be discussed more satisfactorily than they were by Yaska.

Hist of Anc. Skt. Lit. P. 168. Maxmuller.

२ निरुक्तम् अ. २ पा. १ पृ. ३८।

३ निरुक्तम्। अ. १ पा. १ पृ ३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैश्वानरविषयकं विवेचनमपि यास्कस्य विलक्षणम् । विद्युतः सूर्याच्च कथमग्निरुत्पद्यते ऽस्य विषयस्य वैज्ञानिकविवेचनं तेन विहितम् अनेन तत्कालीनसमाजस्य पदार्थविज्ञानाभिज्ञनाऽभिव्यज्यते । आधुनिकाः विश्वप्रकाशका विद्युद्दीपास्तदिदं यास्कस्य वैज्ञानिकतां भृशं काशयन्ति । ग्रीष्मवर्षा शरदृतूनां वर्णनं निरुक्ते ऋतुत्रयस्य प्रभावकारित्वं समाजेन प्रायोऽनुभूय तस्माद्वर्णितम् । अग्रे ऋतु पञ्चकस्यापि समुल्लेखोऽस्ति । मासवर्षादिकं सर्वमपि ज्ञानं लोकेषु तदानीं सम्यक् प्रकारेण विद्यते स्म । एव किल कोशोऽयं तत्कालीनसमाजे वैदिकसंस्कृतिमूलानि – ओतानि प्रोतानि चासन्निति स्पष्टयति प्रकाशयति च । उत्तरकालीन वैदिककोशैरप्येतानि मूलानि सुरक्षितानि सुदृढी कृतानि च ।

न केवलमेतावदेवापितु नैघण्टुकं शब्दचयनमपि पूर्णतः सांस्कृतिकम् । प्रथमाध्यायस्य प्रथम शब्दः पृथिव्याः सम्बन्धितः । अत्रापरः कश्चिदपि शब्दः संस्थापयितुं शक्यते स्म । परं स पृथ्वीनामान्येव सर्वप्रथमं गणयामास । अत्र रहस्योऽयं यद्मानवमात्रस्य संस्कृति - स्थानं भूरेव । मानवस्य सर्वमपि क्रियाजातमत्रैव भवति । अतः पृथिव्या नाम चयनमुचितमेव प्रथमम् । अन्यान्य नाम सन्निवेशो विलक्षणो नाभविष्यत् पृथ्वी वत् पृथिव्या नाम सन्निवेशात् - पश्चात् कोशकारः हिरण्यनाम सन्निवेश कुरुते । भूमण्डले हिरण्यमेवं तादृशं वस्तुजातं येन मानवसंस्कृतिः प्रभाविता भवति । अत एव द्वितीयस्थाने हिरण्यनाम सञ्चयनम् । अन्तरिक्षं स्वर्गश्चोभावपीमौ मानवसंस्कृतितत्वभूतौ । अनयोः पश्चात् रश्मि नामसन्निवेशो निघण्टोः प्रथमाध्याये भवति । रश्मयो न केवलं मानवजीवनमेवापितु सर्वविधसृष्टिजीवनं प्रभावयन्ति । आसां दशन निपातञ्च विना पशुपक्षिमृगादयो जीवनं धारयितुं नहि शक्नुवन्ति । लतापत्रादिकं पुष्पवनस्पति - वृक्ष- शष्पादिकं किमपि नाभविष्यत् यदि रश्मयः स्वकीयोष्मणाऽवश्यकतापं शैत्यञ्च नाप्रसारयन् सर्वञ्च जगत् शुष्कं प्रज्वलितमिव चाभविष्यत् रश्मिबोधकशब्दानन्तरं दिग्बोधक शब्दसन्निवेशः सुतरां समीचीनः यतोहि एता दिक्षु एव निपतन्ति प्रभावयन्ति च जड़चेतनात्मकं जगत् मानवीयाञ्च संस्कृतिम् । निघण्टुकार स्तदनन्तरं रात्रिवाचकशब्दान् सङ्कलयति । सर्वप्रथमं रात्रि दिक्षु एवानुभूयते । ततश्चोषाया बोधकाः शब्दास्तत्र सन्निवेशिताः । निशाया सहैवोषाया आगमनं जायते । उषानिशाभ्यां विश्वमानवसंस्कृतिः जड़ चेतनात्मकश्च संसारः समन्वितः । निशायां निखिलमपि जगत् विश्राम्यति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उषागमेन सहैव च जागर्ति । उभयोः शब्दयोः सन्निवेशोऽत्र नितान्तं साधुः । अनयोरुभयोः पश्चाद्दिनागमः । अत एव निघण्टुकारः—उषायाः पश्चात् दिनवाचक शब्दसन्निवेशं कुरुते । दिवसानन्तरं मेघस्यापि महत्वपूर्णं स्थानम् । मेघश्चेन्न वर्षेत् अमृतरूपस्य जलस्याभावो भवेत् । अनेन प्रकारेण निघण्टोः प्रथमाध्याये क्रमप्राप्तानां शब्दानां सन्निवेशो वर्तते । एभिस्तत्त्वैश्च मानवस्य विशेषतश्चादि मानवस्य संस्कृतिनिर्माणमकारि - इति को नाम न स्वीकरोतु कश्च नाश्चर्यं करोतु निघण्टुकारस्य बुद्धिवैभवं दृष्ट्वा ।१

द्वितीयाध्यायान्तर्गतशब्दानां क्रमप्राप्तशब्दसन्निवेशोऽपि मानवसंस्कृति-सम्बद्धः । तत्र-अन्न-भोजन-बल-धन-वाग्बोधक शब्दानां क्रमशश्चयनम् । अन्नं मानवखाद्यम् । तदशनेनैव बलप्राप्तिः । बलवानेव धनार्जने शक्तः । बलधनसम्पन्नस्यैव वाणी फलवती भवतीति सुन्दरः सांस्कृतिको योगः अस्मिन्नेवाध्यायेऽग्रे संग्राम – व्याप्ति वधवज्र ऐश्वर्य ईश्वर वाचक शब्दानां क्रमशउल्लेखः । उल्लेखोऽयं प्रख्यापयति यत्देवासुरसंग्रामः सर्वत्रैव- आध्यात्मिकाधिदैविकाधि-भौतिक जगत्सु व्याप्तः व्याप्तिरियं च परमदुःखकरा । अस्या वधेन: शत्रुक्ष-येणैव सुखम् । वधश्चासावाध्यात्मिकजगति वज्रेणार्थात् कामक्रोधादिरूपेषु-अरिषु कठोर शासनेन आधिदैविकजगति वज्रेणार्थात् - इन्द्रस्य वज्रेण असुराणां विनाशेन च आधिभौतिकसंसारे च वज्रेणार्थात् शस्त्रैश्शत्रुविघातनात् सुलभा । तत एवैश्वर्य - प्राप्तिस्ततश्चेश्वरत्वमीश्वरप्राप्तिर्वा । कीदृशोऽयं सांकेतिको विश्वसंस्कृति - समुद्घाटको वा सन्निवेशः ? २

एवमेव तृतीयाध्यायेऽवलोक्यताम् । तत्र गृह - सेवा - सुख - रूप - प्रशस्य वाचकशब्दानां क्रमप्राप्तः सन्निवेशः । अत्राध्ययनेनानुभूयते यद्गृहादेव स्वसेवा देशजातिसमाजसेवा वा सम्भवा । स्वार्थपरो निस्वार्थश्चोभावपि तया सेवया सुखिनौ भवतः । सुखेन च रूपवृद्धिः रूपस्य सर्वत्र प्रशंसा भवतीति सुन्दरसमाजव्यवस्थापनबीजान्यत्र द्रष्टुं शक्यन्ते ३

एवमिदं सुतरां स्पष्टं यत्-निघण्टुषु विश्वमानवसंस्कृतिबीजानि - पुष्पितानि-फलितानि चावलोक्यन्ते । उत्तरकालीनेषु च वैदिककोशेषु भारतीया

---

१ निघण्टुः यास्कः । प्रथमाध्यायः ।

२ निघण्टुः । यास्कः द्वितीयाध्यायः ।

३ निघण्टुः यास्कः । तृतीयाध्यायः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतिः परिपुष्टरूपेण सत्यं रक्षन्ती शिवं कुर्वाणा सौन्दर्यञ्च विकरन्ती दृश्यते।

अथ वैदिककोशानां पश्चाल्लौकिक कोशाः समायान्ति। एषु प्राचीनतमा अलभ्याः सन्ति। ते च प्रायेणामरपूर्वाः विद्यन्ते। एवं सति दुर्लभकोशानधिकृत्य किमपि वैशिष्ट्येन लेखनं कठिनं तथापि सौभाग्यात्तेषामुद्धरणानि - अमरकोशस्य टीकासु प्राचुर्येण प्राप्यन्ते। कोशेभ्य एभ्योऽमरसिंहः प्रचुरसामग्रीग्रहणमकरोदिति विज्ञायते 'समाहृत्यान्यतन्त्राणि...१' इति तद्वचनादपि सिद्ध्यति। अतः कोशानामेषां सांस्कृतिकमध्ययनममरकोशान्तर्गतमेव वेद्यम्।

अमरकोशो लौकिककोशेषु मूर्धन्यः। मुख्या दुर्लभकोशाश्च प्रायेणामरपूर्वास्तथापि तेभ्यो यान्युद्धरणानि प्राप्यन्ते तदध्ययनेन महत्वपूर्णतथ्यमिदमुद्घाट्यते यत्तैरपि वैदिकसंस्कृतिविकाससूत्राणि ग्रथितानि। 'तितउः' शब्दोऽयं वैदिककोशेषु बहुत्र व्याख्यातः। अस्यैव व्याख्यानं कात्यः "क्षुद्रच्छिद्रशतोपेतं चालनं तितउः स्मृतः" एवं करोति २। अस्यैव व्याख्या 'चालनं तितउ प्रोक्तम्" रत्नकोशे एवं प्राप्यते ३।" लक्ष्मी सरस्वतीधी त्रिवर्गसम्पद् विभूतिशोभासु। उपकरणवेशरचनाविधानेषु च श्रीरिति प्रथिता ३।" श्लोकेऽस्मिन् व्याडिरपि लक्ष्मीः सरस्वती धी आदिवैदिकसंस्कृतिसम्बद्धशब्दान् स्पष्टयति, प्रयुङ्क्ते च। "ब्रह्माद्यामातरः स्मृताः" ४ भागुरिरपि भारतीयां संस्कृतिं श्लोकेनानेन रक्षति कर्मकाण्डान्तर्गत संस्कारपद्धति प्रचारस्तत्कालेऽप्यासीदिति सङ्केतयति। 'स्त्रियां बहुष्वप्सरसः स्यादेक वेऽप्सरा अपि"५ इति शब्दार्णव वाक्यात् "गन्धर्वो वीतिहाहूसो: ६ "इति च संसारावर्तवाक्यात् — अप्सरा - गन्धर्वादिवैदिककोशेषु व्याख्यातानाञ्च

१. अमरकोशः पृ. ५२१।
२. अमरकोशः पृ. ५२१।
३. अमरकोशः पृ. १९।
४. अमरकोशः पृ. २३।
५. अमरकोशः पृ. ३३।
६. अमरकोशः पृ. ३४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शब्दानां पुनः कालानुसारिव्याख्यानं अमरपूर्वकोशेषु वैदिककोशोपस्थापित-संस्कृतिधाराया अविच्छिन्नं प्रच्छन्नप्रवाहं साधयति। कात्यः "वृताः कुर्वन्ति ये यज्ञं ऋत्विजो याजकाश्च ते" १ वाक्येनानेन विचारमिमं परिपोषयति। स्वर्ग - देवासुरादि - सम्बद्ध सर्वमपि विचारजातमेषु कोशेषु यत्र तत्र विकीर्णवाक्यैरुपलभ्यते यद् स्वीयमविच्छेद्यसम्बन्धं वैदिकसंस्कृत्या सह संयोजयति।

अमरसिंहस्यामरकोशे निघण्टोः प्रथमाध्यायस्य चतुर्थशब्दः प्रथमवर्गनामार्थं प्रयुक्तः। अमरस्य प्रथमाध्यायस्य प्रथमो वर्गः स्वर्गवर्गो भवति। स्वर्गवर्गे श्रुतिस्मृति पुराणवर्णितानां देवानां विस्तृतवर्णनं, दिग्वर्गे कालवर्गे च ज्योतिः शास्त्रसम्बन्धितथ्यानि कालमानञ्च विलक्षणमेव प्राप्यते। अनेन विभिन्नकालीनानां भारतीयविदुषामनुसन्धानश्रमः प्रत्यक्षं ज्ञायते। अमरसिंहकाले देशेऽस्मिन् वर्षारम्भो मार्गशीर्षमासात् - भवति स्म तदिदं तथ्यमपि दिग्वर्गाध्ययनात्परिस्फुटं भवति। स्वर्गवर्गान्तर्गताऽष्ट चत्वारिंशतमश्लोक व्याख्यायां "विमानो व्योमयाने च सप्तभूमिगृहेऽपि च" अनेन वाक्येन तदानीमपि सप्तभूमिगृहनिर्माणकौशलं २ व्यक्तं भवति। ये केवलं पुरातनभारते उटजमात्रनिर्माणस्य कल्पनां कुर्वन्ति तुच्चक्षुरुद्घाटकं तथ्यमिदम्। भारतीयानामारण्यकसंस्कृतित्वात् विशुद्धसाम्यवादविश्वासाच्च लोकैः कुटीरनिर्माणं क्रियते स्म येनार्थिक स्वातन्त्र्यं देशस्याक्षुण्णरूपेण सुरक्षितं भवति। वास्तुशास्त्रे तु ते विश्वगुरव एव बभूवुरिति द्योतक मिदं भवति। धीवर्गान्तु-षड्रस सुगन्धिद्रव्यनिर्माणादिवर्णनात् भारतीयानां सुरुचिः स्पष्टा जायते। तत्रैव शुक्लादिवर्ण— वर्णनप्रसङ्गे यद्विश्लेषणात्मकं ज्ञानमवाप्यते तेन को नाम न चकितो भवेत्-सहृदयः। अमरस्य शुक्लवर्णनामगणनायां शब्दार्णवकारस्य वाक्यमवधेयम्. —"श्वेतस्तु समपीतोऽसौर श्वेतेतर जपारुचिः।

वलक्षस्तु सितश्यावः कदली कुसुमोपमः॥
अर्जुनस्तु सितः कृष्ण लेशवान् कुमुदच्छविः।
एवमेवाग्रेऽमरः, "हरिणः पाण्डुरः पाण्डुः"

इति वक्ति। अत्रैव शब्दार्णवः 'पाण्डुस्तु पीतभागार्धः केतकीधूलिसन्निभः" एवं स्पष्टयति। अमरः, ईषः पाण्डुस्तु धूसरः कथयति, शब्दार्णवकारश्च "धूसरस्तु सितः पीतलेशबान्वकुलच्छविः" एवं व्यनक्ति।" कडारः कपिलः

१ अमरकोशः पृ. ४२७।

२ Seven Storied buildings.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिङ्गपिशङ्गौ कद्रुपिङ्गलौ१ अस्य व्याख्यायां, "कद्रुस्त्रिषु स्वर्णपिङ्गे", सितपीतहरिद्वत कडारस्तृणवह्निवत्; हरितांशेऽधिकेऽसौ तु पिशङ्गः पद्म-धूलिवत् पिशङ्गस्त्वसितावेशात्पिङ्गो दीपशिखादिषु" इत्यादि-शब्दार्णव-वाक्यानां दर्शनात् रङ्गज्ञाने प्रयोगे च भारतीयानां सूक्ष्मतमा प्रतिभाऽभिरु-चिश्च स्पष्टतो व्यज्यते। भारतीया भाषा भारती ब्राह्मी वेत्युच्यते स्म। भारतीयानां संस्कृतेराधारः श्रुतय आसन्। अमरकोशकारः 'श्रुतिः स्त्री वेद आम्नायस्त्रयी" अनेन प्रकारेणास्य संस्कृति-आधारभूतस्य पर्यायान् प्रददाति। एतदनुसारं कार्यकरणमेव तदानीन्तनः आद्यः धर्मोऽभूत् यथा धर्मस्तु तद्विधिः२। भारतीयेषु सत्वरजस्तमोगुणानां ज्ञानं, उदात्तानुदात्तस्वरित – विज्ञान, आख्यायिका कथा प्रहेलिका समस्यादिलेखनं निषादर्षभगान्धारादिसप्तसङ्गीत शास्त्रस्वरपरिचयः, एतत्सर्वं श्रुतिस्मृति पुराणानुसारं प्रचलितमासीत्। तत-आनद्ध-शुषिरघनादिचतुर्विधवाद्य'वादित्रातोद्यनाम्ना कथ्यते स्म। एवं किल मनोरञ्जनात्मकसाधनसमुत्पादने, मानवस्य चान्तः करणाध्ययने भारतीया विश्वगुरव एवासन्। अमरस्य नाट्यवर्गाध्ययनादवगम्यते यन्मानवस्यान्तकरण-भावा भारतीयमनीषिभिः स्पष्टतया समुद्घाटिताः। नृत्यनाट्यादीनामेको भावः, मुद्रा वा विश्वज्ञानञ्च तुलामारोपितुं शक्यते। एवं सति सभावा सा मुद्रा वाधिकमूल्यवती सिद्धयेत। वारिवर्गान्तर्गताध्ययनेन तदानीन्तन-पोत-नौकादि - जलसन्तरणसाधनज्ञानमप्यत्युच्चमासीन्नात्र संशय। भूमिवर्गे भूमिसम्बन्धिशब्दपर्यायाध्ययनेन सर्वविधभूमिविज्ञानं तदा सुलभमासीदिति विज्ञायते। जलजन्तुविज्ञानमपि - अमरकोशान्तर्गतमुत्कृष्टतमम्। प्राच्योदीच्य-शब्द प्रयोगो निरुक्तेऽवलोक्यते तयोः परिभाषाऽमरस्य भूमिवर्गेऽनेन प्रकारे-णावाप्यते "लोकोऽयं भारतं वर्षं शरावत्यास्तु योऽवधेः।३। देश प्राग्दक्षिणः प्राच्य उदीच्यः पश्चिमोत्तरः। भारत एव चातुर्वर्ण्यन्तदानीमासीत्। यथा तत्रत्य टीकास्थवाक्येन प्रतीयते 'चातुर्वर्ण्यव्यवस्थानं यस्मिन् देशे न विद्यते। तं म्लेच्छविषयं प्राहुरार्यावर्तमतः परम्। अत्रैवामरस्य, प्रत्यन्तो म्लेच्छदेशः स्यादिति वाक्यम्। अमरभूमिवर्गे सुमार्गस्य द्वादशपर्यायान्, कुपथश्च पञ्चपर्यायान् यच्छति। अनेन तदानीन्तना यातायातव्यवस्था

---

१ अमरकोश का-१ वर्ग ५. श्लो. १६।।

२ अमरकोशः का. १. वर्ग. ६. श्लो. ३।

३ अमरः का. २. वर्ग. १।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"२६ जनवरी भारतमातरमाकारयति"

जगत रवि शास्त्री

★

विराजितं त्वन्मुकुटं हिमाद्रिणा, भालस्थलं मानसपद्मकेसरैः ।
उरस्थलं विन्ध्य हिमाद्रिपर्वतैः सुधास्रवद्भिश्च तनु नदीनदैः ।१।

त्वं बंगलापाकसुकण्ठहारैः स्वभेदनीतिं श्रुतिगां करोषि ।
आसामकाश्मीरकरद्वयाभ्यां, नः पाययस्तन्यसुधां स्वप्रेम्णा ।२।

पादौ तव क्षालयतीह सिन्धुः सुधांशुधारा मुखपंकजं च ।
धूपेन दीपेन करोति नित्यं नीराजनं गन्धवहोरविस्ते ।३।

सितातपत्रमिव राजते तव, चन्द्रः शिरोभागगतः सतारकः :
संपूज्य से पद्मकरैर्महर्षिभिः संस्तूयसे च कविभिर्नमस्कृतैः ।४।

त्वं देहलीपद्ममुखेन भाषसे, निवेदयन्ती फलसस्य संपदाम् ।
कृषिप्रधानां कमलैः सुशोभितां, नमामि त्वां भारतमातरं सदा ।५।

सुधांशोर्धाराभिः स्नपयसि च देहं प्रतिनिशं,
हिमाद्रेः संभूतैः शिवयसि तनुं चौषधिरसैः ।
जलैः पूतैर्गंगा दिनमणि तनूजा विनिःसृतैः,
सुधातुल्यैस्तन्यैर्जनमनसि तोषं जनयसि ।६।

शरज्ज्योत्स्नाह्लादैर्हरसि जनतापं बहुविधं,
स्रवत्स्रोतोभिस्त्वं भरसि तृणगुल्मानपि पुनः ।
सुधास्वादैरन्नैर्जनमनसि तोषं प्रकुरुषे,
स्तनाम्ना त्वं धन्या सकल भरणाद्भारतगृहे ।७।

अपि च –

उवाच श्री गान्धिवरो मनीषी,
स्वराज्य बीजं जनमानसेऽत्र ।
जवाहरस्नेहजलेन सिक्तः,
स्वराज्यगुल्मः समवाप वृद्धिम् ।८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुपुष्पितः पल्लवितश्चवृद्धे,
सैवर्धन्टैंकादि — विपाटनेन,
सुधीमता शास्त्रिवरेण गुप्त।
विराजते भारतभूध्वजोऽयम् ।९।

जयेन्दुमस्मिन्नुदितं समीक्ष्य,
यो द्वेलितो मर्त्यमहासमुद्रः ।
श्री भासते पुण्यजनैरवाप्तो
हर्षातिरेको विबुधैरिवामृतम् ।१०।

अखण्डितः सूर्यमरीचिदीप्तो,
स्वतन्त्र राज्यस्य महाध्वजोऽयम् ।
समर्च्यते भूतगणैर्वरेण्यः
काश्मीरजैः कुंकुमपद्मपुष्पैः ।११।

दृष्टो मया भारतवीरगुप्तः
स्वयंप्रभः शान्तिप्रदो नराणाम् ।
स्वतन्त्रराज्यस्य महाध्वजोऽयं.
विराजते स्नेहकणैः प्रसिक्तः ।१२।

जयतु जनगणानां मानसे लब्धनिष्ठः
परिहरति भुविस्थं दुष्टसाम्राज्यमूलम् ।
रणभुविरिपुसङ्घान्मर्दयन् सेनया यः
समधिगतजय श्रीर्भारतस्य ध्वजोऽयम् ।१२।

स्वाङ्गमभिन्नं समभूत्स्वराज्ये
काश्मीरराज्यं वत भारतस्य ।
कृतेऽपि पाकैर्मतसंग्रहाय
यत्नं कदाचित्फलितं न तेषाम् ।१४।

दिवि भुवि च रसायां कः समर्थो गुणांस्तान्
प्रथयितुमपि च स्यान्निर्मलं ज्ञानचक्षुः ।
सुरसरिदपि पारं नैव याता निशाह्नो
गुणगणगणने कोऽहं "जगन्नाथ" दासः ।१५।

इन्दिरामन्दिरः सोऽयं, विजय श्रीः प्रवर्तकः ।
पीतश्वेतनीलछायो, ऽशोकचक्रेण शोभितः ।१६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रक्तहीना क्रान्तिः

प्रा० हरिश्चन्द्र रेणापुरकरः, गुलबर्गा

अस्मन्महामहिमशान्तिविशालदेशे,
शास्त्रैर्विनैव मतपेटिकया पुनश्च ।
क्रान्तिर्हि नूनमभवत्खलु रक्तहीना,
जैत्रं पुनश्च समभूद् भुवि लोकतन्त्रम् ।१।

शोच्यां दशामतितरां विधिशासनस्य,
निष्पेषयद्गगनचुम्बिमहार्घतां च ।
भ्रष्टां च जीवनविधिं जननायकानां,
स्पष्टं विलोक्य मतदानमकारि लोकैः ।२।

आसेतुशैलवितते निखिलेऽपि देशे,
सर्वत्र शासकदलस्य विरुद्धमेव ।
वङ्गात् विहाय मतदानमकारि लोकैः
सत्तामदान्धमुखरांश्च विनेष्यमानैः ।३।

अज्ञानदैन्यदलितैरपि भारतीयैः
प्रौढैश्च राजनयपक्वदृशोपपन्नैः ।
स्वार्थैकदृष्टिजनदुःखपराङ्मुखानां,
दिष्ट्या जनैर्निजमताङ्कुशसन्निरुद्धाः ।५।

बोफर्ससंज्ञितभुशुण्डिपणे गृहीतं,
केनापि भारतजनेन धनं प्रभूतम् ।
इत्युग्रवादविषये बत ! लिप्तमस्ति,
राष्ट्रीयमुख्यसचिवस्य विशुद्धनाम ।६।

दिल्लीश्वरस्य निरवद्यपवित्रनाम,
बोफर्सनामपरिवादकलङ्कितं सन् ।
वर्षद्वयं न किमपीह कृतं प्रभावि
निर्मूलनाय परिवादकरस्य तस्य ।७।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"हिन्दू" समाख्यबहुमानितदैनिकेन,
लेख्यप्रमाणमपि दत्तमभूत्प्रभूतम् ।
लेखानिरीक्षकवरैर्बलनायकैश्च,
तस्मात्पृथक् तमुपदिष्टमभूत्तिरस्तम् ।८।

किन्तु प्रधानसचिवैर्नहि तन्निरस्तं,
स्वेच्छेन राष्ट्रमपि तथ्यनिवेदनाय ।
सम्प्रेरितं न बलवत्र कृतं प्रमार्ष्टुं,
शङ्काविषं जनमनःसु विपच्यमानम् ।९।

श्रुत्वा मृषापि चरिताश्रितलोकवादं
रामो जहौ स्वदयितामपि शुद्धसाध्वीम् ।
दृष्ट्वाऽपमृत्युमपि बीक्षितमात्मवृत्तं
संशीतिलेशरहितेन नृपेण भाव्यम् ।१०।

भङ्गाभिभूतहृदयैरपि नेतृवर्यै—
स्त्यापराधगुणदोषविवेचनात् प्राक् ।
आत्मेक्षणं खलु विधेयमनः प्रशान्तं,
तेनैव नूनमिह सर्वविकल्पसिद्धिः ।११।

नोच्चैः प्रतिश्रुतिततिर्न विलोभनानि,
नोत्कोचदानमपि नोत्कट भाषणानि ।
लोकान्न किञ्चिदपि वञ्चयितुं समर्थं—
मित्येव सिद्धमभवद् वरणेन भूयः ।१२।

पंजाबकश्मिरमहाजटिलां समस्यां,
लोकोपपीडकभयङ्करमूल्यवृद्धिम् ।
निवृंत्तितां प्रबलधार्मिकभावनां च,
नेता न कोऽपि समुपेक्ष्य चिराय तिष्ठेत् ।१३।

संमान्य भारतमहाजननायकस्य,
राष्ट्रप्रधानसचिवस्य जनार्चितस्य ।
सिंहस्य हार्दमभिनन्दनमाचरामि,
श्रीशो ददातु मतिशक्तियशांसि तस्मै ।१४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्यं शिवं सुन्दरम्

सुश्री सन्तोष वर्मा

एक: शिव: आधारो धरण्या
सरणाय अस्या: लोकसरण्या: ।
असावेव सर्वेषां शरण्य:,
सर्वै: सर्वत्र सदा वरेण्य: ।

शिवशक्त्या शक्तिमानेष लोक: ।
सत्सधया सत्यसिद्धि: शुभा वै ।
तनुते सौन्दर्यं सर्वस्यां जगत्याम्
दिशि दिशि लोके अह्नि निशायाम्

सत्येन शिवमयं जगत्सर्वम्
ध्रियते हि लोक: शिवशक्त्या वै ।
द्वावेव सेव्यौ सततं सदा हि
भव्याय रम्याय सौन्दर्यस्रवणाय ।

सौन्दर्यस्रवणेन
शैवानुसरणेन,
सत्यसम्भरणेन,
दीप्यते दीप: दिव्यो हि व्यष्टे:
स्रवते श्रेयश्च विभवश्च समष्टे: ।

— अध्यक्षा, संस्कृत विभाग
गान्धी आदर्श कालेज
समालखा (करनाल)
हरियाणा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"व्यङ्ग्य लेख:"

"एव च अपि च"

निगमस्वरूप शास्त्री

आदि कालादेव सृष्टि: द्वाभ्यां शब्दाभ्यां ग्रस्तास्ति। एतावेव समस्तोपद्रवाणां मूलभूतौ स्तः। यदा इमौ, शब्दौ जीवमात्रस्य हृदये आक्रमतः तदा प्राणी स्वीयमस्तित्वं विस्मृत्य अहंकारक्रोधादिनां विकृतिनामधीनं जायते। सहसैव विभिन्न विपदः उत्पादयति। इमौ शब्दौ स्तः "एव अपि च"।

मानवानां तु का कथा यतोहि मानवस्तु सृष्टेः पृथक्विधः जन्तुरस्ति। परं काननेषु वनेचराः, जलचराः खेचरापि "एवापि" शब्दयोः पञ्जरे बद्धाः सन्ति। सिंहः कथयति अहं "एव" काननाधिपतिरस्मि। अन्यः कोपि सिंहः भवितुं शक्नोत्येव न। स इत्थं स्वीकरोत्येव न यत् अपरः सिंहोऽपि काननधिपति भवितुं शक्नोति। समुद्रेऽपि मकरः मत्स्यं, मत्स्यः मीनं, मीना बालमीनां, "एवापि" शब्दाभ्यां आक्रान्ता भक्षयितुं इच्छत्येव न अपितु झटित्येव उदरसात् करोति।

स्वात्मानं सभ्याः, सुशिक्षिताः सम्पन्नाश्च वक्तारः राष्ट्रयपि "एवापि" शब्दाभ्यां भृशं पीड़िताः सन्ति। तेऽपि एवन्पि शब्दाभ्यां मानसिकाधिरूपेणोद्विग्नास्सन्ति। विस्मृतास्ते यत् "वसुधैव कुटुम्बकम्" किमपि वस्तुजातं नाम। अत एव ते लघुराष्ट्रेषु घनशक्त्याः विप्लवमुत्पादयन्ति। तेषां ध्येयं केवलं इदमेव प्रदर्शनं, यदाहमेव शक्तिमानस्मि नान्यः कश्चित्—अस्मिन् विश्वे। इत्थं ते स्वीयां "एव च अप्योश्च" भावनां सन्तोषयन्ति।

सर्वं त्यक्त्वा सततं तपः तप्यमानाः तपस्विनोऽपि "एवापि" शब्दाभ्यां संतप्ताः सन्ति। तेऽपि आत्मानं सर्वोत्कृष्टं तपस्विनं प्रमाण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यितुं अपरान् वपन्ति । अहमहमिकया भावनया उद्घोषयन्ति च "अहमेव ब्रह्म" ।

धर्मेषु धर्मग्रन्थेषु च एव-अप्यो: भावना विराजते । परं जिनधर्मे एवापि शब्दाभ्यां विशिष्टं महत्वं प्रदत्तमस्ति । संक्षेपतस्तु—"अहमेव सुष्ठरस्मि परं स अपि भविता ।" इत्थं यदि वयं इमां भावनां चरितार्थयाम: तर्हि शतश: आधिव्याधिनां क्लेशानां च समूलं नाश:-स्यात् । परं नृपं क: कथयेत् यत् त्वमपि स्वीयं मुखं प्रक्षालय । उपदेष्टा ब्राह्मणस्तु अवशान् "बैंगन" भक्षणात् निषिध्य स्वयमेव "बैंगनानि" अश्नाति ।

जिन धर्मानुसारं वैविध्यानुसारं आत्मान: अपि विभिन्ना: सन्ति । परं जैनधर्म: अन्यधर्माणां "आत्मा एक एवास्ति" अस्मिन् मते न विश्वसिति । अपितु अनेकान्तवादं स्वीकरोति । यद्यपि जिनधर्म:" "एवापि" शब्दयो: पक्षधरोऽस्ति । जैन धर्मस्य स्यादवादानुसारं विभिन्न दृष्टिकोणानाधारीकृत्य ज्ञानस्य वैविध्यमपि सप्तविधं-अस्ति । यथा —

(१) अस्ति (२) नास्ति (३) सन्ति अस्ति च (४) कथयितुं न शक्यते (५) अस्ति परं कथयितुं न पार्यते । (६) नास्ति कथयितुं च न शक्यते (७) अस्ति, नास्ति कथयितुं च शक्यते । इति । जिन तीर्थंकरा मन्यन्ते यत् ज्ञानस्य सप्त स्रोतांसि "एव" सन्ति । महर्षि शंकराचार्येण श्री रामानजाचार्येण च उपरोक्त सप्त स्रोतसां सशक्त: विरोध: कृत: । सत्यं-इदमकाट्यं तथ्यं यत् "एवापिना च" धर्मा अपि व्यापादिता: । सगुण मतानुयायी निर्गुणं निन्दति । शक्तेराराधक: शैवं पिशुनयति अपर: वैष्णवम् । जिनस्य जैना: बौद्धस्य बुद्धिवादमाक्षिपन्ति । एक: परमाक्षिपन् अन्यस्य तर्कं वितर्कयति स्वधर्मं सर्वोत्कृष्टं उद्घोषयति । परं सत्यं तु इदमस्ति ।

तर्कोऽप्रतिष्ठ: श्रुतयो विभिन्ना:,
नैको मुनि र्यस्य मतं प्रमाणम् ।
धर्मस्य तत्वं निहितं गुहायाम्,
महाजनो येन गत: स पन्था ।

अहं तु मन्ये यत् "एवापि" शब्दौ ईर्ष्या, द्वेष. स्पर्धाया: प्रणेतारौ । एतयो: शब्दयो: कारणादेव अहमहमिकया भावनया वेद, पुराणस्मृतिग्रन्थानां रचनाभवत् । शब्दानां व्युत्पत्तिरजायत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वैताद्वैतमतानाञ्च स्थापना सञ्जाता आभ्यां शब्दाभ्यां प्रताड़िता प्रेरिताश्च जनाः केशाकेशि मुष्टामुष्टिमनुसरन्ति । एकः लगुडेन प्रहरति अपरः अर्धचन्द्रं ददाति । पश्चाम्बु आसाम प्रान्तयोः सहस्रशः कुटुम्बानां विनाशस्य कारणमपि 'एवापि" शब्दौ स्तः । राजनैतिक क्षेत्रे तु "एवापि" शब्दौ विप्लवमुत्पादयतः । एकोननवनवतितमे अस्मिन् वर्षे लोकसभायाः सार्वदेशीय द्वन्दाकलने तु भुशुण्डी प्रयोगं विहाय "एवापि" शब्दयोः मुक्तकण्ठेन प्रयोगः कृतः ।

यद्यपि लोके इदं प्रसिद्धं प्रचलितञ्चास्ति यत् तक्रे जलमिश्रणात् तक्रं वर्धते, इत्थं कलहमपि तर्के वितर्क मिश्रणात् वर्धते तथैव वैरमपि । परं "तर्कों हि अनवधिः', "मरणान्तानि हि वैराणि" । परं तर्काचार्यस्तु स्वीयं तर्कमेव सर्वोपरि मन्यन्ते । यतोहि ते प्रतिपक्षं हस्तामलकवत् दर्शयन्ति । परं एवापि शब्दयोः प्रतापेन विततः तर्काचार्यस्तु धर्माचार्यं ईर्ष्यति, धर्माचार्यश्च विज्ञानाचार्यमक्षमति कथयति च ।

गजहब कभी साईंस को सजदा न करेगा ।
इन्सान उड़े "भी" तो फरिश्ते न बनेंगे ।।

आध्यात्मिक-रूप-पुण्यदृष्टिप्रभोः प्रेमिजनास्तु उपदिशन्ति यत् काम-क्रोधादयः मनुष्यमात्रस्य शरीरस्था विकारास्सन्ति । परं "एव च अपि च" भाषाया इमौ द्वौ शब्दौ मनुष्यमात्रस्य मनसः विकारौ स्तः । येनेदं शब्दयुग्ममवगतं तेनेदं अपारं संसारमवगतम् । तस्मै तु "स्थितप्रज्ञस्य" उपाधिः दातव्यः ।

यत्र तत्र सर्वत्र यस्मिन् क्षेत्रे च नः दृष्टिः प्रसरति, तत्रैव एवाप्योः विरोधाभासं मुहुर्मुहुः दृश्यते । समग्रं संसारं एवाप्योः-अग्नौ दह्यते । शिक्षाक्षेत्रे शिक्षाचार्याः स्वस्वविषयानवलम्ब्यात्मानं सर्वशिरोमणि विद्वांसं घोषयन्ति, न ते अन्य विदुषः सत्तां स्वीकुर्वन्ति स्नातकोत्तरउपाधि-दर्पेण दर्पिता साक्षरता (?) ज्ञानविषेणोत्फुल्लितोदरवक्षस्थला, अत एव विकृतमस्तिष्का मिथ्या गर्वेण भणन्ति । यत् वयमेव सर्वोत्कृष्टाः ।

एकतः ज्ञानं विषमस्ति । परं परतः ज्ञान-गंगायां निमग्नः पूर्णरूपेण "वसुधैव कुटुम्बकम्" चरितार्थी कुर्वन्, परोपकारी जनः, प्राणिमात्रस्य पीड़ां दृष्ट्वा तं असहमानः पीडया ज्ञानं विनिन्दन् पञ्जाबी लेखकः भाई वीर सिंहः उद्घोषयति :—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२ ३ ४
होशां नालों मस्ती चंगी रखदी सदा टिकाणे ।
५ ६
क्यों होयग्रा किक्कूं होयग्रा खप खप मरे स्याणे ।
ग्रर्थात् ज्ञानादज्ञानं वरम् ।

यतोहि ग्रज्ञानिनं तस्याज्ञानमेव तस्मै कवचरूपमस्ति । परं ज्ञानि जन: ज्ञानकारणात् परपीड़या भृशं दु:खी भवति—

ज्ञानमेव "एव-ग्रप्यो: च" तर्कवितर्कमुत्पादयति । दुर्योधन: सुयोधनस्तु ग्रासीत् । परं तेन ग्रामृत्यो: ,'एव ग्रपि" शब्दयो: ग्रर्थं नैवावगतम् । ग्रस्माद् कारणादेव विश्वस्य भयङ्करतमं 'महाभारतम्" नाम युद्धमभवत् । ग्रहमपि एव च ग्रपि च शब्दाभ्यां पीड़ितोऽस्मि । ग्रत एव इत्थं लिखामि यतोहि एतयो: प्रहारं हृदये दण्ड:-इव लगति । दण्डश्च सर्वोपरि विराजते —

दण्ड: शास्ति प्रजा सर्वा दण्डएवाभिर. ति ।
दण्ड: सुप्तेषु जागर्ति दण्डं धर्मं विदुर: बुधा: ।।

यतोहि यत्र दण्ड: उद्दण्डतामेति तत्र एव ग्रप्योश्च एक: शब्द: शान्तिमेति इमौ शब्दौ मामपि ग्रङ्गारमयै: टेढकाक्षिभि: पश्यत: । ग्रत: ग्राभ्यां शब्दाभ्यां कोपभयात् ग्रहमपि इमौ नमामि ।

---

(१) यतोहि एतेषां ज्ञानं "विद्याविवादाय" ग्रस्ति ध्येयार्थमेवास्ति । ग्रत एव ज्ञानं विषम् ।

(२) ज्ञानं या सूझ बूझ (३) ग्रज्ञानं. जाड्यं (४) ठीक स्थान (५) कैसे (६) चिन्तन, चिन्ता करके ।

— सरकारी संस्कृत महाविद्यालय
नाभा (पटियाला)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतस्य संस्कृतपत्र-पत्रिका

१ प्रजस्रा - अखिल भारतीय संस्कृत परिषद् म. गान्धी मार्ग, हजरत गंज, लखनऊ- ६००१ (उ. प्र.)

२ अनादिवाक् (त्रैमासिका) संस्कृत सेवा संस्थानम् ५९-८ मध्य मार्ग, तुगलकाबाद विस्तार नई दिल्ली- १००१९

३ अर्वाचीन संस्कृतम् (त्रैमासिकम्) देववाणी परिषद्, आर, वाणी विहार, नई दिल्ली-११००५९

४ उत्कलोदय:- ए-९९, सेक्टर १३, राउरकेला, उत्कल-७६०००९

५ ऋतम्- अखिल भारतीय संस्कृत परिषद् म गांधी मार्ग, हजरत गंज लखनऊ-२२३९०१ उ. प्र.

६ कामधेनु:- (द्वैमासिकम् भारत विद्यापीठम् पो. ओ. एरानेल्लूर, जि. त्रिचूर, केरल ६८०५०१ (भारत)

७ गाण्डीवम्:- (साप्ताहिकम्) गाण्डीव कार्यालय, सम्पूर्णानन्द संस्कृत विश्व विद्यालय, वाराणसी-२२००२ (उ. प्र.)

८ गीर्वाण सुधा.- (मासिकम्) देववाणी मन्दिरम् इन्दिरा निवास, पो. अ. गो मार्ग, बम्बई-४००००४

९ गुञ्जारव:- (त्रैमासिकम्) श्रीकालेश्वर मन्दिरम् घमरे गल्ली अहमद नगरम् ४१४००१ (महाराष्ट्र)

१० गैर्वाणी:-(पाक्षिकम् संस्कृतम् भाषा प्रचारिणी सभा, चितूर आन्ध्र प्रदेश ५१७००१

११ चन्दा मामा.- (मासिकम्) चन्दा मामा बिल्डिंग, वडप्पलनी, मद्रास-७०००२६ (भारत)

१२ जन भारती सदावर्त मठ, ओडिशा

१३ दिग्दर्शिनी:- श्री जगन्नाथ संस्कृत विश्व विद्यालय, उत्कल संस्कृत गोवर्धन समाज, पुरी - ७५२००१

१४ दिव्यज्योति:— (मासिकम्) दिव्यज्योति कार्यालय भारसी विहार, मशोबरा, शिमला - १७१००७ (हि. प्र.)

१५ दूर्वा — मध्य प्रदेश संस्कृत अकादमी. चार बंगला मार्ग, सिविल लाइन्स, भोपाल-४३२००२ (म. प्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१६ परमार्थ सुधा:- सार्वभौम संस्कृत प्रचार संस्थान,
३८-११० हौज कटोरा, वाराणसी (उ. प्र.)

१७ प्रणव पारिजात: — (मासिकम्) श्री सीताराम वैदिक महाविद्यालय,
७२ पी. डब्ल्यू. डी. रोड़, कलकत्ता -११००३५

१८ प्रणव प्रसूनम् : —(त्रैमासिकम्)
सीताराम विद्यामन्दिर दुर्गापुरी, श्रीरंगम्

१९ प्रभातम् :- डी ७७, राजाजी पुरम् लखनऊ- २२६०१७ (उ. प्र.)

२० प्राच्य ज्योति:- इन्स्टीटयूट आफ संस्कृत एण्ड इण्डोलोजिकल स्टडीज
कुरुक्षेत्र विश्व विद्यालय, कुरुक्षेत्र - १३२११८ (हरियाणा)

२१ प्राच्य भारती :- (अर्धवार्षिकम्) असम संस्कृत समिति: काबलीपाड़ा,
गुवाहाटी- (असम)

२२ पारिजातम् (मासिकम्)
१०५-१६४ प्रेमनगर, कानपुर-२०८००१ (उ. प्र.)

२३ ब्रह्म विद्या- अडयार - (मद्रास)

२४ बाल संस्कृतम् (मासिकम्) मणिलाल मेहता मार्ग,
लालबहादुर शास्त्री पथ, घाटकोपर बम्बई-४०००८६ (महाराष्ट्र)

२५ भारत मुद्रा (द्विमासिकम्)
पुरनाट्टुकरा पो. त्रिचूर, केरल-६८०५५१

२६ भारती (मासिकम्) भारती भवन, बी. १५, न्यूकालोनी,
जयपुर — ३०२००१ (राजस्थान)

२७ भारतीय विद्या भारतीय विद्या भवन बम्बई-४००००७ (महाराष्ट्र)

२८ भारतोदय: (मासिकम्) गुरुकुल महाविद्यालय, ज्वालापुर,
हरिद्वार - २४९४०५, जि. सहारनपुर (उ. प्र.)

२९ भास्वती: काशी विद्यापीठ, वाराणसी - (उ. प्र.)

३० मनीषा, श्री कामेश्वरसिंह दरभंगा,
संस्कृत विश्व विद्यालय, दरभंगा-(बिहार)

३१ मनीषा सूत्रम् : दारागंज प्रयाग (उ. प्र.)

३२ युगगति: (साप्ताहिकम्) बख्शीपुर, गोरखपुर - २७३०२१ (उ. प्र.)

३३ ललिता काव भारती, किशोर विद्या निकेतन,
बी-२-२३६ ए भदैनी, वाराणसी (उ. प्र.)

३४ लोक संस्कृतम् कार्यालय श्री अरविन्द आश्रम,
पाण्डीचेरी-६०५००२

३५ लोक सुश्री (मासिकम्) लोकभाषा प्रचार समिति:,
बड़ा ओडिया मठ:, पुरी-७५२००१ (ओडिशा)

३६ विश्व भाषा (त्रैमासिकी) बी. एस. पी. रामनगर दुर्ग,
वाराणसी २१००८ (उ. प्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

३७ विश्व संस्कृतम् (त्रैमासिकम्) विश्वेश्वरानन्द वैदिक शोध संस्थानम्
आश्रमः, होशियारपुर-१४६०२१ (पञ्जाब)

३८ वेदज्योतिः (मासिकम्) विश्व वेद परिषद,
सी. ८१७ महानगर लखनऊ (उ. प्र.)

३९ शारदा पाक्षिकम्) शारदा कार्यालय-२ शैलम,
पत्रकार नगरी, पुणे-४११०१६ (महाराष्ट्र,

४० शारदा (मासिकम्) शारदा कार्यालय,
पो बाक्स ७५० पुणे-४११०३० (महाराष्ट्र)

रक्तहीना क्रान्तिः

प्रा. हरिश्चन्द्र रेणापुरकरः

(गताङ्कादग्रे)

दुर्दान्तमत्तगजकृद्धि विनाशलीलां, निःशङ्कमेव विदधद् विचरन् समाजे
सत्तामदान्धजननायकदृप्तसार्थः, दिष्ट्या जनैर्निजमताङ्कुशसन्निरुद्ध ।५।
बोफर्ससंज्ञितभुशुण्डिपणे गृहीतं. केनापि भारतजनेन घन प्रभूतम् ।
इत्युग्रवादविषये बत ! लिप्तमस्ति राष्ट्रीयमुख्यसचिवस्य विशुद्धनाम ६।
दिल्लीश्वरस्य निरवद्यपवित्रनाम, बोफर्सनामपरिवादकलङ्कितं हत् ।
वर्षद्वयं न किमपीह कृतं प्रभावि, निर्मूलनाय परिवादकरस्य तस्य ७।
'हिन्दू" समाख्यबहुमानितदैनिकेन, लेख्यप्रमाणमपि दत्तमभूत्प्रभूतम् ।
लेखानिरीक्षकवरैर्बलनायकैश्च, तस्मात्पणे तमुपदिष्टमभून्निरस्तुम् ।८।
किन्तु प्रधानसचिवैर्नहि तन्निरस्तं स्वेडेन राष्ट्रमपि तथ्यनिवेदनाय ।
सम्प्रेरितं न बलवन्न कृतं प्रमाष्टुं, शङ्काविषं जनमन सु विषच्यमानम् ।९।
श्रुत्वा मृषापि चरिताश्रितलोकवाद, रामो जहौ स्व-दयितामपि शुद्धसाध्वीम् ।
दृष्ट्वाऽपमृत्युमपि वीक्षितमात्मवृत्तं, संशोधिलेशरहितेन नृपेण भाव्यम् ।१०।
भङ्गायिभूतहृदयैरपि नेतृवर्यै- रंयापराधगुणदोषविवेचनात् प्राक् ।
आत्मेक्षणं खलु विधेयमतः प्रशान्तं. तेनैव नूनमिह सर्वविकल्पसिद्धि ११।
नोच्चैः प्रनिश्रुतिततिर्न विलोभनानि, नोत्कोचदानमपि नोत्कटभाषणानि ।
लोकान्न किञ्चिदपि वञ्चयितुं समर्थ— मित्येर सिद्धमभवद् वरणेन भूयः ।१२।
पंजाबकश्मिरमहाजटिलां समस्यां, लोकोपपीडक भयङ्करमूल्यवृद्धिम् ।
निर्वृत्तितां प्रबलधार्मिकभावनां च, नेता न कोऽपि समुपेक्ष्य चिराय तिष्ठेत् ।१३।
संमान्य भारतमहाजननायकस्य, राष्ट्रप्रधानसचिवस्य जनार्चितस्य ।
सिंहस्य हार्दमभिनन्दनमाचरामि, श्रीशो ददातु मतिशक्तियशांसि तस्मै ।१४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

पञ्चाम्बुप्रदेशे संस्कृतस्य घोरा–उपेक्षा

पञ्जाब प्रदेशे यत्र आतङ्कवादस्य भयावहा समस्या प्रवर्तते तत्रैव भाषासमस्या अपि विकटरूपं धारयति । अत्र हिन्दीपञ्जाबीभाषयोः संघर्षः प्रारंभादेवासीत् । एष संघर्षश्च न भाषाणामस्ति—अपितु लोकैः स्वार्थमग्रे कृत्वा समुत्पादितः अस्तु नाम एतत्—मया तु केवलं संस्कृत विषये संक्षेपतो निवेद्यम् ।

पञ्जाबप्रदेशः संस्कृतस्य गढरूपेण स्वीक्रियते स्म । अत्र प्रख्याताः- विद्वांसः जन्म लेभिरे संस्कृतञ्च वर्धयामासुः । अद्य अत्रैव संस्कृता वागवसीदति । प्रशासनं यदि पञ्जाबीभाषायै- एव महत्वं ददाति तर्हि लोकैस्तु स्वभाषासंस्कृतिरक्षार्थं प्रयासाः कार्याः संस्कृतस्य न कयापि भाषया सह संघर्षः । पञ्जाबीभाषाया अपि मूलं संस्कृतमेव । अतः सर्वैः सम्मिल्य संस्कृतरक्षायै पञ्जाबप्रदेशे प्रयासाः करणीयाः । एवमनुश्रूयते यत् पञ्जाब-विद्यालयशिक्षामण्डलेन दशमकक्षातः संस्कृतभाषा निस्सारिता, इति सर्वं चिन्ताकरम् ।

संस्कृतरक्षायै यद्यपि पञ्जाबे हिन्दी संस्कृतविकासपरिषद् वर्तते । पञ्जाम्बुप्रान्तीय संस्कृतसाहित्यसम्मेलनमपि- आसीत् ।

पञ्चाम्बुप्रान्ते संस्कृतस्य पुनः स्थापनाय तत्रत्य-संस्कृतसंस्थाभिः—कार्यशीलत्वं धारणीयम् । विद्यालयानां महाविद्यालयानां संस्कृतमहाविद्यालयानामराजकीयराजकीयानां पृथक् २ तथा च सर्वेषामेकं विशालसंगठनं करणीयम् तन्माध्यमेन च न केवलं शिक्षाविभाग एव अपितु राज्यपालः प्रबोधनीयः । बारं २ सम्मिल्य स्वतर्कान् - च संस्थाप्य विवशीकरणीयम् संस्कृतस्योत्थानाय प्रशासनम् ।

सामाजिका अपि विभिन्नसम्मेलनमाध्यमेन कविसम्मेलननाटकप्रदर्शन-विभिन्नोत्सवमानन प्रसंगेन संस्कृतं प्रति समाकर्षणीयाः एवं करणेन पञ्जाबे संस्कृतस्य वर्चस्वं वृद्धिमेष्यति । परन्तु-अत्र सर्वेषां संस्कृतज्ञानां सहयोगः परमावश्यकः । आशासे सर्वेऽपि पञ्चाम्बुप्रदेशीयसंस्कृतविद्वांसः, छात्राश्च देशरक्षायै संस्कृतिसंरक्षणाय संस्कृतोद्धाराय च सम्मिल्य प्रयासान्-करिष्यन्ति ।

विधानसभानिर्वाचनानि

अत्रास्माक सर्वप्रान्तीयविदुषां सविधे निवेदनमिदमस्ति यत् यत्र यत्र निर्वाचनानि बिधानसभायै भवन्ति तत्र तत्र भवद्भिः सम्मिल्य केवलं मतदान तेभ्यः करणीयं ये किल संस्कृतानुरागिणो भवेयुः । अपरेऽपि लोकाः संस्कृत-प्रेमिसंस्कृतज्ञप्रत्याशिने मतदानाय प्रेरणीया येन देशस्य एकता अखण्डता च अक्षुण्णा तिष्ठेत् ।

— केशव शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R. N. 6384/57 ल—33/एस. एम. / 10/89

रूसदेशे अभिनीतस्य



मृच्छकटिकम् संस्कृतनाटकस्य एकं दृश्यम्

19-2-90

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

शिमला मार्च, १९९०

र्षम् ३४ अङ्कः ६

संस्कृतस्य सचित्रमासिकम्

होलिकोत्सवकालेऽयं राधाकृष्णयुगं सदा
समायाति समायाति दिव्ये बृन्दावनेऽवनौ ।
धन्योऽयं भारतो देशः धन्याः भारतवासिनः
यत्रायं परमो ब्रह्म रंगक्रीडां करोति वै ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमः

क्र.	विषयाः		लेखकाः		पृष्ठम्
१.	संस्कृत कोशवाङ्मयम् (क्रमशः)	...	प्रो. केशव शर्मा, सम्पादकः	...	१
२.	मडेलाऽभिनन्दनम्	...	डा. हरिश्चन्द्र रेणापुरकरः कर्णाटक	...	२१
३	हिमाचल वैभवम्	...	श्री हरिदत्त शैलज (हि. प्र.)	...	२३
४	वेदांगेषु पाणिनीयव्याकरणम्	...	आचार्य श्याम लाल शर्मा	...	२८
५	हसन्तुतराम्	..	श्री शशिकान्त शर्मा हि प्र.	...	२९
६.	साहित्य सरिता	...		...	३१
७.	समाचाराः	...		...	३[illegible]

दिव्यज्योतिः

हि० क० सं०भा० अकादमी प्रदत्तानुदानसाहाय्यम्। पत्रिकागतमुद्रणदोषाणां सम्पादकीयनीतिविषये च अकादमीदायित्वं नास्ति।

हिमाचल प्रदेश—पंजाब-हरियाणा-जम्मूकश्मीर - मध्य प्रदेश—राजस्थान—महाराष्ट्र उत्तरप्रदेश शासन-स्वीकृतं केन्द्रशासनपुरस्कृतं सचित्रं संस्कृतमासिकम्।

पत्रस्य उद्देश्यानि तथा नियमाः

सरल—सरस-सुबोध-साधनैः सर्वस्मिन् संसारे संस्कृतस्य प्रसारः, साहित्यान्तर्गतानां सकलकलानां समन्वेषणं, संसारस्य हितसम्पादनम्, एवं लौकिक - अलौकिकस्वातन्त्र्यस्य प्राप्तिः।

"दिव्यज्योतिः" प्रतिमासं पञ्चदशतारिकायाम् (आङ्ग्लमानेन) प्रकाशितं भवति।
पत्रस्य वार्षिक मूल्य ३० रु० अर्धवार्षिकं १५ रु० एकस्याङ्कस्य च रु० २-५० भवति।
वर्षारम्भः अक्तूबर—मासतः भवति ग्राहकः कस्मादपि मासाद् भवितुं शक्नोति।
ग्राहकैः, "सम्पादक, दिव्यज्योतिः, भारती विहार, मशोबरा, शिमला-१७१००७ हि० प्र०" इति संकेते धनादेशेन वा. शु. प्रेषणीयम्।

परिचयः

संस्थापकाः तथा आद्यसम्पादकाः आचार्यश्रीदिवाकरदत्त शर्माणः, — दूरभाषः 78459
प्रधानसम्पादकः— आचार्य केशव शर्मा एम. ए., एम, फिल, साहित्यरत्नम् „ 8 300
सम्पादकः- श्रीमती सूनृता गौतम एम. ए. (संस्कृत हिन्दी)
दिव्यज्योतिः कार्यालयः भारती विहारः, मशोबरा, शिमला-७ (हि. प्र.)
मुद्रकः प्रकाशकः —

भारतीमुद्रणालय भारती विहार, मशोबरा-१७१००७ शिमला (हि. प्र.)
स्वामी:- श्रीमती आचार्य रत्नकुमारी शर्मा

मार्च, १९९० चैत्रः २०४६ — वर्षम्—३४ अङ्कः ६

वार्षिक मूल्यम् ३० रु०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गताङ्कदाग्रे

संस्कृतकोशवाङ्मये

विद्यते तं म्लेच्छविषयं प्राहुरार्यावर्तमतः परम् । अत्रैवामरस्य, प्रत्यन्तो म्लेच्छदेशः स्यादिति १ वाक्यम् । अमरो भूमिवर्गे सुमार्गस्य द्वादशपर्यायान्, कुपथश्च पञ्चपर्यायान् यच्छति । अनेन तदानींतना यातायातव्यवस्था प्रगतिशीलाऽनुमीयते । राजमार्ग इत: पृथग्भवतिस्म । मार्गमानान्यपि सुनिश्चितान्यासन् । यथाहामरः 'गव्यूति स्त्री क्रोशयुगम्"२ । अत्रैव धन्वन्तरसहस्र तु क्रोशः इति वाचस्पतिः तथा च शब्दार्णवः "धनुर्हस्तचतुष्टयम्", द्वाभ्यां धनुः सहस्राभ्यां गव्यूतिः पुंसि भाषितः ।" अमरश्च पुनः 'नल्वः किष्कुचतुः शतम्' अत्रैव च कात्यः" नल्वं हस्तशतम्—इत्याह एभिर्वाक्यैर्मार्गमानस्य सुनिश्चितिः स्पष्टा ।

पुरसम्बन्धिशब्दसंचयस्तु कोशेऽस्मिन् पृथगेव पुरवर्गे विहितः । तस्यायमाद्यः श्लोकः

'पूः स्त्री पुरी नगर्यौ वा पत्तनं पुटभेदनम् ।
स्थानीयं निगमोऽन्यत्तु यन्मूलनगरात्पुरम् ॥"
तच्छाखानगरम

एतानि नामानि राजधान्या एव भवन्ति ३ स्म । अन्यलघुनगरेभ्यः शाखानगरमित्यस्यैव प्रयोगो भवति स्म । अनेन स्पष्टं यदमरकाले ततोऽपि पूर्वञ्च सुसम्पन्नानि नगराणि शाखानगराणि चासन् भारते ततश्च विपण्यः आपणादय सर्वमपीदं भवति स्म । वेश्याशब्दः वैदिककोशेष्वपि प्राप्यतेऽमरकाले वेशो वेश्याजनसमाश्रयः, वाक्यादस्मान्नगरोपनगरेषु वेशाः-भवन्ति स्म-इति विज्ञायते गृहनिर्माणकौशलं प्रसिद्धमासीत् । व्यक्त्यनुरूपाणि गृहाणि भवन्तिस्म । अन्योन्याभिमुखशालचतुष्टयगृहाण्यपि - आसन् मुनीनामावासस्थानानि पर्णशाला, उटजानि वा कथ्यन्ते स्म । वाजिनां शालाः, शिल्पिनां शालाः, पानीयशालाः पृथक् २ आसन् । छात्रावासाः तदा मठाः, कथ्यन्तेस्म । मदिरागृहाणि गञ्जा भवन्ति स्म । सूतिका निवासाय पृथक् व्यवस्था आसीत्-प्रतिगृहम् । प्रसाधनकक्षाणि मण्डपानि भवन्ति स्म । धनिनामावासः हर्म्यं राज्ञां प्रासादः, भूभुजां स्त्र्यगारं अन्तः पुरम्-इति कथ्यतेस्म । सर्वेषु गृहेषु अङ्गनानि, चत्वराणि, अजिराणि वा आसन् । पुरद्वारं गोपुरं वा तदानीमप्यासीत् । लताप्रतानादिभिरपि प्रवेशद्वारस्या-

१ अमरः का. २ वर्ग. १
२ अमरः का. २ वर्ग. १
३ अमरः का. २ वर्ग २

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च्छादनं भवति स्म तदैव तन्नामकरणं तोरणः - इत्यासीत्। विष्कम्भार्गला-दीनां प्रयोगोऽप्यासीत् । पाषाणादिनिर्मितसौधाधिरोहणाय मार्गस्य नाम आरोहणं, सोपानं वा भवति स्म । एवं विधारोहणावरोहणसाधनस्य नाम निश्रेणिः - अधिरोहिणी वोच्यतेस्म । सम्मार्जन्याः बहुकार्या वा प्रयोगोऽपि जायतेस्म । गोपालानां गृहाणि - आभीरपल्ली घोषनाम्ना वा प्रसिद्धान्यासन् १ । शबराणां भिल्लानामपि वा ग्रामा आसन् । पुष्पवृक्षफललतादियाः भारतीयाः ग्रामा आसन् इत्यप्यवगम्यतेऽमर-स्याध्ययनात् । 'गृहारामास्तुनिष्कुटाः २ गृहोपवनस्येदं नामद्वयम् । साधारणानां गृहस्येत्यर्थः । धनिनां तु कृत्रिममुपवनमारामनाम्ना प्रसिद्धम् । आरमन्त्यस्मिन्निति । अमात्यस्य गृहोपवनं गणिकायाश्च वृक्षवाटिका नाम्ना प्रसिद्धम् । राज्ञस्तु आक्रीडः । यत्र च सस्त्रीको राजा क्रीडति स्म तत्प्रमदवनमिति कथ्यते । एवमेव लतागुल्मक्षुपादिभिर्विविध-नामभिः परिज्ञायते यद्भारतीया वृक्ष-लता-दि प्रसाधनकलायां औद्यानि-क्याञ्च तदानीमपि विश्वविख्याता आसन् । जम्बीरनिम्ब- बिल्व-श्रीफल-आम्र - बदरी नारङ्ग - जम्बु फलादीनामुल्लेखात्तेषां तात्कालीनः प्रयोगः । गुह्यका आरण्यकाश्च पशुपक्षिमृगादयोऽपि वर्णिताः । मनुष्यवर्गेऽमरः निरुक्त-वत् पञ्चजनप्रयोगं मनुष्यपर्याये कुरुते । अमरस्था स्त्रीपर्यायाः भारतीय-संस्कृतौ नारीमहत्वप्रकाशकाः । सा किल मन्त्रव्याख्यातृरूपेणाचार्या प्राध्यापिकारूपेणोपाध्याया "सैरन्ध्री शिल्पकारिका' ३ अस्यैवश्लोकस्य व्याख्यायां –

चतुःषष्ठिकलाभिज्ञा शीलरूपादिसेविनी ।
प्रसाधनीयचारज्ञा सैरन्ध्री परिकीर्तिता । इति

कात्यवचनं महत्वपूर्णं वर्तते । यत्र सा वारमुख्या वर्तते तत्रैव दैवज्ञा अपि । विश्लेषणेनानेन तत्काले भारतीयनार्याः सर्वक्षेत्रव्यापित्वमभिव्यज्यते । पारस्परिककौटुम्बिकसम्बन्धा भारतीयानां परमपावनाः । तत्कालीना नारी आशिखमानखञ्च सुवर्णरत्न - पुष्पादीनामाभरणैरलंकृताः प्रतीयते । नरा-णामपि कानिचिद्भूषणानि भवन्ति स्म । एतेन भारतस्य समृद्धिः स्पष्टं व्यज्यते । अङ्गराग वासकादीनामपि प्राचुर्येण प्रयोग चिन्हानि कोषादस्मा

१ कुटिग्रामकयोः पल्ली । शाश्वतः । अमरकोशः का २ वर्ग ३ ।
२ अमरः का. व. ४ ।
३ अमरः का. व. ६ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ल्लोकेषु स्पष्टं व्यक्ती भवन्ति । वाल्क फाल - वादर - कौशेयराङ्कवादि-वस्त्राणि सुन्दरतमानि बहुमूल्यानि चाभवन् । साधारणपरिधानवसनानि, पञ्चोपरिवस्त्राणि आप्रपदीनकञ्चुकादीनि स्त्रीणां आर्धोरुकाणि, पादाग्र-पर्यन्तलम्बमानानि विविधानि वसनानि - आसन् - तदानीम् । स्त्रीणां विभिन्नकेशसंरचना पुष्पाद्यलङ्करणञ्चापि तदानीं समाजे दृश्यते । शयनीय साधनानि मुकुरादीनि च सर्वमपीदं तदानीं लभ्यते ।

अमरकोशस्यान्तिमा ब्रह्मक्षत्रविट्शूद्रवर्गाः सांस्कृतिकाधारेण नितान्तं महत्वपूर्णाः । तत्र ब्रह्मवर्गे समाजस्य च चतुराश्रमेषु नियन्त्रणं सामाजिका-र्थिक - राजनैतिक - प्राशासनिकादिविविधदृष्टिकोणैरतितरां महत्वपूर्णम् तद्यथा - इज्याध्ययनदानयाजनाध्यापनप्रतिग्रहैर्ब्राह्मणः षट्कर्मा आसीत् ब्रा-ह्मणमात्रस्य कृते षट्कर्माण्येतानि परमावश्यकानि - आसन् एतदतिरिक्तं स न क्वापि किमपि कर्मकर्तुमधिकारवान् - आसीत् । तस्मै पञ्चयज्ञकरणस्या-प्यावश्यकविधानमासीत् । पञ्चयज्ञाश्चैते:

अध्यापनं ब्राह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो वलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥

अस्मिन् काण्डेऽग्रे ब्राह्मणोऽसौ कथं षट्कर्माण्याचरेदिति तद्विधानस्य, साधनानां व्यवस्थायाश्च पूर्णतो विवेचनं वर्तते ।

क्षत्रियवर्गे क्षत्रियाणां शासनाधिकारित्वं प्रतिपादितम् । विराट् -सम्राट्-चक्रवर्ती - सार्वभौमः – एतेषां पृथक् २ परिभाषाभिस्तत्कालीनशासनपद्धतिर-वगम्यते । राज्ञः सहायकाः- मन्त्रिणः, सचिवाः, पुरोधा, प्राड्विवाकः, इत्यादयो भवन्तिस्म विभिन्नविभागानां पृथक् २ अध्यक्षाः आसन् । असौ चारचक्षुर्भवतिस्म । ज्योतिषीतान्त्रिकः, लिपिकरश्चैतेऽपि तत्सहायाः भवन्तिस्म । अष्टाङ्गराज्यम्, षड्गुणाः, तिस्रः शक्तयः, त्रिवर्गः, उपायच-तुष्टयम् करविधानम्, सेनाया अङ्गचतुष्टयम्, हस्त्यश्वरथादिपरिज्ञानम्, शस्त्रास्त्रपरिज्ञानम् – एतद्विषयकाः शब्दास्तत्र काण्डेऽस्मिन् - तत्कालीन-शासनव्यवस्थायां महत्वपूर्णप्रकाशं विनिपातयन्ति । सेनायाः संख्यावाचको ऽक्षौहिणी शब्दोऽपि महत्वपूर्णस्तद्बोधकञ्चेदं चक्रम् :—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

	सेनापतिः	सेनामुखम्	गुल्मः	गणः	वाहिनी	पृतना	चमू	अनीकिनी	अक्षौहिणी
गजाः	१	३	९	२७	८१	२४३	७२९	२१८७	२१८७०
रथाः अश्वाः	३	९	२७	८१	२४३	७२९	२१८७	६५६१	६५६१०
पदातयः	५	१५	४५	१३५	४०५	१२१५	३६४५	१०९३५	१०९३५०

अनेन प्रकारेण राजन्यानां राज्यकरणं देशरक्षा चेति वृत्तिजातमासीत्। तृतीयवर्गो वैश्यः। तस्य कृषिः, पाशुपाल्यं वाणिज्यञ्चेति वृत्तय आसन्। सेवायाः पर्यायस्तदानीं श्ववृत्तिरासीदनेन भृत्यामनादर एवासील्लोकानाम्। वणिग्भावस्य पर्यायः सत्यानृतमभिधेयः तथापि स्पष्टं यदर्धभागस्तु तदापि वाणिज्ये सत्यस्यासीत्। कुसीदवृत्तयोऽपि वैश्या आसन् अतः कुसीदग्रहणं प्राचीना परम्परा। भूमिगुणानुसारं धान्यवर्णनार्थमुत्पादनार्थं वा क्षेत्राणां विभाजनं कृतमभूत् तेषाञ्च नामानि पृथक् पृथगेवासन्। यथा व्रैहेयं; शालेयं, यव्यं, षष्टिक्यं, तिल्यं माष्यं, उम्यं, अणव्यं, गौधुमीयम्, कालायीनम्, कौलत्थीनम्, प्रैयङ्गवीणम् चाणकीनम्, कौद्रवमित्यादयः। वीजवपनार्थं क्षेत्राणि त्रिहल्यन्ते स्म चैतत्रिसीत्यकरणं कठिनमभूत्तु द्विवारं नूनमेवाकृष्यतेस्म। वीजवपनस्य शस्येकत्रीकरणस्य च मानान्यासन्। द्रोणस्य वापः, आढकस्य वापः प्रस्थस्य वापः अर्थात् द्रोणाढक प्रस्थादयस्तथा च खारीति मानान्यासन्। क्षेत्रस्य कृते वप्रशब्दोऽपि प्रयुज्यतेस्म। क्षेत्रेषु सीत्यानन्तरं समुत्पन्नाः मृत्संघाताः लेष्टानि लेष्टव वा कथ्यन्ते स्म। तेषां निरासाय काष्टस्य लोष्टभेदनाः भवन्तिस्म। वृषभादिप्रेरणदण्डं प्राजनं, तोदनं, तोत्रं वोच्यतेस्म। खननसाधनं खनित्रम्, छेदनसाधनं दात्रम्, धान्यादिलवनशस्त्रञ्च लवित्रमिति क्रमशः कथ्यन्ते। वृषादेर्गले युगबन्धनस्य नाम योक्त्रम् योत्रमाबन्धो वा। "फलं निरीश कुटकं, फालः कृषिकः" इत्यादीनि काष्ठनिर्मित हले लग्नस्य तीव्रलोहनिर्मितफालस्य नामानि हलस्य पृष्ठभागे कर्षकहस्तस्थितः काष्टकीलको युगकीलकः शम्या वोच्यतेस्म। किंशारुः शस्यशूकं, कणिशं शस्यमञ्जरी कथ्यतेस्म। वुस तुषश्च धान्यत्वक् भवति। धान्यानां नामानि तद्गुणानुसारं भवन्ति। तृणधान्य, शमीधान्यं शूकधान्य-

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिति मुसलोलूखलाश्चासन् । शूर्प, तितउ:, स्यूत प्रसेवो १ कण्डोलपिटो २ । एतान्यपि कृषिसाधनानि भवन्ति । कृषिः पाशुपाल्यं वाणिज्यञ्चेति त्रिकमेव समृद्धमासीत् । गौलक्षणैस्तासां दुग्धमात्राप्रदानादिभिः सुवर्ण-रजतताम्र-कांस्य - लौहादिसर्वविधधातुव्यापारैरथ च सर्वविधरत्नक्रयविक्रयैः सर्वमिद प्रतीयते । अन्नतोलनाय विविधमानान्यासन्, धातुतोलनञ्च पृथक्मानैर्भव-तिस्म । सर्वविधश्च व्यापारो वैश्यानामधिकारे पुष्पितः फलितश्च भवति स्म ।

चतुर्थः शूद्रवर्णः । सर्वमपि कार्यजातमुल्लिखितकार्येभ्योऽतिरिच्यैषामेव हस्ते विद्यते स्म । असंख्यकान्येवैतेषां कर्माणि । कारु-मालिक - कुलाल - लेपक - तन्तुवाय - सौचिकचित्रकार - शस्त्रमार्जक - चर्मकार - लोहकार - स्वर्णकार- शांखिक - रथकार - नापित - निर्णेजक - शौण्डिक - अजा जीव - देवल - इन्द्रनालादिमप्याकारशैलूष - नट - चारण - मार्दङ्गिक - वेणुध्म - वैणिक - शाकुनिक जालक - मासिक - वार्तावहभा रवाहादयश्चैते भवन्तिस्म । अन्यान्यपि सर्वाणि लघुकर्माणि- एतैरेव क्रियन्ते स्म ।

अनेन प्रकारेण देशस्य नागरिकाणां ग्रामिकाणाञ्च सर्वोऽपि समूहः स्वस्व कर्मणि निरतः सुखेन स्वजीविकां कुर्वाणः प्रतीयते । श्रुतिस्मृतिकाली-नेयं - आश्रमवर्णप्रणालिर्हि कालेऽस्मिन् देशस्य विभिन्नसमस्यानां सामूहिक-समाधानमभूत् एतदधीनाः परिवाराः पोषमाप्नुवन् । कस्मिन्नपि काले लोकानामाजीविकाप्रश्नः सर्वप्रमुखो दुःसाध्यश्च भवति । अस्य समाधाने वर्णाश्रमपद्धत्या बहूपकृतं स्यात । तदैवेयं पद्धतिर्युगेभ्यः प्रचलमानाऽतिष्ठत् निःशुल्कशिक्षा, आजीविकासन्तोषश्चास्याः प्रमुखफले शास्त्राणि कलाः विज्ञानञ्च सर्वाणीमानि कुलपरम्पराशिक्षणात् परमां प्रगतिमकार्षुः । अत एव तदानीं देशस्य बौद्धिकी, राजनैतिकी, आर्थिकी सामाजिकी च स्थितिः सर्वप्रकारेण सुदृढा सम्पन्ना चासीत् ।

यद्यपि अमरकोशस्य पश्चात्, विभिन्नकोशाः संस्कृतस्य विनिर्मिता बभूवुस्तथापि ख्रीष्टाब्दारंभात्पश्चात् द्वादशत्रयोदशख्रीष्टाब्दयोर्हेमस्याभिधा-

---

१ बोरी, थैला ।

२ टोकरी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नचिन्तामणिकोश: सर्वेषु संस्कृतकोशेषु कालत्रयास्यां सीमायां सर्वश्रेष्ठः कथयितुं शक्यते। अतोऽमरादनु सहस्राब्दानां संस्कृतकोशान्तर्गतसांस्कृतिक-तत्वविवेचनमेनमेवाधारी कृत्य विधीयते

कोशोऽयमनेकदृक्कोणैर्महत्वपूर्णोऽस्ति सांस्कृतिक – तत्वप्रकाशनञ्च कुरुते। जिज्ञासूनां कृते न केवलमस्मिन् पर्याया एव सन्ति अपितु भाषा-सम्बन्धिनितान्तमहत्वशालिसामग्रीसङ्कलनमस्मिन् विद्यते। समाजस्य संस्कृत्याश्च विकासेन सहैव भाषाया अङ्गोपाङ्गेष्वपि विकासो जायते। भावाभिव्यञ्जनार्थे नूतनशब्दानामावश्यकता भवति। कोशसाहित्यस्य मुख्यकार्यं नवीनप्राचीनसर्वविधशब्दसमूहस्य रक्षणं पोषणञ्चास्ति। हेमचन्द्रेणास्मिन् कोशेऽधिकाधिकशब्दास्तु संग्रहीता एव सहैव नवीनप्राचीनशब्दानां सम वयोऽपि समुपस्थापितः। यत: गुप्तकाले भुक्ति: (प्रान्त:), विषय: (मण्डलम्), युक्त: (मण्डलस्य सर्वोच्चाधिकारि) विषयपति: (मण्डलाधीश:), शौल्किक: (करविभागाध्यक्ष:) बलाधिकृत् (सेनाध्यक्ष:) महाबलाधिकृत् (सर्वोच्चसेनाध्यक्ष:) गौल्मिक: (अरण्यपाल:), अक्षपटलाधिपति: सूचनारक्षक:) इत्यादय: प्रचलितशब्दा नवीना: सङ्कलिता:। १

न केवलमियदेव वैशिष्ट्यमस्य। कोशस्यास्य स्वोपज्ञवृत्तिनामिकायां स्वकृतायामेव टीकायां कोशकार: स्वपूर्ववर्तिनां षडपञ्चाशत ग्रन्थकाराणामेकत्रिंशत् संख्यकानाञ्च ग्रन्थानामुल्लेखञ्चकार। तदिदं सांस्कृतिकैतिहासिकदृक्कोणतोऽतीव महत्वपूर्णं कार्यम् २। भावनगरसंस्करणमधिकृत्य तत्पृष्ठपङ्क्तिसंख्याङ्कनमत्र विधीयते एषु षड्पञ्चाशत्ग्रन्थकृतां नामानि कोष्ठेषु च क्रमश: पृष्ठ पङ्क्ति संख्याऽङ्किता। यथा अमर: (५५-२७ २१, ५६-२५) अमरादि: (२७६-२१,१६६ १४) अलंकारकृत (११२-१३) आगमविद् (७०-१४) उत्पल: (७४-१४) कात्य: (५६-१०,६१ ८) काम दकि: (५५०-४) कालिदास: (४१३-२ ४४०- ६) कौटल्य: (७०-४, २६६-२) कौशिक: (१६६-१३, १७०-२८) क्षीरस्वामी (३५०-९ ४६१-१७) गौड:

१ प्रान्त, जिला, जिलेका सर्वोच्च अधिकारी, जिलाधीश चुंगीविभाग का सर्वोच्च अधिकारी सेनाध्यक्ष, फील्डमार्शल, कञ्जरवेटर रिकार्डकीपर।

२ भावनगरात् प्रकाशित संस्करणम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(३६-२६, ५६-३) चाणक्यः (३९४-५ चान्द्रः (५२८-२५) दन्तिलः (१२१-२२, ५६३-३) दुर्गः (५७-८,१७४-२७) द्रमिलः (१५१-७ २०६०-२०) धनपालः (१-५, ७६-२१) धन्वन्तरिः (६६-२८, २५६-७) नन्दी (५२-२३) नारदः (३५७-१०) नैरुक्तः (१६४-१८, १८६-६) पदार्थविद (२०८-२२) पालकाप्यः (४६५-२७) पौराणिकः (३७३-६ प्राच्यः (२८-२६,५७-२८) बुद्धिसागरः (-४५-२५) बौद्धः (१०१-१७) भट्टतोत (२४-१७) भट्टिः (५६३-२३) भरतः (११७-६, १८४-२३) भागुरिः ६६-१४ ६८-२७) भाष्यकारः (६६-२३,३४८ १३ २८६ २६) भोजः (१५७-१७,१८८ २६) मनुः (६३-११,१६५-१३) माघः (६२-१७) मुनिः (१७१-८,२५४-२०) याज्ञवल्क्यः (३३६-२,४८३-२०) याज्ञिकः (१०३-९) लौकिकः (३७८-२३, ४३३-३) लिङ्गानुशासनकृत् (५३६-२४) वाग्भटः (१६७-१) वाचस्पतिः (१-६,२६-४) वासुकिः (१-५) विश्वदत्तः (४६-८) वैजयन्तीकारः (१३१-२३१,३३-१६) वैद्यः (१६६-२८,२५३-३) व्याडिः (१-५. ३४-२२,२५) शाब्दिकः (४३-७, १०२-७ शाश्वतः (६४-७,१०२७) श्रीहर्षः (११८-७) श्रुतिज्ञः (३२२-२७) सभ्य. १३४-१, २५८-१२) स्मार्त (२०६-१००,३४७-२, ३५८-१०) हलायुधः (१४४-१५, १६) हृद्य (४५३ २७) तथैव ग्रन्थाङ्कनम् - अमरकोश (८-५) अमरटीका (४५-१३ ५५-१) अमरमाला (४४०-३२) अमरशेषः १५२-२०, ४५६-१५) अर्थशास्त्रम् २६७-२५,३१६-७) आगमः २१८ १६) चान्द्रः १५८-२६) जैनसमयः (८०६) टीका (५७४-२४) तर्कः (५५० ५) त्रिषष्ठिशलाका-पुरुष चरितम् (१३-६, ८० ७) द्वयाश्रयगद्यकाव्यम् (६१०-१८,२५) धनुर्वेदः ३०६-१७, ३० ८, ३१७-७) धातुपारायणः (१-११ ६०६-५) नाट्यशास्त्रम् (११७६,१२२-१३, २४३-१७) निघण्टुः (४८४-३०) पुराणानि ५६-२१, ७०-१५) प्रमाणमीमांसा (५५५-२१) भारतः (६३८-१३, ३६० २७) महाभारतम् (८१-२३) माला (६८-२७, २१८-२५) योगशास्त्रम् (४४५ ७) लिङ्गानुशासनम् - ८-४,१६३-१३-६०६-११) वामनपुराणम् (६-२६, ८२-८) विष्णुपुराणम् (६६-१९, ६३-१) वेदाः (३५-२२) वैजयन्ती (५ -३,१०६-१०) शाकटायनः (२ १) श्रुतिः (२८-२५, ३०-१८) संहिता (६३-४, ६६ ६) स्मृतिः (३५-२७ ३३-७)।

भागुरि व्याड्यादि विषयेऽत्र किञ्चिद्विज्ञायते। यत्र शब्दार्थेषु मतभेदः प्रतीयते तत्र हेमचन्द्रोऽन्येषां ग्रन्थानां ग्रन्थकृताम्बा वचनानि उद्धरन् स्पष्टयति। यथा मूकनामानि। मूकः अवाक् एषा नामद्वयी हेमचन्द्रेण

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मूकस्य कृते दीयते। शेषे चायं मूकस्य पर्याये जडशब्दमपि प्रददाति। प्रसङ्गेऽस्मिन् मतभिन्नतां स्पष्टयन् "कलमूकत्ववाक् श्रुति" इतिहलायुधः एवं लिखति अनेडोऽपि - अवंकरोऽपि, मूकः, अनेडमूकः. 'अन्धो ह्यनेडमूकः स्यात्-इति भागुरिः अर्थात् हलायुधो भागुरिश्चात्र मूकस्य भिन्नपर्यायानपि यच्छतः। अनेड मूकशब्दश्चानेकार्थकः । हेमस्य मते एडमूकः अनेडमूकः अवाक् श्रुतिश्चेति पर्यायाः मूकस्य सन्ति।

एवं किलैतिहासिक - तुलनात्मक - सांस्कृतिकदृष्ट्याः स्पष्टमस्य महत्त्वम् । भाषाया ज्ञानं विभिन्नप्रकारेण तदानीमाचार्या कारयन्ति स्म । तत्र च ते सर्वथा क्षमा आसन् अनेन कोशकारेणानेक - पर्यायवाचिशब्दनिर्माणाय यद्विधानमाश्रितं तेन स्पष्टतया तत्कालीनसांस्कृतिक सङ्केतावाप्ति-र्भवति विधानेऽस्मिन् सः, "कविरुढ्याज्ञेयोदाहरणावलिः" इत्याह तदनुसारञ्च कान्ता-प्रियतमावधू- प्रणयिनी– निभादिशब्दयोगेन पत्न्या नामानि, कलत्रवाचकशब्देषु च वर–रमण–प्रणयि–प्रियादिशब्दानां तत्समानाम्वा योगेन पतिवाचकाश्च शब्दाः निर्मीयन्ते। यथा गौर्याः पर्यायनिर्माणायोक्त-शब्दानां संयोगः शिवशब्देन कार्यः । तदा शिवकान्ता, शिवप्रियतमा, शिववधू शिवप्रणयिनी चेति पर्याया जायन्ते । निभाशब्दस्यापि समानार्थकपरिग्रहाः – भवन्ति। परं कविसमुदायेन यथा शिवकान्तादयः शब्दाः प्रयुक्तास्तथा नायम् । एवं शाब्दिकेष्वपि कविसम्मानमासीद् समाजे तस्य महत्त्वपूर्णस्थानात्।

कलत्रवाचकगौरीशब्देन सह वर-रमणप्रभृतिशब्दसंयोगेन गौरीवरः, गौरीशः इत्यादयः शिववाचकशब्दाः- निर्मीयन्ते । परन्तु गौरी वर इव गंगावर शब्दो न गृह्यते। यद्यपि कान्तावाचक गङ्गाशब्देन सह पतिवाचक-वरशब्दसंयोगेन व्याकरणदृष्ट्या शुद्धोऽयं शब्दस्तथापि कविसम्प्रदाये नास्य प्रसिद्धिः। अत एव शिवार्थे न गंगावर शब्दः समुचितः । एतत्सर्वमपि वैशिष्ठ्यं हेमचन्द्रेण स्वोपज्ञवृत्त्या प्रकाशितम् । कविरुढ्योदाहरणावली' सिद्धान्तवाक्यं तत्कालीनसमाजस्य मानसिकस्थितिं' प्रकाशयति । आचार्य-हेमचन्द्रः सामाजिकानां मनोवैज्ञानिकतया पूर्णपरिचित आसीदित्यपि परिज्ञायते। अत एव कपालपालः कपालधनः, कपालयुक् कपालनेता कपाल-पतिः इत्यादयोऽमान्यशब्दसंग्रहादपि रक्षा जायते। व्याकरणसिद्धा अपि शब्दा एते कविष्वमान्यतया विपरीतास्ततो न गृहीता कपालिनः स्थाने। अनेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तत्कालीनभारतीयसमाजस्य कवीनां संस्कृतविदुषाँ च भावोच्चता, भाषासौष्ठव प्रियत्वं, भावमाधुर्यं रुचिश्चेति सर्वं स्पष्टतयाऽवलोकयितुमनुभवितुं वा शक्यते।

अस्य कोशस्याध्ययनेनेदमपि परिलक्ष्यते यद्हेमस्य शब्दसंग्रहः प्राकृतापभ्रंशान्यदेशीभाषाशब्दैश्च पूर्णतः प्रभावितः भाषाविज्ञानस्य समीकरण-विषमीकरणादिसिद्धान्तानामप्यस्मिन् दर्शनं जायते यथा ? पोलिका १ (गुजराती) गुर्जरभाषायां पोणी', ब्रजभाषायां पोनी', भोजपुर्यां 'पियुनी', हिन्द्याञ्च पिउनी. २ मोदको लड्डुकश्च, हिन्द्यां लड्डू, गुर्जर्यां लाडू राजस्थान्यां लाडू । ३ चोटी-हिन्द्यां 'चोटी' गुर्जर्यां चोणी राजस्थान्यां चोणी चूणिका च । ४ समौ कन्दुकगेन्दुकौ हिन्द्यां गेंद' ब्रजभाषायां 'गेंद', गेंद । ५ हरिको गूढ़पुरुषः, ब्रजे हेर हेरना, देखना गुर्ज्यां हेर। ६ तरवारिः ब्रजे तरवार, राजस्थान्यां तलवार गुर्जर्यां तरवार। ७ 'जंगलो निर्जलः ब्रजे जंगल, हिन्द्यां जंगल। ८ 'सुरुङ्गातु सन्धिला' स्याद् गूढमार्गो, भुवोऽन्तरः' ब्रज - हिन्दी - गुर्जरीभाषासु 'सुरंग' । ९ 'निश्रेणी' त्वधिरोहिणी' ब्रजे नसेनी, गुर्जर्यां नीसरणी। १० 'चालनी तितउः' ब्रजराजस्थानी गुर्जरीभाषासु चालनी हिन्द्यां चलनी छलनी, हिमाचलीभाषायां छालनी, छानणी । ११ पेटा स्यात्मञ्जूषा, राजस्थान्यां पेटी, गुर्जर्यां पेटी पेटो ब्रजे पिटारी, पेटी । संस्कृतस्य प्रभावस्तु सर्वासु भाषासु वर्तत एव परमस्य कोशस्याध्ययनेन सिद्ध्यति यत् यथा लौकिकवैदिकसंस्कृतस्य सम्बन्धः परस्परं वर्तते, तथैव भारतस्य लोकभाषानां संस्कृतस्य च लौकिक-वैदिकस्योभयविधस्यापि सम्बन्धो भारतीयभाषाभिः सह विद्यते। परं वैदिकात् संस्कृतभाषा जाता, संस्कृताच्च भारतीयाः सर्वा अपि भाषाः-अपभ्रंशरूपाः।

---

१ अभिधानचिन्तामणिः ३-६२
२ ,, ३-६४।
३ ,, ३-३३९।
४ , ३-३५३।
५ , ३-३९७।
६ , ३-४४६।
७ ८ अ. चि. ४-५१।
९ अ. चि. ४-७९।
१० अ. चि ४-८४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतया विकासेन सहैव भाषाया अङ्गविकासोऽपि स्वाभाविक इति पूर्वमेवोक्तं प्रसङ्गेऽस्मिन् । अत्र निम्नोदाहरणमवधेयम् अमरे - सुन्दर पर्यायवाचिनः 'सुन्दरं रुचिरं, चारु सुषमं साधु शोभनम् कान्तं, मनोरम रुच्यं, मनोज्ञं मञ्जु मञ्जुलम् ।" एते द्वादशशब्दा भवन्ति हेमश्चास्यैव सुन्दरवाचिशब्दस्य षड्विंशति पर्यायान् प्रयच्छति यथा १ चारुः २ हरिः ३ रुचिरम्, ४ मनोहरं, ५ वल्गुः, ६ कान्तम् ७ अभिरामम्, ८ बन्धुरम्, ९ वामं, १० रुच्यम्, ११ सुषमम् १२ शोभनम् १३ मजुलम्, १४ मञ्जुः, १५ मनोरमम्, १६ साधु, १७ रम्यम्, १८ पेशलम् १९ हृद्य २० काम्यम् २१ कमनीयम्, २२ सौम्यम् २३ मधुर, २४ प्रियम् इत्यादय । "लडहः" अयं देशीशब्दोऽपि हेमचन्द्रेण सौन्दर्यवाचिषु गणितः । एवमाचार्यः स्वकोशमेधयामास । शतश एवंविधा शब्दाः सन्ति येषामुपलब्धिः इतरकोशेष्वसम्भवः । अधस्तनोदाहरणैस्तदानीन्तनं शास्त्रीयज्ञानं आचारः, जनाकृत्यादयः परिज्ञायन्ते ।

यस्य वर्णाः पदं वा लुप्तं भवेत्, यस्योच्चारणं पूर्णतया न कृतं यात्, तद्वचनं 'ग्रस्तम्' इति, नाम्ना प्रसिद्धमासीत् । ष्ठीवनपूर्वकवचनं "अम्बूकृतम्" पर्यायेण बोध्यते स्म । शुभवाण्या नाम कल्या, हर्षक्रीडायुक्तवचनस्य नाम चर्चरी, चर्मरीति विद्यते स्म निन्दापूर्वकोपालम्भयुक्तवचनस्य कृते 'परिभाषण' शब्द प्रयोगोऽस्ति । ज्वलितोदनाय च भिस्सटादग्धिकाशब्दयोः प्रयोगो दृश्यते १ गोधूमचूर्णाय समिताशब्दः प्रयुक्तः २ । यवचूर्णं चिक्कसनाम्नाभिहितम् ३ । नासिकाया विभिन्नाकारबोधकशब्दा इमे भवन्तिः- नतनासिकः, अवनाटः, अवटीटः, अवभ्रः, एते शब्दा मुखोपरि प्रसृतया नासिकया युक्तस्य कृते प्रयुक्ताः । यस्य नासिकाया अग्रभागस्तीव्रो भवति स खरणसः उच्यते लघुनासिकः नक्षुद्रः क्षुरवद्विशालनासिकश्च खुरणसः, ऊर्ध्वनासिकश्चोन्नसः कथितः कोशेऽस्मिन् । एभिरुदाहरणैः स्पष्टं प्रतीयते यत्तदानीं दक्षिणपूर्वं एशियापर्यन्तं भारतीयप्रशासनं विस्तृतमासीदथवा

का. श्लो.

१ अ. चि. ३ - ६० ।
२ ,, ३ - ६६
३ ,, ३ - ६६ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतभूमिरियं विभिन्नसंस्कृतिरुद्भावयित्री - अथवा ग्रासीकृतविविध संस्कृतिरासीत् ।

ज्येष्ठश्यालिका कुलीशब्दव्यवहार्या कनिष्ठा च हाली, यन्त्रणी, केलि-कुञ्चिका, एभिशब्दैर्वाच्या भवति स्म । कनिष्ठश्यालिका नामपर्याया-ध्ययनेन तत्काले तया साकं हासपरिहास करणप्रथाऽवगम्यते । पत्युरवसाना-नन्तरं च तया साकं विवाहश्च थाऽपि भवेत् । अत एव सा केलिकुञ्चिका शब्देनाभिहिता । इयं प्रथाऽद्यापि यत्र तत्रार्येषु दृश्यते ।

वामदक्षिणनेत्रयोः पृथक् पृथक् नामनिर्देशोऽत्रावाप्यते यथा, "भावनीयम् - दक्षिणनेत्रम्. सौम्यम् - वामनेत्रम् १ । जिह् वामलं कुलुकम्, दन्तमलञ्च पिप्पिका २ भवति. मृगचर्मव्यजनपर्यायः- धवियम्' वस्त्र व्यजनपर्यायश्च गालावर्तम् ३ अनेन भारतीयजनेषु चर्म-वस्त्रव्यजनप्रयोग सुतरां व्यक्तः ।

नावमध्यस्थदण्डाः पोलिन्दाः, नावस्योर्धभागो मङ्गः नौकाया मध्ये स्थितस्य जलस्य बहिः प्रक्षेपक चर्मपात्रस्य नाम सेकपात्रम्, सेचनम्वा आसीत् ४ ।

गृहाच्छादनिकायामाधारभूतकाष्ठस्य नाम गोपानसी, यस्मिन्बध्वा दुग्ध-मन्थनिका संचाल्यते स दण्डश्च विष्कम्भ मुद्रापितं परिणतताम्रसुवर्ण रजतधातुजातञ्च रूप्यमित्युच्यन्तेस्म । सुवर्णरजतमिश्रितस्य नाम धन-गोलकः, कूपस्योपरि रज्जूबन्धनाय काष्ठलोहादिनिर्मितचक्रिकाया नाम तन्त्रिका, गृहस्य वाटिकाया निष्कुटम्, ग्रामनगराभ्यां बहिः स्थितस्योद्यानस्य पौरकम्, क्रीडार्थं निर्मितस्य आक्रीडः, उद्यानम् वा राज्ञामन्तपुरयोग्य स्यावृत्तस्य प्रवदवनम्, धनिकानां पुष्पवाटी वृक्षवाटी वा लघूद्यानस्य च क्षुद्रारामः प्रसीदिका चेति नामधेयानि भवन्ति ।

अनेनैव प्रकारेण भोजनेषु प्रयोक्तव्यवस्तूनां .....नामानि अंगप्रत्यङ्ग-सञ्ज्ञाः, मालाः, सेनाया विभिन्नभागाः, वृक्षलतापशुपक्षि - धान्याना मनेक नामानि कोशेऽस्मिन् लभ्यन्ते । एकतो यत्रायं कोश अमरकोशकालीन

१ अ. चि: ३-२४० ।
२ ,, ३-२९६ ।
३ ,, ३ ३५१-५३ ।
४ ,, ३-५४२ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतिजातमनेन शब्दसमूहेन रक्षमाणस्तिष्ठति तत्रैवापरतोऽमरात्पश्चात् सहस्राब्देषु जातं ह्रासविकासादिकं प्रत्याययति । सांस्कृतिकदृक्कोणतश्चास्य महत्मूल्यवत्ता ।

साहित्यमपि संस्कृतेरङ्गभूतम् । कोशेऽस्मिन् व्याकरणस्य विशिष्टपरिभाषाऽवाप्यते । सा चेयम् :

प्रकृतिप्रत्ययोपाधिनिपातादि विभागशः ।
यदान्वाख्यानकरणं शास्त्रं व्याकरणं विदुः ।[1]

अयमाशयो यत्प्रकृति - प्रत्यय विभागेन पदानामन्वाख्यानकरणं व्याकरणमिति । व्याकरणेन शब्दा व्युत्पाद्यन्ते । व्याकरणसूत्राणि सञ्ज्ञा-परिभाषा-विधि-निषेधनियमातिदेशाधिकाराख्येषु सप्तभागेषु विभक्ता । प्रत्येकसूत्रस्य च पदच्छेदविभक्ति - समास - अर्थ - उदाहरण - सिद्धयः षडङ्गानि भवन्ति ।

अनेनैव प्रकारेणाग्रे वार्तिकटीका - पञ्जिका - निबन्ध -सग्रहपरिशिष्ट-कारिका - कलिन्दिका - निघण्टुइतिहास - प्रहेलिका - किम्वदन्ती - वार्तादीनां व्याख्याः परिभाषाश्च प्रदत्ता. समुपलभ्यन्ते कोशेऽस्मिन् । एभिर्भारतीय संस्कृत्यङ्गभूतस्य तत्कालीन-साहित्यानेकसिद्धान्ताः प्रकाश्यन्ते । तदानीन्तन-भारते प्रसाधनस्य के के प्रकाराः प्रचलिता आसन्. तदिदमपि कोशादस्माद-वगम्यते शरीरसस्कारः परिकर्मशब्देन, तच्छुद्धिकरणमुत्सादनशब्देन, कस्तूरिकादिलेपनमंगरागशब्देन, चन्दनागुरु - कस्तूरिकाकुंकुममिश्रण चतुः-समशब्देन, कर्पूरागुरुकंकोलकस्तूरिका — चन्दन - द्रव - मिश्रणेन निर्मित-लेपविशेषश्च यक्षकर्दम - नाम्ना. शरीरसंस्कारार्थमुपयोज्यलेपवर्तिर्गात्रानु-लेपनी नाम्ना वा कथितः ।

मस्तकोपरिधार्यमाणा पुष्पमाला, माल्यम्, कचेषु स्थापिता पुष्पमाला गर्भका' वेणी प्रलम्वमाना, प्रभ्रष्टकम्, समक्षे लम्वमाना ललामकम् वक्षोपरि तिर्यक् - लम्बमाना, वैकक्षम् कण्ठात् वक्षोपरि सरला लम्बमाना प्रालम्बम्. शिरसि समावेष्टिता आपीडम कर्णयोः प्रलम्बमाना अवतंसम्, धम्मिले लग्ना च पुष्पमाला वालपाश्यं कथ्यते स्म । कर्ण - कण्ठ - ग्रीवा चरण - हस्त - कट्यादि प्रदेशेषु धारणीयानि विविधस्वर्णाभरणानि भवन्ति स्मेति विभिन्ननामभिरवगम्यते । मौक्तिकानाञ्च शतसहस्राष्टाष्टोत्तरशत पञ्चशत-

१ अ. चिः २-१६४ (स्वोपज्ञवृत्तिः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुषष्ठि - द्वाविंशति - षोडश - चतुष्पञ्च - चतुपञ्चाशत लतिका युक्तानां मालानां विभिन्ननामनिर्देशः कोशेऽस्मिन् प्राप्यते । वस्त्रेष्वपि विभिन्नाङ्गधारणीयानि क्षौम-कार्पास - ऊर्ण वसनानि विभिन्ननामनिर्देशपूर्वकमुपवर्णितानि ।

विभिन्नवस्तूनां व्यापारिणां नामानि, क्रय्य विक्रेय वस्तूनाञ्च नामोल्लेखेन तत्कालीनव्यापारस्य समृद्धि र्लोकानाञ्च सम्पन्नता स्त्रीणांश्रृंगाररुचिस्तस्याश्चोत्तम योगश्चाश्चर्यकरः । तदानीं मद्य निर्माणस्यानेकविधय कोशेऽस्मिन् दृश्यन्ते । मधुयोगेन निर्मितं मद्यं मध्वासवः, गुडयोगेनोत्पादितस्य मैरेयम्, तण्डुलोत्पादितस्य नग्नहू इत्यादि नामभिरुच्यते १ ।

स्वल्पदिवसैर्धारितगर्भाया गोर्नाम धेनुः वहुबारं घृतगर्भाया: परेष्टुः, एकबारं गर्भवत्या गृष्टिः, गर्भधारणार्थं वृषभसयोगं कामयमानायाः काल्या, सरलतया दुग्धदायकायाः सुव्रता, कष्टेन दुग्धप्रदायाः करटा बहू दुग्धदाया बंधुला, एकद्रोण (अर्धमण) दुग्धप्रदायाश्च द्रोणदुग्धा, स्थूलस्तनाया पीनोध्नी, बन्धकी कृतायाः धेनुष्या उत्तमाया नैचिकी, बाल्ये धृतगर्भायाः पलिक्नी प्रतिवर्षं गर्भधारिकायाः समांसमीना, सरलाया नाम सुकरा, स्नेहेन वत्सं कामयमानाया वत्सला, नामानि क्रमशो भवन्ति । एभिर्लक्ष्यते यत्तत्काले गोसम्पत् समृद्धा महत्वपूर्णा चासीत् ।

अश्वानां विविधनामावल्या अपि परिज्ञायते यत्तदानीं भारतेऽश्वानां बाहुल्येन प्रयोगो भवतिस्म । प्रशिक्षितोऽश्वः साधुवाही दुःप्रशिक्षितः शूकलः कशाभिघातैः साधनीयस्य कश्य, वक्षसि - मुखे च भ्रमराकृतिधारकस्याश्वस्य श्रीवृक्षकी, हृदय - पृष्ठ - मुखोभयपार्श्वेषु श्वेतचिन्हयुतस्य पञ्चभद्रः, श्वेतस्य कर्कः, पिंगलस्य खङ्गोहः, दुग्धवत्रंगशीलस्य सरोहः, पीतस्य हरियः, कृष्णस्य खुङ्गाहः, रक्तस्य क्रियाहः, नीलस्य नीलकः गर्दभवर्णस्य सुरूहः, पाटलस्य बोरूखानः, स्वल्पपीतस्य कृष्णोरुवतश्च कुलाहः, पीतरक्तस्य उकनाद कोकनदच्छवियुतस्य शोणः, हरितवर्णस्य हरिकः काचवर्णस्य पङ्गुलः चित्रविचित्रस्य कोहलाहः अश्वमेधाश्वस्य च ययुरित्यादि नामोल्लेख कोशेऽस्मिन्नुपलभ्यते । अश्वानां विभिन्नगतिवाचकशब्दालोकनेन सिद्धमस्ति यदश्वा विभिन्नगतिषु प्रशिक्षिताः क्रियन्तेस्म । हस्तिविषयेऽपि

---

१ अ. चि: ३-५६४-५६५ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवमेव ज्ञेयम् ।

अभिधानचिन्तामणेः स्वोपज्ञवृत्तिरपि समकालीना हेमचन्द्राचार्येण स्वयं प्रणीता च । अस्यां प्राचीनाचार्याणां प्रमाणवचनानि तु सन्ति–एव परन्तु-अनेकशब्दानां व्युत्पत्तयस्तादृशाः सन्ति यासामध्ययनेन सांस्कृतिकेतिहासः शब्दानां लिखितुं शक्यते । शब्देष्वर्थ परिवर्तनं कथमभूत्, अर्थविकासः कथं जातः, एतत् - सर्वं परिज्ञायते । वृत्तौ व्याकरण सूत्रनिर्देश पूर्वकं शब्दानां साधुत्वमपि प्रदर्शितम् । यथा -

भाष्यते भाषा (क्तेटो गुरोर्व्यञ्जनात् इत्यः । ५-३-१०६ । एवमेव सर्वत्र सूत्रनिर्देशः । वर्ण्यते वाणिः श्रूयते श्रुतिः सुष्टु - आसमन्तात् - अधीयते स्वाध्यायः, अवति विघ्नात् ओम्. ओमेव ओंकारः । प्रस्तूयते प्रस्तावः न श्रिय लाति अश्लीलम्-न श्रीरस्यास्तीति वा संमुखं लपनं संलापः सम्मुखं कथनं संकथा, मन्यतेऽनया मतिः, बुध्यतेऽनया बुद्धिः दधाति ध्यायति वा धीः, तत्वानुगामिनी मतिः, पण्यते स्तूयते पण्डा । नियन्तं दान्तीन्द्रियाणि, अस्यां निद्रा, पण्डते जानातीति पण्डितः, सञ्जाताऽस्येति पण्डा-बुद्धिरितिवा छ्यति छिनत्ति मूर्खदुष्टचित्तानीति छेकः । विशेषेण मूर्खचित्तं दहतीति विदग्धः । वाति गच्छति नरं वामा । विगतो धवो भर्ताऽस्याः विधवा । दधते बलिष्ठतां दधि । भाषा श्रुति - ओंकार - अश्लील-संकथा-विदग्धवामा विधवादिशब्दानां व्युत्पत्तयः सत्यमेव प्रच्छन्नभारतीय-संस्कृतेरितिहासोद्घाटिकाः सिद्ध्यन्ति ।

एतदुपरान्तं खीष्टाब्दानामेकोनविंशतितमशतकस्य शब्दार्थचिन्तामणि-कोशस्य पृष्ठेषु समुल्लिखिताः शब्दाः समवलोकनीया ।

१ अष्टाङ्गार्घ्यः अष्टद्रव्यघटितपूजोपकरणविशेषः । अस्यैव विशिष्टार्थ बोधनाय कोशकारस्तत्र तन्त्रशास्त्राधारित व्याख्यां प्रस्तौति —

"आपः क्षीरं कुशाग्राणि दधिसर्पिः सतण्डुलाः ।
यवाः सिद्धार्थकाश्चैव अष्टाङ्गार्घ्यः प्रकीर्तितः ।

अयमष्टाङ्गार्घ्यं वैदिकविधि - संस्कार - तन्त्रमन्त्रादिविधिसम्पादने प्रयुज्यते ।

२ आधारः वैदिकानां कर्मविशेषे । ऋग्वेदिनां स्रुवेण चतुराज्यं स्रुचि दत्वा प्रजापतिं मनसा ध्यात्वा तुष्णीमग्नेर्वायव्यकोणादारभ्याग्नेयीं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यावदविच्छिन्ना धृतधारा दीयते, पुनश्च स्रु वेण चतुराज्यं स्रुचि दत्वा इन्द्रं ध्यात्वा नैऋति दिशमारभ्य ऐशानीं दिशमवधीकृत्य धृतं क्षार्यते तस्मिन् कर्मणि । यजुर्वेदिनान्तु स्रु वेण मन्त्रोच्चारणपूर्वकं पूर्वोक्तक्रमेण घृतधारादाने प्रयुज्यते ।

३ आचमनम् उप पर्शः वैधकर्मारम्भात् पूर्वं वारत्रयं जलपानानन्तरं यथाक्रमाष्टाङ्गस्पर्श - रूप-शुद्धि जनक क्रियायाम् क्रियते । अस्यैव विशिष्ट व्याख्यामुपस्थापयति कोशकारः ।

प्रक्षाल्य पाणिपादौ च त्रिः पिबेदम्बुवीक्षितम् ।
सम्वृत्याङ्गुष्ठमूलेन द्वि प्रमृज्यात्ततो मुखम् ॥
संहृत्य तिसृभिः पूर्वमास्यमेवमुपस्पृशेत् ।
अंगुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम् ॥
अंगुष्टानामिकाभ्याञ्च चक्षुः श्रोत्रे पुनः पुनः ।
नाभि कनिष्ठांगुष्ठेन हृदयन्तु तलेन वै ।
सर्वाभिश्च शिरः पश्चात् वाहू चाग्रेण संस्पृशेत् ।
आयत पर्वणां कृत्वा गोकर्णाकृतिवत्करम् ।
संहृताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः ॥
मुक्ताङ्गुष्ठ कनिष्टाभ्यां शेषेणाचमनं चरेत् ।

४ आज्यभागः — वैदिकानामाहुतिविशेषः । ऋग्वेदिनामग्नेरुत्तरभागे स्रुतुवेणाग्निसम्प्रदानकघृताहुतिः तद्दक्षिणभागे सोम-समादानकाहुतिश्च । यजुर्वेदिनान्तु - अग्नेरुत्तरदक्षिणयोः पश्चिमादि - प्राच्यन्तं घृतधारेति- पशुपतिः ।

५ अग्निजिह्वा - अग्नेः सप्तजिह्वा भवन्ति
यथा काली कपाली च मनोजवा च ।
सुलोहिता या च सुधूमवर्णा ।
स्फुलिंगिनी विश्वपुरुची देवी ।
लेलायमाना इति सप्तजिह्वा ॥
भारतीया अग्निपूजावसरे सप्तजिह्वापूजनं कुर्वन्ति ।

६ अग्निष्वात्तः-दिव्यपितृ भेदे ।
अग्निष्वात्तादयो देवानां मारीच्यालोक विश्रुताः ।
चिरलोकपितरः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अग्निष्वात्तादयो लोके पितरश्चिरवासिनः ।
श्राद्धादिकाले– एषां दिव्यपितृणां पूजा भवति ।
७ अष्टमङ्गलः- अष्टमङ्गलानि ।
एतद्विषये विशिष्टमस्मिन्नेव शब्दार्थचिन्तामणिकोशे संकलित वाक्यानि यथा -

१ श्वेतोर खुरपुच्छास्य पृष्ठकेशतुरंगमे ।
२ मृगराजो वृषो नाग. कलशो व्यञ्जनं तथा ।
वैजयन्ती तथा भेरी दीप इत्यष्टमङ्गलम् ।।
३ लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यसर्पिरादित्यमापो राजा तथाष्टम ।
४ वचाकुष्ठं तथा ब्राह्मी सिद्धार्थकमथापि च ।
सारि वा सैन्धवश्चैव पिप्पलीघृतमष्टमम् ।
(भावमिश्रः)

भारतीयेषु कानि २ माङ्गलिकानि वस्तूनि भवन्तीति कोशादस्माद् प्रत्यक्षं ज्ञायते। सहैवेदमपि ज्ञायते यदौषधावपि यानि वस्तूनि प्रयुज्यन्ते तान्यपि मङ्गलस्वरूपाणि मान्यन्ते ।

८ अकालः – कालशुद्धौ ।
अनुराधर्क्षमारभ्य षोडशर्क्षेषु भास्करः ।
यावच्चरति वै तावत्- अकाल मुनयो विदुः ।

ज्योतिष विद्याखगोलज्ञाने च भारतीयानां पारगामित्वमनेन ध्वन्यते ।

९ अकालवृष्टिः- सहसावर्षणे ।
पौषादि चतुरो मासान् प्रोक्ता वृष्टिरकालजा ।
व्रतं यात्रादिकं तत्र वर्जयेत् सप्तवासरान् ।

१० अङ्क्य मृदङ्गभेदे ।
सार्धतालत्रयायामश्चतुर्दशाङ्गुलाननः ।
हरीतक्याकृतिर्यः स्यादङ्क्योऽङ्के सहि वाद्यते ।।

११ अपभ्रंशः अशास्त्र शब्दे असंस्कृतशब्दे, ग्राम्यभाषायाम् ।
आभीरादि गिरः काव्येष्वपभ्रंश इति स्मृतः ।
शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितम् ।
संस्कृतादपभ्रश्यति ।

१२ अजनाभः- अस्मिन् वर्षे ।
भारताधिकारात् भारत इति व्यपदेशः ।
पूर्वन्तु - अजनाभ इति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आलुः — कन्दविशेषे ।

कन्दो बहुविधो लोके आलु शब्देन भण्यते ।
कचवालुश्चैव घण्टालुः पिण्डालुः शर्करादिकम् ।।

टंगः —जंघा ।

एते शब्दार्थ चिन्तामणि शब्दाः प्राचीननवीनयो मिश्रणं संस्थापयन्ति । कोशादस्मादत्र केवलं एवत शब्दाः समुदाहृता ये पूर्णतया भारतीय वैदिक-पौराणिकाधुनिककालीनभारतीयसंस्कृत्याः सम्बद्धाः । आलुः शब्दस्तु नवीनकन्दभक्षणंप्रचारं भारतीयेषु साधयति यथाह कोशकारः स्वयमेव 'कोषादिषु न दृष्टं तत्' ।

निघण्टौ नास्य पर्यायाः न गुणाः परिकीर्तिताः । एतैर्वाक्यैरस्य खाद्यकन्दस्य भारतीयभक्ष्येषु" नवीनं मिश्रणम् टंगशब्दप्रयोगश्च भारतीयभाषास्योऽपि नवशब्दग्रहणात्मकसांस्कृतिकविकासचिन्हत्वेन स्वीकर्तुं शक्यते ।

अत्रैव वाङ्मयार्णवस्य "अणुः" शब्दः, "अणुः पुमान् धान्यभेदे परमाणौ समीरणे" १ एवमाधुनिकपरमाणविज्ञानस्य भारतीयजीवने पुनः प्रवेशं संकेतयति । आरुः शब्दश्चाधुनिक फल प्रयोगं भारतीयजीवने साधयति यथा: आरु "पुंसितरोर्भेदे "२

भारतवर्षोऽयं विभिन्नसंस्कृतिरूपाणि धारयन्नपि यथा नद्यः स्यन्दमानाः समुद्रे एकरूपतामाप्नुवन्ति तथैवैकामेव वैदिकसंस्कृतिवान् बभूव । वामन शिवराम आप्टे महाभागस्य संस्कृतकोशे, ३ अंगः ४ आन्ध्रः. ५ अवन्तिः. ६ अश्मकः ७ आनतः (सौराष्ट्रम्) इन्द्रप्रस्थम् (दिल्ली) उत्कलः ओड्ः (उड़ीसा) कनखलम्, (हरिद्वारसमीपे) कपिशा कलिंगः, कांची, कामरूपम्. काम्बोजः, (बलखगिलगितयोर्मध्ये) कुन्तलः (हैदरावादः) कुरुक्षेत्रम्, कुलूतः (हिमाचलान्तर्गत कुल्लू-मण्डले कुशावन्ती-कुशस्थली (बुन्देल खण्डा-

---

१ वाङ्मयार्णवः श्लोक ८८ प्रथमं सं. वाराणसी ।
२ ,, ,, ५७४ ,, , ।
'आड़ू' इति फल नाम
३ भागलपुर ४ वेलंगागा.
५ धौलपुर ६ त्रावनको

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्तर्गत रामनगरम्) कैकय:. (पञ्जाबस्य सीमायां स्थित:) केरल: कोशला, कौशाम्बी, (प्रयागस्य समीपे) कौशिकी (भागलपुर-पूणियामध्ये प्रवहमाणा दरभंगाया: पूर्वभागे) गौड:- पुण्ड्र:- (उत्तरबंग:) चेदि: (जब्बलपुरस्य) निम्नभागे, चोल:, (मैसूर:) जनस्थानम् (नासिकस्य समीपे) जालन्धर: (पञ्जावे) ताम्रपर्णी (ताम्रवती) ताम्रलिप्त: त्रिगर्त: (कांगड़ा हिमाचल प्रदेशे) त्रिपुरीदशपुर दशार्ण-द्रविड़ · द्वारका - निषध - पञ्चवटी - पञ्जाल-पद्मपुर: - पद्मावती - पंपा - पाटलिपुत्र - पाण्ड्य - पारसीक - पारियात्र - प्रतिष्ठान · मगध - मत्स्यविराट्मलय · महेन्द्रमहोदय – मानस - माहिष्मती - मिथिला मुरल- मेकल - लाट - बंग- (पूर्वबग: कलभी वाल्हीकवाहीक-विदर्भ-विदेह - वृन्दावन - शक - शुक्तिमत - श्रावस्ती - सह्य - सिन्धुदेश - सुह्म-स्वछन - हस्तिनापुर - हेमकूटादय: शब्दा: भारतस्य विभिन्नराज्य - नदी - सरोवर - पर्वत - श्रृंखलानाञ्च वाचका: जातिविशेषबोधकाश्च सन्ति । एते सर्वेऽपि नूनमेव भारतीयसंस्कृते आधारा आगारांश्च नात्र सन्देह: । कोशेषु सर्वेऽप्येते सामयिकपरिवर्तन - पूर्वकं व्याख्याताास्तेन चाधुनिक - भारतीया: स्व प्राचीन संस्कृत्या: दर्शनमेषु कर्तुमर्हन्ति व्योमयानं विमानं स्यादग्नियानं तदेवेति ।[1] "इत्यादि वाक्येन संस्कृतकोशा: आधुनिक संस्कृतिबीजान्यपि प्रकटयन्तीति स्पष्टम् ।

निष्कर्ष:

अध्यायेऽस्मिन् - आवैदिकात् - कालात्-वर्तमानकालं यावत् संस्कृतकोशेषु विकीर्णानां सांस्कृतिकतत्वानां संकेतसन्निवेशो विहित: । शास्त्रकोशा: ग्रन्थ-कोशाश्च तथा · विविधकोशास्तु नि:सन्देहं संस्कृतिकोशा एव सन्ति नात्र मतद्वयी अत: शास्त्र- ग्रन्थ विविधकोशतत्वानामभिनिवेशोऽत्रानावश्यक:

अनेनाध्ययनेन व. संस्कृतकोशेषु न केवलं भारतीयसंस्कृतितत्वोपलब्धि रेवापितु विश्वमानवसंस्कृतितत्वबीजानि द्रष्टुं शक्यन्ते । वैदिककालादेव भारतीयानां प्रकृतिप्रियत्वं, दैवीशक्त्यां विश्वास: देवतापरत्वम्, त्रिदेवैकदेव-बहुदेवतादिवाद: तेषां निराकारसाकारकल्पना- पारिवारिक सामाजिकप्रथा:, शिक्षापद्धति:, ज्ञानप्रशसाऽज्ञाननिन्दा, विविधविज्ञान पारगामित्व चतुरा-श्रमवर्णव्यवस्थादिकञ्च परिज्ञायते ।

---

१ संस्कृत हिन्दीकोश: पृ. १२०७ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एतदुत्तरकालीनेषु - भागुरि-व्याडिकात्यायनामरकोशादिषु विकसित रूपदर्शनं जायते भारती संस्कृते: । विशेषत: पाशुपाल्ये राजनीतौ, वानिक्यां, कृषिक्षेत्रे वाणिज्ये, प्रशासने वास्तुविद्यायां शारीरिक्यामौषधि विज्ञाने वानस्पत्ये फलोत्पादने व्यवहारे रणनीतौ युद्धविद्यायां अलंकरणे, 'वस्त्रोत्पादने', सौगन्धिक्या, संस्कारेषु चतुर्वर्ण चतुराश्रमव्यवस्थापनायां अश्व-हस्तिजलयान - जलजन्तु - परिज्ञाने, राजनैतिकार्थिक-सामाजिकादि-व्यवस्थासु च दृष्टुं शक्यते विकासोऽयम् ।

तत्पश्चात् षोडश सप्तदशशतक पर्यन्तं ख्रीष्टाब्दानां भारते यानि यानि-परिवर्तनानि जातानि तदनु च बौद्धजैनान्दोलनस्य परिणामस्वरूप यद्विकासो जातस्तस्य सूक्ष्म परिज्ञानमुत्तरकालीनकोशैर्भवति ।

संस्कृतजर्मन-संस्कृतांग्ल - संस्कृतभारतीयप्रान्तीयभाषाकोशेश्च भारतस्याधुना पर्यन्तं सांस्कृतिकस्वरूपं स्पष्टं भवति । सर्वभाषासु च संस्कृतस्य व्याप्तिमत्वमपि सिद्ध्यति ।

पृथ्वी - अन्न - बल - धन - उषा - रात्रि - दिवस - अन्तरिक्ष- द्यु-स्वर्ग - मेघ - विद्युत् - जल - देवतादिशब्दा: वैदिककोशेषु वैशिष्ट्येन व्याख्याता । एभिरेव विश्वमानवसंस्कृतिस्तदानीं यथा प्रभाविता आसीत्तथैवाद्यापि वर्तते ।

वैदिककोशेषु भारतीयसंस्कृतिनिर्मापक - तत्वेषु शिक्षा - आचार्य-सुवसनप्रयोगनिर्धनधनिक - औरसपुत्रादीनां सन्तत्या दायभागाधिकारत्वस्य, स्त्रीविक्रयादीनाञ्च दर्शनं यथा भवति सैव स्थितिरद्यापि समाजे राष्ट्रे च यथाकथञ्चित् येन केन प्रकारेण च दृष्टुं शक्यते । कुटीरप्रासाद प्रभृति साधारणगृहादिनिर्माणं, ग्रामनगरस्थापनविकासादिकञ्चाद्यापि - अमर-कालीनमिव राष्ट्रे वर्तते । यथामरेऽन्योन्याभिसुखशाल-चतुष्टय गृहाणां तात्कालीनता अद्यापि ग्रामेषु समृद्धपरिवाराणां स्वतन्त्रतापूर्वं राज्ञाञ्च भवनानां निर्माणमनयैव पद्धत्या जातमिति अद्यापि सम्यक् दृष्टुं शक्यते । अद्य सभ्यानां गृहेषु प्रसाधनकक्षस्य (Drawing Room) विशेष चर्या भवति । परन्तु भारतीयसंस्कृतौ प्राचीनतमेयं व्यवस्था । तत्र "मण्डप:" शब्देनानेनास्य परिचयो लभ्यते ।

प्रशासन क्षेत्रे मण्डलाधीश अरण्यपाल- करविभागाध्यक्ष सूचनाधिकारि-आदिनां विधानमासीत् । सेनायाश्चापि वैशिष्ट्येन महत्ता ऽऽसीत् - यथाऽद्य ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यवहारे च विभिन्न-स्मृतयः समुपयुज्यन्ते स्म । आधुनिकन्यायस्य मूले विचारस्तु स एव यस्तदानीतन कोशैर्व्याख्यायते ।

कृषि- पशुपाल्य,वाणिज्यादिष्वपि वानिक्यामौद्यानिक्याञ्चापि मौलिको विचारः प्राचीनकोशोपवर्णित एव। अमरकाले यानि कृषि साधनान्यासन् तान्येवाद्यापि भारतस्य विभिन्नेषु सर्वत्र विस्तृतेषु ग्रामेषु विशेषतश्च हिमाचल प्रदेशे द्रष्टुं शक्यन्ते ।

सक्षेपत इद कथनीय भवति यत् भारतीया वैदिकी संस्कृति भारतीयजीवने सहस्रवर्षेभ्योऽविरत समुपस्थिता वर्तते । ऋत्वनुसारि - नदी - आकारमिव भारतीयसंस्कृत्याः कदाचित् सूक्ष्मरूपः कदाचिच्च विशाल-रूपो द्रष्टुं शक्यते । अयं रूपः स्वरूपश्च भारतीय कोशवाङ्मयस्य सांस्कृतिकाध्ययनेन सिद्ध्यति । अध्ययनमिदं सामयिकविकासपरिवर्तनपरिवर्धनादिकमपि च समुपस्थापयति ।

२६ कीथमैक्डानलीय वैदिकानुक्रमणिका
(१६१२ खी)

कीथ-मैक्डानलाभ्यां १९१२ खीष्टाब्दकाले वेदकनाम्नाञ्चैकाऽनुक्रमणिका संग्रहीता प्रकाशिता च। अनया ब्लूम् फील्डेन स्वयोजनान्तर्गतं निर्धारितस्य द्वितीयविषयस्य पूर्तिर्भवति। एतदन्तर्गत वेदसम्बन्धि-भाषण-लेखादीनां संग्रहः. प्राचीन - नवीनानुसन्धानपरिचयसंकलन सर्वमपीद समायाति एतद्विषयकपरिचयोऽस्यामनुक्रमण्यां संकलितः । एतत्सम्बन्धिसंकेतानामकाकारादि अनुक्रमेण संग्रहो विद्यते । एतिहासिक - भौगोलिक – सामान्यविषयानुसन्धानपराणां कृते ग्रन्थोऽयं परमामुपयोगितामर्हति ।

इति आचार्यश्रीकेशवशर्मणा निर्मितस्य संस्कृतकोशवाङ्मयस्य विशेषपरिचयाख्ये भागे विविधकोशसम्बद्धः अष्टमः काण्डः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मण्डेलाऽभिनन्दनम्

प्रा० हरिश्चन्द्र रेणापुरकरः

★

अफ्रीकाया असितजनतां श्वेतवर्णीयदास्या—
न्मोक्तुं भीमं प्रखरसमरं कुर्वते दीर्घकालम् ।
मण्डेलाय त्रिभुवननमस्याय वीरोद्भटाय
हार्दं सूक्तं मुदितमनसा स्वागतं व्याहरामः ।१।

अफ्रीकाराष्ट्रियजनसमाक्रान्तिकारिप्रधानो
ह्यश्वेतान्तःकरणदयितो वर्णभेदप्रतीपः ।
अष्टाविंशत्यधिकशरदो घोरकारानिबद्धो
विश्वाक्रोशं प्रबलविमतिं स्पष्टमालोक्य मुक्तः ।२।

हर्षोत्फुल्लैरगणितजनैः स्वागतं तस्य चक्रे
शोभायात्रा ह्यपि च महती राजमार्गेण तस्य ।
नीतोत्स्फूर्तैरुदितजयघोषैश्च लोकैः प्रचण्डा
मण्डेला वै सकलदलितोत्पीडिताऽऽशाप्ररोहः ।३।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईदृग्दीर्घाबाधिकगुरूणा दण्डतो दण्डनेन
ह्यन्यः कश्चिन्मनुजसमयैः शंभुवर्ष्योऽमनिष्यत् ।
मण्डेला तु स्थिरतममतिर्धीरवीराग्रगण्यो
गाढं तस्थौ नहि समचरद् बैतसीं वृत्तिमत्र ।४।

स्वल्पैर्गौरैर्मनुजदनुजैः—नूनमागन्तुकैश्च
तमस्थायान् सरलमनुजान् कृष्णवर्णीयलोकान् ।
दासीकृत्य स्वयमिह पशूनेडमूकानिवैते
मानुष्यस्याधिकृतिरहिताः प्रापिता हीनभावम् ।५।

कृत्वा तेषां निरतिशयितं शोषणं सर्वगामि
नीत्वा सर्वान् कृपणपशुवच्छोचनीयामवस्थाम् ।
श्वेतत्वग्भिः परिमितजनैर्वंशवर्णावलिप्तैः
स्वस्वामित्वं विरचितमहो पञ्चकृत्वोऽधिकेषु ।६।

गौराङ्गस्तैर्गर्वितहृदयैः सभ्यमन्यैश्च लोके—
मानुष्यैक्यं स्मरणसरणौ सारयित्वा विमूढैः ।
तेषां वासा असितवपुषामामणाः पाठशाला—
श्चाण्डालानामिव तनुभृतां कल्पिताः पूर्णभिन्नाः ।७।

सार्धं गौरैरसितमनुजाः साधिकारा न वस्तुं
स्थातुं भोक्तुं ह्यपि च सह तै रेलयानेन गन्तुम् ।
लोकान् निर्वाचयितुमपि ते साधिकारा न कृष्णा
इत्थं दास्यं निरतिशयितं स्थापितं तेषु गौरैः ।८।

नीग्रोसंज्ञेष्वनघनिरवद्येषु गौरांगलोकैः
सामान्यस्वाधिकृतिनिवहान् याचमानेषु घोराः ।
अत्याचाराः कठिनहृदयैर्न्यमारोपिता ये
मण्डेलानेल्सनसमजनास्तस्य दृष्टान्तभूताः ।९।

वर्णायत्तो भुवि नरकृतो भेदभावो नरेषु
नूनं मिथ्या भवति नितरां गर्हणीयः समेषाम् ।
मर्त्याः सर्वे परमपुरुषस्यैव पुत्राः समानाः
लोकेष्वेषु प्रभवति कथं वंशवर्णादिभेदः ।१०।

गांत्रोजोभिः शतमितसमापूर्वमेवं प्रवृत्त—
मफ्रीकायामसितजनतास्वाधिकारार्थयुद्धम् ।

(शेषः २४ पृष्ठे)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



हिमाचलवैभवम्

हरिदत्त ग्वाड़ी 'शैलज
साहित्याचार्यः, एम. ए.

आयान्तु स्वागत वो, महनीयभारतं नो
नमत हिमाचलम् रे
भजत हिमाचलम् रे

नैना - ज्वाला - चिन्तपूरणी, चामुण्डामातरः
यासां वसतिर्हिमाचलमिदं, भजति सकलसंसारः
प्रणताय मेऽस्तु मातः, अखर्वगर्वजातः
नमत हिमाचलम् रे
भजत हिमाचलम् रे

शिमला - चम्बा - कलित कांगड़ा कुल्लू कुञ्जमनाली
स्वर्ग मनोरम मधुवन मध्ये,—भ्रमति - भ्रमरपथिकाली
हे मातृभूर्नमस्ते ! नो छात्रसूनवस्ते
नमत हिमाचलम् रे
भजत हिमाचलम् रे

लसति लुलितनवललनालोला, मधुमयसेवद्रुमाली
गायति तरला सरलासरसितसौरभमुग्धपिकाली
भव्यं हि वैभवं ते, रम्यं मनोरमं मे
नमत हिमाचलम् रे
भजत हिमाचलम् रे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर-सर-सर-सर सरति सुन्दरी, सरिता सरससमुद्रम्
कल-कल-कल-कल कलयति कूले, कलितं शब्दरसालम्
वत! व्योम्नि शैलमालं, तव नौमि तुंगभालम्
नमत हिमाचलम् रे
भजत हिमाचलम् रे

जयतु जगति जनगणमनमधुरा, मृदुला संस्कृतवाणी
यत्र वसति नवज्ञाननिर्झरा, मुदिता वीणापाणी
नन्दन्तु भारतीयाः, भव्यन्तु भारतीयाः
नमत हिमाचलम् रे
भजत हिमाचलम् रे

आयान्तु स्वागतं ... ...

— हिमाचल केन्द्रीय संस्कृत महाविद्यालय
जोगला, रोहडू, जिला शिमला
(हि० प्र०)

(शेषः २२ पृष्ठस्य)

मण्डेला-सम्भिन्नरवरश्चाल्यमानं सघर्यम्
सिद्धिं प्राप्स्यत्यचिरमिति नो शङ्कनीयं कदाचित् ।११।
मुक्तेरूढ्वं जगति दलितोत्पीडितानां हि मुक्त्यै
संघर्षार्थं जनहितकृतो लोकतन्त्रस्य हेतोः ।
यत्तेनोक्तं निजदृढमतं ज्ञापकं निश्चयस्य
रुद्धः श्वासः खलु समवदन्नेल्सनो मानवानाम् ।१२।
गौराङ्गाणां कुटिलजटिला वर्णभेदप्रवृत्तिः
श्यामाङ्गानां प्रति च सितवर्णीयपार्थक्यनीतिः ।
मालिन्यं स्याद्विमलविपुले भव्यमानुष्यभाले
मण्डेलाख्यप्रबलहुतभुग्ज्वालमालावलीढम् ।१३।

— साहू बिल्डिंग, ऐवानशाही रोड
(गुलबर्गा कर्नाटक)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदांगेषु पाणिनीयव्याकरणम्

आचार्य श्याम लाल शर्मा
व्याकरण साहित्याचार्यः, एम. ए.

वेद इत्यस्य शब्दस्य कोऽर्थः ? अथ च वेदस्य किं महत्वं ? इति ज्ञानाय जायते जिज्ञासा। उच्यते:— पाणिनीयव्याकरणस्यादादिप्रकरणे ज्ञानार्थकाद् विद् धातोः घञि प्रत्यये निष्पद्यतेऽयं वेदशब्दः। अर्थात् विद्यन्ते ज्ञायन्ते लभन्ते वा धर्मार्थ काममोक्षादिपुरुषार्थाः एभिरिति वेदः।

श्रीमद्भट्टोजिदीक्षितप्रणीते व्याकरणसिद्धान्तकौमुदी ग्रंथे विद् धातोः पञ्चवारं विभिन्नार्थेषु प्रयोगः समुपलभ्यते यथा– १ अदादिगणे विद् √ ज्ञाने धात्वङ्कः ११४०, २. दिवादिगणे विद् √ सत्तायाम् धात्वङ्कः १२४७। ३ रुधादिगणे विद् √ विचारणे धात्वङ्क १५४४। ४. चुरादिगणे विद् √ चेतनाख्यानविश्वासेषु धात्वङ्कः १८४३। ५. तुदादिगणे विदॢ √ लाभे धात्वङ्कः १५२६। सिद्धान्त कौमुद्याम् श्लोकमेकमपि विषयेऽस्मिन् दृश्यते यथा—

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे।
विन्दते विन्दति प्राप्तौ श्यन् लुक्श्नम्शेष्विदं क्रमात्। इति।

(मूल व्याकरण सिद्धान्त पृष्ठकाः ४६०)

वेदस्य वेदता विषये कृष्णयजुर्वेदीयभाष्यभूमिकायां वेदविदुषा सायणेन अपि उपन्यस्तमस्ति यथा—

प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।
एवं विदन्ति वेदेन तस्मात् वेदस्य वेदता। इति

अतः परमसारल्येन सिद्धयति यत्-वेदो हि नाम अशेषज्ञानविज्ञान राशीति। आम्नायः आगमः, श्रुतिः वेदा, एते सर्वे समानार्थ वाचकाः शब्दाः वेदे समुपलभ्यन्ते। वेदानां अपौरुषेयत्वं शाश्वतत्वञ्चेति सर्वे सममेव स्वीकुर्वन्ति। आपौरुषेयेषु वेदेषु अलौकिकतायाः सम्यक् ज्ञानं इति तु सायणेनापि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतिपादितम्। यथा—"इष्टप्राप्त्यनिष्टपरिहारयो: अलौकिकमुपाय यो वेदयते स वेद:"।

तत्र जायते जिज्ञासा यत् कतिवेदा ? अस्योत्तरे ऋक्, यजु, साम अथर्ववेदा: इति चतुसंख्यात्मकत्ताम्। एषां चतुर्वेदानांमपौरुषेयत्वेन विश्वे ख्याति:।

एषां वेदानां चत्वार: उपवेदाऽपि सन्ति यथा—ऋग्वेदस्य आयुर्वेद:, यजुर्वेदस्य धनुर्वेद:, सामवेदस्य गन्धर्ववेद अथर्ववेदस्य अर्थवेदश्चेति। परंस्माक वर्ण्यविषयोऽस्ति वेदाङ्गानि, तानि कति संख्यकानि ? कानि कानि च तेषां नामानि ? विषयेऽस्मिन् पाणिनीयशिक्षायामायाति।

छन्द: पादौ तु वेदस्य हस्तौ कल्पोऽस्य पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।१।
शिक्षा घ्राणस्तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् सांगमधीत्यैव ब्रह्मलोके महीयते ।२।
(इति पाणिनीयशिक्षायाम्)

अर्थात् छन्द:-कल्प-ज्योतिष निरुक्त-शिक्षा-व्याकरणमितिषट संख्याकानि वेदाङ्गानि वेदानां सम्यक् अवबोधनार्थं प्रवृत्तानि। विना वेदाङ्गानां अध्ययनेन वेदार्थज्ञानं सम्यक् प्रकारेण नहि भवितुं शक्यते इति निश्चितमेव षडङ्गेषु वेदानां अध्ययनार्थं व्याकरणमपि आयाति। किमिदं व्याकरणम् ? अथ च कतिविधं व्याकरणम् ? इत्यस्य ज्ञानमपि परमावश्यकम्।

वि+आङ् पूर्वकयो: कृधातो निष्पन्न व्याकरण शब्द ? अर्थात् व्याक्रियन्ते, व्युत्पाद्यन्ते, संसाध्यन्ते शब्दा: अनेनेतिव्याकरणम्। कतिविधं व्याकरणं इति प्रश्ने सति, श्री तत्त्वविधि नामके वैष्णवग्रन्थे नव विधं व्याकरणमिति उल्लेखो वर्तते। तद्यथा—

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्। इति।

अर्थात् - ऐन्द्र-चान्द्र - काशकृत्स्न कौमार-शाकटायन - सारस्वत आपिशल शाकल्य पाणिनीयञ्चेति नव व्याकरणानि। एषु नव व्याकरणेषु मात्रं पाणिनीयव्याकरणस्यैव वेदाङ्गत्वं नेतरेषाम्। नवविधं व्याकरणमिति विषयेतु वाल्मीकि रामायणस्योत्तरकाण्डेऽपि वर्णनं दृश्यते यथा—

'सोऽयं नव व्याकरणार्थवेत्ता" उ० का० ३६-४७)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतोऽपि नव व्याकरणानि सिद्ध्यति । परं भोजविरचितस्य सरस्वती कण्ठाभरणस्य टीकायां अथ च भास्कराचार्यस्य लीलावतीनामकग्रन्थस्यान्ते अष्टविधं व्याकरणमिति मिलति । तेषु अष्टविधव्याकरणेषु चापि पाणिनीय व्याकरणं त्रिमुनिपदेन व्यपदिश्यते । महाराज समुद्रगुप्तोऽपि मुक्तकण्ठेन स्वीकरोति यत् पाणिनीय अष्टकमेव वेदाङ्गम् इति ।

महामुनि कात्यायनेनापि पाणिनीय व्याकरणस्यैव वेदाङ्गत्वं स्वीकृतम् । तद् यथा -

"न केवलं व्याकरणं पुपोष दाक्षीसुतस्येरितवार्तिकैर्यः"

(कृष्णचरितम्)

आर्षज्ञान-विहीनार्वाचीनवैयाकरणानामिद मतं सर्वथाऽज्ञानमूलकं यत् कात्यायनः पतञ्जलिश्च पाणिनीय व्याकरणस्य मतखण्डनं कुरुतः ।

व्याकरण क्षेत्रे श्री लक्ष्मीधरतनुजस्य भट्टोजिदीक्षितस्य नाम स्वर्णाक्षरैरङ्कितं वर्तते श्रीमद्भट्टोजिदीक्षितेन विदुषा शब्दकौस्तुभः तन्निकर्षरूपः वैयाकरण सिद्धान्तकौमुदी तद्व्याख्यानभूता मनोरमा चेति संदर्भा विरचिताः तेन भट्ट महोदयेन मुनित्रयप्रमाणमत्तेस्य विषये स्पष्टरूपेण प्रतिपादितमस्ति यत्—

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम्
पाणिनीयं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ।इति ।

अर्थात् किमतिविस्तरेण नवविधव्याकरणेषु केवलमात्रं पाणिनीयव्याकरणस्यैव वेदाङ्गत्वमिति दिक् ।

— श्री वसिष्ठ संस्कृत विद्यापीठ तुंगेश
पत्रालय चयोग वाया फागू
जिला शिमला (हि० प्र०)

वार्षिकशुल्कं कृपया त्वरया प्रेष्यताम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



एकस्मिन् कार्यालये साक्षात्कारोऽभूत तत्र परीक्षकेण एकः प्रत्यशीः पृष्टः भो !

तव किं नामधेयम् ?

प्रत्यशीः - श्रीमन् ! विद्यासागरः ।

परीक्षकः:- तव पितुः किं नामास्ति ।

प्र० – श्रीमन् ! सरस्वतीचन्द्रः ।

प० – त्वं किं कार्यं करोषि ?

प्र० – पशून् चारयामि ।

★ ★ ★

एकः ग्रामीणः प्रथम वारं चित्रपटं दृष्टुं गतः यदा चित्रपटारम्भोऽभूत् । तदाभ्यन्तरे विद्युत्प्रकाशाभावो विहितः । स अगर्जत् किं वय उल्लुकाः स्मः ये अन्धकारे चित्रं दृक्ष्यामः ।

★ ★ ★

एको भिक्षुकः गृहाङ्गणे गत्वा अवदत् श्रीमन् ! भिक्षां देहि । आभ्यन्तरात् प्रत्युत्तरमागतम् गृहणी गृहे नास्ति । भिक्षुकः पुनराह श्रीमन् ! भिक्षां याचे न तु पत्नीम् ।

★ ★ ★

अध्यापक :- (छात्रं प्रति) जानेऽहं यत्त्वं कक्षायाम् अत्यधिकं भाषणं कुरुषे ।

छात्र - श्रीमन् ! नैव अहन्तु कक्षायां सुप्तो भवामि । न च स्वप्नकाले कदापि भाषणं करोमि ।

शशि कान्त शर्मा

ज्योतिषाचार्य, ओ टी. रिसर्च स्कालर

रा मा. विद्यालय हारसी

जि० कांगड़ा (हि. प्र.)

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



काव्योन्मेष:

(सं: काव्यसंग्रह:)

प्रणेता: श्री हरिश्चन्द्र रेणापुरकर:, सेवानिवृत्त प्राचार्य: ।

प्रकाशक: – एस रामकृष्णन्, का वाहकमन्त्री. भारतीय विद्याभवनम्
मुम्बापुरी ७

प्राप्तिस्थानम्:— प्रा. हरिश्चन्द्र रेणापुरकर:, मराठी साहित्यमण्डलाध्यक्ष:
पटेल चौक, गुलबर्गा (कर्णाटक) मूल्यम् २९ रु पृ. २००

सेवानिवृत्तप्राचार्यं श्री हरिश्चन्द्र रेणापुरकरविदुषा प्रणीत. काव्योन्मेषाभिधोऽनुपम: संस्कृतकाव्यसंग्रह: प्रसादगुणगुम्फितो ललितपदवाक्यैरनुगत, शिखरिणीवसन्ततिलकादिमधुरछन्द: सन्दोहैरनुप्राणित:, उपमारूपकानुप्रासाद्यलङ्कारालङ्कृत:, भावगाम्भीर्यसौरभसुवासित:, वर्तमानकालिकरचनासु चमत्कृतिपूर्णो विपश्चितां प्रमोदावहो वर्तते । अस्मिन् काव्यसंग्रहे ४२ मिता विभिन्नशीर्षकात्मिका: रचना: संकिलिता: सन्ति ।

श्री भि वेलणकर गीर्वाणसुधा सम्पादकमहाभागेन, मुम्बईस्थनिवृत्तप्राचार्येण भाई शंकरपुरोहितेन, कर्णाटकराज्य मराठी साहित्यपारषदोऽध्यक्षेण श्री व. पा देऊलगादकर महाभागेन च काव्यसंग्रहस्यास्यातीवाशंसन विहितम् । प्रस्तावना लेखका: सन्ति तर्कतीर्थ श्रीलक्ष्मण शास्त्री महाभागा: । अस्मिन् काव्यसंग्रहे वेदलहरी, दयानन्दलहरी, विवेकानन्द लहरी गान्धिलहरी शास्त्रिशोकलहरी इति लहरीपञ्चकं शिखरिणीछन्दस्युपनिबद्धं सहृदय हृदयाह्लादकम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदलहरी निम्नपद्यात् प्रारभ्यते :—

निसर्गादौ लीलाजनितजगदाधारबिधिना
जगत्कल्याणार्थं परमकरुणापूर्णमतिना ।
मुनीनामाद्यानां विमलहृदयेषु प्रकटितं
श्रुतेर्नाम्ना ख्यातं जयति भुवने ज्ञानमपरम् ॥

धर्मतत्वसमीक्षाप्रसङ्गे सुगूढ़तमाधर्मविषयमवलम्ब्य साधु समीक्षितम् । अनुप्रासालङ्कारस्यापि समन्वयः सर्वथा प्रमोदावहः

यथाः —

पर्णे पर्णे प्रतिकणगतां संगतिं सुव्यवस्थां
सामञ्जस्यं मधुरमधुरं नूनमाश्चर्यरूपम् ।
साभिप्रायं त्रिभुवनगतं संविधानं च दृष्ट्वा
श्रद्धातुं नां भवति बलवत् प्रेरितो विश्वशक्त्याम् ॥

यत्र तत्र संस्कारगरिमाविषये राष्ट्रियभावनाजागरणबिषये च प्रतिपादितं यथा:-

सत्संस्कारैर्मनुजवरनिर्माणकार्यं हि शक्यं
संस्कारैश्च प्रभवनितरां व्यक्तिमत्त्वप्रकाशः ।
शिल्प्युट्टङ्कैः प्रतिकृतिरिव स्थूलपाषाणखण्डाः
शाणोल्लीढ़ो मणिरिव नरो भाति संस्कारयुक्तः ।

उपमालङ्कारस्यापि सन्निवेशोऽत्र चमत्कृतिपूर्णः । साम्प्रतं संस्कृत-कबिषु छन्दोऽलङ्कारमयरचनानिबन्धनस्य परम्परा प्रायेण लुप्यमाना दृश्यते । कवित्वाभिवृद्धये नूनमेवोदीयमानसंस्कृतकविभिर्विद्यार्थिभिश्च काव्योन्मेषोऽवश्यमेव पठनीयः

विश्वविद्यालयेषु पाठ्यपुस्तकरूपेणापि काव्यसंग्रहोऽयं यदि निर्धारितः स्यात्तर्हि छात्राणां हिताय स्यात् । समस्तभारतीय पुस्तकालयैः पुस्तकालया-लंकरणाय प्राप्तव्योऽयं काव्यसंग्रहः । श्रीरेणापुरकरमहाभागानां सर्वथा स्तुत्योऽयं प्रयासः ।

पुस्तकस्य मुद्रणमपि सौन्दर्यसुभासितम् ।

— प्रधान सम्पादकः

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाचाराः

लोकसभायां संस्कृते शपथग्रहणम् !

महाराष्ट्रराज्यतः निर्वाचित ४८ लोकसभासदस्येषु सप्त सदस्यैः संस्कृतभाषायां प्रतिज्ञा (शपथं) गृहीता।

ते स्वनामधन्याः संस्कृतिसंस्कृतरक्षकाः यथा– श्री विद्याधर गोखले, प्राध्या राम कापसे, श्री राम नाईक, श्रीमती जयंतीबेन मेहता, श्री पुंडलिक वानवे, श्री मोरेश्वर सावे, श्री वामनराव महाडिक च।

हिमाचल प्रदेशतः त्रिभिः लोकसभासदस्यैरपि संस्कृते शपथग्रहणं कृतम्।

एते सन्ति श्री शान्ताकुमारः प्रो. श्री प्रेमकुमार धूमलः, श्री महेश्वर सिंहः।

एतेषां सर्वेषां अन्तः करणेन वयं अभिनंदनं कुर्मः। एतेषां अयं प्रशंसनीयः उपक्रमः सर्वैः अनुकरणीयः।

दुरदर्शने 'भाति मे भारतम्'

दिल्ली–दूरदर्शनेन प्रातःकालीनराष्ट्रीयप्रसारणे 'भाति मे भारतम्' इतिशीर्षकस्य धारावाहिक कार्यक्रमस्य प्रदर्शनं २० जनवरी १९९० तः प्रारब्धम्। अयं कार्यक्रमः प्रतिशनिवासरं प्रातः ८-३६ वादनकाले-प्रसार्यते, चेदत्र किञ्चिदाकस्मिकं परिवर्तनं न स्यात्। २०-१-९०, २७-१-९०, ३-२-९० तारिकासु प्रथम-द्वितीय-तृतीया भागाः प्रसार्यन्त। अग्रिम भागाः १०-२-९०, १७-२-९०, २४-२-९०, ३-३-९०, १०-३-९०, १७-३-९०,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२४-३-९० तारिकासु प्रसारयिष्यन्ते । प्रत्येकः भागः पंचमिनिटात्मकोऽस्ति । भारतस्य भौगोलिकं, प्राकृतिकं, वैज्ञानिकं, औद्योगिकमाध्यात्मिकं च वैशिष्ट्यं कार्यक्रमे समुन्मील्यते ।

कार्यक्रमस्य प्रणेता निर्देष्टा च डा० रमाकान्त शुक्लोऽस्ति । निष्पादयित्री संस्था 'देववाणी –परिषद्, दिल्ली' अस्ति ।

दूरदर्शन—दर्शकाः कार्यक्रममिमं वीक्ष्य स्वविचारैः निर्देष्टारं, दूरदर्शनं, समाचारपत्रसम्पादकान् च परिचाययितुं प्रार्थ्यन्ते ।

संकेतः- १) 'आप और हम', पो. बा. ७८, दूरदर्शन, आकाशवाणी भवन, संसद मार्ग, नयी दिल्ली - १

२) डा. रमाकान्त शुक्ल, देववाणी-परिषद्, दिल्ली आर-६ वाणी विहारः, नयी दिल्ली-११०००५९ ।

पाठकाः प्रार्थ्यन्ते

मान्याः !

प्रवर्तमानवर्षस्यापि अर्धभागो व्यतीतः । पत्रप्रेषणेनापि वार्षिकशुल्कप्रेषणार्थं प्रार्थना कृता किन्तु स्वल्पैरेव महानुभावैः शुल्कप्रेषणं कृतम् । अतः सविनयं प्रार्थ्यते यत् शीघ्रमेव शुल्कप्रेषणेन सहायता क्रियताम् ।

—— सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिमाचल प्रदेशे मन्त्रिमण्डलपरिवर्तनम्

संस्कृतञ्च



१९९० ख्रीष्टाब्दीयनिर्वाचने हिमाचलप्रदेशे भारतीयजनतादलीय प्रशासनाय लोकैः सदस्याः, निर्वाचिता शान्तिपूर्णशक्तिपरिबर्तनस्य इयं परम्परा परमशोभना। वयं न केनापि दलेन सम्वद्धाः वयं तु तेषां स्म ये किल संस्कृतप्रसाराय विकासाय च कार्यं कुर्युः।

पूर्वप्रशासनेन श्री वीरभद्रसिंहस्य नेतृत्वे प्रदेशे संस्कृतप्रसाराय विकासाय च यन्महत्वपूर्णकार्यं कृतमासीत्तत्र-अधिकारिणां संस्कृतविरोधिविचारधारया पूर्णसाफल्यं न जातम्। तथापि - वयं पूर्वप्रशासनस्य कृतज्ञा स्म विशेषत श्री वीरभद्रसिंहस्य येन धार्मिकसंस्थानानां पोषणाय बहुप्रयासाः कृताः संस्कृतप्रसाराय च यत्कार्यं कृतं तत्र संस्कृतस्य विशेषाधिकारि नियुक्तिः, संस्कृतस्य पाठ्यक्रमे पुनः स्थापना - इति द्वयं महत्वपूर्णम्-साफल्यम् संस्कृतज्ञानाम्। श्री वीरभद्रसिंहः प्रदेशे संस्कृतप्रसारविकासकृते पुनरपि-अधिकोत्साहेन कार्यं करिष्यति इति आशास्यते।

श्री वीरभद्र सिंहः प्रदेशस्य सर्वभाषालेखकानां, कवीनां साहित्यकाराणाञ्च प्रोत्साहनायापि महत्वपूर्णान् प्रयासानकरोत सुविमला स्पष्टा च वर्तते अस्य छविः नात्रसन्देहः।

श्री शान्ताकुमारोऽपि संस्कृतप्रसाराय विकासाय च न केवलं पूर्वप्रचलमानयोजनापरिचालनमात्रं करिष्यति — अपितु नवीनयोजनाभिः संस्कृतस्य वैशिष्ट्यं स्वीकुर्वाणः संस्कृतप्रसारे महत्वपूर्णयोगदान करिष्यति इति आशा दिव्यज्योतिषा शुभकामना, नवीनप्रशासनाय दीयन्ते।

— केशव शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R. N 6384/57 33/एस. एम. / 10/89

हिमाचल प्रदेशस्य नवीनो मुख्यमन्त्री

श्री शान्ताकुमारः

श्री शान्ता कुमारः द्वितीयबारं हिमाचल प्रदेशस्य मुख्यमन्त्री जातः । अनेन संस्कृते शपथग्रहणमकारि । आशास्यते यत् प्रदेशे संस्कृतस्य भविष्यमुज्ज्वलं स्यात् ।

श्री राधारमण शास्त्री



राधारमणः भारतीयजनतादलस्य महासचिवोऽपि निर्वाचने जितः । इदानीमयं प्र. राज्यसभाया :– अध्यक्षपदमलंकुरुते पूर्वमयं पर्यटनमण्डलस्याध्यक्षः अपि आसीत । दिव्यज्योतिषः सकाशात् वर्धापनानि ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

संस्कृतस्य सचित्रमासिकम्

★

शिमला

अप्रैल, १९९०

★

वर्षम् ३४

अङ्कः ७

★



हिमालये वासन्ती सुषमा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

विषयानुक्रमः

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्र.	विषयाः	लेखकाः	पृष्ठम्
१.	संस्कृत कोशवाङ्मयम् (क्रमशः)	प्रो. केशव शर्मा, सम्पादकः	१
२.	हसन्तुतराम्	शास्त्री ओम्प्रकाश 'राही'	१३
३.	ईश्वरान्वेषणम्	सुश्री विमला देवी (पंजाब)	१४
४	गुरु तेगबहादुरः	डा. सुरेन्द्र अज्ञात (पंजाब)	१५
५.	ईश्वर सिद्धिः	प्रा. रामानन्द शर्मा (सं. कालेज शिमला)	१७
६.	दि. पं. श्री रघुनाथ शर्मा	डा. रूपनारायण पाण्डेयः	२१
७.	भावात्मिका भारती	डा. सत्यदेवः (उ. प्र.)	२३
८.	कथानकम्	डा. ओम् प्रकाशः (पञ्जाब)	२६
९.	हिमाचल में नवयुग का अभ्युदय	श्री शान्ता कुमार मुख्य मंत्री (हि. प्र.)	२८
१०.	हि. रा. का सन्देश	श्री बी. रचैया राज्यपाल	३१

दिव्यज्योतिः

हि० क० सं०भा० अकादमी प्रदत्तानुदानसाहाय्यम् । पत्रिकागतमुद्रणदोषाणां सम्पादकीयनीति-विषये च अकादमीदायित्वं नास्ति ।

हिमाचल प्रदेश—पंजाब-हरियाणा-जम्मूकश्मीर - मध्य प्रदेश—राजस्थान—महाराष्ट्र, उत्तरप्रदेश शासन-स्वीकृतं केन्द्रशासनपुरस्कृतं सचित्रं संस्कृतमासिकम् ।

पत्रस्य उद्देश्यानि तथा नियमाः

सरल—सरस-सुबोध-साधनैः सर्वस्मिन् संसारे संस्कृतस्य प्रसारः, साहित्यान्तर्गतानां सकलकलानां समन्वेषणं, संसारस्य हितसम्पादनम्, एवं लौकिक - अलौकिकस्वातन्त्र्यस्य प्राप्तिः।

"दिव्यज्योतिः" प्रतिमासं पञ्चदशतारिकायाम् (आङ्गलमानेन) प्रकाशितं भवति पत्रस्य वार्षिक मूल्य ३० रु० अर्धवार्षिकं १५ रु० एकस्याङ्कस्य च रु० २-५० भवति। वर्षारम्भः अक्तूबर—मासतः भवति ग्राहकः कस्मादपि मासाद् भवितुं शक्नोति। ग्राहकैः, "सम्पादक, दिव्यज्योतिः, भारती विहार, मशोबरा, शिमला-१७१००७ हि० प्र०" इति संकेते धनादेशेन वा. शु. प्रेषणीयम्।

परिचयः

संस्थापकाः तथा आद्यसम्पादकाः आचार्यश्रीदिवाकरदत्त शर्माणः, — दूरभाषः 78459
राष्ट्रपति सम्मानिताः
प्रधानसम्पादकः— आचार्य केशव शर्मा एम. ए., एम, फिल, साहित्यरत्नम् - ,, 8200
दिव्यज्योतिः कार्यालयः भारती विहारः, मशोबरा, शिमला-७ (हि. प्र.)
मुद्रकः प्रकाशक.—

भारतीमुद्रणालय भारती विहार, मशोबरा-१७१००७ शिमला (हि. प्र.)
स्वामी:- श्रीमती आचार्य रत्नकुमारी शर्मा

अप्रैल. १९९० वैशाखः २०४७ — वर्षम्—३४ अङ्क ७

वार्षिक मूल्यम् ३०-००

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतकोशवाङ्मये

नवमकाण्डः

उपसंहृतिः

विश्वस्य कस्यापि वाङ्मयस्य कोशसाहित्ये तादृशं वैभिन्यं वैचित्र्यं वा न लभ्यते यादृशमत्राधीते संस्कृतकोशवाङ्मये । विभिन्नभाषाकोशेषु वर्णाक्षरक्रमः, चित्रप्रदानपद्धतिः, ऐतिहासिकप्रक्रमप्रदर्शनप्रकारः, इत्यादयः क्रमा एव प्रमुखतया दृश्यन्ते । आधुनिकसंसारस्य प्रमुखभाषासु विभिन्नक्षेत्रसम्बद्धशब्दकोशनिर्माणपद्धतिरपि लोकप्रियतां भजते ।

१ आद्यापद्धतिः-

इह संस्कृतकोशवाङ्मये तु कोशनिर्माणस्य बहुविधरुचिकरपद्धतीनामाविष्कारो व्यधायि संस्कृतस्यानेकशास्त्रपण्डितैः कोशकारैः अध्ययनादस्मादवगम्यते यत्संस्कृतस्याद्यकोशेषु केवलं नामाख्यातसंग्रहः, देवताऋषिसङ्कलनमित्येवासीत् । उपसर्गनिपातानामपि निघण्टवोऽभविष्यन् ।

२ निरुक्तिपद्धतिः-

ऋषिपरम्परावसाने शब्दार्थानां सुगमतया परिज्ञानाय निरुक्तग्रथनं जातम् । अस्मादेव कालात् संस्कृतकोशसाहित्ये शब्दानामर्थप्रदानारम्भोऽभूत् । निरुक्तेन शब्दानां निर्वचनपूर्वकमर्थप्रदानं विधीयते । एतदर्थं कोशकारो विभिन्ननियमानिर्धारणं कुरुते यथा, "अथ निर्वचनम् तद्येषु पदेषु स्वरसंस्कारौ प्रादेशिकेन गुणेन अन्वितौ स्याताम् तथा तानि निर्ब्रूयात् । अथानन्वितेऽर्थे, अप्रादेशिके विकारे अर्थनित्यम् परीक्षेत् केनचिद्वृत्तिसामान्येन । अविद्यमाने सामान्येऽपि अक्षरवर्णसामान्यात् निर्ब्रूयात् । न तु एव न निर्ब्रूयात् । संस्कारमाद्रियेत । विशयवत्यो हि वृत्तयो भवन्ति । यथार्थं विभक्तीः संनमयेत् ।[1]" इति ।

---

१ निरुक्तम् अ. २ । पा. १ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निरुक्तपद्धतिरियं परमरुचिकरा हृदयावर्जका च । निरुक्तकारः निघण्टोः कमपि शब्दं गृहीत्वा तन्निरुक्तिं करोति । निरुक्तिं कृत्वा कोशकारः सम्बन्धितशब्दप्रयोगप्रदर्शनायोदाहरणं ददाति । अत्राप्यसौ प्रकारद्वय-माश्रयते । १ कदाचित्सहसैवोदाहरति २ कदाचिच्चेतिहासकथनपूर्वकमुदा-हरण ददाति । उदाहरणं विनापि क्वचित् - निर्वचन विधायाग्रे गच्छति । उदाहृतायाः ऋचोऽन्वयं विनैव सरलसंस्कृतेऽर्थान् करोति तद्गतशब्दानपि यत्र तत्र निर्वक्ति । हि-तु-नु- शब्दान् पदपूरकान् न निर्वक्ति । यत्र च विवादास्पदविषयाः समायान्ति यथा मन्त्राणां सार्थकता, धातुजसिद्धान्तः, तत्र प्रबलशास्त्रार्थमहारथित्वं व्यञ्जयन् भारतीयदार्शनिकपरम्परां पालयन् पूर्वपक्षोपस्थापनपुरःसरं तस्य प्रबलोक्तिभिः खण्डनं विधाय सिद्धान्तं संस्थापयति । स्वसिद्धान्तं स्थापयन् विभिन्नविचारकाणां मतोपस्थापनामपि कुरुते यथा "दण्डः दहतेः. १ धारयति कर्मणः. "दमनादिति" औपमन्यवः, इत्यादिः ।

३ समानार्थकनानार्थकपद्धतिः-

"एतावन्तः समानकर्माणो धातवः ।" एतावन्ति अस्य सत्वस्य नामधेयानि एतावतामर्थानामिदमभिधानम् । नैघण्टुकमिदं देवतानाम । २ इत्यादिवाक्यैरवगम्यते यत्समानार्थकधातुसंग्रहः, समानार्थकशब्द - संग्रहः, अनेकार्थकशब्दसंग्रहः. देवानां प्रधानगौणनामसंग्रहो निघण्टौ सर्वमपीदं भवति स्म । परन्तु पद्धतिरियममरपूर्वकोशेषु विकासं गता । एनामाधारी कृत्यामरपूर्वकोशेषु समानार्थक - नानार्थकशब्दसङ्कलनं जातम् ।

४ धातुरूपावलिपद्धतिः-

धातुरूपावलिनिर्माणपद्धतिरपि निरुक्तकालादेव प्रचलमाना प्रतीयते परन्तु व्याकरणशास्त्रस्य विकासयुगे तत्रैव धातुरूपाणां सन्निवेशात - इयं पद्धतिर्विशिष्टविकासं नाप । तथापि धातुकोशनिर्माणस्य लोकप्रियतापरिवर्धनाय विद्वद्भिरुत्तरकाले प्रशंसनीयप्रयासाः कृताः । साधारणतोऽस्याः पद्धत्या अनुसारं धातुरूपाणां सङ्कलनमेवात्रेप्सितम् ।

---

१ निरुक्तम् २-२ ।

२ निरुक्तम् १-६ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

५ नामतन्त्राणि:-

अमरपूर्वकोशेषु - उत्पलिन्यादिकोशा: केवलं नाम प्रतिपादका आसन्, यथा—

"प्रहेलिका प्रवल्ही च प्रश्नदूती विपादिका" १ ।

अथवा कात्यायनकोशे वचनं यथा—

'वि नानार्थेऽव सन्देहे हरणं हार उच्यते ।
नाना सन्देह हरणाद्-व्यवहार इति स्मृत: ।।"

अथवा-

जातीलवंग-कक्कोल · पूगानां तु फलानि च ।
नलिका नलदं कुष्ठ हरेणुस्तगरं प्लवम् २ ।।

एभिर्वाक्यै: कोशेषु नामतन्त्रपद्धतिरप्यासीदित्यवगम्यते ।

६ लिङ्गतन्त्राणि:-

इयमपरा लिङ्गप्रतिपादकपद्धतिरपि-अमरपूर्वकोशेषु प्रचलमाना आसीत् । एतच्च रत्नकोशस्यामरदत्तस्य च वाक्यैरप्यवगम्यते, यथा—

"कङ्कती तु प्रसाधनी - इति स्त्री काण्डेऽमरमाला ।" ३
"कङ्कतं तु प्रसाधनम्–इति क्लीव काण्डेऽमरमाला ।

रत्नकोषे च. "गन्धोली वानरी कपी" स्त्रीलिङ्ग काण्डे ।४।

अमरकोशस्य प्रथमकाण्डीय तृतीयश्लोकस्य व्याख्यायां भानुजदीक्षितो ऽप्याह–"त्रिकाण्डोत्पलि·यादीनि नाममात्रप्रतिपादकानि। वररुच्यादिकृतानि तु लिङ्ग-मात्र प्रतिपादकानि ५"

---

१ अमरकोश: पृ. १०६ ।
२ धन्वन्तरिकोश: श्लो. ४४ ।
३ अमरकोश: । पृ. ४१७ ।
४ अमरकोश: । पृ ३२६ ।
५ अमरकोश: पृ. ३ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

७ किरातगोपाधिपतापसव्याधवनेचरमूलाहारपद्धतिः.

एनां प्रणालिमाश्रित्य धन्वन्तरि - निघण्टु–निर्माणं जातम् । तदिदं, "गोपालास्तापसाः ये चान्ये वनचारिणः । मूलाहाराश्च ये तेभ्यो भेषजं व्यक्तिरुच्यते ।" १ अनेन वाक्येन स्पष्टमेव ।

८ लोकप्रसिद्धिः-

धन्वन्तरिकोशनिर्माणेऽथवा तत्रोत्तरकालिककोशसंयोजने पद्धतिरेषा ऽप्यवलम्बिताभूत् । यथा द्रव्यावली निवद्धानां द्रव्याणां नामनिर्णयम् । लोकप्रसिद्धं वक्ष्यामि यथागमपरिश्रुतम्" २ आगमन्तु भारतीयविद्यामूलमेवात्र न संशयः उत्तरकाले लोकप्रसिद्धिरप्यागमानुकूलैवासीदित्यप्यवमगम्यते ऽस्मात् । संस्कृतकोशकारैर्लोकप्रसिद्धिरपि कोशनिर्माणार्थमुपयोजितेति तेषां बुद्धिचमत्कारं स्पष्टयति लोकजीवनेन सह च तादात्म्यमपि वोधयति ।

९ नामलिङ्गानुशासनपद्धतिः-

अमरकोशनिर्माणे नाम-तन्त्र - लिङ्गतन्त्रात्मकोभयविधप्रणाल्योः समावेशेनापरा नूत्नैव नामलिङ्गानुशासननामिका पद्धतिरुदिता लिङ्गज्ञानस्य महतीयं समस्या संस्कृतभाषायाम् । अत एवोत्तरकाले प्रणालिरियं संस्कृतकोशकृत्सु सर्वप्रिया सञ्जाता ।

१० वर्गप्रणालिः-

अमरकोशनिर्मात्रा या वर्गप्रणालिरुद्भाविता साऽप्यपूर्वा । इयं किल व्यावहारिकरूपेणातीव सुगमा परमोपयोगिनी शीघ्रशब्दान्वेषणे चैकैव । नवोद्भाविताऽक्षरवर्णप्रणालिरप्यस्याग्रे ऽकिंचना । नूतनतमा च विभिन्नक्षेत्रशब्दकोशनिर्माणपद्धतिरनयैवाऽनुप्राणिता ।

११ विशेष्यनिघ्नप्रणालिः-

विशेषणै र्निमितशब्दानामेकत्रीकरणं नवीनशब्दनिर्माणम्बाऽस्या पद्धत्या अन्तरर्भावितम् इयमपि - अमरकोशकारेण प्रसूता ।

---

१ धन्वन्तरि कोशः (ह लि.) श्लो. ११ ।

२ ,, ,, ,, श्लो. १४ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२ सङ्कीर्णपद्धतिः

इयमपराऽमरकोशकारोद्भाविता। सङ्कीर्णार्थसङ्कीर्णलिङ्ग-शब्दा अस्या अनुसारं संगृह्यन्ते। सहैव सर्वविधानां समूहनम्।

संस्कृते लिङ्गज्ञानस्य या महती समस्या वर्तते तस्याः समाधानायामरकारो विशिष्टानि सुगमनियमानि विनिर्ममे। यथा —

प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित्।
स्त्रीपुन्नपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित्॥

त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति। १
स्त्रीराद्यैर्यद्विशेष्यं यादृशैः प्रस्तुतं पदैः।
गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदकाः २
प्रकृतिप्रत्ययाद्यर्थैः सङ्कीर्णे लिङ्गमुन्नयेत्। ३

१३ अन्त्याक्षरपद्धतिः

इयमप्यमरेण समुद्घाटिता। अस्या अयमर्थो विद्यते यद्यथा ये शब्दाः ककारेण, खकारेण, गकारेण वान्तं यान्ति तेषामेकत्र संग्रहः क्रमपूर्वकम्। यथा—

'आकाशे त्रिदिवे नाकः लोकस्तु भुवने जने।
पद्ये यशसि च श्लोकः शरे खड्गे च सायकः॥ ४

एवमन्यवर्गेष्वपि इयं पद्धतिरप्यनेककोशकारै रुत्तरकाले ऽनुकृता।

मेदिनिकारेण तु कान्तवर्गाद्दान्तवर्गं यावत्, एकाक्षरात्षडाक्षरपर्यन्तञ्च पद्धतिरेषाऽवलम्बिता। "कैकम्, कद्विकम्, कत्रिकम्, कचतुष्कम्, क पञ्चकम्, क षट्कम्" क्रमोऽयं सर्वत्र कोशेऽस्मिन् वर्तते। अव्ययेष्वप्येष एव क्रमोऽनेनालम्बितः।

यथोदाहरणम्:- सचतुष्कम्-

---

१ अमरकोशः। का. १। व. १। श्लो. ३, ५।
२ अमरकोशः। का. ३। व. ५। श्लो. २।
३ अमरकोशः का. ३। व. २। श्लो. १।
४ अमरकोशः का. ३। व. ३। श्लो. २।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

'अधिवासो निवासे स्यात् संस्कारे धूपनादिभिः ।
अवध्वंसः परित्यागे निन्दनेऽप्यवचूर्णने ।।"

लिङ्गज्ञानायापि महत्वपूर्णनियमनिर्धारणमनेन कृतम् । काव्यचमत्कार-दृष्ट्याः शीघ्रतया शब्दान्वेषणतया चोभयत एवैषा पद्धतिरपि वैज्ञानिका, चमत्कारपूर्णा, आशुसाहाय्यकरी च ।

१४ अव्ययपद्धतिः-

सर्वैरपि संस्कृतस्य प्रख्यातकोशकृद्भिः पद्धतिरियमपि गृहीता । अमर-हेमादिकोशेषु ननु, ईषत्, चिराय, मुहुः" इत्याद्या अव्यया व्याख्याता बभूवुः । मेदिन्यादिषु चाक्षराण्यव्ययरूपेण गृहीतानि । एवं किलात्रेयं पद्धतिरपि द्वैविध्यमावहति यत्र केचित् कोशा अव्ययानामनेकार्थान् बोधयन्ति तत्रैव केचनापरे अकारात् हकारान्तमक्षरवर्णार्थान् प्रत्याययन्ति अनेन ज्ञानेच्छु-कानां-महत्या आवश्यकतायाः पूर्तिर्जायते । अव्ययानामेकाक्षरस्य वार्था-न्वेषणे सत्यामस्यां प्रणाली न कापि कठिनता ।

१५ शभेदपद्धतिः-

देवनागर्यां संस्कृतभाषायां शकारद्वयस्य प्रयोगो भवति बहुवारमत्र लोका भ्राम्यन्ति । तद्भ्रमनिराकरणाय प्रणालिरियं शभेदात्मिका समन्विष्टा कोशकारैः । तत्रोदाह्रियते :-

"शश्वत् शशांक शिशिराण्यपि शूक शिम्बि-
स्तालव्यशद्वययुताः कथिता कियन्तः ।"
"शालो झषे धीवर एव दाशः ।।
अनया पद्धत्याः क्व तालव्यशकारोऽस्ति
क्व च मूर्धन्यस्तदिद शब्दसंग्रहणपूर्वकं शभेदकोशे प्रतिपादितम् ।१

१६ ऊष्मपद्धति :-

अपरैः कोशकारैः ऊष्मविवेककोशनिर्माणेन सैव पद्धतिरनुकृता । यथो-दाहरणानि -

"तालव्याः मूर्धन्याश्चैते शब्दाः
शटी च परिवेषश्च ।"

---

१ शभेदकोशात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विष्वक्सेनो भ्रेषः प्रतिष्कशः कोशविशदौ च ।
सुभटे शूरः सूर्ये च दन्त्यौऽपि ।
गृहमात्रे गणिकायाः सद्मानि वेशो भवेत्तु तालव्यः ।
तालव्यो मूर्धन्यो ऽलंकरणे कथित आचार्यैः ॥ १

१७ द्विरूप पद्धतिः—

संस्कृतभाषायामेवं विधशब्दा अनेके सन्ति येषां किल द्विरूपता तेषां ज्ञानसौकर्याय यद्यपि विभिन्नकोशेषु श्लोकसंग्रहो दृश्यते। परं स विकीर्णः, प्रकीर्णश्च। अतो द्विरूपकोशनिर्माणपूर्वकं नूत्नपद्धतिरियमुदिता जनसौविध्याय संस्कृतकोशकृत्सु। यथा –

"विष्वग् विष्वक् स्मृतौ विज्ञै विषुवं विशुव तथा देवकी दैवकी च।

हालाहलं हालहलं वदन्त्यपि हलाहल । विद्यादगारमागारमापगामपगामपि।

खनिरेव मता खानिः । २

१८ त्रिरूपपद्धतिः-

इयं पद्धति र्हि द्विरूपपद्धति वदेव वर्तते त्रिरूपकोशे समाकृतीनां त्रिसंख्यकशब्दानां स्वल्पभेदवतां सग्रहो वर्तते । अनेनापि संस्कृतशब्दपरिज्ञाने ऽपेक्षितसौविध्यं जायते ।

१९ आद्याक्षरपद्धतिः-

प्रख्यातकोशकारो हेमचन्द्रः पद्धतिमिमामनेकार्थसंग्रहकोशनिर्माणे प्रयुक्तवान् शब्देष्वादौ - अकारादिरन्ते च ककारादिः पूर्वमुद्देश्यवचनमनन्तरं च तदर्थप्रकाशनमिति क्रमः सर्वत्र कोशेऽस्मिन् जागर्ति तद्यथा–

अर्को द्रुभेदे स्फटिके ताम्रे सूर्ये विडौजसि
अक दुःखाद्ययोरङ्को भूषारूपक लक्ष्मसु "
"अणुको निपुणेऽल्पे चाऽशोको कङ्केलि बञ्जुलौ ।
निःशोकपारदौ चाप्यशोका तु कटुरोहिणी ॥
आतङ्को रुजि शकायां सन्तापे मुरजध्वनौ ।
एतत् किलाक्षरविषयेऽयं वर्णविषये क्रमो ऽयम् ॥"

---

१ ऊष्म विवेकात् ।
२ द्विरूपकोषात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यमितोऽपि विलक्षणः कवर्गस्य ककारात् कमिति पर्यन्तं प्रत्येक वर्गान्त-गतद्वादश वर्णानामुपयोगो विहितः यथा –

"को ब्रह्मण्यात्मनि रवौ मयूरेऽग्नौ यमेऽनिले ।
कं शीर्षेऽप्सु सुखे... ... ... ।१

२० देशीपद्धतिः-

अस्या अनुसारं देशीशब्दसङ्कलनपूर्वकं संस्कृतकोशनिर्माणमतीव महत्वं धारयति । उदाहरणं यथा - उटजस्तृणपर्णादिः । २

२१ कथाच्छलपद्धति :

दशमशतकस्य हलायुधः पद्धतिमेनामाश्रित्य कविरहस्यकोशं विनिर्ममे । व्याकरणशास्त्रस्य शुष्कत्वादथ च क्रियाकोशनिर्माणे लोकप्रियतां समुत्पाद-नाय स विलक्षणामेव पद्धतिमिमां कथाच्छलात्मिकामाश्रितवान् । यथाः–

अस्त्यगस्तिमुनिज्योत्स्ना परीते दक्षिणापथे ।
कृष्णराज इति ख्यातो राजा साम्राज्यदीक्षितः ।।
'गोपायति क्षितिमिमां चतुरब्धिसीमाम् ।
पायाज्जुगुप्सित उदारमतिः सदैव ।
वित्तं न गोपयते यस्तु वनीयकेभ्यः ।
धीरो न गुप्यति महत्यपि कार्यजाते ।।
अग्नि पृणाति पृणति द्विजदेवताश्च
पृणाति बान्धवजनानतिथिं पृणोति ।
सुप्रीयते प्रणयिषु प्रयते च भृत्यान्
यं प्रीणयन्ति कविसूक्ति रसायनानि । ३

२२ अक्षरवर्णानुक्रमपद्धति :-

अस्याः पद्धत्या प्रचलनं संस्कृतकोशकारेषु द्वादशतमखीष्टाब्देषु - एव ततोऽपि पूर्वम्वा प्रारब्धम् । तथात्याधुनिककोशेषु वाङ्मयार्णवादयः पद्यात्मकाः संस्कृतशब्दार्थकौस्तुभादयश्च पृथक् पृथक् शब्दसकलनात्मकाः महत्वपूर्णाः सन्ति ।

---

१ अनेकार्थ संग्रहः हेमचन्द्रः सं वाराणसी, १९६९ ।
२ देशीकोशः ।
३ कविरहस्यकोशः श्लो. ६-७ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

२३ चित्रात्मिका पद्धति :-

केषुचित् छात्रीयकोशेषु पद्धतिरियमभ्यवलम्बिता संस्कृतकोशकारैः ।

२४ ऐतिहासिकपद्धति :-

इयं पद्धतिर्वर्षेऽस्मिन् प्रकाशिते ज्ञानकोशेऽवलम्बिता । इयमपि महत्त्वपूर्णा । ऐतिहासिकदृष्टिकोणतश्च शब्दार्थप्रकाशिका ।

२५ द्विभाषाबहुभाषापद्धति:-

पञ्चविंशति सङ्ख्यकाः पद्धतयः संस्कृतभाषायाः कोशवाङ्मयस्य गौरवास्पदस्थानं संसाधयन्त्यः संसारस्य कस्या अपि भाषायास्तुलनायां संस्कृतस्य स्थानमुच्चमेव वर्तते-इति च सप्रमाणमुद्घोषयन्ति ।

अनेन सहैव संस्कृतकोशकाराणां बुद्धिवैभवस्यापि स्पष्टपरिचयोऽनेनावाप्यते । तैः काले २ कीदृशीनां सरणीनामाविष्करणं कृतं कथञ्च तेषां तेषां विचित्रकोशानां रचना कृता ।

एतदतिरिच्यापरोऽप्येकोऽत्यन्तमहत्वपूर्णं विषयोऽत्र समुद्घाटितो भवति । एवं प्रतीयते यदाद्यापद्धतिनाम्ना निघण्टुसंकलनात्मिका या पद्धतिरत्रोपन्यस्ता सा महाभारतयुद्धात् उत्तरकालीना । तदानीं ऋषिपरम्पराया विलोपात् राष्ट्रस्य प्रपतनाच्च वेदानामनेके शब्दा दुरूहतां गताः अत एव ते समुदीयमानविद्वन्मण्डलेन संहृती कृताः । अयं प्रथमः शक्तिशालिराघातो वैदिकसंस्कृतिपरायणेन राष्ट्रेण यथाकथञ्चित्सोढ़ः । निरुक्तपद्धत्याः समीक्षणेन यास्कस्य व्याकरणशास्त्रज्ञत्वं भाषावैज्ञानिकत्व कोशकारत्वञ्च परिचीयते । तत्काले वैयाकरणानां परिपुष्टसमुदाया आसन् । समानार्थकपद्धतिर्नानार्थपद्धतिश्च तथा च धातुकोशपद्धतिश्चैता. सर्वा अपि पद्धतयो यास्ककाल एव समुदिता-आसन् परन्तदानीं सत्सु व्याकरणकेसरिषु धातुकोशानामनावश्यकत्वात् धातुकोशनिर्माणे विशिष्टाभिरुचिर्न जागृता । तस्मिन्नेव काले तत्समीपवर्तिनि वा समये नामकोशेषु नानार्थककोशाः समानार्थककोशाश्च निर्मिता बभूवुः । नामलिङ्गानुशासनकर्तृत्वं पुनरपि भारते भारतीयसंस्कृतिसमभ्युदयं बोधयति ।

बौद्धान्दोलनकाले यद्यपि पुनर्भारतीया वैदिकसंस्कृतिर्द्वितीयाघातेनाक्रान्ता बभूव परं सुरगिरः- जनमानसे ऽधिष्ठानात् शीघ्रमेव बौद्धविद्वांसोऽपि संस्कृतपाण्डित्ये निष्णाता बभूवु । संस्कृतप्रचारप्रसारकर्मणि च ते सहयोगमकार्षुः । अमरसिंहस्तेष्वेवैक आसीत् । बौद्धान्दोलनकाले न केवलं संस्कृतस्य पूर्तये एवापितु युगान्तेष्वपि संस्कृतसंरक्षकोऽभूदयं कोशः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नामलिङ्गानुशासनपद्धतिसमन्वयेनामरसिंहः लिङ्गानुशासनस्य विकटतमसमस्यासमाधाने साफल्यमवाप । आगामिशतकेषु सोऽनेकेषां कोशकृतां मार्गदर्शनमकरोत् । वर्गप्रणालि - विशेष्यनिघ्न - सङ्कीर्णादि - प्रणालिभिरयमुत्तरकालीन - कोशकाराणां तथा पथप्रदर्शनमकार्षीत् येन संस्कृतस्य समृद्धं समुज्ज्वलं, सर्वजनाकर्षिरूपञ्च ववृधे । नवीनशब्दनिर्माणे शैघ्र्येण च नवशब्दान्वेषणे, नूतनशब्दकण्ठस्थीकरणे एताः प्रणाल्योऽतितरां साहाय्यमापादयन्ति ।

जैनान्दोलनावसरे संस्कृतहानये प्रभूतप्रयासाः जाता एषस्तृतीयाक्रमणोऽभूत् भारतीयसंस्कृति-संस्कृतोपरि । तथाप्यत्र संस्कृतस्य सुदृढप्रभावात् हेमचन्द्रसदृशाः जैनाचार्याः संस्कृतकोशवाङ्मये जगति – तथाविधान् कोशान विनिर्मितवन्तो येन न केवलं संस्कृताघातस्य प्रायश्चित्तं जातं परं युगयुगान्तरेष्वपि कोशोऽयं सुरगिरः समेधकः समजनि

भाषायाः प्रचारप्रसारादिकमधिकृत्य काले काले याः याः समस्याः संस्कृतजगति समुत्पन्नास्तासां समाधानाय कोशकारैर्निरन्तरमुपायाः समन्विष्टाः । यदाऽव्ययशब्दानामर्थज्ञानसमस्या समुद्भूतास्तदाऽव्ययकोशपद्धतिस्तां दूरमनयत् । पश्चात् अक्षरवर्णार्थज्ञानकाठिन्ये सति तत्समाधानाय एकाक्षरकोशाः विनिर्मिताः कोशकारैः तालव्यमूर्धन्यशकारज्ञानकाठिन्यमनुभूय विद्वद्भिर्हि शभेदउष्मविवेकादिपद्धति - आविष्करणपूर्वकं तत्समाधानमन्विष्टम्

अन्त्याक्षर - आद्याक्षरपद्धतिजातमपि संस्कृतकोशकाराणां प्रतिभाचमत्कारस्याभूतपूर्वमुदाहरणम् । विश्वस्य काप्यन्या भाषा अनयोः पद्धत्योरनुकरणकर्तुमपि न प्रभवतीत्याश्चर्यकरमेव ।

द्विरूपत्रिरूपपद्धतिद्वयमपि विचित्रम् एकतस्तु काव्यसौष्टवं भाषाचमत्कारश्चात्र समाकर्षति पाठकान् अन्यतश्च शब्दा एते एकत्रैव कोशरूपेणावाप्ता भवन्ति । अतः कवीनां साहित्य - रस - रसिकानाञ्च कृते यथा आद्यन्त्याक्षरपद्धतिद्वयमुपकारकं तताऽप्यधिकमिदं सिद्धमत्र न कोऽपि सन्देहः ।

किरातगोपाधिपपद्धति हि – आयुर्वेदवनस्पतिविज्ञानस्य धन्वन्तरिनिघण्टुः प्रथमकोश इति संसाधयति । अत्र कोशकारस्य परिश्रमः, लोकानां कृते विशुद्धसत्यज्ञानप्रदानस्य कोशकारेच्छा सर्वमिद सवथा प्रशंसापात्रतामेति । अस्या पद्धत्याः समवलम्बनेन शुद्धार्थज्ञाने प्रमादाय स्वल्पमेव स्थानम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इतोऽप्यधिकाश्चर्यकरा प्रणालिस्तु हलायुधस्य कथाच्छल प्रणालिर्वर्तते। सरस सरलकाव्यमयशब्देषु कथा-कथनपूर्वक कोशनिर्माण भाषाप्रसारकर्मणि कियन्मूल्यमादधतीति विद्वांसः स्वयमेव विचारयितुं शक्नुवन्ति। किरातगोपाधिप-प्रणालिस्तु विश्वयुद्धज्वालाज्वलितसमाजे कोशनिर्माणं कथं क्रियेत इत्यपि दर्शयति मार्गमत्र।

म्लेच्छैरधिकृते भारते समारूढायाञ्च पारसीकभाषायां शासनाधिकारे संस्कृतकोशकृद्भिर्देशीकोशाः पारसीकप्रकाशादयश्च विनिर्मिताः।

स्वल्पस्मृतीनामाधुनिकानां वर्तमानशिक्षायां संस्कृतकोशानाञ्च अभावात् अनधीतकोशानां कृतेऽक्षरवर्णप्रणालिरेव वैशिष्ट्येन सहायिका भवतीति विचार्याधुनिककोशेषु पद्धतिरियमेवावलोक्यते।

बालकाः वैदेशिकाः- वा चित्रात्मकप्रणाल्या शीघ्रं शब्दार्थज्ञाने प्रभवन्तीति विचार्य तादृक्कोशनिर्माणमपि क्रियते।

अनुसन्धातृणां लाभाय - ऐतिहासिक संस्कृतकोशोऽपि विनिर्मितः। अत एवैतिहासिक प्रणालिरपि स्वकीय पृथक्वैशिष्ट्यं धारयति।

द्विभाषाबहुभाषापद्धतिश्चान्यमेकं दृढतरप्रहारं सोढ्वा संस्कृतरक्षामकरोत् संस्कृतप्रचारञ्च बहुगुणितमापादयत्। आंग्लैरत्रागत्य सर्वप्रथमं संस्कृतबहिष्काराय भारतस्य जनान्दोलन - समुत्थापनाय चानेकाः कूटनीतयः सञ्चालिताः। संस्कृतविद्वांसः ऐतिहासिकाश्च तत्सर्वं पूर्णतया परिचिन्वन्ति। परिणामस्वरूपं तेऽपि संस्कृताध्ययनञ्चक्रुः। संस्कृताध्ययनेन तथा भाषायाअस्या साहित्येन च ते हठात् प्रभाविताः बभूवुः शनैः २ संस्कृतस्य प्रसारप्रचारकर्मणि राष्ट्रियसहयोगं विना शैथिल्यमागतम् तथापि संस्कृतजर्मनसंस्कृतांग्लकोशाश्च महत्वपूर्णरूपेण प्रकाशिता अभवन्। ये किल भारते संस्कृत-प्रचारनिरोधाय प्रयासान् चक्रुस्तैरेव भारते तु साफल्यमवाप्त पर एभिः द्विभाषिकोशः युवरूपखण्डे संस्कृतस्य प्रचारः प्रभूतमात्रायां कृतः।

स्वातन्त्र्य पश्चात् भारते राजकीयमहत्वं तु हिन्द्या प्रान्तीयभाषाभिश्च प्राप्तम्। तथापि संस्कृतस्य राष्ट्रिय-स्वरूप नाशयितुं सुकरं नास्ति। परिणामतश्च संस्कृतप्रमुखा द्विभाषा त्रिभाषा- चतुर्दशभाषाकोशाश्च निर्मिताः बभूवुः। अनया पद्धत्या संस्कृतं विश्वस्य राष्ट्रे राष्ट्रे भारतस्य च प्रान्ते प्रान्ते स्वीयं महत्वं प्राकाशयत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्थं किलाध्ययनमिदं संस्कृतकोशकाराणां संस्कृतकोशानाञ्च महत्वपूर्ण-भूमिकां स्पष्टयति राष्ट्रनिर्माणे भारतस्य एकरूपतायाः सग्रथने, राष्ट्रस्य भाषिकबौद्धिकसम्पन्नताप्रतिपादने च । इयञ्च संस्कृतकोशवाङ्मयसम्पत्ति-र्भारतं समर्द्धयति, संग्रथ्नाति – एक्यसूत्रे, समन्वयति च तथैव दिव्यया वैदिकसंस्कृत्या सह ।

अत्र शास्त्रकोशग्रन्थकोषादि - प्रणालिप्रकथन नैव कृतं वर्गप्रणा-ल्यन्तर्गतत्वात्तासाम् । आसु संस्कृतकोशनिर्माणस्य विभिन्नपद्धतिसु कतमा श्रेष्ठा श्रेष्ठतमा अथवा कतमा निकृष्टा निकृष्टतमा वेति कथयितुं न पार्यते । यतोहि सर्वा अप्येता समयस्य समाजस्य राष्ट्रस्य च परिवर्तनशीलपरिस्थि-तिषु समुद्गताः सन्ति । अत एवैतास्तस्योद्यानस्य पुष्पाणीव सन्ति यस्मिन् विभिन्नकुसुमानि स्वविकासेन शोभया सुगन्धेन चोद्यानसुषमां परिबर्धयन्ति । यथोद्यानात्समुत्पारितमेकमपि पुष्पं तत्सौन्दर्यं हीनतामापादयति । तथैव कापि पद्धतिरितो निष्कासिता संस्कृतकोशवाङ्मये सुषमां क्षिणोति ।

अद्य संस्कृतकोशवाङ्मयस्य शब्दभाण्डारः समृद्धतमः । एतदन्तर्गताश्च विभिन्नाः पद्धतयोऽपि तथा । ततोऽपि नैयून्यमेकमत्रानुभूयते । अद्यतन जगत् विभिन्नविज्ञानेषु प्रगतिशीलतामावहति । वास्तुविज्ञान, चिकित्सायां शल्ये चापि तादृशा-एव स्थितिः । अतस्ता निखिलामप्याधुनिकीं सम्पत्ति-मात्मसात्कर्तुं संस्कृतकोशकाराणामाह्वानं कुर्वन्ति इदं कार्यं किल बाहुल्येन तु - हिन्दी - प्रान्तीयभाषादिकोशमाध्यमेन जातपूर्वम् । तथापि संस्कृतस्य विशुद्धकोशाभाव एव । अतश्चिन्तनीयोऽयं विषयः ।

संस्कृतकोशकाराणां ध्यानं विश्वस्य तासु भाषासु · यास्विदानीं यावत्संस्कृतकोशाः न सन्ति – संस्कृतकोशनिर्माणाय समाकृष्यते एतन्नयून्यं यस्मिन्नपि दिवसे पूरितं भविष्यति विश्वस्य सकला अपि कोशसम्पत् संस्कृत-कोशवाङ्मयस्य तुलनायां कदाऽप्यागन्तुं न शक्ष्यतीति सुनिश्चितम् ।

इति आचार्यश्रीकेशवशर्मणा निर्मितस्य संस्कृतकोशवाङ्मयस्य विशेषपरिचयाख्ये भागे उपसंहृत्याख्यो नवमः काण्डः ।

(समाप्तश्चायं ग्रन्थः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शास्त्री ओम्प्रकाश 'राही'
— प्राचार्य, एम. ए., एम. फिल.

१. निशायां सूर्य:-

कश्चित् पप्रच्छ निशायां वै, सूर्य: कुत्र गच्छति ?
प्रत्युवाच अन्यस्तम्, आकाशे एव तिष्ठति ।
प्रथमोऽपृच्छत् यद्येवं, तर्हि कथन्न दृश्यते ?
द्वितीय आह निशान्धकारे, स: न द्रष्टुं शक्यते ॥

२. परीक्षाफलम् :-

अध्यापक: पप्रच्छ ब्रूहि छात्र ! मधुरं कटु च किं फलम् ?
हसन्नाह छात्रश्शीघ्रम्, तदस्ति भगवन् परीक्षाफलम् ॥

३. उपाय :-

विवदतोर्मध्ये एक: प्राह — साधारणपुरुष: नास्म्यहम् ।
धनार्जनस्य शतमुपाया:, पुस्तकमेतदहमलिखम् ॥
पप्रच्छान्य: कथं तर्हि, भिक्षा त्वया याच्यते ?
प्रत्युवाच पूर्वस्तम् — एषोऽप्युपाय: विद्यते ॥

४. पूजायै धूपम् :-

अकथयत् सेवकं गृहिणी, पूजायै आनय धूपं त्वम् ।
सेवक आह—मेघाच्छन्ने, आकाशे कुत आनयाम्यहम् ॥

५. हृद्रोगोपचार :-

दूरस्थं निजप्रेमिणं चिकित्सकम् , प्रेमिकाऽलिखदेकं पत्रम् ।
त्वं तु नायासि मित्र ! इतश्च वर्धते हृद्रोग: नित्यम् ॥
पत्रोत्तरे लिखितं कान्ते ! पूर्णं विवरणं प्रेषय शीघ्रम् ।
व्यस्ततयाऽऽगन्तुमसमर्थ:, प्रेषयिष्याम्यौषधं तुभ्यम् ॥

— रा. उ. वि. बोगधार जिला— सिरमौर (हि. प्र.)

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar



ईश्वरान्वेषणम्

सुश्री विमला देवी
शास्त्री, एम. ए. (हि. सं.)
एम. फिल.

★

ईश्वरः आनन्दरूपो मन्यते
न तु दुःखरूपः
अतः स सर्वस्वमस्ति ।
एतत् कथनं कथं सत्यम् ?
पीड़ायां कलहे द्वेषे तस्य वर्णनं न क्रियते,
आनन्दे माधुर्ये सौन्दर्ये एव स वर्ण्यते,
स दुःखरूपो पीड़ारूपश्च,
इत्येतन्न केनापि कथितम् ।
मुनिना तत्त्वान्वेषणे
ललितेष्वेव जनानामनुरागः
ललितस्यैव संग्रहः क्रियते ।
यदि भगवान् सर्वस्वम्
तर्हि कुत्सितस्यापि संग्रहो भवेत्,
यतः तत्रापि भगवतः स्थितिः,
किन्तु कुत्सितस्य संग्रहो न क्रियते ।
यदि भगवान् सर्वस्वम्,
तर्हि एष भेदो न शक्यते,
अतः मे संशीतिरस्मिन् कथम्,
'सर्वं खल्विदं ब्रह्म ।'

★

— संस्कृत अध्यापिका
केन्द्रीय विद्यालय—२
डी. सी डब्ल्यू पटियाला - (पंजाब)

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्वितीयः आत्मबलिकृत् गुरुतेगबहादुरः

डा० सुरेन्द्र अज्ञात

गुरुतेगबहादुरः सिक्खानां नवमो गुरुरिति प्रसिद्धः। स इन्दु-नेत्ररसेन्दुमिते (१६२१) ख्रिष्टाब्दे एप्रिलमासस्य प्रतिपदायां गुरु-हरगोविन्दस्य पंचमपुत्रत्वेन जनिं लेभे। गच्छता कालेन स वेद-रस-रसेन्दु-मिते (१६६४) ख्रिष्टाब्दे गुरु पदवीं प्राप ! सर्वमायुस्तेनेश्वरनाम-स्मरण एव व्यतीतम्।

तदात्वे भारते सर्वत्र औरंगजेबस्य शासनमासीत्। स हिन्दु-धर्मस्यानुयायिन इसलाममते दीक्षिता भवेयुरित्यनेकविधान् धर्मपीड-कानुपायान् चकारेति शृणुमः। तस्य धर्मान्धस्य क्रूरतापीडिताः पंच शतानि ब्राह्मणाः काश्मीरेभ्य आगत्य आनन्दपुरे (पंजावस्थिते) गुरुतेग-बहादुरस्य समक्षं स्वीयं दुःख वर्णयामासुः। तेषां व्यथाकथां निशम्य स कञ्चित् कालं विचारयांचकार। क्षणमूर्ध्वमुवाच– कस्यापि महाजनस्य बलिर्देयः स्यात्।

एतन्निशम्य तस्य नववर्षः पुत्र उवाच-भवन्तं विना कोऽस्त्यन्यो महाजन इति ? तच्छ्रुत्वा गुरुतेगबहादुरो मनसि परमं प्रसन्नो बभूव। तेन ब्राह्मणानां तिलक-यज्ञोपवीतादिरक्षणार्थं स्वीयः निर्णय उद्घो-षितः। तेन ते ब्राह्मणा भणिताः— भवद्भिरवरंगजेब एवं वाच्यो यथा गुरुतेगबहादुरोऽस्माकं नेता। यदि स इसलाममतं गृह्णाति वयमपि ग्रहीष्यामः। तेन स एव भवता इसलाम - ग्रहणाय प्रेरणीय इति।

एवमुक्तेनावरंगजेबेनाहूतो गुरुः स्वीयैरन्तरंगैरनुचरैः दीवानमति-दासभाईदयाला –भाईसतीदास – भाईगुरदित्ताऽऽदिभिस्सह दिल्लीं प्रति जगाम तत्र सम्राडनेकविधानि प्रलोभनानि-ददौ गुरवे, उवाच च-इसलाममतं स्वीकरोतु भवानिति। परं यदा गुरुर्न स्वीचकार किमपि तदावरंगजेबः कथयांचकार–इतस्त्रिषु दिवसेषु भवता इसलाममतं स्वी-कार्यमन्यथा सानुचरो मृत्योर्वशं गमिष्यतीति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदापि गुरुनं स्वीयं निर्णयं परिववृते । तेनावरंगजेबेनादिष्टं-इमं बन्दिनं कुरुत स निगृहीतो बभूव । अवरंगजेबस्यादेशेन तस्यानुरा नकैकशस्तस्य समक्षं निर्घृणं घातितः— दीवानमतिदासः क्रकचेन विदीर्णः भाईदयाला च क्वथति तैले क्षिप्तः, भाई सतीदासश्चाग्नाः कृत्तः । यदाऽनेनापि न विचलितो बभूव गुरुतेगबहादुरस्तदा सर्वजनसमक्षं दिल्ल्याश्चान्दनीचौकस्थले तस्य शिरश्चिच्छेद स जाल्मः । एवं गुरुतेगबहादुरो हिन्दुधर्मस्य रक्षार्थं स्वीयान् प्राणान् ददौ ।

सिक्खमते तिलक–यज्ञोपवीतादिनां न किमपि महत्वम् । सिक्खा न तद् धारयन्ति । न तेषां गुरुभिर्धारितानि । तथापि गुरुतेगबहादुरस्तत्सर्वस्य रक्षार्थं प्राणान् जहौ । जगति स्वधर्मरक्षार्थं त्यक्तजीविता जना बाहुल्येन प्राप्यन्ते, परं परधर्मरक्षार्थं न केनापि जीवितं त्यक्तमृते गुरुतेगबहादुरात् । तेन तस्यात्मबलिदानमद्वितीयम् । तेनैव स "हिन्द दी चादर" (भारतस्य रक्षकः) इत्युच्यते । तस्य बलिदानं धर्मनिरपेक्षतायाः जनतन्त्रस्य च सत्यमुदाहरणम् । तस्मै नमस्तेगबहादुराय । इति ।

पाठकाः प्रार्थ्यन्ते

मान्याः !

प्रवर्तमानवर्षस्यापि अर्धभागो व्यतीतः । पत्रप्रेषणेनापि वार्षिकशुल्कप्रेषणार्थं प्रार्थना कृता किन्तु स्वल्पैरेव महानुभावैः शुल्कप्रेषण कृतम् । अतः सविनयं प्रार्थ्यते यत् शीघ्रमेव शुल्कप्रेषणेन सहावता क्रियताम् ।

——सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्यं परं धीमहि

ईश्वरसिद्धिः

प्रा. रामानन्द शर्मा
दर्शनाचार्य एम. ए., ज्यो तिलम्,

★

सर्वं हि कार्यंजातं लोके कर्तृजन्यं दृश्यते, यथा घटादिः। कार्यं च पृथिव्यादिकमपि कर्तृजन्यमेव, यश्चेदं सर्वं महाशक्तिर्जनयति स एवायमीश्वरः।

कुसुमांजलिकार आचार्य उदयनः स्वग्रन्थेऽधोलिखिता अष्टौ युक्तीराश्रित्येश्वर सिद्धिं व्यधात्।

(१) पृथिवीपर्वतादिकं सकर्तृकं कार्यत्वात्। न चास्मदादिस्तस्य कर्ता, यतो हि कर्ता कार्योपादानकारणस्यापरोक्षज्ञानयुक्तो भवति। सांसारिकाणां पदार्थानामुपादानकारणस्य नास्मदादिनां ज्ञानं सम्भवति। अतः सांसारिकजनविलक्षस्य तादृशज्ञानवत् ईश्वरस्य सिद्धिर्निर्बाधा।

(२) द्रव्योत्पत्तिः परमाणूनां परस्परसंयोगेनैव द्व्यणुकत्र्यणुकोत्पत्तिक्रमेण संभवति. किन्तु तत्संयोगश्च परमाणूनामचेतनत्वादप्रवृत्तिमत्तया कथं संभविष्यति, अतस्तेषु प्रवृत्तिप्रयोजकस्य कस्यचिच्चेतनाधिष्ठानस्यापेक्षा सुतरामावश्यकी। स चाधिष्ठाता चेतनः परमेश्वर एव सम्भवति, यतो हि प्रलयकालानन्तरं सृष्टिकाले सांसारिकस्यास्मद्विधस्य जनस्य कस्यचिदप्यभावः।

यदिचेतनवन्तमधिष्ठातारं विना निश्चेतनानां कार्ये क्वचिदपि प्रवृत्तिनिवृत्ती स्वीक्रियेते, तदा कार्यक्रियायाः अविरतिप्रसंगात्। यथा हि यदि निश्चेतनानां स्वरसतः प्रवृत्तिः स्वीक्रियेत, तदा निरभिप्रायस्यापारवत्त्वात्सदा कार्ये प्रवृत्तिः प्रसज्येत, नहि अकस्मात्प्रवृत्तिनाशस्य युक्तत्वात्, एवं च कार्यस्याविरतिरपि दृश्येत। यद्योदासीन्यं तर्हि क्वचिदपि प्रवृत्तिर्न स्यात्। अधिष्ठायकस्य कस्यचित्प्रयत्नबलः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ईश्वरस्य सत्त्वे तु कदाचित्प्रवृत्तिः, कदाचिच्च निवृत्तिरित्यौचित्यं सिद्ध्यति ।

(३) क्षित्यादिब्रह्माण्डपर्यन्तं साक्षात्परम्परया वा केनापि पतनप्रतिबन्धकप्रयत्नवता पुरुषेण भाव्यम्, यतो हि गुरुत्वस्य सद्भावेऽपि धृतिमत्त्वं स्पष्टमेव परिदृश्यते लोकेऽपि अचेतनपदार्थानां काष्ठादीनां धारणं नभसि पक्षिणा कृतं दृश्यते, तथैव समस्तजगद्धारक ईश्वर एव ।

(४) घटनिर्माणकला कुम्भकारः स्वतन्त्रतया परपुरुषनिर्देशाद्वे विज्ञाय तत्र प्रवर्तते व्यवहारत्वादाधुनिकव्यवहारवत् । यथा पिता निजसुतस्य देवदत्तसंज्ञां करोति, तत्संज्ञयैव परिवारे समाजे वा ख्यातिः संजायते । एकोऽध्यापकश्छात्राय यज्ज्ञानं प्रददाति । एवं ज्ञानपरम्परा प्रचलिता दृश्यते । प्रलये एषां व्यवहाराणां लोपे, पुनः सर्गे केनापि व्यवहारप्रवर्तकेन भाव्यम् । स च ईश्वर एव यतो व्यवहाराणामाद्यापदेष्टृरूपेण परमेश्वरस्य सिद्धिर्भवति । उक्तं च–

सर्गादौ व्यवहारश्च प्रसामान्योपदेशवा ।
नियतत्वाद् प्रबुद्धानां कुमारव्यवहारवत् । १

(५) वेदज्ञानस्य प्रामाण्यसिद्धये परमेश्वरोऽपेक्षितः । नैयायिकानां मते वेदस्य पौरुषेयत्वं स्वीक्रियतेऽतो वेदज्ञानस्य प्रामाण्यं तदुपदेष्टुः प्रामाण्यमाश्रितम् । स चोपदेष्टा जगन्निर्माता परमेश्वर एव ।

(६) श्रुतिवाक्येभ्यश्चेश्वरः सिद्ध्यति । वेदाः सर्वज्ञप्रणीताः वेदत्वात्, यो न सर्वज्ञप्रणीतः स न वेदः, यथा व्यवहारार्थमुक्तानि लौकिकजनवाक्यानि (वेदत्वं चात्रानुपलभ्यमानमूलान्तरत्वे सति महाजनपरिगृहीतत्वम्) इत्यनुमानेन परमेश्वरास्तित्वं साधितं भवति ।

उक्तं च वाचस्पतिमिश्रेण तात्पर्यटीकायाम्–''तस्माद्यो वर्णाश्रमाचारव्यवस्थापक आगमो महाजनपरिगृहीतः स तत्प्रणीत आप्तोक्तत्वात् । प्रमाणं मन्त्रायुर्वेदवाक्यवदिति संप्रधार्यते । तत्परिशेष्यद्विदा एव सकललोकयात्रामुद्वहन्तो हिताहितप्राप्त – परिहारोपायानुपदिशन्त ईश्वरप्रणीता इत्यवगच्छामः ।''

तथा हि सर्गादौ सर्गादिव्यवहारसमर्थानयोनिजान्पुरुषान्मनसैव सृष्ट्वा भोग्यभोगसाधनभोगस्थानादिप्रविभागोपेतं भूतभौतिकप्रपंच समुत्पाद्य तेषु तेष्वर्थविशेषेषु 'अस्य पदस्यायमर्थः' इति संकेतेन सह

---

१ शान्तिरक्षितकृत तत्त्वसंग्रह, का० ५ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदानामुपदेष्टा, स एव परमकारुणिकः सर्वशक्तिसमन्वितः। सर्वज्ञो जगत्स्रष्टा परमेश्वरएव।

(७) यथा रघुवंशादिकृतीनां रचितृरूपेण कालिदासादीनां स्मृतिर्भवति. तथैव सृष्टयादौ वेदानां स्मारयितुरीश्वरस्यानुमितिः। कस्यचित्कर्तुरभावे वेदस्यापौरुषेयत्वं मन्वानानां मीमांसकानां मतं निराकुर्वता जयन्तभट्टेनोक्तम् 'मीमांसका यशः पिबन्तु, पयो वा पिबन्तु, बुद्धिजाड्यापनयनाय ब्राह्मीघृतं वा पिबन्तु। वेदस्तु पुरुषप्रणीत एव, नात्र भ्रान्तिः १ वाचस्पतिमिश्रेण च तात्पर्यटीकायामुक्तं—'महाप्रलयेऽपीश्वरेण वेदान् प्रणीय सृष्टयादौ तत्सम्बन्धः प्रवर्त्यत एव।

(८) प्रलयानन्तरं सृष्ट्यादौ द्वयणुकपरिमाणनिर्माणार्थं परमाणुगतद्वित्वः संख्यया कारकस्यापेक्षाबुद्धेः श्रुतया परमेश्वरस्य सिद्धिर्भवति।२

ईश्वरस्वरूपम्

ईश्वरः सृष्टिकर्ता। किन्तु न स जगत उपादानकारणम्, अपितु निमित्तकारणमेव। निमित्तकारणत्वमपि तस्य कर्मसापेक्षमेव। अतएव न्यायसूत्रकारेण 'ईश्वरः कारणम्, पुरुषकर्माफल्यदर्शनात्' ३ इति सूत्रेण पूर्वपक्षभूत वेदान्त्यभिमतोपादानकारणत्वं पूर्वपक्षतयोद्भाव्य तत्र 'न पुरुषकर्माभावे फलनिष्पत्तेः' ४ इति सूत्रेण पूर्वपक्षभूतवेदान्त्यभिमतोपादानकारणत्वानपेक्षनिमित्तकारणत्वनिरासः कृतः, तत्परं च 'तत्कारितत्वादहेतुः इति सूत्रेणेश्वरस्य निमितकारणत्वसिद्धान्तोपन्यासः कृतः- इति वाचस्पतिमिश्राणां न्यायवार्तिकतात्पर्यटीकाकाराणां मतम्। ५

धर्मज्ञानसमाधिसम्पदा च विशिष्टमात्मान्तरमीश्वरः। तस्य च धर्मसमाधिफलमणिमाद्यष्टविधमैश्वर्यम्, धर्मश्चास्य संकल्पानुविधायी।

---

१ न्यायमंजरि आह्निका-४ (उद्धृत-बोधिचर्यावतार, भूमिका पृ. ८)

२ कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः
वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्ययः॥
(न्याय कु पंचमस्तबक १)

३ न्या.य सू० ४-१-१९

४ न्यायसू० ४-१-२०

५ न्यायसू० ४-१-२१

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स चेश्वरः प्रत्यात्मवृत्तीन्धर्माधर्मसंचान्पृथिव्यादीनि च भूतानि भूतानि प्रवर्तयति। एवं च स्वकृताभ्यागमस्य लोपेन निर्माणप्राकाम्य-मीश्वरस्य स्वकृतकर्मफलं भवतीति।

आप्तकल्पश्चायम्। यथा पिताऽपत्यानाम्, तथा पितृभूत ईश्वरो भूतनाम्। न चात्मकल्पादन्य कल्प सम्भवति न तावदस्य बुद्धि विना कश्चिद्धर्मो लिंगभूतः शक्य उत्पादयितुम्। आगमाच्च द्रष्टा, बोद्धा, सर्वज्ञाता ईश्वर इति सिध्यति। बुद्ध्यादिभिश्चात्मलिंगैनिरूपाख्यमी-श्वर प्रत्यक्षानुमानागमविषयातीतं कः शक्त उपपादयितुम्।१

अयमेव सर्गादौ शक्तिग्रहकारकः। यथा मायावी सूत्रसंचाराधिष्ठितं दारुपुत्रकं कृत्वा दारुपुत्रक ! घटमानय' इत्यादिशब्दैर्नियोज्य पटानयन सम्पादय बालकस्य व्युत्पत्तौ प्रयोजकस्तथेश्वरोऽपि प्रयोज्यप्रयोजक-भावापन्नं शरीरद्वयं परिगृह्य व्यवहारं कृत्वा तदानींतनानां शक्तिं ग्राहयति एवं घटादिसम्प्रदायमपि स्वयं कृत्वा शिक्षयति तदिदमुक्तं 'मायावत् समयादयः २ इति।

ईश्वरः सर्वज्ञः। नित्यज्ञानरूपप्रमा समवायसम्बन्धेनेश्वरे वरीवर्ति, अतः स प्रमाता' कथ्यते।३

अदृष्ट-माया - अविद्या - प्रकृति - इत्येतैर्नामभिरभिधीयमानया युक्तो रागादिरहितोऽविद्यादिदोषैरस्पृष्टश्च स ईश्वरः ४ एवं देवाना-मधिदेवः ५ शिव एव परमपूज्यः।६

---

१ वात्स्यायन भाष्य, न्यायसू ४-१ २६

२ न्याय कु. द्वितीयस्तवक।१

३ न्याय कु. चतुर्थस्तवक ५

४ न्याय कु. ६-२०

५ न्याय कु. ३-२३

६ न्याय कु. ४ ६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिवङ्गतः पण्डितवर्यः श्री रघुनाथशर्मा

डा० रूपनारायण पाण्डेयः

वर्तमानकाले संस्कृत क्षेत्रे व्याकरणे साहित्ये वेदान्तादिषु च दर्शनेषु येषां विदुषां प्रभुत्वमासीत् विद्यते वा, तेष्वग्रणीः गुरूणां गुरूः पण्डितवर्यः श्री रघुनाथशर्ममहाभागः साम्प्रतमस्माक मध्ये-भौतिकशरीरेण न विद्यते । महनीयकीर्तेः सारस्वतवैभवविलसितस्य परमपूतचरितस्य तस्यैव च कश्चित् परिचयोऽत्र प्रस्तूयते श्रद्धाप्रसून रूपेण सप्रश्रयम् ।

विक्रमीये १९५६ तमे संवत्सरेऽषाढ़े मासे कृष्णे पक्षे एकादश्यां तदुपरि द्वादश्यां तिथौ कृत्तिकानक्षत्रे वृषराशिगते चन्द्रे मिथुनलग्ने भारतवर्षे उत्तरप्रदेशे बलियाजनपदे छाताग्रामे स्वजन्मनाऽलङ्कृतवान् निखिलवसुधाम् । तस्य जनकः पण्डितवर्यः काशीनाथशर्ममहोदयो महान् विद्वान् आसीत् । तस्मादेवानेन कुशाग्रमतिना बालेन गृहे शास्त्राणि विविधानि पठितानि । १९२५ तमे खिष्टाब्देऽनेन व्याकरणाचार्यः इति परीक्षा समुत्तीर्णा । भूतभावनस्य भगवतः शङ्करस्य नगर्यां वाराणस्याम् अनेन नवोदितेन विदुषा नवनवान्मेषशालिन्या प्रतिभया विभिन्नेषु संस्कृतमहाविद्यालयेषु व्याकरणम् अध्यापितम् वेदान्तश्च १९३० तः १९४ तम खिष्टाब्द यावत् १९४० तः १९५८ तम यावद् राजकीयसंस्कृतमहाविद्यालये, अध्यापनं कृतम् सम्पूर्णानन्द संस्कृतविश्वविद्यालये १९६५ तमं खिष्टाब्द यावत् साभिमानं वेदान्तविभागाध्यक्षपदस्य प्रतिष्ठा संवर्धिता ।

१९६४ तमे वर्षेऽयं कालिदासपुरस्कारेण उत्तरप्रदेशसर्वकारेण सभाजितः १९७१-७२ तमयोः वत्सरयोः उत्तरप्रदेशशासनमिम संस्कृतसेवायाः विशिष्टपुरस्कारेण पुरस्कृतवत् । १९७७ तमेऽब्देऽयं सपूर्णानन्दः संस्कृतविश्वविद्यालयस्य सर्वोच्चमानदेन 'डि॰लिट्' इति उपाधिना विभूषितः । १९८१ तमे वर्षे षड्विंशे दिनाङ्के अक्टूबरमासे वाराणस्यां सम्पन्ने पञ्चमविश्वसंस्कृतसम्मेलने पण्डितप्रवरोऽयं काशीहिन्दूविश्वविद्यालयस्य डि॰ लिट्' इत्युपाधिना समभ्यर्चित । १९८१ तमे वर्षे एव स्वाधीनतादिवसेऽयं महामहिमराष्ट्रप तमहाभागेन मम्मानप्रमाणपत्रप्राप्त्यर्थम् उद्घोषितः । सम्मानपत्रेऽस्मिन् पञ्चसहस्रं रूप्यकाणि प्रतिवत्सरमाजीवन प्रदीयते । पत्रमिदं १९८२ तमे वर्षेऽधिगतम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

काशीस्थाखिलभारतीयपण्डितपरिषदपि विद्वद्वरम् इमं महामहोपाध्याय:' इति सर्वोत्कृष्टेनोपाधिनालञ्चकार । उत्तर प्रदेशसर्वकारोऽपीमं लक्षरूप्यकात्मकेन द्वितीयेन विश्वभारती पुरस्कारेण सम्मानितवान् । भारतसर्वकारेणापि अयं 'पद्मश्री:' इत्यलङ्कारेणालङ्कृत: अत्र भवता सुरभारतीसपर्यायाम् अनेकानि ग्रन्थरत्नानि प्रस्तुतानि तेषु कानिचनात्रोल्लिख्यन्ते –

१ वाक्यपदीयस्याम्बाकर्त्री टीका पञ्चखण्डेषु
सम्पूर्णानन्दसंस्कृत विश्वविद्यालयत:

२ चित्रनिवन्धावलि: ।

३ श्रीरामस्तव: ।   ४ वायुस्तव:

५ श्रीकृष्णस्तव: ६ स्तोत्रवल्लरी

सम्पूर्णानन्दविश्वविद्यालस्य शोधपत्रिकायां सारस्वती सुषमायाम्' अन्यत्रचापि श्रद्धेयगुरुचरणानाम् अनेक शोधलेखा: प्राकाश्यं नीता विलसन्ति ।

भारतीयसंस्कृति संरक्षणतत्परस्य सर्वतन्त्रस्वतन्त्रस्य पण्डितवर्य श्री रघुनाथशर्मणो जीवितं सर्वथा शुद्धं भारतीयमहर्षिपरम्परानुकूलम अभूत् । प्रतिदिवस यथाकालं भ्रमणं लेखनं स्वाध्यायोऽध्यापन निर्देशनं च शोधछात्राणां तस्य जीवितं नित्यकर्मसु तिष्ठन्तिस्मविदेशोद्भूता विद्वांसोऽपि तस्य प्रसादाधिगतये स्वशङ्कानिवारणायचास्य सामीप्यं वाञ्छन्तिस्म ।

अस्य सारल्यं सर्वथा प्रशंसनीयमभूत् । अपरिचित यापि मम मन्दमतेरनेकानां शङ्कानां परिहरणमत्र भवता सस्नेहं प्रमाणपुरस्सरं बहुधा कृतम् अद्य तं विनाहमात्मानं शून्यमिवानुभवामि । सारस्वत क्षेत्रे अस्य महापुरुषस्य स्थानस्य सम्पूर्ति: न चिरं न स्याद् इत्यह मन्ये । यश शरीरेण विराजमानस्य अस्य चरणाम्बुजयो: इमानि शब्दपुष्पाणि समर्प्याहं तस्य सुपुत्रस्य श्री मुक्तिनाथपाण्डेयस्याभारं शिरसात्रहामि यस्य कृपापत्र प्रसादाद् अयं लघुलेख: सम्पन्नतां गत: ।

वस्तुत: संस्कृतभाषाया, तस्या: ग्रन्थारत्नानां च संरक्षणं सवधनं चवास्यं पण्डितप्रवरस्य वास्तविकं सम्मानोऽस्ति । जयतु संस्कृतम्, संस्कृतिश्च ।

— ६-८ रामनगर, वाराणसी (उ प्र.) २२१००८
संस्कृत प्रवक्ता, रा. इ. का.

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भावात्मिका–भारती

रचयिता:- डा० सत्यदेव निगमालंकार:
एम. ए., पी. एच. डी.,

★

१. सहस्राक्षं शक्रं परमसुखदं दिव्यमनघं,
स्मरामस्त्वां नित्यं ग्रथितरसभावैः खलु वयम् ।
प्रभो ! त्वं नः दुःखं हरसि जगति त्वंहि वरदः
धनधान्यं राज्यं बलमपि च दत्से ननु सुखम् ।

२. निहन्ता दुष्टानां रिपुपरिभवानाञ्च जनिता,
सुमित्रं सर्वेषाञ्च सकलधनानां वितरक ।
अधिष्ठाता, ज्ञाता सकलजनधाता त्वमसि भो,
अहो ! किं किं नासि त्वमिह कुरु शम्भो ! मम शिवम् ।

३. हिरण्येनाजेनाननमपिहितं यस्य भुवने,
स एवास्मिन् लोके प्रसरति च खे खेलयति च ।
स पूर्णेश ब्रह्मा प्रथयति दिनं रात्रिमखिलां,
वयन्तं शं विद्मः कथमपि च शक्त्या सुसमये ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

४. हरिस्त्वं मित्रं वा वरुण इति दिव्यश्च पुरुषः,
सुपर्णोऽग्निश्च त्वं यम इति गरुत्मानथ मरुत् ।
न जाने लोकेऽस्मिन्निह सुललितैः शंकरपदैः,
वदन्त्येते विप्राः प्रतिपदमहो ! किञ्च बहुना ॥

५. समेषामाधारस्त्वमिह भुवनेशस्स्वयशसा,
त्वदायत्तं सर्वं यदपि भगवन् ! दृश्यत इदम् ।
अहो ! नस्त्वं राजा तव वशगतं विश्वमखिलं,
भविष्यत् भूतं यत्तदपि च तवाधीनमधुना ॥

६. विराट् तस्मादीशाद् सकलबलदातुः समभव—
दिदं सर्वं विश्वं यदपि भुवने दृश्यत इह
सदा यस्सर्वस्मात् पृथगिह सुवामञ्च कृतवान्,
धरां यो निर्माय प्रथयति च तां धारयति च ॥

७. हिमांशुर्लोकेऽस्मिन् विरलमनसश्च प्रकटितः,
रविश्चक्षोर्जातः प्रथयति करैर्यस्त्रिभुवनम्
प्रभोः श्रोत्राद् प्राणः पवनमथ तस्मात् समभवत्,
मुखादग्निर्जातः प्रवरपुरुषात् विश्वजनकात् ॥

८. बुधाः यं पूर्णेशं परमपुरुषं दिव्यमनघं,
निरीहं यज्ञार्हं सकलसुखकारं भवहरम्
सदा यं विद्वांसः हृदि च ऋषयः ज्ञानिन इह
स्वचित्ते ध्यायन्तः तमिह च यजन्ति प्रतिदिनम् ॥

९. अहो ! नस्सूर्योऽयं निखिलविदुषां मित्रमिति यः,
सुचित्रं च क्षुर्वा सकलजगतः प्राण इति च ।
समेषामात्मायं गगनमथ भूमिञ्चनुगत,
स पूज्यः बन्द्यश्च प्रणब इति नाम्ना प्रथितवान् ।

१०. सदाधारः प्राणप्रिय इति च भूर्नाम विहितः,
भुवस्त्वात् जीवानां बिविधविपदां हारक ज्ञात ।
सुखं दत्ते भर्गः परमवरणीयः प्रतिदिनं,
सुमेधाया दाता न इह धिषणां देहि भगवन् ॥

११. यतस्त्वं ख्याताऽसि क्षितिरिव गृहाण क्षितिमिमां
धरेव त्वं विश्वं वहसि, बहुगोत्रामपि सदा
जहि त्वं मानन्तामदितिरिति लोके खलु भव
महाराज्ञः भार्ये ! जगति भव भूमेः गुण-समा ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१२. द्युलोकं भूलोकं विरचितपदं यश्च धृतवान्,
गृहीत्वा खद्योतं जगति किरणैर्यः प्रथितवान् ।
इदं विश्वं सर्वं निखिलमपि सोमं हि विधिना
स इन्द्रस्सुत्रामा यमयति न किं किं प्रभुवरः ॥

१३ अहो ! कश्चिद् पश्यन्न च सुवचनं पश्यति पठन्,
श्रुतिं कश्चित् शृण्वन् कथमपि शृणोतीति न पुनः ।
यथा देवं जाया वरयति समालंकृतवतिः
तथा विद्या त्वस्मै प्रकटयति सर्वं यदखिलम् ।

१४. विनाशं यो नाप्तः परमपुरुषः यश्च भगवान्
यथा व्योम व्याप्तं तदिव रममाणस्त्रिभुवने ।
समे देवाः वेदाः ननु सकल लोका सुपुरुषाः,
स्थिताः तस्मिन् वेदाम तमिह च नृचाभिः प्रतिफलम् ।

— प्रवक्ता संस्कृत-विभाग गुरुकुल कांगड़ी
विश्व विद्यालय हरिद्वार

फार्म ४

१.	प्रकाशन स्थान	—	भारती विहार मशोबरा
२.	प्रकाशन अवधि	—	मासिक
३.	मुद्रक का नाम	...	केशव शर्मा
	(क्या भारत का नागरिक है ?)	—	भारतीय
	(यदि विदेशी है तो मूल देश)	...	पूर्ववत
४.	प्रकाशक का नाम	—	केशव शर्मा
	(क्या भारत का नागरिक है ?)	—	भारतीय
	पता ...	...	पूर्ववत्
५.	सम्पादक का नाम	...	केशव शर्मा
	(क्या भारत का नागरिक है ?)	...	भारतीय
	(यदि विदेशी है तो मूल देश)	—	भारतीय
	पता —	...	पूर्ववत्
६.	उन व्यक्तियों के नाम व पते जो समाचार--पत्र के स्वामी हों तथा जो समस्त पूंजी के एक प्रतिशत से अधिक के सांझेदार या हिस्सेदार हों	...	आचार्य रत्नकुमारी शर्मा केशव शर्मा

मैं, केशव शर्मा एतद् द्वारा घोषित करता हूं कि मेरी अधिकतम जानकारी एवं विश्वास के अनुसार ऊपर दिए गए विवरण सही है।

प्रकाशक के हस्ताक्षर
केशव शर्मा

दिनांक १५-३-९०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एका पौराणिकी लघ्वी कथा—

महत्वपूर्ण-समयः कार्यं व्यक्तिश्च

अनुवादकः– डा. ओम् प्रकाश शर्मा "सुबन्धुः"

★

कस्यचित् नृपस्य मनसि त्रयः प्रश्नाः समुदिताः। तत्र प्रथम आसीद् यन्महत्त्वपूर्ण-समयः कः? द्वितीयो महत्त्वपूर्णं कार्यं किम्? तृतीयश्च महत्त्वपूर्णा व्यक्तिश्च का? नृपः उपर्युक्त–प्रश्नान् मन्त्रिणो राज्यसभाया विदुषां सकाशाद् अपृच्छत् परं स सन्तोषं न प्राप्तवान्। अन्ते स नगरस्य बहिर्वने एकस्मिन् कुटीरे स्थितस्य साधोः समीपे आगच्छत्। साधुः तस्मिन् समये आरवाणं गृहीत्वा राजिकानां मृत्तिकाम् उत्खनति स्म। नृपः साधुं प्रणम्य स्वप्रश्नान् तस्मै निवेदितवान् परं साधुः मौनमेव आकलितवान्, निजकर्मणि च संलग्नः स्थितः। नृपः चिन्तितवान् यत् साधुः वृद्धः, सम्प्रति श्रमकारणात् श्रान्तः, यदा स्वस्थो भविष्यति, नूनं मम प्रश्नानाम् उत्तरं प्रदास्यति। इत्थं विचिन्त्य स साधोः हस्ताभ्याम् आरवाणं गृहीतवान् स्वयं च राजिकानां परिशोधने लग्नः यदा साधुः आरवाणं नृपाय दत्त्वा पृथक् स्थानेऽतिष्ठत्, तदा पुनः नृपः स्वप्रश्नान् अपृच्छत्, परं तस्मिन्नेव काले साधोः दृष्टिः दूराद् धावन्तं जनं प्रति गता। साधुः अवदत्– भो राजन्! पश्य, कोऽपि जनो धावन् इत एव आगच्छति। पूर्वं द्रष्टव्यम्, किमिच्छति एष जनः? यदा स समीपे प्राप्तः, तदा स भीत इव आसीत्। तस्य शरीरे शस्त्राणाम् आघाता आसन्, येभ्यो रक्तं निस्सरति स्म! तयोः समीपम् आगत्य स पतितो मूर्च्छितश्च जातः। साधुना नृपेण च स झटिति सेवितः नृपः स्व उष्णीषं चीरयित्वा तस्य व्रणान् जलेन प्रोञ्छितवान्। साधुना वन्यामिरौषधिभिः उपचारमकरोत् व्रणेषु पट्टिकाश्च अबध्नात्। किञ्चित् कालानन्तरं तस्य मूर्च्छाभंगो जातः। नृपं स्व—सेवायां निरतं दृष्ट्वा स नृपस्य चरणयोरपतत्, रुदन् च अब्रवीत्– हे नृप! मम अपराधं क्षम्यताम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नृप आश्चर्यचकितो भूत्वा अकथयत् भो भ्रात ! अहं न त्वाम् अभिजानामि । तदा स जनोऽवदत् – सत्यमुच्यते भवता, किन्तु एकस्मिन् युद्धे भवान् मम भ्रातरम् अहन् । अहं तस्मात् कालादेव भवन्तं हन्तुं प्रतिशोधस्य अवसरम् अन्विष्यन् अद्य वनं प्रति यदा भवान् गच्छति स्म तदा "शोभनोऽयम् अवसरः" इति ज्ञात्वा एकस्मिन् कण्टगुल्मे स्वात्मानं निलीय भवन्तं हन्तुम् अवसरं प्राप्तुकाम आसम् । परं तत्क्षणमेव भवतः सैनिकैः अहम् अवलोकितः शस्त्रैः प्रहृरितश्च । येन केनापि प्रकारेण स्वात्मानं रक्षयित्वा अत्र सम्प्राप्तः । भो नृपश्रेष्ठ ! अधुना भवतः सेवां दृष्ट्वा मम शत्रुता अपगता क्षम्यताम् । अद्य प्रभृतिरेष जनः आजीवनं भवत्सेवायां समयो यापयिष्यति ।

नृपस्तं जनं स्वसेवकैः सार्धं नगरं प्रति प्रेषितवान् । ततः पुनो नृपः स्वसाधनात् अपृच्छत् । साधुः अवदत् – भो नृपश्रेष्ठ ! अधुनापि उत्तरे न ज्ञातम् । यदि न ज्ञातं तर्हि श्रूयताम्—अतिमहत्वपूर्ण—समयः स आसीद्, यदा भवान् मम पुष्पवाटिकाः खनति स्म । यतो हि यदि भवतः तस्मिन् समये पदा सैनम् अभविष्यच्चेत तदाऽयं जनो नूनम् आक्रमणम् अकरिष्यत् । महत्वपूर्णं कार्यम् अस्य जनस्य सेवा आसीत् । यदि सेवां कृत्वा अस्य जीवनस्य रक्षां न अकरिष्यत्, तदा प्रथमं, शत्रुतां चेतसि निधाय मृत्युम् अगमिष्यत् । न जाने कियन्ति जन्मानि यावत् इयं शत्रुता स्थास्यति तदा । महत्वपूर्णा च व्यक्तिः "अहम् अस्मि" यतः शान्ति लब्ध्वा तव परावर्तन भविता ।

शिक्षा:–

महत्वपूर्ण—समयः—"वर्तमान समयो वर्तते, अस्य समयस्य सदुपयोगः कर्तव्यः । महत्वपूर्णं कार्यं तदस्ति, यद् वर्तमानसमये अस्माकं सम्मुखे वर्तते, तत्कार्यं सावधानतया सम्पन्नं करणीयम् । महत्वपूर्णा च व्यक्तिः सा अस्ति, या तस्मिन् काले सम्मुखे स्यात्, तेन सह सम्यक् प्रकारेण व्यवहारः कर्तव्यः ।" इदमेव शोभनजीवनस्य रहस्यम् ।

—राजकीय—संस्कृत—महाविद्यालयः
नाभा-१४७२०१ (पटियाला)
पंजाब

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिमाचल में नवयुग का अभ्युदय

— शान्ता कुमार मुख्य मंत्री

हिमाचल प्रदेश के लोगों के लिए १५ अप्रैल हर्षोल्लास का ही नहीं, आत्मावलोकन का दिन भी है। १९४८ में इसी शुभ दिन हिमाचल का जन्म हुआ था यह दिन यहां के उन सरल और परिश्रमी लोगों की आकांक्षाओं का प्रतीक है जिन्होंने शताब्दियों तक उपेक्षा की यातना भोगी।

रियासती व्यवस्था से हिमाचल को घोर निर्धनता, निरक्षरता और पिछड़ापन ही विरासत में प्राप्त हुआ था। तब से यद्यपि प्रदेश ने विकास के मार्ग पर एक लम्बी यात्रा तय की है फिर भी यह एक विचित्र विडम्बना है कि प्रति व्यक्ति आय की दृष्टि से देश में छठे स्थान पर होते हुए भी हमारे लोग सामाजिक न्याय से अब भी वंचित हैं।

राज्य के पास विपुल संभावनाएं और समृद्ध प्राकृतिक साधन हैं किन्तु लोग अब भी गरीब हैं। स्पष्ट है कि ऐसा असन्तुलित विकास नीतियों के कारण ही हुआ है और इन नीतियों का लाभ जनसाधारण तक पहुंचा ही नहीं।

जनसंघ और कुछ अन्य दलों को मिलाकर बनाई गई जनता पार्टी १९७७ में जब अस्तित्व में आई थी तो उसने विकास कार्यक्रमों को पुनः अनुस्थापित करने और उन्हें आवश्यकतानुसार बनाने का प्रयत्न किया था। उससे पूर्व के २९ वर्षों में केवल ३'००० गावों को पेयजल उपलब्ध कराया गया था। जबकि उसके बाद के २७ महीनों में ३,१०० गांवों को पीने के पानी की सुविधा दी गई निर्धनों में सबसे निर्धन लोगों को सहायता उपलब्ध कराने के लिए अन्त्योदय कार्यक्रम आरम्भ किया गया तथा १९.००० परिवारों को निर्धनता की रेखा से ऊपर उठाने में मदद दी गई। परन्तु जनता पार्टी अपना पांच वर्ष का कार्यकाल पूरा नहीं कर सकी और उसके वायदे अधूरे ही रह गये।

पिछला दशक लोगों पर थोपे गये कुशासन का दशक था। अब लोगों ने हाल ही में भारी जनादेश द्वारा पुनः भारतीय जनता पार्टी को सत्ता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सौंपी है । जनता द्वारा अभिव्यक्त यह आस्था और विश्वास एक चुनौती भी है और एक अवसर भी कि सरकार लोगों की आवश्यकताओं तथा आकांक्षाओं के अनुरूप उनकी सेवा करे।

नई सरकार ने अभी ४८ दिन पहले ही कार्यभार संभाला है और उसे २०२ करोड़ रुपये का घाटा विरासत में मिला। इस वित्तीय कुप्रबन्ध की जांच की गई तो पता चला कि इसका कारण था सर्वत्र व्याप्त गंभीर वित्तीय अनुशासनहीनता, अनुव्यापक खर्चे और धन का घोर अपव्यय है। यह स्थिति वास्तव में बड़ी गम्भीर है लेकिन हम हतोत्साह नहीं हैं। खर्चों को कम करने और अधिकतम बचतों को सुनिश्चित बनाने के लिये कठोर मितव्ययीय उपाय किये गये हैं। केन्द्र से विशेष सहायता देने का निवेदन किया गया है। हम भी स्वयं अपने साधन जुटा रहे हैं। जनादेश और लोगों का समर्थन हमारे साथ है। इसीलिए हमें भरोसा है कि हम इस स्थिति पर काबु पा लेंगे।

गत मास योजना आयोग से हुआ विचार-विमर्श लाभप्रद रहा है। उसने हमारी १९९०—९१ की वार्षिक योजना के लिए ३६० करोड़ रुपये स्वीकृत किये हैं। पिछले वर्ष की तुलना में २० प्रतिशत की इस वृद्धि से हमें लोगों की आकांक्षाएं पूरी करने में सहायता मिलेगी। हम केन्द्र और योजना आयोग के विशेष रूप से आभारी हैं कि उन्होंने राज्य की तुरंत आवश्यकता को समझा और हमें उदार सहायता प्रदान की।

नई सरकार ने मन्त्रिमण्डल की अपनी पहली बैठक में दैनिक प्रशासनिक कार्यों में हिन्दी को लागू करने का निर्णय लिया। ऐसा १९७७ में भी किया गया था किन्तु कांग्रेस के शासन में स्थिति उलट गई। हिमाचल हिन्दी भाषा राज्य है इसलिये वहां के समस्त सरकारी कार्य का लोगों की भाषा हिन्दी में ही होना उचित है। इस से शासन को जनता के और अधिक निकट लाने में सहायता मिलेगी।

नई सरकार ने प्रशासनिक अधिकरण को समाप्त करने का सोच समझ कर निर्णय लिया है और यह मामला केन्द्र के साथ उठाया है। अपने चुनाव घोषणापत्र में हमने कर्मचारियों से यह वायदा किया था और हम इसे पूरा करने के प्रति कृतसंकल्प हैं। प्रशासन को सक्रिय तथा लोगों के प्रति और अधिक संवेदनशील बनाने के लिये आवश्यक पग उठाए गए हैं। केवल एक कुशल, ईमानदार और प्रभावकारी प्रशासन ही लोगों को न्याय दे सकता है। अधिकारियों से कहा गया है कि वे फाइलों पर अपना निर्बाध और निसंकोच मत दें। कर्मचारियों से कहा गया है कि वे कर्तव्य के प्रति निष्ठा को अपनाएं और समर्पण की भावना से लोगों की सेवा करें।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विकास कार्यक्रमों का पुन: अनुस्थापन तथा प्राथमिकताओंके पुनर्निर्धारण की प्रक्रिया आरंभ कर दी गई है गत मास हुए विधान सभा अधिवेशन में केवल दो महीनों के लिये लेखा अभिमत लिया गया । पूरा बजट अगले महीने प्रस्तुत किया जायेगा इसमें चुनावों के समय किये गये वायदों के प्रकाश में नई प्राथमिकताएं और कार्यक्रम प्रतिलिखित होंगे

हमने हर रसोई में सरकारी खर्च पर एक नल लगाने का महत्वपूर्ण वायदा किया है इसे चार चरणों में पूरा किया जाएगा । पहले चरण में उन क्षेत्रों में शीघ्र ही नल लगाए जाएगे जहां पर्याप्त मात्रा में जल उपलब्ध है । दूसरे चरण में उन क्षेत्रों को लिया जाएगा जहां स्रोत में पर्याप्त पानी उपलब्ध है तीसरे चरण में ऐसी योजनाए होंगी जिनके लिये अतिरिक्त स्रोत आवश्यक होंगे और अन्तिम चरण में शेष बने हुए घरों में नल लगाए जाएगे । इन चरणों को पूरा करने में कुछ समय लग सकता है किन्तु सरकार तब तक चैन की सांस नहीं लेगी जब तक यह कार्य पूरा नहीं हो जाता ।

इस वर्ष गर्मियों में बड़ी सख्या में पर्यटकों के आने की आशा है प्रशासन तंत्र को इस योग्य बनाया जा रहा है कि वह इस चुनौती का सामना कर सके । सार्वजनिक और निजी दोनों क्षेत्रों में शिमला, धर्मशाला और मनाली में तम्बुओं की बस्तियां बनाई जा रही हैं तथा शिविर- स्थलियां निश्चित की जा रही है । पर्यटकों को आवास सुविधा उपलब्ध कराने के लिए लोक निर्माण विभाग, वन विभाग तथा बिजली बोर्ड के विश्राम गृह हि. प्र. पर्यटन विकास निगम के सुपुर्द कर दिये गये हैं ।

चुनाव के समय किये गये वायदे के अनुसार पहचाने गए गरीब परिवारों को रियायती दरों पर सस्ता राशन देने का ढग निश्चित किया जा रहा है । राशन वर्तमान सार्वजनिक वितरण प्रणाली के माध्यम से उपलब्ध कराया जाएगा । इससे उन लोगों को राहत मिलेगी जिन्हें मूल्य वृद्धि के कारण सबसे अधिक कठिनाई का सामना करना पड़ा है ।

इस बात को भी सुनिश्चित बनाया जाएगा क किसानों को उनके उत्पादन का लाभकारी मूल्य मिले । विश्व बैंक ने हिमाचल को ७५ करोड़ रुपये लागत की एक समन्वित बागवानी विकास परियोजना देने का प्रस्ताव किया है वशर्ते कि समर्थन मूल्य देना बन्द कर दिया जाए ।

सरकार चुनाव के समय किये गये अपने सभी वायदों को पूरा करने के प्रति वचनबद्ध है । हमें विश्वास है कि लोगों के दुख दूर करने और आशा तथा समृद्धि का युग लाने के अपने प्रयासों में हमें जनता का पूरा समर्थन प्राप्त होगा । इस अवसर पर मैं उम्मीद करता हूं कि हिमाचल के महान लोगों ने जो उत्तरदायित्व हमें सौंपा है उसे पूरा करने में हमें उनका सक्रिय सहयोग मिलता रहेगा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजभवन

शिमला

राज्यपाल का हिमाचल दिवस के उपलक्ष में–

संदेश

मैं हिमाचल प्रदेश के लोगों को तैतालिसवें हिमाचल दिवस के ऐतिहासिक एवं खुशी के अवसर पर अपनी हार्दिक बधाई देता हूं।

प्रकृति हिमाचल प्रदेश को स्वास्थ्यवर्द्धक जलवायु, सुन्दर दृश्यावलि, विस्तृत वनस्पति व वन्य प्राणियों के साथ साथ विशाल जलविद्युत उत्पादन की क्षमता तथा फल व सब्जियों के उत्पादन के लिये असीमित साधन प्रदान करने में उदार रही है। मुझे यह जानकर प्रसन्नता हुई कि राज्य सरकार हिमाचल को देश के सबसे समृद्ध राज्यों में से एक बनाने के लिये इन स्रोतों का दोहन करने के सभी प्रयास कर रहीं है।

सरकार प्रदेश में पर्यटन विकास के लिए एक महत्वाकांक्षी योजना तैयार कर रही है तथा जलविद्युत उत्पादन को सर्वोच्च प्राथमिकता दे रही है। इन दोनों कार्यक्रमों से प्रदेश के युवकों के लिये रोजगार के बहुत से अवसर खुलेंगे।

गरीबों में सब से गरीब, जो अब तक उपेक्षित ही रहे की ओर विशेष ध्यान दिया जा गा जिन के लिये शीघ्र ही कार्यान्वित करने के लिये सरकार एक निश्चित कार्यक्रम बना रही है।

हिमाचल प्रदेश के पास समृद्ध सांस्कृतिक धरोहर है तथा इस का संरक्षण और प्रसार प्रदेश के प्रत्येक नागरिक का दायित्व है।

इस सुन्दर पहाड़ी प्रदेश के पर्यावरण सतुलन को बनाये रखने के लिये वनीकरण के प्रयास विस्तृत स्तर पर करने की आवश्यकता है। मैं जनता का आह्वान करता हूं कि वे हरियाली को बढ़ाने तथा इसे संरक्षित करने में अपनी महत्वपूर्ण भूमिका निभाए।

इस शुभ अवसर पर मेरा प्रदेश के लोगों से आग्रह है कि वे प्रदेश के तीव्र विकास तथा देश को एकता और अखण्डता को सुदृढ़ बनाने के लिये आपसी सद्भाव तथा भाईचारे की सदियों पुरानी परम्परा को बनाये रखने के लिए समर्पण की भावना से काम करें।

ह/

(बी. रचैया)

राज्यपाल, हिमाचल प्रदेश।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिमाचल दिवसः— १९९०

"अस्माकं कृते हिमाचलः
एकं मन्दिरम् अस्ति,
हिमाचलस्य जनता
एका देवतारूपा तथा
राजनीतिः तस्या
देवतायाः आराधनो।"

— शान्ता कुमार
मुख्यमन्त्री

— हिम लोक सम्पर्क —

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

संस्कृतं प्रदेशे नवनिर्वाचनानि च

देशे प्रदेशेषु च यदा निर्वाचनानि भवन्ति तदा संस्कृतज्ञानां संस्कृतहितेच्छुकानां भारतीय – संस्कृतिप्रणयिनाञ्च मनस्सु – एका-उत्सुकता, एक उत्साह सर्वदा भवति । स्वतन्त्रतायाः पश्चात् – प्रति-निर्वाचनं संस्कृतं प्रति प्रशासनेषु - उदासीनता एव वृद्धिमुपगता ।

गतनिर्वाचने ये प्रतिनिधयः निर्वाचिताः बभूवुः तेषु भारतीय-संस्कृतिप्रणयिनोऽपि पर्याप्ताः सन्ति इति प्रतीयते एतस्य स्पष्टस्तु-नास्ति कोऽपि प्रमाणः परन्तु केन्द्रे चतुर्विंशतिसांसदैः संस्कृते शपथग्रहणं कृतमनेन संस्कृते शपथग्राहकानां संख्या पुनर्वृद्धिमुपगता या शनैः २ परम क्षीणतामुपगता आसीत् ।

विभिन्नप्रदेशेष्वपि संस्कृते शपथग्रहणमकारि कैश्चित् । परन्तु हिमाचल प्रदेशे यत्र मुख्यमन्त्रिणा संस्कृते शपथग्रहणमकारि तत्र अन्यैः संस्कृते शपथग्रहणं न कर्तुं पारितम् । कैश्चिदधिकारिभिस्तत्र बाधः उपस्थापितः । अत्रास्माकं कथनमिदमस्ति यदत्र सदने शास्त्रियुगलं वर्तते अनेन युगलेन तथा प्रयासा विधेया येन आगामिनि काले कश्चिदपि इच्छावान् विधायकः संस्कृते शपथग्रहणात् – वञ्चितो न भवेत् । इदमपि कार्यं तैः – मुख्यरूपेण कार्यम् यदि तत्र कश्चित् बाधः ? — —

किं संस्कृते शपथग्रहणमात्रमेव ?

संस्कृते केवलं शपथग्रहणेन संस्कृतज्ञाः सन्तुष्टाः- भविष्यन्ति इति प्रशासनेन नैवावधार्यम् । यद्यपि - प्रशंसास्पदमिदं सर्वं तथापि संस्कृत-प्रसारविकासकृते प्रशासनं किमपि करोति नवेति तु भविष्ये एव स्पष्टं भविष्यति विश्वस्तसूत्रेण ज्ञातमभूद्यत् प्रदेशे शिक्षाविभागे एवं विधानिर्देशाः प्राप्ता अभूवन् येषु संस्कृतमहाविद्यालयानां (College) कृते पाठशाला (School) लेखनाय निर्दिष्टमस्ति यदीदं सत्यमस्ति तु संस्कृतज्ञाः सुप्ताः न तिष्ठेयु रपितु संस्कृत प्रसारमधिकृत्य पूर्वप्राप्ता-धिकाररक्षार्थं प्रयासान् कुर्युः । यतोहि अधिकारोऽय संस्कृतमहाविद्या-लयानां कृते न्यायालयैः - भारतस्योच्चतमन्यायालयेनापि दत्तः । एवं सति किमर्थं संस्कृतज्ञाः सुप्ता इव किं कर्तव्यविमूढा इव विचरन्ति । इदानीन्तु शास्त्रिद्वयं प्रदेशविधानसभायां वर्तते । असौ भवद्भिः :- संस्कृतं प्रति न्यायकरणाय संघर्षकरणार्थं प्रेरणीयः । मुख्यमन्त्रिश्च प्रार्थनीयः-प्रेरणीयश्च प्रतिनिधि - मण्डलमाध्यमेन संस्कृतमहाविद्याल-यानामुचितमान्यतायै तथा च दशमकक्षापर्यन्तं संस्कृतस्यावश्यकी करणाय एतेनैव संस्कृतप्रसारो विकासश्च भविष्यति । आशासे संस्कृतपरिषदोऽत्रोचितं कार्यं करिष्यन्ति ।

— केशव शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R·N 6384/57 ल—33/एस. एम. / 10/89

त्वर्यताम् त्वर्यताम् त्वर्यताम्

*** *** ***

जातक फलादेशस्य दुर्लभो ग्रन्थः

फलादेश कल्पतरुः

राष्ट्रपतिसम्मानितप्रख्यातविद्वान्सेवानिवृत्तप्राचार्य श्रीमदाचार्य-दिवाकरदत्तशर्मप्रणीतो हिन्दी-आङ्ग्लटीका सहितः चिरप्रतीक्षितः फलादेशकल्पतरुः प्रकाशितोऽभूत् ।

अस्मिन् ग्रन्थे द्वादशभावफलम्, दशाफलम्, आधुनिकाः शुभा-शुभयोगाः, नारीणां जातकफलम्, सन्तानप्राप्तिबाधानिवारण-प्रयोगाः, अनिष्टदशाफलशमनोपचाराश्च निर्दिष्टाः ।

सोऽयं ग्रन्थः श्रीमदाचार्यपादानाँ चत्वारिंशद्वर्षाणां ज्योतिष-शास्त्रसेवाया अनुसन्धानपूर्णानुभवस्य च दुर्लभा कृति विद्यते ।

स्वनामधन्यानां श्रीमार्तण्डपञ्चाङ्गप्रवर्तकानां विश्वविख्यात ज्योतिर्विदां श्रीमदाचार्यमुकुन्दबल्लभ मिश्र ज्योतिषाचार्य महा-भागानां प्राक्कथनेन च समलङ्कृतः ।

महर्घतावशात्स्वल्पा एव प्रतयो मुद्रिताः । मूल्यमपि केवलं कर्गलमुद्रणादिव्ययपूरकं डाकव्ययसहितं सप्तति (७०) रूप्यकाणि निर्धारितम् । फलादेश कल्पतरोः भारते विदेशेषु च दैवज्ञैरपूर्वं स्वागतं कृतम् स्वल्पाः प्रतयः अवशिष्टाः सन्ति । द्वितीय संस्करणप्रकाशने विलम्बो भविष्यति । मूल्यं निम्नसंकेते धनादेशद्वारा प्रेष्यताम् ।

सचिव, संस्कृत शोध संस्थान, भारती विहार, मशोबरा शिमला—७

171007 (हि. प्रदेश)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

जयन्तीमुपलक्ष्य

अयमस्ति रवीन्द्रो वै
कवीन्द्रः सुमहानभूत् ।
सम्मानितोऽभूद्देशे ऽपि
विदेशे "नोबलेन" च ॥

शान्तेर्निकेतने येन
विश्वविद्यालयो महान् ।
संस्थापितः प्रयासेन
स्वीयेन महता पुरा ॥

संस्कृतस्य सचित्रमासिकम्

शिमला मई, १९६०

अङ्कः ८

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमः

क्र.	विषयाः	लेखकाः	पृष्ठम्
१.	आत्मज्ञानप्राप्तौ द्वितीयं साधनम्	श्री मणिरत्ना शास्त्री असमः	१
२.	कायाकल्पस्य दिव्यौषधि	श्री जगदीशशरणः श्रीरामस्वरूपः लालवेहट	८
३.	हसन्तुराम्	श्री ओमप्रकाश (हि. प्र.)	१२
४.	साहित्यसरिता	कार्यालय	१३
५.	विंशतिशताब्दीये	सुश्री विमला देवी (पञ्जाब)	१४
६.	साम्प्रदायिक विभीषिका	श्री हरिदत्त शैलज (हि. प्र.)	१८
७.	भारतीय संस्कृति पोषकः	आचार्य सुरेश (हि. प्र)	१९
८.	नीलत्वम्	डा. लेखराम शास्त्री (हि. प्र.)	२०
९.	देवभूमिर्हिमाचल	आचार्य श्यामलाल (हि. प्र.)	२१
१०.	गीयताम्	श्री पूर्णचन्द्र भार्गव (हि. प्र.)	२३
११.	स्वतन्त्रता	कु. कुसुमलता (पञ्जाब)	२४
१२.	भवतां पत्राणि	प्रा. हरिश्चन्द्रः कर्णाटक	२६
१३.	ज्ञापनम्	कार्यालयः	२८
१४.	समाचाराः	,,	३१
१५.	सम्पादकीयम्		

दिव्यज्योतिः

हि० क० सं०भा० अकादमी प्रदत्तानुदानसाहाय्यम् । पत्रिकागतमुद्रणदोषाणां सम्पादकीयनीति-विषये च अकादमीदायित्वं नास्ति ।

हिमाचल प्रदेश—पंजाब-हरियाणा-जम्मू कश्मीर - मध्य प्रदेश—राजस्थान—महाराष्ट्र उत्तरप्रदेश शासन-स्वीकृतं केन्द्रशासनपुरस्कृतं सचित्रं संस्कृतमासिकम् ।

पत्रस्य उद्देश्यानि तथा नियमाः

सरल—सरस सुबोध-साधनैः सर्वस्मिन् संसारे संस्कृतस्य प्रसारः, साहित्यान्तर्गतानां सकलकलानां समन्वेषणं, संसारस्य हितसम्पादनम्, एवं लौकिक - अलौकिकस्वातन्त्र्यस्य प्राप्तिः ।

"दिव्यज्योतिः" प्रतिमासं पञ्चदशतारिकायाम् (आङ्ग्लमानेन) प्रकाशितं भवति
पत्रस्य वार्षिक मूल्य ३० रु० अर्धवार्षिकं १५ रु० एकस्याङ्कस्य च रु० २-५० भवति ।
वर्षारम्भः अक्तूबर—मासतः भवति । ग्राहकः कस्मादपि मासाद् भवितुं शक्नोति ।
ग्राहकैः, "सम्पादक, दिव्यज्योतिः, भारती विहार, मशोबरा, शिमला-१७१००७ हि० प्र०" इति संकेते धनादेशेन वा. शु. प्रेषणीयम् ।

परिचयः

संस्थापकाः तथा आद्यसम्पादकाः आचार्यश्रीदिवाकरदत्त शर्माणः, — दूरभाषः 78159

राष्ट्रपति सम्मानिताः

प्रधानसम्पादकः— आचार्य केशव शर्मा एम. ए., एम, फिल, साहित्यरत्नम् - ,, 8 200

दिव्यज्योतिः कार्यालयः भारती विहारः, मशोबरा, शिमला-७ (हि. प्र.)

मुद्रकः प्रकाशकः—

भारतीमुद्रणालय भारती विहार, मशोबरा-१७१००७ शिमला (हि. प्र.)

स्व।मोः- श्रीमती आचार्य रत्नकुमारी शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीआदिशंकरदृष्ट्या —

आत्मज्ञानप्राप्तौ द्वितीयं साधनं वैराग्यम्

—— श्री मणिरत्ना शास्त्री

★

भगवत्पादश्रीआदिशंकराचार्यमतानुसारेण आत्मज्ञानप्राप्तौ द्वितीयसाधनं वैराग्यम् । अत्र किं तावत् वैराग्यमिति प्रथमतः निरूपणीयम्–तथोक्तम् —

अन्तस्त्यागो बहिस्त्यागो विरक्तस्यैव युज्यते ।
त्यजत्यन्तर्बहिः संगं विरक्तस्तु मुमुक्षया ॥

— विवेकचूडामणिः

श्लोकेऽस्मिन् वैराग्यस्य सर्वांगपूर्णं स्वरूपम् निरूपितम् । कर्मेन्द्रियाणाम् ज्ञानेन्द्रियाणामपि मनसा सह सर्वथा विषयभोगत्यागः एव वैराग्यम् न तु बाह्येन्द्रियाणाम् निवृत्तिस्तथा मनसा विषयाणामनुचिन्तनम् तथाहि —

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् बिमूढात्मा मिथ्याचारः स उच्यते ॥

— गीता ३–६

अस्य श्लोकस्य शांकरभाष्ये भगवतोक्तम्—

"कर्मेन्द्रियाणि हस्तपादादीनि सयम्य सहृत्य च आस्ते तिष्ठति मनसा स्मरन्निन्द्रियार्थान् विषयान् बिमूढान्तकरणो मिथ्याचारः पापाचारः स उच्यते ।" आप्तवाक्यमिदम् । कारणवशात् (सामाजिक मर्यादा भंगभयात्) वाह्येन्द्रियाणि तत्तद्विषयेभ्यः निवृत्य मनसा चिन्तयन्नास्ते तदेव पापाचारः. नतु सविरागः । मतः प्रथमं यावन्न संयम्यते तावन्न हि वैराग्यमुत्पन्नं भवति । उक्तञ्च—

मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
मोक्षप्राप्तौ विषयेषु बन्धने च बलवत्तर कार्यमस्ति मनसः ।

विगतम् रागम् विरागम् तस्य भावः, वैराग्यम्, सर्वं विषयेषु स्पृहाशून्यत्वम् । आदिशंकरः पूर्णं विरागी आसीत् । तस्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अवतरणं हि परात्परभगवत शंकरादेव-"शंकरः शंकरो साक्षात् दुःसाध्यकर्माणि सम्पादयितुम् परमेश्वरेणैव पार्थिवशरीरं स्वीकृतम्" एतद्धिकारणम् आदिशंकरस्य विरागित्वे ज्ञानित्व च । उक्तञ्च- ज्ञानम् शंकरादिच्छेत ।

भारतवर्षेऽस्मिन् कतिपयाः विरागिपुरुषाः स्त्रियश्च प्रादुरभवन्- शाक्यवंशे भगवान् बुद्धदेवः (कपिलवस्तु) अलिंगस्वामि (होलिआ दक्षिणापथ) प्रेमिभक्त श्री कृष्णचैतन्य (नदीया) श्री रामकृष्ण परमहंस (बेलुड़मठ) स्वामी विवेकानन्दः (बेलुड़मठ) मातृ शारदा (बेलुड़मठ) स्वामी शिवानन्द (स्वर्गाश्रम ऋषिकेश) इत्यादयः बहवः विरागिसाधकाः अतीव समादरणीयाः । एतेषाँ खलु जीवनचरित्राणि- विरागिजीवनेनैव सम्यग्ज्ञानप्राप्तौ कथम् सिद्धिः स्यादस्य ज्वलन्तोदाहरणानि अधुनाऽपि नवोदितानाम् जिज्ञासु साधकानाम् मार्गदर्शनं कुर्वन्ति । एतेभ्यः महानुभावेभ्योऽपि आदिशंकरस्य जीवनमेव वरिष्ठतममिति एकान्तसत्योपहितम् । विरागिसाधकलेखकसमाजसुधारक अध्यापन-पाण्डित्यादि कतिपयोत्तमगुणः ।

तस्यावतरणं हि लोकोपकाराय । लोककल्याणार्थन्तु सम्पूर्णवैराग्य जीवनं विना नहि सुसिद्ध्यति । शंकरः सांसारिकविषयभोगान् अजानन् एव विषयविरागी अभवत् । अस्योदाहरणन्तु-मण्डनपत्नी उभयभारती देव्याः सह शास्त्रार्थे क्रियमाणे — देव्याः कामकेलि विषयक कतिपयप्रश्नानां उत्तरदानाय एकमासस्याऽवसरम् — याचितम् भगवता—तदैवोदितोऽभवत् । शंकरः स्वकीयायुषि तृतीय-वर्षं पूर्तिव मातृभाषायां यथेष्टाध्ययनं कृतवान् तदनन्तरं संस्कृत भाषा-माध्यमेन स्वकीयाष्टवर्षावस्थां यावत् गुरुपादात्प्रभूताध्ययनानन्तरं-शीघ्रमेव स्वगृहं तत्याज ।

सांसारिकविषयेभ्यः पराङ्मुखीभूतानाम् विरागिमहानुभावा-नाम् द्वौ भेदौ स्तः (१) अभुक्त भोगी (२) भुक्त भोगी च आदि-शंकररामकृष्णविवेकानन्दमातृशारदाप्रभृतयः अभुक्तभोगिनः बुद्धदेवगौरांगशिवानन्दादयः भुक्तभोगिनः । अभुक्तभोगिनाम् जीवनकार्यक्रमेषु न एकोऽपि विषयासक्तावसरोऽस्ति । एते हि नैष्ठिकसन्यासिनः, ब्रह्मज्ञानिनः पूर्णप्रज्ञाश्च यतः—

स्वकर्मपाशवशगः प्राज्ञोऽन्यो वा जनो ध्रुवम् ।
प्राज्ञः सुखं नयेत् कालमिति वेदान्तडिण्डिमः ।

इत्येवं आदि शंकराचार्यस्यामोघरामवाणवचनम् । प्रज्ञा-प्राप्तिस्तु प्रारब्धकर्मबन्धने निपतितानामेव परन्तु दुस्त्याज्यम्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रारब्ध कर्मफलम् अनायासेनातिक्रमितुं ब्रह्मज्ञानप्राप्त्यर्थञ्च सतत-प्रयत्नं कुर्यात्-सर्वकर्माखिलं ज्ञाने परिसमाप्यते इति भगवद्वचनात्। अखिलविश्वमिदम् स्वप्नविकारम् । अयं नामरूपस्यैव विकारमात्रम्. तथोक्तम् —

न नामरूपे नियते सर्वत्र व्यभिचारतः ।
अनामरूपं सर्वं स्यादिति वेदान्तडिण्डिमः ॥

निश्चितमेव यत्— नामरूपे सर्वत्र परिवर्तनशीले, व्यभिचारिणी, अनित्ये । स्वप्नविकारस्यास्य संसारस्य विषये भगवतोक्तम् —

वयसि गते कः कामविकारः शुष्के नीरे कः कासारः ।
नष्टे द्रव्ये कः परिवारः ज्ञाते तत्त्वे कः संसारः ।
कस्त्वं कोऽहं कुत आयातः का मे जननी को मे तातः ।
इति परिभावय - सर्वमसारं विश्वं त्यक्त्वा स्वप्नविकारम् ।

— चर्पट पञ्जीकास्तोत्रम्

वैराग्यविधौ सर्वाग्रे संसारस्यासारत्वज्ञानम् परमावश्यकम् तदेव हि घृणास्पदम् अतएव दूरात्त्याज्यम् तथैवोपदिष्टम् स्तोत्रेऽस्मिन् । आत्मज्ञानप्राप्तेः वैराग्यम् परमावश्यकम् न चेत् विपदास्पदम् —

विषयविषममार्गे गच्छतो नष्टबुद्धेः ।
प्रतिपदमभियातो मृत्युरप्येष विद्धि ।
हितसुजनगुरूक्त्या गच्छतः स्वस्ययुक्त्या ।
प्रभवति फलसिद्धिः सत्यमित्येष विद्धि ॥

— विवेकचूडामणिः (विषयनिन्दा) २९-८३

तथ्यमिदमस्ति यत्-सांसारिकविषयभोगेषु ये जनाः अधिकाधिक्येन संलग्नाः सन्ति ते हि विपज्जालग्रस्ताः । अवश्यमेव भोक्तव्यम् कृताकृतमशुभाशुभम् । आत्मज्ञानान्मुक्तिः भवति । तत्कारणञ्च विषयभोगविमुखम्, यदुक्तम -

मोक्षस्याकांक्षा यदि वै तवास्ति
त्यजातिदूराद्विषयान् विषं - यथा ।
पीयूषवत्तोषदयाक्षमार्जव-
प्रशान्तदान्तीर्भज नित्यमादरात् ॥

- विवेक चूडामणिः (विषय निन्दा) २९-८४

मोक्षं-वाञ्छति चेत् सांसारिकविषयभोगान् दूरादेव, त्यजेत्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भयंकरविषमिव, तदनन्तरं संतोषक्षमादयः सच्छतामदमादीन् समादरेण प्रयत्नेन च ग्रहणीयम् ।

किंनाम वैराग्यमिति अनुशीलनीयम् - यदुच्यते—

तद्वैराग्यम् जुगुप्साया दर्शनश्रवणादिभिः ।
देहादिब्रह्मपर्यन्ते ह्यनित्ये भोगवस्तुनि ॥
- विवेकचूड़ामणिः, (साधनचतुष्टयम्)
१३-२

देहादारभ्य ब्रह्मपर्यन्तम् (आब्रह्मस्तम्भपर्यन्तम्वा) समस्त सांसारिकभोग्यवस्तुषु दर्शनश्रवणादीनां घृणामुत्पाद्य दूरात्तान् परित्यज्य सर्वेषु भोग्यवस्तुषु अरुचि वैराग्यमुच्यते । विरागि पुरुषो हि ब्रह्मनिष्ठोऽपि भवति । तथा -

बहिस्तु विषयैः संगं तथान्तरदमादिभिः ।
विरक्त एव शक्नोति त्यक्तुं ब्रह्मनिष्ठितः ॥
- विवेकचूड़ामणिः १२२-३७४

इन्द्रियाणां तत्तद्विषयेभ्यः पराङ्मुखो कृत्वा तेषां सम्बन्धानपि निषिध्येत; आन्तरिकभावानपि परित्यजेत । स एव बलवान् पुरुषः, ब्रह्मणिनिष्ठितः (प्रज्ञाप्रतिष्ठितः) नायमात्मा बलहीनेन लभ्यः वैराग्यनिरूपणे उक्तम् -

वैराग्यबोधौ पुरुषस्य पक्षिवत
पक्षौ विजानीहि विचक्षणत्वम् ।
विमुक्तिसौधाग्रतलाधिरोहणम्
ताभ्यां बिना नान्यतरेण सिद्ध्यति ॥
- विवेकचूड़ामणिः १२२-३७५

वैराग्यादेव ज्ञानोदयः सम्भवति । वैराग्य ज्ञानोदयौ अविच्छेद्यौ भवतः । एकस्यैव पक्षिणः द्वौ पक्षौ; एकस्याऽभावे नहि मुक्तेः सिद्धिः स्यात् ।

वैराग्यस्वरूपं निरूप्याधुनाज्ञानप्राप्तौ तस्यावश्यकतां निरूपयिष्यति तस्य द्वितीय साधनभूतञ्च काम्यम् ? विचारणीयम् । आत्मज्ञान प्राप्तेः प्रथमम् साधनम्-स्वयं जिज्ञासु व्यक्तिः । सोऽपि प्रारब्धकर्म प्रेरितः अभ्यच्च प्रारब्ध पुण्यकर्मफलेनैव पूतात्मा, गुरुवेदान्तवाक्येषु श्रद्धालुः श्रवण-मनन निदिध्यासनादौ अभिनिविष्टमनः साधको वैराग्यस्याधिकारो भवति तद्धि अतीव विरलः यतो-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्यविविनक्ति धीरः
श्रेयोहि धीरोऽभिप्रेयसो वृणीते, प्रेयोमन्दोयोगक्षेमात् वृणीते

– कठोपनिषद्- १-२-२

अस्य मन्त्रस्य विषये शाकर भाष्ये उच्यते –

"उच्यते सत्यं स्वायत्ते, तथापि साधनतः फलतश्च मन्दबुद्धीनां दुर्विवेकरूपे सति व्यामिश्री भूते इव मनुष्यम् एतः पुरुषम् आ+इतः प्राप्नुतः श्रेयश्च प्रेयश्च। अतो हंस इवाम्भसः पयः, तौ श्रेयः प्रेयः पदार्थों सम्परीत्य सम्यग् परिगम्य मनसा सम्यक् आलोच्य गुरुलाघवं विविनक्ति पृथक् करोति धीमान्। विवेच्य च श्रेयो हि श्रेय एव अभिवृणीते प्रेयसोऽभ्यर्हितत्वात् श्रेयसः। कोऽसौ धीरः। यस्तु मन्दोऽल्पबुद्धिः स सदसद् विवेकासामर्थ्यात् योगक्षेमनिमित्तं शरीराद्युपचय-लक्षणनिमित्तमित्येतत्, प्रेयः पशुपुत्रादि लक्षणं वृणीते।"

प्रेयोमार्गे धावन्ति मूढाः। श्रेयो मार्गे तु मुष्टिपरिमेयपुण्यवत् केषाञ्चिद् व्यक्तयः अनुसरन्ति हि विद्यानिष्ठाः। इह अविद्यानिष्ठत्वात् (मायाबद्धत्वात्) मनुष्याणां जीवनम् नीचप्रवृत्तावेव (प्रेयोमार्गे एव) अनुधावने अभ्यस्तम्। तस्माद्धि उद्धर्म् उपनयनार्थम् श्रेयोमार्गे अनुप्रेरणार्थम्) शंकरेणोक्तम्–

उद्धरेदात्मनात्मानं मग्नं संसारवारिधौ।
योगरूढत्वमापाद्य–सम्यग्दर्शननिष्ठया –

विवेक चूडामणिः १०-१०

गीतायाञ्च-

उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव हि आत्मनो बन्धुरात्मैव रिपुरात्मनः - ३।

आत्मनैव आत्मानं उद्धरेत् न कोऽपि उपायान्तरेण सम्भवः अतएव आत्मनैव आत्मनः बन्धुरूपेण मन्यमानः तथोचितकार्याणि च क्रियमाणः सन् परमार्थप्राप्त्यर्थं सतत प्रयत्नं कुर्यात्। परमतत्त्वं विना जीवनं निरर्थकम् यदुक्तम्—

अविज्ञाते परे तत्त्वे शास्त्राधीतिस्तु निष्फला।
विज्ञातेऽपि परे तत्त्वे शास्त्राधीतिस्तु निष्फला॥

— विवेकचूडामणिः २३-६१

परमतत्त्ववेदार्थम् सर्वशास्त्राणि अध्येतव्यानि, परमतत्त्ववेदानन्तरम् किमन्यैः शास्त्रविस्तरैः सर्वे कार्यं कलापाः। तदनन्तरं सर्वं त्याज्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनुष्यजीवनमतीव दुर्लभं तत् समवाप्य पुनः नाधःपतनार्थम् कतिपयउपदेशाः प्रदत्ताः । मनुष्यजीवनं स्वयमेवात्मना उद्धर्त्तुं शक्नोति, इतर जीवास्तु तदसमर्थकाः भवन्ति । मनुष्यः यथावत् उद्धर्त्तुं सशक्तः तथावत् अधोपतनार्थमपि पदे पदे बाध्यो भवति तदन्येतरे जीवाः अधः पतन्ति सांसारिकविषयेभ्यः पराङ्मुखो (विरागी) भूत्वा परमगतिलाभार्थम् परमज्ञानेन बिना नान्यः पन्था-विद्यते । उपदेशसहस्रीग्रन्थे—

जन्ममृत्यु प्रवाहेषु पतितो नैव शक्नुयात् ।
इत उद्धर्तुमात्मानं ज्ञानादन्येन केनचित् ।। ३६३-५२

उपदेशसहस्री—

अपरश्च—

श्रद्धाभक्ती पुरस्कृत्य हित्वा सर्वमनर्जवम् ।
वेदान्तस्यैव तत्त्वार्थे व्यासस्याभिमतो तथा ।।
४१३-६७

सर्वाः कुटिलताः विहाय श्रद्धाभक्तो पुरस्कृत्य वेदान्तदर्शनस्य (अद्वैत-तत्त्वस्य) वेद व्यासोक्तपरमतत्त्वस्याभिप्रायञ्च सम्यगवगम्य तेषां निर्देशित-मार्गेषु अनुसर्तव्यम् तदेव परमपुरुषार्थं प्राप्नुयात् ।

परमज्ञानजिज्ञासु विरागी साधकः केनोपायेनानायासेनामृतत्त्वं प्राप्नुयात् विषयेऽस्मिन् आदिशंकरेण कतिपयोपदेशाः प्रदत्ताः । तेषु निम्नलिखिता मूलश्लोकं ग्रहणीयम् । सर्वाणि तीर्थानि सर्वान् वेदाञ्च परित्यज्यापि एकमेव मानसतीर्थं सुसेव्यमानः पुरुषः अमृतत्त्वं हि प्राप्नुयात्—

यस्मिन् देवाश्च वेदाश्च पवित्रं कृत्स्नमेकताम् ।
व्रजेत् तं मानसं तीर्थं यस्मिन् स्नात्वाऽमृतो भवेत् ।

उपदेशसाहस्री ३१५-४०

यत्र सर्वाणि तीर्थानि ऋग् यजुः सामादिवेदान् अनायासेन प्राप्नुयात् तद्धि मानसतीर्थमिति ख्यातः तत्र स्नानं कुर्वन् अर्थात् 'तत्त्वमसीति' महावाक्येन पूतः (निदिध्यासितः) मानसतीर्थे विलसन् मनुष्यः अमृतत्त्वमाप्नोति । एतद्धि अविद्यातारकम् ।

आदिशंकराचार्यस्य प्रायः सर्वे ग्रन्थाः निवृत्त्युपदेशकाः श्रेयोमार्गस्य मार्गदर्शकाः, अतएव परमकल्याणकारकाः इति निश्चितम् । तेषामध्ययनेनैव परमपुरुषार्थ प्राप्तौ । सुगमपंथेति मन्ये । किं बहुना—

संक्षेपेण प्रवक्ष्यामि यदुक्तं ग्रंथकोटिभिः ।
ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः ।।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इत्युक्तम् आदिशंकरेण। तस्य समग्र ग्रन्थेषु उक्तिरेषा चरितार्था च कृता। आदिशंकरस्य समस्तग्रन्थानाम् आपाततः— आदिशंकर कृतम् ब्रह्मविद्याग्रन्थमिति नानध्येयं कृतम् चेत् तदपि उचितम् मन्ये लेखकस्य मनोवृत्तयः, हार्दिकमनोवाञ्छाः जीवनस्याधिकाधिककार्यकलापानाञ्च इतिवृत्तं: स्वस्य समस्तग्रन्थेषु सम्यग् परिलक्ष्यन्ते, स्पष्टतयाध्ययनम् प्राप्यन्ते, अत्राऽपि एतद्धि कारणम्। आदिशंकरस्य प्रादुर्भाव उद्देश्यं तु— वेदव्यास गौड़पादाचार्य गोविन्दपादाचार्यादिभिः सुस्पष्टरूपेण निरूपितं यत् व्यासदेव कृत वेदान्तब्रह्मसूत्राख्यग्रन्थरत्नस्य भाष्यप्रणयनेन सह अद्वैतवेदान्ततत्त्वोपदेशकनानाग्रन्थानपि रचयित्वा तेषां लोकेषु सफलप्रचार प्रसारणमिति। ग्रन्थानाम् प्रणयनानन्तरं तेषां लोकेषु सफलप्रचारार्थम् भगवता स्वयं कृष्णद्वैपायनेनआदिशंकरस्यायूंषि द्विगुणी कृतानि अर्थात् चन्द्रमौलीश्वरेण मातृविशिष्टायाः स्वप्नादेशेन यत् षोड़शवर्षाणि आयु प्रदत्तम ततोर्द्ध द्वात्रिंशत् शंकरस्यायुः कृतानि समाजसुधारकार्याण्येव विभिन्नधर्मसम्प्रदायानाम् एकमेव अद्वैतमार्गनिर्दिश्य एकत्रीकरण रूप समाजसुधार कृत्वैव— आदि शंकरः समाजसुधारक इति ख्यातः समीचीनश्च सः।

आत्मज्ञानप्राप्तौ वैराग्यम् अमोघरामवाणम्। तस्य पात्रमपि दाशरथि रामचन्द्रवत् मर्यादापुरुषोत्तम एव स्यादिति। सत्पात्रेदानम् इतिख्यातम्, आदिशकरस्य वैराग्योपदेशानाम् अधिकारिणोऽपि सत्पात्राः एव स्युरित्य निपार्यम्। अद्ययावत् आदिशंकरस्योपदेशाः सुष्ठु जीवन्ति, कार्याणि सम्पादयन्ति च परन्तु अस्यां कलियुगसन्ध्यायां वैराग्य ग्रहिष्णुसत्पात्राणाम् शिष्यानामेवाभावः। गुरुस्तु आधुना यावत् व्याख्यां प्रयच्छति जिज्ञासु शिष्येभ्यः।

— वास्तव्यः—एलांबमलैकाइ, इंफाल मसमः

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कायाकल्पस्य दिव्यौषधिः

ले० जगदीशशरण जी बिलगैयां "मधुप"
अ० रामस्वरूप शास्त्री: अमर:" तालवेहटस्थ:

पुनर्नवा नामिका कायाकल्पस्यैका दिव्यौषधिर्वर्तते । यस्याभिधेयं हिन्द्यां: "विषखपरा" इति वर्तते । स्वविकासकालादेव मानवजाति: स्वकीयस्वास्थ्यप्राप्तये निरन्तर प्रयतते । मानवै: स्व-जीवनस्य दीर्घायुष्ट्वाय तथा चानरताऽमरतोपलब्धयेऽनेके प्रयत्ना विहिता: सन्ति । तत्प्रयत्नैर्यथाशक्यं मानवजातिरियं सफलाऽपि समभवत् । साधकैर्वेदविशेषज्ञैस्तान्त्रिकैस्तथा चायुर्वेदविज्ञानविशेषज्ञैर्योगाचार्यैश्चापि स्वकीयै दीर्घकालीन गहनानुभवै: प्रयोगैश्च समुचिततथ्यमुपलभ्य विश्वस्मै विश्वाय स्वानुभवरत्नानि समर्पितानि सन्ति । दीर्घायुषे तथा च नवयौवन सम्प्राप्तये त्रय आधारस्तम्भा निर्मिता: सन्ति । प्रथमाधारस्तु योग:. द्वितीयाधारश्च तन्त्र-मन्त्रसाधना, तृतीयश्चाधारो वर्तते तावदौषधय इति ।

योगस्य खेचरीमुद्रया कायाकल्पस्य कतिपयै: क्रियाविशेषै: चैव योगासनैस्तथाध्यानसमाधिप्रभृतिभि: केचन योगिनो दीर्घजीविनोऽजरा अमराश्चाभूवन् तेषु महापुरुषेषु श्रीं मत्स्येन्द्रनाथ श्री गोरक्षनाथादयो महात्मान: प्रमुखा: सन्ति । तन्त्र—मन्त्र- साधनानामप्यनेकान्युदाहरणानि तन्त्रशास्त्रेषु तन्त्रेषु च सन्निहितानि वरीवर्तन्ते देवीनां देवतानाञ्चोपासनाभिरपि बहव: साधका: सत्पुरुषाश्च दीर्घजीविनोऽजरा अमराश्च सञ्जाता: सन्ति । महर्षि श्री लोमश मार्कण्डेयादयोमहात्मानोऽस्य प्रबल-प्रमाणस्वरूपेण दर्शिता दरीदृश्यन्ते । सप्त चिरजीविनो, येषु-अश्वत्थामा बलिव्यांसो हनुमांश्चविभीषण: । कृप: परशुरामश्चैतेसप्तमहापुरुषा: प्रमुखा: सन्ति । एतेषु श्री पवनात्मजाय श्रीमते हनुमते. सीता—जनन्या: अजर अमर गुणनिधि, सुत होंऊ । करहिं सदा रघुनायक छोहू । इत्येतदमोघवरदान मिलितमेवास्ति । श्री विभीषण-कृपाचार्य—परशुरामादीनां शुभाभिधेयेस्तु सर्वे जना: परिचिता एव सन्ति ।

तन्त्रसाधनायामेकमुदाहरणं द्रष्टव्यमेवास्ति । सुरकात्यायनीदेव्याश्चतुर्वरण—मन्त्र-साधनया तत्कर्तु: साधकस्य पञ्च शतवर्ष मितंजीवनं जायते ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तथा च सा साधना अष्टशत-मितेभ्यो भोजनं ददातीति। साधकस्य स्वर्गमने च तस्य पुनरुच्चकुले जन्म जायते। इति निश्चितमेवास्ति। ऋग्वेदोपवेदे चायुर्वेदे त्वनेकप्रकारकै रसैः रसायनैरौषधिभिश्च कायाकल्पस्य प्रयोगाः प्रदर्शिताः सन्ति। केवलं त्रिफलाचूर्णस्य सालम-मिश्री तिनाम्न्या सह घृतेन च सार्धं सेवनेन पञ्चशतवर्षाणां पुरुषस्यायुर्भवतीति निश्चप्रचमुत्तरदायित्वपूर्णं कथनमस्तीति।

एतत्तु सर्वविदितमेव वर्तते। यत् "सञ्जीविनीबूटी—प्रदानेन श्री वीर-लक्ष्मणः पुनर्जीवितोऽभवत्। अस्यामेव कोटौ पुनर्नवा (विषखपरा) इति नामिका दिव्यौषधिरायाति। यादृशमस्याभिधेयमस्ति? तादृशमेव पुनर्मानवेभ्यश्चिर यौवनमेषा दिव्यौषधिः प्रददातीति। औषधिरेषा चिरजीवन प्रदात्री इतिसत्यमेवास्ति यदि मुहूर्तविशेषे - इयमौषधिः साधकेन गृहीत्वा सेव्यते? तर्हि विशेषरूपेण स्वप्रभावं दर्शयति। ज्योतिः शास्त्रे पुनर्नवा-सेवनार्थं - निम्नमन्त्र - स्वर -लग्न पर्व - ग्रह - नक्षत्राणि निर्दिष्टानि सन्ति। मन्त्रः— ओ३म् 'अच्युताय नमः"। औषधिसेवनसमये मन्त्रोऽयमष्टोत्तर-शतवारं जपेत्। इति। स्वरः— चन्द्र—मात्रम्। चन्द्रमा सम्पूर्णौषधीनाम-धिपति स्वीकृतोऽस्ति। अत एव स्वरवैज्ञानिकैश्चन्द्र स्वरः पुनर्नवासेवनार्थ-मुपदिष्टो वर्तते। तात्पर्यमिदमस्ति। यद्-यदा वामस्वर प्रचलेत तदैव पुनर्नवा औषधि - सेवनं श्रेयस्करम्। शुभग्रहाः यथा - सोमो बुधस्तथा गुरुः तथा च शुक्रो ग्रहः शुभः स्वीकृतोऽस्ति। अतः ग्रह—योगे पुनर्नवानामिकौषधिः सेवनीया इति।

नक्षत्राणि हस्त, पुनर्वसु श्रवण, मृगशिरः, स्वातिकृतिका ज्येष्ठा-शतभिषा-धनिष्ठा-इत्येतेषु नामकेषु नक्षत्रेषु पुनर्नवा सेवन सर्वोत्तमं निगदितमस्ति। लग्नम्-षष्ठ सप्तमाष्टमद्वादशभावेषु गेहेषु शुभो गुरुर्ब-लवान् भवति अतः सर्वैः पुरुषै रायुर्वृद्धिकारके शुभे योगे पुनर्नवौषधिसेवनं श्रेयस्करं भवति इति। अस्मिन् कार्ये जन्म-चन्द्रमा वर्जितो भवति।

पुनर्नवा कल्प :-

भावप्रकाशनिघण्टोः पृष्टसंख्याया २२३,२२४ पृष्ठयोरस्य विवरणं प्रदत्तमस्ति। यत्संक्षेपेणेत्थं वर्तते। पुनर्नवायास्त्रीणि चत्वारि वा प्रकाराणि भवन्ति। पुनर्नवायाः पत्राणि वर्तुलाकाराणि गोलाकाराणि वाभवन्ति पुष्पाणि, रक्तवर्णानि श्वेतवर्णानि भिन्नभिन्न स्वरूपाणि च भवन्ति। एतेषु पुष्पेषु श्वेतवर्णपुष्पस्य नाम विषखपरा" अस्ति। तथा च रक्तवर्णग्रन्थेश्च 'धुनेरा" इति नामवर्तते। "विषखपरा" इत्यस्य स्वरूपं रूपं वा पृथिव्यां विस्तृतं प्रसृतं वा भवति। पर्णानि वर्तुलानि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोलाकाराणि रक्तवर्णानि च भवन्ति पुष्पाणि च श्वेतवर्णानि जायन्ते । श्वेतवर्णा पुनर्नवा · यथा—

पुनर्नवा श्वेतमूला शोथघ्नी दीर्घपत्रिका ।
कटुः कषायानुरसा पाण्डुघ्नी दीपिनी परा ।

शोफानिल-गर-श्लेष्महरी वृण्योदरप्रणुत् । इत्येतानि संस्कृतभाषायां पुनर्नवाया नामानि सन्ति । पुनर्नवाया गुणाः- यथा · पुनर्नवा कटुः, कषाया अतिशयेनाग्नि - दीपिका । पाण्डुशोथरोगघ्नी तथा च वृणोदर-रोग नाशिनी च वर्तते । विभिन्नासु भाषासु पुनर्नवाया विभिन्नानि नामानि निगद्यन्ते । यथा -

हिन्दी भाषायां · श्वेत पुनर्नवा । बङ्गाभाषायां श्वेतगांण इति । महाराष्ट्र भाषायां: होटुली "इति । कन्नड़ भाषायां बिलीय दुबेल्लढ़किलु' इति तमिलभाषायान्तु "हुकरत्तेकिरे" इति । जर्मनभाषायां 'इन्दकूकी" इति । आङ्गलभाषायां 'Spreadinghoweed" इति कथयन्ति । लैटिन-भाषायाञ्च-"वार्का विवाडिपूयूका' इति वदन्ति ।

तन्त्रानुसारमोषधिग्रहणनियमाः - यथा

औषधि-सेवनात्पूर्वं तस्यै विधि - पूर्वकंनिमन्त्रणं देयम् औषध्युन्मोच-नादेक - दिवस - पूर्वञ्च तत्स्थलं गत्वा, यत्र एषौषधिः स्थिता स्यात्-तत्र पीता यक्षतानि नीत्वा · ततृस्थाने संस्थापयेत् । तथा च कलशैकजलं समर्प-यित्वा प्रार्थनामिमामित्थ प्रकुर्याद् यद् -

हे देवि ! अहं स्व - कार्यसाफल्यार्थं त्वां नेतुं सादरं निमन्त्रयामीति ।

औषधि - समुत्पाटन - नियमाः । यथा -

पुनर्नवौषधि - समुत्पाटन -समये सर्वप्रथयं कलशे जलं गृहीत्वा तदौषधि-पुनर्नवोपरि समर्प्य च धूपदीप - नैवेद्य - प्रसाद - मिष्टान्नादिकमेवमेव फलानि पुष्पाणि चन्दनाक्षतादीनि समर्पणीयानीति । औषधि - पूजनञ्च विधातव्यम् । तत्पश्चात् प्रार्थनैषा कर्त्तव्या । यद् · हे देवि ! यत्कार्यार्थं त्वदीयं ब्रह्मविष्णु-महेश्वरैः खननं कृतम् । तदर्थमेवाहं स्वकार्यपूर्तये त्वदीयं खननं विधास्ये" इति ।

एवमुक्तवौषधिमुत्पाटयेत् । नियमोऽसौ सर्वौषधि समुत्पाटनार्थं वरीवर्तते ।
पुनर्नवा - कल्प - यथा

पौषमासीय - शुक्लपक्षस्य रविवासरे प्रातः कालं मूलेन पर्णैश्च सम श्वेत - विषखपरा-नामिका पुनर्नवा समुत्पाटनीया । पुनर्नवां ताञ्च शोष-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यित्वा पिष्ट्वा च चूर्णं विदध्यात्। तदनु घृतेन विषममात्रया मधुना च साकं मर्दयित्वा यत्नेन घृतपात्रे संस्थापयेत्। वदेच्च यद् हे देवि ! मासमेकानन्तरं कथितौषधिः पुनर्नवा चम्पासदृशं भविष्यतीति। पुनःश्चैत्र वैशाख - मासयो र्वसन्त-समये पावनो भूत्वा प्रयत्नपूर्वकं मासमेकं सेवेत। सेवनेनैतेन मलमूत्रयोः सुगन्धिर्जायते। शिरोरुहाश्च भ्रमरपक्षवत - कालिमानं भजन्ते। शरीरञ्च गौरवर्णं गौराङ्गं वा सञ्जायते बृहस्पतिरिव तस्मै विदुषे पञ्चशतवर्षाणामायुषः प्राप्तिर्जायते।

एतत्पुनर्नवा = कल्पतुल्योऽन्यः कश्चिदपि कल्पः पृथिव्यां नास्ति इति। पुनर्नवा - सेवनेन, देहे यौवनं सुस्थिरीजायते। विश्वेऽस्मिन् आयुर्विज्ञानविशेषज्ञैरेवं वनस्पतिशास्त्र - विशेषज्ञैरपि पुनर्नवायाश्चास्या दिव्याया औषधिनाम्न्याः सम्बन्धे विषये चाप्यधिकमन्वेषणं प्रयोगीकरणञ्चापि प्रयत्नपूर्वकं विधेयमिति। यतः साधारणो जनोऽपि पुनर्नवौषधिविज्ञः परिचितश्च भवेदिति। एतद्विशेषज्ञानामिद परम कर्त्तव्यमेवास्ति। यतः

दिव्या पुनर्नवा प्रोक्ता दिव्यायुः- सौख्यदायिनी।
रामस्वरूप - रूपाय स्वास्थ्यमेधादिदा शुभा॥
पुनर्नवा - कल्पः सर्वेषामेव हितार्थं मया लिखित इति।

पाठकाः प्रार्थ्यन्ते

मान्याः !

प्रवर्तमानवर्षस्यापि अर्धभागो व्यतीतः। पत्रप्रेषणेनापि वार्षिकशुल्कप्रेषणार्थं प्रार्थना कृता किन्तु स्वल्पैरेव महानुभावैः शुल्कप्रेषणं कृतम्। अतः सविनय प्रार्थ्यते यत् शीघ्रमेव शुल्कप्रेषणेन सहायता क्रियताम्।

——सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



शास्त्री ओम्प्रकाश राही
आचार्य, एम. ए., एम. फिल.

★

१. उपाय: –

विवदतोर्मध्ये एक: प्राह—
साधारणपुरुष: नास्म्यहम् ।
"धनार्जनस्य शतमुपाया:",
पुस्तकमेतदहमलिखम् ॥
पप्रच्छान्य: कथं तर्हि,
भिक्षा त्वया याच्यते ?
प्रत्युवाच पूर्वस्तम् -
एषोऽप्युपाय: विद्यते ॥

२ परीक्षा फलम् :-

अध्यापक: पप्रच्छ ब्रूहि छात्र !
मधुरं कटु च किं फलम् ?
हसन्नाह छात्रश्शीघ्रं —
तदस्ति भगवन् परीक्षाफलम् ॥

३, हृद्रोगोपचार :–

दूरस्थं निजप्रेमिण चिकित्सकम्
प्रेमिकाऽलिखदेकं पत्रम् ।
त्वं तु नायासि मित्र !
इतश्च वर्धते हृद्रोग: नित्यम् ॥
पत्रोत्तरे लिखित कान्ते !
पूर्णविवरण प्रेषय शीघ्रम् ।
व्यस्ततयाऽऽगन्तुमसमर्थः,
प्रेषयिष्याम्यौषध तुभ्यम् ॥

— रा. उ. पि. बोगधार
सिरमौर—(हि. प्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अश आर-रसधार श्रेयः खण्डः

रूपान्तरकार : श्री शान्त प्रकाश: सत्यदासः ।

मूल्यम् : दश रूप्यकाणि ।

प्राप्तिस्थलम् : सी—५/बी सी लाइन

विरला ग्राम—नागदा जं० ४५६३३१ (म. प्र.)

पुस्तकमिदं ७६ पृष्ठात्मकमस्ति सावरणम् । पुस्तकेऽस्मिन्-३०० मितानां उर्दू साहित्यस्य गजलेभ्य: रोचकपद्यानां संस्कृत रूपान्तरं कृतमस्ति । यथा :—

उर्दू:— गजब है कि दिल में तो रक्खी कदूरत ।
करो मुंह पै हम से सफाई की बातें ।

संस्कृत:— अहो मानसे शत्रुतायाः निवासः ।
तथापि क्रियन्ते मिथः- प्रेमवार्ताः ।

एवं किल हृदयस्पर्शि उर्दू-पदानां संस्कृतानुवादः तेष्वेव लयछन्दःसु कृतोऽस्ति येषु किल उर्दू भाषायाम् । उर्दू हिन्दी संस्कृत विज्ञाः सर्वेऽपि पदानामेषामानन्दं समानरूपेण प्राप्तुमर्हन्ति । देशस्य ऐक्यभावनयाऽनूदितमिदं साहित्यं महत्वपूर्णमस्ति । पुस्तकस्य मूल्यं स्वल्पम् । अतोऽधिकाधिक संस्कृतप्रणयिभिरिदं पठनीयमस्ति श्री शान्त प्रकाशः सत्यदासश्च धन्यवादार्हः येन प्रयासोऽयं विहितः । मुद्रणं शुद्धमस्ति । एवं विधपुस्तकस्यावरणमधिकाधिकमाकर्षकं भवितुं शक्नोतिस्म परन्तु संस्कृतपुस्तकानां विक्रयाऽभावात्तथा कर्तुं न पारितं स्यात् रूपान्तरकारेण । तथाप्यभिनवोऽयं प्रयासः सर्वेषाञ्च स्वागतार्हः ।

— सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विंशतिशताब्दीये आधुनिके नलदमयन्तीये नाटके- – पूर्वरागविप्रलम्भश्रृङ्गाररसस्य विवेचनम्

–सुश्री विमला देवी
(संस्कृत अध्यापिका)

संस्कृतकाव्यशास्त्रे आद्याऽऽचार्यस्य रससम्बद्धो भरतमुनेः प्रसिद्धसूत्रमस्ति' यत् सर्वमान्यम्—

"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" । १

अर्थात् विभावानुभावव्यभिचारिभावानां संयोगादेव रसोऽवाप्यते सामाजिकैः भरतस्य अस्मिन् सूत्रे मूलतः रसनिष्पत्तिः प्रतिपादिता । एतत् सूत्रं रसविषये आचार्याणां विवेचनस्य आधारत्वेन शस्यते ।

संस्कृत साहित्ये रसस्य महत्त्वं प्रतिपादयन् कथ्यते यत् काव्यं प्राणविहीनशरीरवत् भवति अतः कस्यां अपि रचनायां रससिद्ध्यर्थं घटनायां वैविध्यमापाद्यते । इत्येवं रसेन परिपुष्टं काव्यं साहित्यजगति सामाजिकान् नितराम् आकर्षति । एवं कविः निजकृत्यां रसस्य प्रकृष्टत्वं दर्शयन् दर्शकान् आनन्दाब्धिमग्नान् विधत्ते । एतादृशः काव्यरसनिर्भरः कविः साहित्यजगति जयति । वस्तुतः रसैव आनन्दप्राप्त्याः मूलाधारः वर्तते । कविना काव्यस्यान्तर्गतं रसमाश्रित्य विशेषरूपेण ध्यातव्यम् ।

साहित्यदर्पणकारो विश्वनाथो नाटके एक एव श्रृंगारो वीर एव वाऽङ्गीभवेत्. अन्ये सर्वे रसा अङ्गम् इति मनुते । तस्य कथनमस्ति–

"एक एव भवेदङ्गी श्रृंगारो वीर एव वा ।"

आधुनिकं विशंतिशताब्दीयं नलदमयन्तीयं नाटकं प्रेमपूर्णमस्ति यतः अस्मिन् नाटके नायकनायिकायाः प्रेमकथा वर्णिता । अतः श्रृंगाररसः आवश्यकः । श्रृंगारेऽपि कवये विप्रलम्भश्रृंगारं रोचते 'परञ्च इदानीं प्रस्तुते

१. नाट्यशास्त्र, काव्यमाला, –४२, पृ० ३

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शोधपत्रे नाटककारेण कलिपदाऽऽचार्येण शृंगारस्यान्तर्गतं यत् पूर्वरागविप्रलम्भं वर्णितम् तस्य एवात्र समीक्ष्यते।

सर्वप्रथमं विश्वनाथेन निम्नरूपेण विप्रलम्भ-शृंगारलक्षणम् कृतम्, यथा—

"यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ।"

— इत्यादि ★

अधुना आलोच्ये नाटके विप्रलम्भान्तर्गते पूर्वरागविप्रलम्भविषये निम्न-निदर्शनम् द्रष्टव्यम्।

"अद्य तु कामेन सुदुःसहामवस्थां नीतः प्रकाशमानं भावं रक्षितुकामः पुरोपपवनविहारव्याजमाश्रित्य इह मिलितः (विभाव्य) अथ कीदृशीयं विदर्भनन्दिनी यां ललितलावण्यां चित्रगतामीक्षमाणः सुतरामधीरतां यातो मे प्रियवयस्या यादृशी चित्रगता सा परिदृश्यते, यदि सा तथैव, तदा समुचितं एव तादृशो मानसनिर्बन्धो वयस्यस्य किन्तु तत्रैव भूयान् संशयः समुदेति। अपि संभवति मानुषे लोके तथाभूता कमनीयलावण्य सम्पत्।"

अत्र विदर्भदुहिता दमयन्ती आलम्बनः, तस्याः स्मृति, चित्रे चित्रितं सौन्दर्यश्चउद्दीपनः, उत्सुकतादयः व्यभिचारिणः, रतिश्च स्थायिभावेन अत्र अदृष्टवतीं दमयन्तीमिच्छायां व्याकुले नले पूर्वराग विप्रलम्भः व्यक्तः।

निम्नप्रसंगेऽपि कीदृशं पूर्वरागविप्रलम्भ रमणीयम्? यथा—

"प्रिय प्रथमदर्शनात् प्रभृति चित्रशिल्पे नवे,
मनो मधुरवासनारसविशेषमुग्धायितम्।
अहो बत पदे पदे हृदयभावविद्रावणी,
प्रयत्नविनियोजना सपदि किञ्च मिथ्यायते॥"

अत्र प्रियप्रथमदर्शने इति स्थायिभावः दमयन्ती आलम्बनः, चिन्ता-स्मृत्युत्कण्ठादयः व्यभिचारिणः, चित्रशिल्पोद्दीपनेन पूर्वरागविप्रलम्भ परिपाकं मर्मस्पर्शी।

अन्य स्थलेऽपि पूर्वरागविप्रलम्भं दृश्यते, यथा—

"गण्डाभोगे विलसति परं पाण्डिमा प्रौढ़कान्तिः,
वाचां मध्ये स्फुरति सहसा नामभागः प्रियायाः।
श्वासो दीर्घं प्रसरति चिरं शून्यशून्येव दृष्टिः,
क्षीणा प्राणा न चलति पुरो विह्वला देहयष्टिः॥"

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अस्मिन् पद्ये रतिः स्थायिभावः, आलम्बनः दमयन्ती, अभिलाषा-चिन्तास्मृतिसंप्रलापादयः अनुभावाः, वैवर्ण्यकृशत्वादयः व्यभिचारिणः पूर्वरागविप्रलम्भं मनुते ।

उक्तञ्चान्यत्रापि पूर्वरागविप्रलम्भविषये, यथा—

"इन्द्रजालोपनीता सा वस्तुनः परिणामवत्,
सहस्रेवान्यथाकारा दृश्यसे न स्वरूपतः ।"

अत्रापि रति स्थायिभावः आलम्बनं च दमयन्ती, चिन्तास्मृतिगुणकथनोद्वेगादयः व्यभिचारिणः इन्द्रजालेन प्रियायाः स्पर्शः उद्दीपनः, प्रियायाः कटाक्षादयः अनुभावैः पूर्वरागविप्रलम्भः प्रकटितः ।

निम्ननिदर्शनमपि पूर्वरागविप्रलम्भगर्भितं, यथा—

सा कल्पपादपविसृष्टमनर्घरत्नं,
क्षीरोदसागरभवा च सुधामनोज्ञा ।
मन्दाकिनीकनकपङ्कजविन्दशोभा,
सा कापि पुण्यपरिपाकफलस्य सीमा ।

अत्र स्थायिभावः रतिः, आलम्बनं च दमयन्ती, तस्याः विषये गुणकथनादयः व्यभिचारिणः तस्याः शोभायाः वर्णनं साधने कृते उद्दीपनैः पूर्वरागविप्रलम्भं प्रयुक्तम् ।

अन्यत्रापि उदाहरणे पूर्वरागं वर्णितम् , यथा—

"राज्यार्थं ननु चिन्तया विघटते सा मे मनोमन्दिरे, विच्छिन्नः परिकल्पनाव्यतिकरो भूयो न सन्तिष्ठते, प्रत्यक्षं तददर्शनेऽपि हृदये तद्दर्शनादुद्भवन्, आनन्दो न मयाद्य राजपदवीयोगादहो लभ्यते ।

अस्मिन् प्रसंगेऽपि रतिः स्थापिभावः दमयन्ती आलम्बनं तस्याः स्मृतिपाण्डुतोद्वेगादयः व्यभिचारिणः. आनन्दस्याभावेन अनुभावेन पूर्वरागविप्रलम्भः स्पष्टः ।

इदं निदर्शनमपि पूर्वरागविप्रलम्भाय युक्तम् , यथा—

"वह्निरेव कुसुम सुषमा हृदय तिमिरैः ममाच्छन्नम् ।
क्षितिधूड्गह्वरगेह लग्ने वह्निरातपे यद्वत ।।

अत्रापि रतिः स्थायिभावः, दमयन्ती आलम्बनः, पुष्पाणां शोभादयः प्राकृतिकसाधनानि: उद्दीपनं, तापादयः व्यभिचारिभिः पूर्वरागविप्रलम्भः कथितः ।

एवं प्रकारेण निम्ननिदर्शनादपि पूर्वानुरागविप्रलम्भाः पूर्णाः, यथा—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"सुषमा कुसुमनिरूद्धा यदि दयिता मा भवेदस्मिन् ।
काञ्चनमिव मणिवद्धं वनमिदमद्धा वसन्तीयम् ॥"

अपि च- "विना तल्लावण्यं वितथ इव वल्लीसम् यो,
विना तस्याः स्पर्शं कुसुममपि नो साधकजनः ।
अलं वा पुष्पाणां ललितरचना पादपतले,
न चेत् पद्मं नीरे कथमिव तदीयस्तुतिकथा ॥"

"चित्रे पुरा चतुरचित्रकरोपनीता,
सा चित्ततस्कर अवलोकिता मे ।
तस्मात् परं मनसि कल्पनया प्रणीय,
तन्मूर्ति सुतरां परिमोहितात्मा ॥"

"आदौ दृष्टा चित्रशिल्पे मया या,
सैवाभून्मे रागपात्रं महीयः ।
सा चेद् भैमी तत्र मे चित्तरागः ।
सा चेदन्या तत्र मे चित्तरागः ।"

उपर्युक्तेषु सर्वेषु प्रसंगेषु राज्ञः नलस्य दमयन्तीं प्रति पूर्वानुरागविप्रलम्भं वर्णितम् । इदानीं निम्नस्थले दमयन्त्याः नल प्रति पूर्वानुरागविप्रलम्भं कीदृशं रमणीयम्, यथा—

दम०- तदिदं श्रूयताम्, येन मे मनो नितरां अवसन्नम्, उक्तं देवहंसेन यथा, राजपुत्रि भवतीमधिकृता मदनेन सुतरां निषधराजो विकारं नीतः; किं बहुना स हि मदनमोहग्रस्तो राज्यचिन्तामातपेषु विन्यस्य चित्तनिर्वृत्तये सवयस्यो विलासोद्याने सरोवरसोपाने ऽवतीर्णः सुतरामेव ताम्यति ।"

अत्रापि स्थायिभावः रतिः, आलम्बनः च नलः, स्मृति उन्मादादयः व्यभिचारिण, शान्तिराभावैः अनुभावैः पूर्वरागविप्रलम्भः व्यक्तः ।

इत्येवं उपर्युक्तैः प्रसंगैः कलिपादाऽऽचार्येण आधुनिके युगे प्रस्तुते निजनाटके नलदमयन्तीरयाख्ये श्रृंगारान्तर्गते पूर्वरागविप्रलम्भरसस्य साफल्यरूपेण प्रयोगं कृतम् । वस्तुतः नाटकेऽस्मिन् नलदमयन्त्याः प्रेमकथा वर्णिता, तौ परस्परौ प्रदर्शनैव आकर्षिताः अभवताम् । अतः प्रस्तुते नाटके प्रथमेऽङ्के यत्र तत्र व्यक्तं पूर्वानुरागविप्रलम्भं दृश्यते, यस्मिन् कृतैः विलापैः सामाजिकानां मनसि दुःखं जनयति ते च तयोः संयोगमिच्छन्ति । निष्कर्षतः समदृष्ट्या कलिपादाऽऽचार्येण वर्णितं पूर्वानुरागविप्रलम्भं पूर्णतया मर्मस्पर्शी विद्यते यत् श्रृंगाररसस्य मूलम् अनेन रसेन नायकनायिकायाः प्रेम दृढ़ प्रतीयते एतदेव नाटकस्य सफलतारूपं भवति, स एव अत्र दृश्यते अतः नाटककारेण विरचितं इदं नाटकं पूर्णरूपेण सफलीभूतम् ।

— केन्द्रीय विद्यालय-२
डी० सी० डब्ल्यू पटियाला (पंजाब)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साम्प्रदायिकविभीषिका

प्राध्यापक हरिदत्त ग्वाड़ी "शैलज"
साहित्याचार्य एम. ए.

★

कश्मीराख्यां त्रिभुवनसुधासारसौन्दर्यभूतां
घाट्यां घोरा घटति घटना घातकै पाकपुत्रैः ।
केचित्हिंस्राः हननक्रियया तर्जयन्तः स्वदेशम्
पाकिस्तानं प्रतिदिनमहो ! भग्नधर्माः भजन्ति ।

जम्बूद्वीपे विघटनपरा अस्त्रशस्त्रादियुक्ताः
धर्मव्याजात् सकलयवनान् योधने योजयन्तः ।
'हित्वा वार्तां सपदि शिमला' कर्तयन्ति कुभालम्
हा हा भ्रातः ! भरतवसुधा भज्यते दह्यते च ।।

पंचापस्य शृणुतरवणे रावणै द्रावयन्तम्
खालिस्तानं निपतितकुतो पश्य धर्मान्धतेयम् ।
जाता यस्यां भगतसदृशाः सिद्धस्वातन्त्र्यवीराः
सेयं भूमिः विकलविधवा आसमन्ताद् विरौति ।।

रे रे शिष्याः । स्मरत प्रथमं शत्रवो ये गुरूणाम्
यैः संत्रस्तं वरशिशुद्वयं घातितं घोरपापैः ।
सन्देशार्थं भवतु भवतां शीषगंजस्थद्वारम्
हिंसाधर्मं त्यजत भजत नित्य सत् श्री अकालम् ।।

बोडोलैण्डम् विगलितमतो श्रूयते कामरूपे
वाञ्छन्प्रान्तं निजवशभव युद्धयते छात्रसंघः ।
लोभाकृष्टा कुपथभ्रमिताः किन्तु व्यामूढचेताः
अर्थाभावादपि च श्रयते शस्त्रसंघर्षमार्गम् ।।

गोर्खालैण्डम् शमितमपरं बङ्गभङ्गायजातम्
पाश्चात्यानां सततमथनादुत्थितं झारखण्डम् ।
खण्डं खण्डं भवितुमुदिता पश्यतामायभूमौ
हं हो भ्रातः ! सुनयविधुरा सर्वकारस्य नीतिः ।

दिव्यादिव्यैः सकलसुजनैः धीरगम्भीरवीरैः
उर्वीपुत्रैः विकलस्वजना यत्नतः रक्षणीयाः ।
रक्षायोग्या परमसुखदा संस्कृतिः संस्कृतञ्च
आब्रह्माण्डं जयतु विमलं राष्ट्रमेतद् ऋषीणाम् ।।

— हिमाचल केन्द्रीय महाविद्यालय
जांगला, रोहड़ू जिला-शिमला (हि. प्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीयसंस्कृतिः परिपोषकः कालिदासः

आचार्य सुरेशः

★

आदि कवि महर्षि वाल्मीकेरनन्तरं महाकवि कालिदासो भारतीय-संस्कृतिं पुपोष । तेन स्वकाव्यनाटकेषु विविधस्थलेषु भारतीयसंस्कृत्या समुज्ज्वलं चित्रमुपस्थापितम् अनेन कविना न केवलं उपमा चमत्कारेण शृंगार रस प्रयोगेन स्व काव्यमलंकृतम् अपितु स्वकल्पना-माध्यमेन हिन्दूनां पुनीतसंस्कृतिः अनेक प्रसंगेषु उद्‌घाटिता । अस्य रघुवंश महाकाव्यम् पाठकानां हृदयेषु गोः सेवाया महत्वम् सततं सञ्चारयति । नृपदिलीपो यस्या शुश्रूषया पुत्र रत्नं प्राप्तवान् सा भारतीयसभ्यतायाः मूलम् कामधेनुः वन्दनीया, प्रथमार्चनीया प्राणदात्रिः । अमृतदायिनी हन्त ? इदानीम् तुच्छ स्वार्थवशेन वधस्थानेषु विक्रीयते च अजावत् । धिक् हिन्दूनां जीवनं सर्वमिदं श्रुत्वा दृष्ट्वा अपि येषां शरीरे रोमाञ्च न भवति स्व संस्कृतेः स्व सभ्यतायाः, स्वमातुः रक्षार्थं दृढव्रताः न सञ्जाताः । किं अद्यापि दिलीप-सदृश शुश्रूषया भारतीयाः न किञ्चिदपि प्राप्तुं शक्नुवन्ति ? हा-नास्तिकता ! हा-पाश्चात्यानुकरणम् ! हा-भारतदुर्दशा, यस्या शरीरे सर्वतीर्थानां देवतानामधिवासः सा धेनुरूपा देवी, किञ्चिद द्रव्यलोभवशेन हन्यते । किं देवभूम्यां ऋषि जन्मभूम्याम् म्लेच्छाचारः ? नास्ति कोऽपि रक्षकः. वेतनवृद्ध्यर्थं तु अनशन कुर्वाणाः वहवः श्रूयन्ते प्रतिदिनं परं केनापि भारतीयेन तस्याः रक्षार्थं हिंसाविरोधार्थं च स्वप्राणानां त्यागः अनशनं कृतम, याः मूकत्वेन निज सुतैः स्वप्राणानां रक्षां याचते । चेत् वधोऽयं प्रतिदिनं क्रमशः पूर्ववत् वृद्धि प्राप्तः निः सशयं हिन्दूनां अस्तित्वमपि विलयं गमिष्यति. हवेरभावेन यज्ञ परम्परावरुद्धा भविष्यसि अस्यां दशायां आशास्महे चेदय उच्चघोषः हिन्दूनां कर्णकुहरेषु प्रविष्टः स्यात् -

"उत्तिष्ठ ! जाग्रत उत्थाय च स्व संस्कृतिं रक्षत"।

अस्माकम् स्मृतिग्रन्थेषु हिन्दू शब्दस्योत्पत्तिविषये कथितम्ः—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गोषु भक्ति र्भवेद्यस्य प्रणवे च दृढा मतिः ।
पुनर्जन्मनि विश्वासो स वै हिन्दुरिति स्मृतः ।।
(अत्रिस्मृतिः) अतः

भारतीयाः, पाश्चात्य संस्कृत्या अन्धानुकरणेन युष्माभिः स्वसंस्कृति-रुपेक्षिता । एषा भारतभूमिः ऋषीणां जननी, देवानां जननी, अवताराणां जननी ज्ञानीनां धर्मधुरन्धराणां, महावीरपुरुषाणां पुण्यतीर्थानां धरित्री । किं स्वर्णं विहाय लौहाकांक्षा, शान्तिं विहाय अशान्त्यान्वेषणम्, सत्यमुपेक्ष्य असत्यानुसरणम् अहिंसापरिपालनेन हिंसावतारः भोगानृत्यक्त्वा भोगासवित, उर्ध्वं गच्छद्भिः अधोपतनं, यज्ञ भूम्यां निवसद्भि वधभूमिअभिलाषा, ज्ञानं विहाय अज्ञानपिपासा, एषा रामकृष्ण जननी गांधी जवाहरजन्मभूमिगौतमनानकभूमिम् पुण्यभूमिम् वन्देऽहं भारत भूमिम् ।

प्राचीनकालादारम्य अद्यावधि कविभिः स्वजन्मभूमि भारतीय-संस्कृति श्चानुरागवशेन पदे-पदे प्रशसिता । कविवरकालिदासस्यापि अयमेव प्रयासः ।

नीलत्वम्

डा॰ लेखराम शास्त्री

हालाहलं मिष्ठमिदं, दिनानुदिनं विवर्धमानं ।
पीत्वा पीत्वा पुनः पीत्वा कंठ शिवस्य नीलत्वमेति ।। ★
तृष्णया अतर्प्यया संघातेन चोत्पद्यमानं ।
पीत्वा पीत्वा पुनः पीत्वा, कंठे शिवस्य नीलत्वमेति ।।
अनिच्छयापि स्वकीयया, संसारेण बलाद्दीयमान ।
पीत्वा पीत्वा पुनः पीत्वा, कंठः शिवस्य नीलत्वमेति ।।
बलाबलैः परस्परं, प्रेम्णाऽप्रेम्णा वा कर्ष्यमाणं ।
पीत्वा पीत्वा पुनः पीत्वा, कंठः शिवस्य नीलत्वमेति ।।

★ नीलोऽपि कंठः पुनः पुनः नीलत्वमेति अन्यच्च शिवस्य कल्याण-मार्गिणः अनीलोऽपि कठः नीलत्वमेतीति ।

— गव. संस्कृत कालेज,
सोलन (हि. प्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवभूमि हि पञ्चाम्बुः

आचार्य श्याम लाल शर्मा
व्याकरणाचार्य (एम. ए. संस्कृत)

★

अद्य संसारस्य एव दशा सघर्षमयी वर्तते। परितो राक्षसासुरवृत्तीनां साम्राज्यमस्ति। पर भारतस्य सर्वासु प्रमुखसमस्यासु प्रमुखा इयं पञ्जाबसमस्या। यतोहि एतया समस्यया पञ्जाबनिवासि-निर्दोष जनानां पीड़न, दलनं, शोषण निवासकरणादिकुकृत्यं प्रतिदिवसे सततं एधाते। मातुर्भगिन्याः कन्यायाश्च विविधात्याचारापमानादिकं शिखोग्रवादिमूर्खैः। गोलिकाप्रहारकरणे अत्याचाराचरणे लुण्ठनोत्पाटनादिकार्यकरणे लज्जां न अनुभवन्ति उग्रवादिखलाः। सम्पूर्णे पञ्चाबुप्रदेशे पीडित जनानां चीत्कार एव श्रवणाय लभ्यते। चीत्कारेऽस्मिन् शब्द स्फोटो भवति यत्—

"हमारी आंखे भी है वीरान, हमारा दिल भी है खाली।
चन्द आंसू भी नहीं बचे, खुद पे बहाने के लिए"

"आत्मवत सर्वभूतेषु" अथवा 'आत्मनः प्रतिकूलानि" "वसुधैव कुटुम्बकम्" इत्यादि भावना कुत्रापि नैव दृष्यते न च श्रूयते। तत्र जायते जिज्ञासा यत् एवं सति देशस्य किं भविष्यति? सर्वं विदितमेतत् यत् पञ्जाब भमिः वेदोत्पत्तिभः मन्यते। वाल्मीकिप्रभृतीनां नैकेषां ऋषीणां च सा जन्मस्थली कर्मस्थली च अवर्तत परं खेदस्य विषयोऽयं यत् पुरा यत्र दुग्धदधि - नद्यः प्रवहिन्त स्म तत्राद्य निर्दोषजनरुधिरनद्यः दृष्यन्ते अस्माभिः।

शिखानां भ्रमोऽय यत् हिन्दुशिखौ च परस्परं भिन्नौ। यतो हि व्याकरण दृष्ट्याः दर्शनेन शिष्यशब्दस्य अपभ्रंशोऽयं शिख शब्दः। शिखशिष्ययोः नास्ति भेदः उक्तञ्चापि कवीरेण यत्—

'हिन्दु शिख दोह एक हैं, विभ विचार कच्छ नाहि।
जल ते उपजहि जियों, जलि ही विखै समाहि।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कोऽपि धर्मः हिंसायाः पाठं न पाठयति उक्तञ्चापि-

"मजहब नहीं सिखाता आपस में वैर रखना ।
हिन्दु है हम वतन है हिन्दुस्तान हमारा" ।। इति ।।

धर्मः विश्वजनीनो व्यापकश्च पदार्थोऽस्ति । धर्मे नास्ति संकीर्णतायैः तथा च लुण्ठनादिकुकृत्याय किमपि स्थानम् । धर्मोऽबं महान् विशालः पदार्थः । वस्तुतो धर्म एव हि सर्वत्र एकात्मानुभूति जनयति, संकीर्णतां समूलं उन्मूलयति, सर्वानपि अत्याचारान् शमयति । उक्तं चापि—यथा-

श्रूयतां धर्म सर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् । इति ।।

प्रभु कृपया यदि सर्वे गुरुधर्मानुयायिशिखजनाः शांतिदया-निर्दोषजनकारुण्यं करिष्यन्ति तर्हि पञ्जाव प्रदेशः साक्षात् देव लोको भविष्यति । विश्वशान्तिश्च स्वयं एव सिद्धा भविष्यति ।

आतंको उग्रवादश्च द्वावेतौ देश नाशको ।
विहाय शक्तिः प्राप्या वै प्रार्थये शिखवन्धुभिः ।।

पञ्जाबस्योग्रवादं चेत् सर्वकारः प्रणाशयेत् ।
देव भूमि हि पञ्जाबु देव लोको भविष्यति ।। इति ।।

पूर्व प्रवक्ता—

श्री वसिष्ठ संस्कृत विद्या पीठ
तुङ्गेश जिला शिमला (हि. प्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



आचार्य पूर्णचन्द्र भार्गव

★

तर्ज—तुम्हीं मेरे मन्दिर तुम्ही मेरी पूजा तुम्हीं देवता हो।

न येषां मनस्सु प्रकामं प्रमादो,
जनास्ते परित्यज्य मोहं भवस्य ।
सदैवात्र भीमे च कालि प्रसिद्धे,
विशुद्धौ त्वदीयौ चरणौ भजन्ते ॥

कथं ते स्वरूपं कथं वा बलन्ते,
विमूढ़ा ग्रहीतुं हि शक्ता भवेम ।
नैवात्र किञ्चिद् मनो मे समर्थं,
त्वमेवात्र माये ऽव मां तान् समस्तान् ॥

हृदि ज्योतिरायातु देवि त्वदीयं,
न चान्यत् मनो वाञ्छितं मे जगत्याय् ।
इदं जीवनं मेऽस्तु भक्त्या च शान्तं,
परित्यज्य गर्वं जगज्जालजन्यम् ॥

इयं प्रार्थना मे विषादेनपूर्णा,
बहु व्याधि सन्देह सन्तापजन्या ।
समागच्छ शीघ्रं प्रहतुं प्रबुद्धे.
ममाज्ञानमेतत् करालं महद्धि ॥

— ग्राम पोस्ट डुमैहर
जिला सोलन, (हि. प्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथानकम्

स्वतन्त्रता

कु. कुसुमलता
सुपुत्री:- सोहनलाल शर्मा,

★

आशिता अद्य प्रभृति: एव महाविद्यालयं गन्तुं प्रारभत। तत्र सा सर्वं नव इव पश्यति स्म। यतो हि तस्या इदं प्रथमं दिनमासीत्। बहवो दिवसा व्यतीता: प्रतिदिनं गृहेऽऽगत्य यदा सा महाविद्यालयीयं दैनिकं जीवनं स्मरति तदा स बालक: अधिकरूपेण स्मरणम् आयाति य: तां सर्वदा स्नेहपूर्णया दृशा पश्यति स्म।

एकदा सा महाविद्यालये किञ्चित्समयपूर्वम् आगता। तत्र सा अवलोकितवती यत् सोऽपि बालक: तत्र तिष्ठति। परस्परम् अवलोक्य, अजानन्तौ एव तौ आकर्षितौ जातौ। अभिवादनानन्तरम् आशिता अपृच्छत्-किं तव नाम ?

'अंकित:' इति स स्वनाम अकथयत्।
आशिता अपि स्वनाम प्रकटितवती।

द्वावेव स्वाभाविकेन स्नेहेन आप्लावितौ जातौ। तयो: मिलन क्रम: दैनिक जीवनस्य अङ्गं जातम्। वार्तालाप - प्रसंगे आशिता उक्तवती यत् "तस्या: न कोऽपि भ्राता अस्ति भो अंकित! अहं त्वां भ्रातृबन्धनेन व्यवहर्तुम् इच्छामि।"

अंकितोऽवदत् -"अयि आशिते! अहमपि त्वां स्वां भगिनीम् मन्ये अत: रक्षाबन्धनोत्सवे त्वया रक्षाबन्धन कार्यम्।"

यत: अंकितस्यापि न काऽपि भगिनी आसीत्। शून्यमिव अनुभवति अंकितो भगिनीं विना तथैव आशिताऽपि भ्रातरं विना।

एकस्मिन् दिने आशिता अवदत्। भो भ्रात: ! अद्य त्वया मम गृहे आगन्तव्यम्, अहं तव हस्ते रक्षासूत्रं बद्धुमिच्छामि। अंकित: तथैव अकरोत्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सार्धं सा तस्या गृहे प्राप्तः ।

गृहे आशितां विहाय न कोऽपि आसीत् । तस्मिन् आगते तस्याः प्रसन्नता आकाशम् अस्पृशत् सा अनुभवति स्म यदद्य गृहं पूर्णं इवास्ति ।

आशिता रक्षासूत्र हस्ते धृत्वा अवदत्—अयि भ्रातः ! अद्य प्रभृति स्वभगिन्याः रक्षाया भारः तवोपरि भविष्यति ।

अंकितोऽवदत् - अयि भगिनि ! अद्य रक्षाबन्धनोत्सवस्तु नास्ति, परं श्वः स्वतन्त्रता दिवसोऽस्ति, इति हर्षस्य विषय ।

आम् भ्रात ! यदि वयम् अद्यापि परतन्त्रा अभविष्याम तदा न जाने अस्माकं किदृशी दशा अभविष्यत् ।

"अयि भगिनि ! अस्माकं कृते इदं गौरवाय कल्पते यदद्य वयं स्वतन्त्र-देशस्य नागरिका स्मः " अंकितः प्रत्युत्तरमदात् ।

आशिता अकथयत् – अस्तु भ्रातः ! अधुना इदं रक्षासूत्र बध्नातु । रक्षासूत्रम् हस्ते गृहीतमेवासीत् तदैव कस्यापि पादध्वनिः कर्णयोः पतिता दृष्टम् अरे ! इयं तु मदीया जननी । मातरं दृष्ट्वा द्वावेव सन्नौ जातौ ।

तौ सार्धम् उपविशन्तौ दृष्ट्वा मातुः क्रोधः सीमानम् अतिक्रामत् अवदत् च हन्त ! मम सम्मानं धूलिसात्कृतं त्वया । सम्प्रति तु केवलं दश दिनानि एव महाविद्यालये यापितानि नवयुवकानाम् आगमनमपि आरब्धम् मया स्वप्नेऽपि न चिन्तितमासीत् यत्वया इत्थं विधीयते तस्य परिणामः इदृशः भविता । किं लज्जा अपयाता ! किं मृतस्य पितुः स्मरणं नैव आगतम् ।"

आशितायाः नेत्रयोः अश्रूणि समागतानि उक्तवती च नहि जननी, नहि जननी नास्ति ईदृशम्, एवमुक्त्वा भूमौ अपतत् । पतन समये एव तस्याः प्राणाः निर्गताः ।

अंकितः मुहुर्मुहुः हा ! भगिनि ! हन्त भगिनि ! मामपि सहैव नय एवम् आकारयन् रोदितिस्म ।

आशितायाः जननी तमपि बलात् नीचैः पातितवती । सोऽपि तत्रैव श्वासान् अत्यजत् । अपरेद्युः तयोः चिता प्रज्ज्वलतिस्म ।

——

- धिदसा – पटियाला (पञ्जाब)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



प्रा. हरिश्चन्द्र रेणापुरकर: गुलबर्गा,

★

विद्याविदग्धरसिकोत्तमसूरिवर्या।
साहित्यकाव्यकमनीयकलाविलासा।
आचार्यवर्यकुलमण्डनकेशवार्या:
सप्रेमसाञ्जलि ममास्तु नतिर्विनम्रा ।१।

कार्तज्ञभावभरितेन मया व्यलोकि
मत्काव्यबन्धमधिकृत्य भवत्समीक्षा ।
सौहार्दपूर्णसरसोज्ज्वलभावगर्भा
निर्व्याजनिर्मलविशालमनोऽभिरामा ।२।

अत्यन्तकार्यनिरतैरपि मान्यवर्यै—
रालोड्य दीर्घकविता अपि मे सधैर्यम् ।
यच्चारुमार्मिकतरं लिखितं भवद्भि:
प्रीतोऽस्मि तेन परमोपकृतो भवामि ।३।

निष्कामसख्यभरितान्तरशास्त्रिवर्यै:
स्वोदारशोभनवदान्यविशालदृष्ट्या ।
मत्काव्यवर्णनपरं लिखितं यदत्र
तद्व्यञ्जकं खलु भवन्मनसो महिम्न: ।४।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मच्छुष्कनीरसनतोन्नतपद्यपक्तिः
प्रीत्यै बभूव भवतां यदि विद्वत्तणाम् ।
हेतुस्तु तत्र भवतां गुणगृह्यतैव
गृह्णाति निम्बरजसो मधु मक्षिकापि ।५।

नाहं कविः कविकुले न च मे प्रसूतिः
साहित्यिकोऽपि न भवामि न लेखकोऽपि ।
गीर्वाणवाक्चरणपङ्कजचञ्चरीको
गुञ्जारवं हि वितनोमि यदाकदाचित ।६।

सामान्यकाव्यगुणहीनकृतिर्मदीया
साहित्यकाव्यरससिद्धसमीक्षकाणाम् ।
तोषाय किञ्चिदपि चेद् रसिकोत्तमानां
स्वल्पं यथार्थकृतिनं खलु भावयेऽहम् ।७।

संक्षिप्तमेतद्विनिवेद्य किञ्चित
कार्तज्ञभावं च पुनः प्रकाश्य ।
सम्प्रार्थ्य देवं च भवत्सुखाय
मौन भजेऽहं हरिश्चन्द्रनामा ८।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिमाचल प्रदेश राजकीय संस्कृत महाविद्यालय प्राध्यापक संघेन

हि. प्र. मुख्यमन्त्रिणे श्री शान्ताकुमाराय, श्री दीनानाथ शास्त्रिणो, विधानसभा सदस्यस्य नेतृत्वे, प्रदत्तं ज्ञापनम्

सेवा में,
माननीय मुख्य मन्त्री महोदय,
हि० प्र० सरकार शिमला ।

विषय :—
प्रदेश के पांच राजकीय संस्कृत शिक्षण संस्थानों का महाविद्यालय-स्तर ।

मान्यवर,

विनम्र निवेदन है कि हिमाचल सरकार प्रदेश में पाँच संस्कृत महाविद्यालय चला रही है । इन पाँचों में मैट्रिक (अनिवार्य) के बाद शास्त्री की पांच डिग्री कक्षाएं पढ़ाई जाती है जिसे भारत सरकार ने १९६४ में तथा हिमाचल सरकार ने १९६७ में बी. ए. के समकक्ष मान्यता प्रदान की है सोलन, शिमला और सुन्दरनगर में सरकारी आदेशों से भिन्न-भिन्न विषयों की आचार्य कक्षाएं भी पढ़ाई जा रही है जिन्हें भारत और हिमाचल सरकार ने एम.ए. के समकक्ष मान्यता प्रदान की है नाहन में भी विभागीय स्वीकृति से आचार्य कक्षाएं चलती रही है । महोदय, ये पांचों संस्कृत शिक्षण संस्थाए पहले से ही महा विद्यालय अथवा कालेज हैं। क्योंकि हिमाचल सरकार ने इन पांचों को समय-समय पर 'संस्कृत महाविद्यालय" अथवा 'संस्कृत कालेज" के रूप में अभिगृहीत किया है इन में विश्व विद्यालय स्तर की शिक्षा दी जाती है । बी. ए. और एम. ए. के स्तर की शास्त्री और आचार्य की डिग्री कक्षाएं इनमें पढ़ाई जाती है १९८३ से इन संस्थाओं में शास्त्री कक्षाओं में बी. ए. के हिन्दी, अंग्रेजी, इतिहास और राजनीति-शास्त्र ये चार आधुनिक विषय भी पढ़ाये जा रहे हैं। १९७४ के सर्विस—रूल्ज़ के नोटिफिकेशन में सरकार ने इन संस्थाओं को "संस्कृत कालेज" के रूप में परिभाषित भी किया है। इन्हीं तर्कों के आधार पर हिमाचल प्रदेश उच्च न्यायालय ने १९७८ में यह निर्णय दिया

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

है कि ये राजकीय संस्कृत शिक्षा—संस्थाएं किसी भी सूरत में "पाठशालाएं" नहीं हैं बल्कि अन्य कालेजों की तरह ही ये "कालेज" अथवा स्नातोत्तर महाविद्यालय हैं। माननीय उच्च न्यायालय के इस निर्णय की प्रतिलिपि साथ संलग्न है। शिक्षा-सचिव हिमाचल सरकार तथा शिक्षा-निदेशक हि. प्र. के उन दस्तावेजों की प्रतिलिपियां भी साथ संलग्न हैं जिनके तहत शिक्षा विभाग-सरकार ने १६८५ में उच्च-न्यायालय से अपील वापिस लेकर न्यायालय के उक्त निर्णय को स्वीकार किया है, इन संस्कृत शिक्षा-संस्थाओं को "कालेज" माना है तथा इनमें कार्यरत पंडितों तथा हैड-पंडितों को पिछली १-११-६६ की तिथि से ही दूसरे डिग्री कालेजों के लेक्चरार और प्रिंसिपलों के समकक्ष वेतनमान प्रदान किए हैं। यहां तक कि शिक्षा विभाग के उच्चाधिकारी समय-समय पर अदालत में यह हल्फीया ब्यान देते रहे हैं कि उच्च न्यायालय के निर्णयानुसार सरकार एवं विभाग इन संस्कृत महाविद्यालयों को "कालेज" ट्रीट कर चुकी है एवं ट्रीट कर रही है।

परन्तु यह भारी आश्चर्य एवं खेद की बात है कि यह सब होने के बावजूद भी उच्च शिक्षाधिकारी बार बार यही कहते रहते हैं कि वे इन संस्थाओं को कालेज या महा विद्यालय नहीं बल्कि पाठशाला ही मानते हैं और इन्हें पाठशालाओं की तरह ही ट्रीट करते रहेंगे। यही बहाना लगाकर उच्च शिक्षाधिकारियों ने इनमें कार्यरत शिक्षकों के पदोन्नति स्थायीकरण, वेतन - निर्धारण आदि के (लगभग एक दर्जन निर्विवाद प्रकरणों को जानबूझ कर लटकाया और उलझाया हुआ है तथा इन संस्कृत महाविद्यालयों के सुधार एवं स्टाफ आदि के लिए महाविद्यालय स्तर पर बनायी गयी योजनाओं को रद्द किया जा रहा है। परन्तु जब अदालत में जबाब देने की बात आती है तो लिखा जाता है कि सरकार इन संस्थाओं को कालेज ट्रीट कर चुकी है।

इस प्रकार माननीय उच्च न्यायालय ने संस्कृत शिक्षकों के सम्बन्ध में जो न्याय प्रदान किया है, वह न्याय भी हमें प्राप्त नहीं हो रहा हैं जिसे प्राप्त करने के लिए महोदय हम आपकी शरण में आए हैं। इस सम्बन्ध में हमारा निम्न निवेदन है कि:-

१. सरकारी रिकार्ड के आधार पर जो माननीय उच्च न्यायालय ने संस्कृत महा विद्यालयों को कालेज निर्णीत किया है तथा इनके शिक्षकों को जो अन्य डिग्री कालेजों के लेक्चरार और प्रिंसिपलों के समान वेतनमान देने का निर्णय जारी किया है शिक्षाधिकारियों ने उसे प्रतिष्ठा का प्रश्न बना लिया है। इस कारण अंग्रेजी के विद्वान उच्च शिक्षा अधिकारियों का राजकीय संस्कृत महा विद्यलयों और संस्कृत शिक्षकों के प्रति जो प्रतिकूल और अपमानजनक व्यवहार चलता आ रहा है उसे बदलने के लिए कृपया आप अपने अप्रतिम प्रभाव का प्रयोग करें ताकि मान्य अधिकारीजन माननीय उच्च न्यायालय के निर्णय को खुले

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन से, स्वीकार करके उसे सर्वांगीण रूप से लागू करने के लिए बिना किसी बहाने के सच्चे मन से प्रयास करे।

२. सरकार राजकीय संस्कृत महा विद्यालयों को हरेक उद्देश्य के लिए "संस्कृत कालेज" अथवा आदर्श संस्कृत महा विद्यालय" व्यवहृत (ट्रीट) करने की घोषणा करे ताकि विभाग इनसे सुधार के लिए तदनुसार योजनाए तैयार करें।

३. इन संस्कृत महा विद्यालयों की शोचनीय दशा में अपेक्षित सुधार लाने के लिए आवश्यक कदम उठाए जाएं।

४. इन संस्कृत महा विद्यालयों के शिक्षकों का एक वर्ग माननीय ऊच्च न्यायालय के निर्णय को अर्थात् सभी अथवा एम. ए. शिक्षा प्राप्त अध्यापकों को पंडितवर्ग के समान कालेज लेक्चरार का वेतनमान प्रदान करने के लिए प्रशासनिक-अधिकरण में गया है। सरकार सहानुभूतिपूर्वक विचार करके इस वर्ग के शिक्षकों को भी कालेज लेक्चरर का वेतनमान प्रदान करें जैसा कि १९८५ में उच्चाधिकारियों की मिटिंग में निर्णय लिया गया था परन्तु उसे अब तक कार्यान्वित नहीं किया गया।

५. संस्कृत महा विद्यालयों के आचार्यों तथा प्राचार्यों के पदोन्नति स्थायीकरण। नए यू. जी, सी. वेतनमान आदि के अनेक निर्विवाद मामले वर्षों से शिक्षा निदेशालय अथवा सचिवालय में लम्बित पड़े हैं जिन्हें एक मास के भीतर निपटाने के लिए निर्देश जारी करने की कृपा करें।

विश्वास है कि आपकी सरकार हमें अवश्या न्याय दिलाएगी।

धन्यवाद। भवदीय,

दिनांक २६-४-१९९०

— मस्तराम शर्मा
प्रधान
संस्कृत महा विद्यालय,
प्रध्यापक संघ कार्यालय नाहन
(सिरमौर) हि. प्र.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हिमाचल सरस्वती केन्द्रीय आदर्श सं. महाविद्यालयः

हिमाचल प्रदेशस्य शिमला मण्डलान्तर्गत रोहड़ू क्षेत्र मध्यवर्ति जांगला ग्रामस्थो हिमाचल सरस्वती सं. महाविद्यालयः १-४-८० तः भारतसर्वकार शिक्षामन्त्रालयेन केन्द्रीय आदर्श संस्कृत महाविद्यालय रूपेण स्वीकृतः ।

हिमाचल प्रदेशे एव प्रथमः केन्द्रीय आदर्श संस्कृत महाविद्यालयो वर्तते ।

हि. स. संस्कृतमहाविद्यालयः श्री परमानन्द शास्त्रिणः, एम. ए., तथा श्री लछमनदास महोदयस्य सत्प्रयासेन कतिपयवर्षपूर्वं स्थापितोऽभूत् । उभयोरेतयोः परम प्रयासेन तथा पूर्वमुख्यमन्त्रिणा माननीय श्री वीरभद्रसिंह, महाभागानां सहयोगेन भारतसर्वकारेण केन्द्रीय आदर्श महाविद्यालयः स्वीकृत इति हिमाचल प्रदेशीयानां कृते परमप्रमोदावहम् ।

सत्यमेव पर्वतीयग्रामटिकासु भारतीया संस्कृतिरद्युनापि विग्रहवतीव विराजते संस्कृताश्रिता ।

संस्कृतवाङ्मयाध्ययनमनुसन्धानञ्च एतास्वेव पर्वत कन्दरासु पूर्वं महर्षिभिः सम्पादितमासीत्–इति नास्ति विपश्चितां तिरोहितम् ।

हिमाचलीयेऽस्मिन् आदर्शमहाविद्यालये अध्ययनाध्यापनस्य निवासस्य च एतादृशी सुरुचिरतरा व्यवस्था स्यात् यया भारतेतरदेशीया अपि विद्यार्थिनः अध्ययनार्थं समाकृष्टाः स्युः ।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सोलन हरिमन्दिरस्य वार्षिकोत्सवः

परमात्मस्वरूपैः ब्रह्मर्षिवर्यैः श्री हरि जी महाभागैः संस्थापितस्य श्री हरिमन्दिरस्य वार्षिकोत्सवसमारोहः २२-५-८० तः महता समारोहेण समजनि ।

अस्मिन् समारोहे श्रीमदाचार्यकेशवशर्मभिः ... संस्कृतशोधसंस्थानस्य सचिव महाभागैः श्री मद्भागवतमहापुराणस्य सप्ताह पर्यन्तं पाण्डित्यपूर्णं प्रवचनं विहितम् । अन्येषाञ्च सन्तमहापुरुषाणां प्रवचनानि, संकीर्तनमण्डलीनां कीर्तनकार्यक्रमाः, भक्तिसंगीतसरिताप्रवाहश्च विविधकार्यक्रमा समायोजिता अभूवन् ।

अस्मिन् हरिमन्दिरे एष सप्तदशतमः श्रीमद्भागवत सप्ताहः समभूत् ।

* * * * * * * * * *

संस्कृतं विना नैव कापि भारतीया भाषा पूर्णा

श्री वी० सत्यनारायण रेड्डी

वाराणस्यां 'वाग्योगचेतनापीठ' द्वारा समायोजिते हि एकस्मिन् पुस्तकविमोचनसमारोहे तस्य विमोचनं कुर्वाणैः राज्यपालैः 'प्रोक्तम्-संस्कृत-भाषा सीखने को सरल एवं वैज्ञानिक विधि' नामकं पुस्तकं नूनं हि लाभकरं भविष्यति यतो हि पुस्तकमिदं मा येन श्री भागीरथप्रसादत्रिपाठिना सम्यग् विधाय प्रस्तुतं जनानां हिताय किन्तु यत्किञ्चिदपि जानामि तत्सर्वं भारतीय-विद्याभवनस्य संस्कृतशिक्षणाख्यपुस्तकेन स्वयमधीत्य जानामि इदमपि गृहे गत्वा पठिष्यामि, अनुभावयामि च पुनः यदि कदाचित् विद्वत्सदसि समागमनं भवेत्तर्हि संस्कृते वदिष्यामि ।

इदं तु निश्चितं वर्तते यत्सर्वकारस्य साहाय्यं विनापि संस्कृतविद्वांस कार्यरता दृश्यन्ते इयं च परम्परा अस्य देशस्य पुरातनी तथापि संस्कृतं खलु समेषां कृते अनिवार्यं करणीयम् । संस्कृतं क अस्माकं सभ्यतायाः संस्कृतेश्च भाषा । अतः इयं निश्चितरूपेण सततं प्रचलिष्यतीति कामये ।

—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

अपि पीता मोहमयी प्रमादमदिरा ?

नवीनप्रशासनस्य सत्तायां प्रायेण मासषट्कं पूर्तिमेति । एतत्समये संस्कृतसमुत्थानाय भारतस्य कस्मिन्नपि प्रदेशे किमपि महत्वपूर्णं कार्यं न जातम् । निर्वाचनकालेऽयमपि विषयः लोकानां मनसि, आसीत् - विशेषतः भारतीयसंस्कृतिप्रेमिणाम् यन्नवीनशासन संस्कृतोत्थानं करिष्यति

परन्तु प्रशासनमेव सर्वं करिष्यति — एतादृशी आशापि दुराग्रहमात्रमेव । यतोहि प्रशासन गणतन्त्रे लोकाग्रहाधारितं भवति । तर्हि संस्कृतसमुत्थानस्य सर्वविधकार्यं प्रायेण लोकेषु निपतति । केषु लोकेषु ? संस्कृतपठितेषु, संस्कृताध्यापक — प्राध्यापकेषु, संस्कृतछात्रेषु, संस्कृतपत्रकारेषु, संस्कृतलेखकेषु, पुराणवाचकेषु, कर्मकाण्डज्योतिष — आचार्येषु ।

अस्माभिः सर्वैः स्वकीयमनसि समवलोकनीयम् । किमु — अस्माभिः संस्कृतस्य हिताय किमपि क्रियते ? मद्विचारेण तु संस्कृताध्यापकप्राध्यापकैस्तु केवलं स्ववेतनपर्यन्तमेव चिन्त्यते — इति प्रतीयते संस्कृतोत्थानकर्मणि संस्कृताध्यापकप्राध्यापका एका दृढ़तमश्रृंखला सैव यदि विशीर्णा, त्रुटिता स्फुटिता च स्यात्तदा किं कथनीयम् ?

अन्यप्रदेशेषु संस्कृतज्ञाः नवीनप्रशासनेन सह वार्तालापं किमपि कुर्वन्ति नवेति नाधुना स्पष्टम् । परन्तु हिमाचल प्रदेशे संस्कृतविद्वद्भिः नवीन-मुख्यमन्त्रिणा सह संस्कृतोत्थानविषये वार्तालापः सम्मिल्य कृतः । इति सन्तोषावहम् । परन्तु अत्र शैथिल्य न अपेक्ष्यते मासद्वयानन्तरमवश्यमेवात्र मेलनं भवेत् - पूर्वकार्य - समीक्षा च कृता स्यात् ।

सर्वप्रथम संस्कृतमहाविद्यालयानां संस्कृत - परीक्षाणाञ्च पूर्वप्राप्तमान्यताया रक्षणं, संस्कृतस्य दशमकक्षापर्यन्तं चाध्यापनम् इति विषयद्वयं परमावश्यकम् । यतोहि इदमेव संस्कृतस्याधारभूतमस्ति । हि. प्र. विश्वविद्यालयस्य पूर्वसंस्कृतविभागाध्यक्षस्य कार्यकाले संस्कृतविद्याताय कृतकार्याणां निरासायापि प्रयासा अपेक्ष्यन्ते

अद्य प्रदेशे संस्कृतज्ञाः जागरूकाः । यदि ते सम्मिल्य कार्यं कुर्युस्तर्हि प्रशासनं सर्वं करिष्यति परन्तु परीक्षाणां महत्व न्यूनी करण प्रयासा जघन्याः सेत्स्यन्ति ।

बी. ए. आदि परीक्षाणामुत्तरणमपि शास्त्रि आचार्याणां कृते ऽनावश्यकमस्ति । शास्त्रिणां कृते यदि बी. ए. उत्तरणमावश्यकं क्रियते तर्हि संस्कृतस्य विनाश एव क्रियते ।

संस्कृतज्ञाः स्वयमेव संस्कृतस्याहितं कुर्वन्ति — इति अस्माभिः गतपंचत्रिंशत्वर्षीयसंस्कृतसेवाजीवने दृष्टम् । अतः सावधानम् । संस्कृतज्ञैर्मोहमयी प्रमादमदिरा न सेव्या ।

— केशव शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R ·N 6384/57 ... 38/एस. एम. / 10/89

त्वर्यताम् त्वर्यताम् त्वर्यताम्

*** *** ***

जातक फलादेशस्य दुर्लभो ग्रन्थः

फलादेश कल्पतरुः

सचिव, संस्कृत शोध संस्थान, भारती विहार
मशोबरा शिमला–७
171007 (हि. प्रदेश)

राष्ट्रपतिसम्मानितप्रख्यातविद्वान्सेवानिवृत्तप्राचार्य श्रीमदाचार्य-दिवाकरदत्तशर्मप्रणीतो हिन्दी-आङ्गलटीका सहितः चिरप्रतीक्षितः फलादेशकल्पतरुः प्रकाशितोऽभूत् ।

अस्मिन् ग्रन्थे द्वादशभावफलम्, दशाफलम्, आधुनिकाः शुभा-शुभयोगाः, नारीणां जातकफलम्, सन्तानप्राप्तिबाधानिवारण-प्रयोगाः, अनिष्टदशाफलशमनोपचाराश्च निर्दिष्टाः ।

सोऽयं ग्रन्थः श्रीमदाचार्यपादानां चत्वारिंशद्वर्षाणां ज्योतिष-शास्त्रसेवाया अनुसन्धानपूर्णानुभवस्य च दुर्लभा कृति विद्यते ।

स्वनामधन्यानां श्रीमार्तण्डपञ्चाङ्गप्रवर्तकानां विश्वविख्यात ज्योतिर्विदां श्रीमदाचार्यमुकुन्दबल्लभ मिश्र ज्योतिषाचार्य महा-भागानां प्राक्कथनेन च समलङ्कृतः ।

महर्घताबशात्स्वल्पा एव प्रतयो मुद्रिताः । मूल्यमपि केवलं कर्गलमुद्रणादिव्ययपूरकं डाकव्ययसहितं सप्तति (७०) रूप्यकाणि निर्धारितम् । फलादेश कल्पतरोः भारते विदेशेषु च, दैवज्ञैरपूर्वं स्वागतं कृतम् स्वल्पाः प्रतयः अवशिष्टाः सन्ति । द्वितीय संस्करणप्रकाशने विलम्बो भविष्यति । मूल्यं निम्नसंकेते धनादेशद्वारा प्रेष्यताम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

श्रीपरशुरामजयन्ती

श्रद्धाञ्जलिः

करकलित – कुठारः- दिव्यरामावतारः ।
बहुलविविधमन्त्र – शस्त्रशास्त्राद्यगारः ॥
अतिशय – मदमत्तशासकानां प्रहर्ता ।
जयतु परशुरामो रेणुकाहर्षकर्ता ॥

— सम्पादकस्य

संस्कृतस्य सचित्रमासिकम्

शिमला जून, १९९०

...३० अङ्कः १

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमः

क्र.	विषयाः	लेखकाः	पृष्ठम्
१.	देव भाषा	श्री हजारीलाल शास्त्री (हरियाणा)	१
२.	कादम्बर्या प्रकृतिचित्रणम्	श्री प्रेमपाल राणा शास्त्री (हि. प्र.)	२
३.	टरव्यूहः	श्री शुकदेव मुनिः पंजाब	६
४.	गीयताम्	डा. देवेन्द्रनाथ राजस्थान	९
५.	भारतरत्नमम्बेदकरः	डा. सुरेन्द्र अज्ञातः पञ्जाब	१०
६.	कविताद्वयी	कु. कुसुमलता (पंजाब)	१४
७.	जन-आस्थायाः	श्री ओं प्रकाश राही शास्त्री (हि. प्र.)	१५
८.	वेदार्थो विनियोगवादश्च	डा. सत्यदेव निगमालंकारः (उ. प्र.)	१९
९.	हरियाणा प्रदेशे	श्री रामनारायण आचार्य (हरियाणा)	२२
१०.	साहित्य सरिता	कार्यालय	२६
११.	समाचाराः	"	२९
१२.	अपील	श्री शान्ता कुमार मुख्य मंत्री हि. प्र.	३२
१५.	सम्पादकीयम्	—	—

दिव्यज्योतिः

हि० क० सं०भा० अकादमी प्रदत्तानुदानसाहाय्यम् । पत्रिकागतमुद्रणदोषाणां सम्पादकीयनीति-विषये च अकादमीदायित्वं नास्ति ।

हिमाचल प्रदेश—पंजाब-हरियाणा-जम्मूकश्मीर - मध्य प्रदेश—राजस्थान—महाराष्ट्र उत्तरप्रदेश शासन-स्वीकृतं केन्द्रशासनपुरस्कृतं सचित्रं संस्कृतमासिकम् ।

पत्रस्य उद्देश्यानि तथा नियमाः

सरल—सरस-सुबोध-साधनैः सर्वस्मिन् संसारे संस्कृतस्य प्रसारः, साहित्यान्तर्गतानां सकलकलानां समन्वेषणं, संसारस्य हितसम्पादनम्, एवं लौकिक - अलौकिकस्वातन्त्र्यस्य प्राप्तिः।

"दिव्यज्योतिः" प्रतिमासं पञ्चदशतारिकायाम् (आङ्ग्लमानेन) प्रकाशितं भवति

पत्रस्य वार्षिक मूल्य ३० रु० अर्धवार्षिकं १५ रु० एकस्याङ्कस्य च रु० २-५० भवति ।

वर्षारम्भः अक्तूबर—मासतः भवति । ग्राहकः कस्मादपि मासाद् भवितुं शक्नोति ।

ग्राहकैः, "सम्पादक, दिव्यज्योतिः, भारती विहार, मशोबरा, शिमला-१७१००७ हि० प्र०" इति संकेते धनादेशेन वा. शु. प्रेषणीयम् ।

परिचयः

संस्थापकाः तथा आद्यसम्पादकाः आचार्यश्रीदिवाकरदत्त शर्माणः, — दूरभाषः 78459

राष्ट्रपति सम्मानिताः

प्रधानसम्पादकः— आचार्य केशव शर्मा एम. ए., एम, फिल, साहित्यरत्नम् - „ 8-200

दिव्यज्योतिः कार्यालयः भारती विहारः, मशोबरा, शिमला-७ (हि. प्र.)

मुद्रकः प्रकाशकः—

भारतीमुद्रणालय भारती विहार, मशोबरा-१७१००७ शिमला (हि. प्र.)

स्वामीः- श्रीमती आचार्य रत्नकुमारी शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

देवभाषा

स्व. श्री हजारीलाल शास्त्री

★

सदा भारते देवभाषा विभातु
मुदा चादृता राज्यभाषा सुभूषा ।
अनल्पैः प्रयत्नैः कृते वो बुधाना -
मतश्चार्यबन्धून् हृदा पूजयामः ।१।

न वाञ्छास्ति राज्ये न तु द्रव्यजाते
न शिष्टे पदे ऽस्तीति चेहास्मदीया ।
सतां श्रीयुतानां प्रशस्तैः प्रयत्नैः
सदा भारती भारते भातु भव्या २।

कथं नाक्षि लक्ष्यं गतं श्री युतानां
सदाधो निपातोऽद्य गीर्वाणवाण्याः ।
कथं न श्रुतौ वो गतं क्रन्दनं हा !
हतानामजस्रं गवां भारते हा ! ।३।

विभूतिः समस्ता विनाश गता हा !
न चाद्यानवद्या सुभाषास्मदीया ।
न वेशो न भूषास्मदीया जनानां
गतानां विदेशीयभाषामुखानाम् ।४।

न धूमो न गन्धोऽत्र यज्ञोद्भवोऽद्य
न पाठः श्रुतीनां श्रुतो भारते ऽद्य ।
न शिक्षा न दीक्षा न शिष्टा विचारा
जनानां विदेशीयभाषाहतानाम् ।५।

शिखासूत्रमात्मीयवृत्तं समस्तं
स्व सन्ध्यादिकृत्यं च नित्यं पवित्रम् ।
विहायेति मन्दा न यान्तीति लज्जां
मुधार्यां गता भारूता धरित्र्याः ।६।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न भक्ष्यं न चेदं सुभक्ष्यं विचार:
सदाचारधर्मो न च ब्रह्मचर्यम् ।
गता वेदविद्या गतं धर्मशास्त्रं
त्विदानीं तनानां जनानां गतिः का ।७।

न शाकं त्वभीष्टं व्रतं ब्रह्मचर्यं
न दुग्धं न तक्रं घृतं त्विष्टमन्नम् ।
अभीष्टं तु तेषां पलाण्डुस्त्वभीष्टस्
त्वजाकुक्कुटाद्यण्डजातं च मद्यम् ।८।

तमाल। प्रियो हा प्रियो धूम्रपानः
प्रियो हा विषो विष्कुटः कुक्कुटो हा ! ।
प्रियं दर्शनं हा ! कुवेश्याङ्गनानां
न जाताश्च किं हाऽसुरा भारतीयाः ।९।

सुदेशः स्वकीयः सुवेशः स्वकीयः
विधानः स्वकीयो जनाश्च स्वकीयाः ।
समानाः समस्ताः समस्तः स्वकीयः
कथं भारती भारते नो स्वकीया ।१०।

अतः स्यात् कथं भारते संस्कृतस्य
प्रचारो भवन्तः स्वयं शोचयन्ताम् ।
विनोन्मूलनं मांसमद्यार्पितानां
न सिद्धिः सुसाध्या हि गीर्वाणवाण्याः ।११।

सुवेशे स्थितानां सतां श्रीयुतानां
हिते संस्थितानां सदा संस्कृतस्य ।
सुपद्यप्रसूनैरतश्चादरेण
सहर्षं प्रकुमः प्रियं स्वागतं वः ।१२।

— श्री ब्राह्म संस्कृत महाविद्यालय
रामह्रद (जिन्द)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कादम्बर्यां प्रकृतिचित्रणम्

(साहित्यिकं सिंहावलोकनमेकम्)

प्रेमपाल राणा शास्त्री

एम. ए. संस्कृत

संस्कृतकाव्यनाटकक्षेत्रे यथा कालिदासस्य सर्व श्रेष्ठता सर्वमान्या तथैव संस्कृतगद्यसाहित्ये वाणभट्टस्य नाम सर्वानपि गद्यकारानतिशेते । वाणविरचितेषु गद्यकाव्येषु 'कादम्बरी' सर्वोत्तमं गद्यकाव्यमस्ति येन बाणस्य विजयवैजयन्तीं सर्वास्वपि दिक्षु प्रसारिता। 'कादम्बरी' शैली-प्रधानं वर्णनप्रधानञ्चैकमुपन्यासमस्ति, यस्मिन् शैली तत्वंमधिकतया महत्त्वं गतं वर्तते ।१

'प्रकृति' शब्दस्य व्युत्पत्तिः 'प्र' उपसर्गकात् कृ धातोः ति प्रत्यये कृते जायते; यस्यार्थः येन साधनेन समस्तमिदं जगत्समुत्पाद्यते सा प्रकृतिः । सांख्यैः सत्वरजस्तमसां साम्यावस्था प्रकृतिः मन्यते । सांख्य-मतानुसारं "प्रकर्षेण धीयते अन्तर्लीयते सर्वं जगत् यस्मिस्तत् प्रधानम् ।२

वस्तुतस्तु प्रकृत्या समुत्पादितस्य जगतः यथार्थचित्रणमेव प्रकृति-चित्रणत्वेन कथ्यते । 'प्रकृति' शब्दः स्वभावस्यापि द्योतकः। यस्य सर्वे क्रियाकलापाः विध्यनुसारं, यथा समयं, अनायासं, नियमानुरूपं, विकृतिरहिताः, लौकिककृतिरहिताः भवन्ति सैवेश्वराधिष्ठिता प्रकृतिः ।

कादम्बर्यां वाणभट्टेन स्वसमग्राऽपि प्रतिभा प्रकटिता; एतस्यां न कोऽपि शब्द-एतादृशः यस्य प्रयोगो न कृतो भवेत् । एतामेव वार्ता विलोक्य कैश्चित् कथितमपि यत्—"बाणोच्छिष्टं जगत् सर्वमिति ।" एतस्मिन् गद्यकाव्ये कविपुङ्गवेनानेन एतादृशी रसयोजना विहिता

१ कादम्बरी भूमिका पृ० ३

२ 'सांख्य सिद्धान्त । श्री उदयवीर शास्त्री पृ० १३९

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अलंकाराणामेतादृशेन चातुर्येण प्रयोगो विहितः यत् केचन् विद्वांसः कथितुं वाधिताः बभुवुः यत् "कादम्बरी रसज्ञानामाहारोऽपि न रोचते." कादम्बरी' बस्तुतस्तु 'कादम्बरी' एव यस्या मदेन मत्तः वाणपुत्रो भूषणोऽपि कथयितुमिदं विवशो जातः यत् "कादम्बरी रसभरेण समस्त एव मत्तो न किञ्चिदपि चेतयते जनोऽयम् ।१

कादम्बर्याः पठनेन रसास्वादनेन च स्पष्टमिदं प्रतीयते यत भूषणेन न काऽपि अतिशयोक्तिः कृता ।

कादम्बर्यां सफल सुपुष्टञ्च प्रकृतिचित्रण वाणस्य प्रकृत्याऽसीम-मनुरागं द्योतयति । श्लिष्टप्रकृतिचित्रणे तेन स्वाप्रतिमायाः प्रति-भायाः परिचयो दत्तः । स्व काव्येषु वाणेन प्रकृत्या सुकोमलरूक्षयो-रुभयोरेव रूपयोः चित्रणं कृतमस्ति । यत्र सूर्योदयस्य चन्द्रोदयस्य, सन्ध्यायाश्च चित्रणेषु प्रकृत्याः सुन्दरस्य, रूपस्य चित्रणं सञ्जातं तत्रैव विन्ध्याटवीवर्णनसदृशेषु चित्रेषु प्रकृत्याः भीषणरूपमपि साफल्येन चित्रितमस्ति ।२

वाणस्य प्रकृतिचित्रणे महती विशेषतेयं वर्तते यत् सः प्राकृतिक-दृश्यान् वातावरणदेशकालयोरनुरूपमेव चित्रयति यथा कथामुखे महर्षेः जावालेराश्रमे सन्ध्या वर्णनमस्ति । दिनस्यावसाने रक्तनक्षत्रयुता सन्ध्या तपस्विनां कृते एतादृशी प्रतीयते, यथा तपोवनस्य रक्तपुत्तलि-कायुता कपिला धेनु वनात् निर्वतिता भवेत् । मृणालिन्या पतिपतङ्गः परदेशं गतवानतः सा कथं सुखेन स्थातुं शक्नोति ? पत्या सह पुर्नमि-लनाय सा व्रतमाचरति । सङ्कोचं गतानि कमलानि तस्या कमण्डलुः, हंसाः श्वेतवस्त्राणि, श्वेतमृणालमेव च यज्ञोपवीतम् तस्याः उपरि उड्डीयमाना भ्रमरपंक्तिरेवाक्षमाला वर्तते ।३ अत्र वर्णनेऽप्रस्तुताना चयन विशेषः । रक्तसन्ध्यायाः कृते धेनोरुपमानमत्रवातावरणस्यानुकूल वर्तते । सूर्येऽस्तङ्गते सति तस्य पत्न्याः कमलिन्याः व्रतधारिण्याः रूपे चित्रणं व्रतसाधना युक्तस्याश्रमजीवनस्य एकमङ्गमेव प्रतीयते । गद्येऽत्र कमण्डलोः, श्वेतवस्त्रस्य, अक्षमालायाः, यज्ञोपवीतस्य चोप-मानभूतस्य मनोहरा योजना जाताऽस्ति ।

बाणस्य प्रकृतिचित्रणे पृष्ठभूमेः परिसरस्य च सर्वदैव ध्यानं रक्षितमस्ति । द्वयोः स्थानयोः तेन सन्ध्यायाः वर्णन कृतं, पूर्वप्रदर्शिता

---

१ कादम्बरी उतरार्धं

२ कादम्बरी कथामुखस्य भूमिका पृ० ४२

३ कादम्बरी कथामुखे जावालेराश्रमवर्णनमे पृ० ३५५ व ३५७

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्ध्याऽश्रमस्य सन्ध्या वर्तते द्वितीया च सन्ध्या राजभवनस्य वर्तते । अत्रास्तं, गम्यमानस्य सूर्यस्येत्थं वर्णनमस्ति यत् हृदाकाशे पूर्णतया विकसिता कमलिनीसन्ध्या रक्ता जाता; यदा दिशाऽङ्गनामुखेषु तिमिर-रेखा प्रकटिता जाता ताः कृष्णागुरुलेपेन विनिर्मिताऽभूषक रेखा इव प्रतीयन्ते यदा रक्तसन्ध्या रागः भ्रमरकुलश्यामलेनेव तिमिरेणापसार्य-माण - आसीत्तदा प्रतीयते इमेत्थं यत् भ्रमरकुलश्यामलनीलकमलवनं रक्त कमलवन शोभां ग्रहीतुं प्रवृत्तो भवेत् । यत्र भ्रमरा रक्तपुष्पान्तरेषु प्रविशन्ति तदा प्रतीयते यत् पीतमातपं निस्सारयितुं तेषु प्रविष्टाः तिमिररेखा ते भवेयुः ।१ एवं वर्णनेषु वर्णितस्य चित्रमेव सम्मुख-मायाति प्रकृतिचित्रणेन वाणेन कुत्रचित्भावीघटनानामपि सूचना प्रदत्ता; यथा महाश्वेताऽभिसारपृष्ठभूमिरूपेण कृतं चन्द्रोदयवर्णनं यद्यपि प्रभावमभिसारस्य वर्धयितुमेवकृतमस्ति, किन्तु तत्रैव शेषना-गायितं चेन्द्रमण्डलमभिवर्त्य महाश्वेतायाः सञ्चाराहित्यं प्रदर्शितम् ।२

प्रकृत्याः रुक्षरूपेण चित्रणमपि कौशलेन कृतमस्ति यथा—कुत्र-चित् बराहावतारं धृतवता विष्णुना दंष्ट्रया समुत्खातेन भूमण्डलेन युक्ता प्रलयवेलेव महासूकरैर्दंष्ट्रयोत्खातभूमण्डलयुता वर्तते । कुत्रचित् वानरवीरै भज्यमानेनोत्तुंग भवनसमूहेन व्याप्ता लङ्केव चटुलवानरैः भज्यमानेन शालबृक्षवृन्देन युक्ताऽसीत् ।३

बाणेनाधिकांशतः प्रकृतिरालम्बनरूप एव चित्रिता । किन्तु कादम्बर्यां पुण्डरीकस्य प्रेम्णि महाश्वेतायाऽकुलतायां कृतं चन्द्रोदय वर्णनं महाश्वेतायाः प्रणयभावनामुद्दीपयितुमेव सहायतां करोति । बाणेन स्व प्रकृतिचित्राणि विलक्षणाया काव्यप्रतिभाया सूक्ष्मनिरीक्षण-शक्तिबलेन चाकर्षकरूपयुतानि विहितानि । अलकार बिधानेन तस्मिन् चमत्काराधिक्यमुत्पन्नमस्ति, किन्तु श्लेषविरोधादीनामलकाराणां मोहे पतितेन कविनाऽत्यन्तमप्याकर्षकं प्रकृतिचित्र कुत्रचित् विकृतं कृतमस्ति ।४ किन्तु वाणस्य समयस्य यत् साहित्यिक वातावरणं आसीत्, तस्यैव प्रभावोऽयं यस्यानुसारं श्लेषविशेषपरिसंख्यादिभिरलंकारैः काव्ये चमत्कारोत्पादनं स्पृहणीयं मन्यते स्म ।

— रा. माध्यमिक पाठशाला
कुठेडा तह० जोगेन्द्र नगर
जि० मण्डी (हि० प्र०)

---

१ कादम्बरी पृ० ३३३
२ कादम्बरी कथामुख
३ कादम्बरी पृ० १५०–१५१
४ कादम्बरी विन्ध्याटवी वर्णनं पृ० १४८—१५६

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



टरव्यूह:

श्री शुकदेवो मुनिः

★

शिक्षिता सकला विद्याः,
कला नैव च शिक्षिता ।
पितरौ न चापि सन्तुष्टौ
विद्या वृत्ति— विवर्जिता ।
लब्ध इव विनयो नैव,
लब्धा अंकास्तु पूर्णतः ।
उपाधिः सर्वोत्तमः प्राप्ता,
प्राप्ता नैवाथ भारती ।
व्यापारे चाथ व्याहारे,
अर्जिता वृत्तिशंगला ।
एकदा दैवयोगेन
साधुर्जातः समागमः ।
वृत्त्यर्थं भृत्यर्थं च ।
अथ अववेश — वशंगतः,
नानाविधानि पत्राणि,
प्राप्तानि यानि कालजे,
साभिमानं सदर्पं च,
येषां नास्ति प्रतिस्थः, आदाय !
आमन्त्रितः संघः,
प्राप्तोऽन्तव्यूंह— समागमे ।
यत्रासीत्संख्यायूनां भूयसी,
मनः प्रमाथिनी हृन्मर्मविदारिणी ।
प्रतीहारस्य चाहूतिः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राय: ग्राम् मनोरमा ।

बत्यागतस्तबश्चाशु,

असौ क्षिप्रं पलायते ।

क्रमेण गुटरु: पार्श्वं.

प्राप्तवान् मानविमर्दिनीम् ।

किं ते नाम ?

"गुटरु:" इति वदन्तिमाम् ।

किं एवं पिबसि पिपासार्तः ?

वाटरं बोटलाद्भृतम् ।

तुभ्यं किं रोचते खाद्ये ?

बटरं महिषी—दुग्धजम् ।

शाक: केन प्रियो भाति ?

मटरेण नवीयसा ।

टमटरेण चाथ स्वादीयसा ।

किं परिधानं तवाभीष्टम् ?

पलिस्टरं पटतमं प्रियम् ।

आयातः केन यानेन ?

मोटरेण जवीयसा ।

निर्दिष्ट: केन इहायातुम् ?

सिसटरेण महीयसा ।

टिकट: त्वया कुतः प्राप्तः ?

कण्डक्टरेण कनीयसा ।

शिक्षा त्वया कुतो लब्धा,

मास्टराद् वरीयसः ।

तव जीवनस्य किमु लक्ष्यम् ?

डाक्टरो वा इन्सपेक्टरो वा

बभूषु: अस्मि केवलम् ।

आम्, अलं तावत्

कस्य पत्रं इदं हस्ते ?

मणीष्टरस्य पटीयसः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्षणं तिष्ट तावत्,
विचारयामो यावत् ।

ग्राम्, सम्यगबोधि कार्गलिकयाऽज्ञायि ।

अस्ति
सर्वकारस्य,
एका योजना,
विचाराधीना ।

राज्यस्य,
महत्त्वपूर्णेषु;
स्थानेषु,
नवाः सचिवालयाः
मण्डूक—विभागाधीना ।
तत्र, यत्र, कुत्र,
भवेयुर्बहवो ह्रदाः ।

तेषु,
कार्य-वेलायां,
तथां, मण्डूकाः
संगत्यारटेयुर्निरन्तरम् ।
यथालोकानामपेक्षिता बाधो,
नापतेयुः,
श्रवणान्तरम् ।
एवं विकमैण्डयिष्यामः, तदर्थ,
त्वदर्थं,
यदर्थ
साम्यमावहति ते वाणी
टर्टरायमाणे मंण्डूकैः
सह सर्वथा ।
परिश्रमश्च ते
स्यादन्यथा
वृथा,
सिफारशश्चश्च, न भवेदन्यथा
यथा ।
यूना अपिच सम्यगबोधि,
यदुक्तं धीवरोत्तमैः ।

— सेवा निवृतः प्राचार्य
रा. संस्कृत कालेज नाभा
(पंजाब)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



राष्ट्र–देवो भवेद्रामचन्द्रस्तथा

डा० देवेन्द्र नाथ पाण्डेय

★

रामजन्मभूमिसम्बद्धमष्टकम्

(१)

रामभूमेः सुताः भारतीयाः वयम् रक्षितारः सदा पालयामो वयम् ।
यत्र रामो बभूवोत्तमो वै नरस्तत्स्थलं भासतां निश्चलं भारते ।

(२)

तच्चमुख्यालयः संस्कृते वर्तते भारतस्य स्थल राष्ट्रचिह्नन्तथा ।
धाम रामस्य तद्भासतां भारते राष्ट्र-नेतुः प्रियं वै ह्ययोध्यापुरम् ।

(३)

यथा बर्बरो बाबरोऽबीभवद्धि पुरा निष्फलस्तत्पुरंप्राप्तुमिच्छन् ।
ह्ययोध्यां पुनः धर्मविध्वंसको योभवेच्चेष्टमानोऽन्वयो बाबरस्य ।

(४)

को न जानाति लोके ह्ययोध्यापुरं राम-जन्मस्थलं विद्यते विश्रुतम् ।
लोक-मन्तव्यमानं कथन्वन्यथा सर्वकारोऽपि कर्तुं भवेद्भारते ।

(५)

भारतं शाश्वतं शाश्वतो राघवो वर्तते तत्पुरं यत्र रामोऽभवत् ।
शक्नुते हिन्दु-लोके कथं कोऽपि ना यत्पुराऽसीन्नवा रामजन्मस्थलम् ।

(६)

हिन्दवो जागृताः सन्ति संरक्षणे रामजन्मस्थलस्यायुधैः संगताः ।
तत्पराः मन्दिरं रामजन्मस्थले स्थापयिष्यन्त्यवश्यन्वरीणां पुरः ।

(७)

भारते ये वसन्तो जनाः हिन्दवः सन्ति सन्तु स्थिराः रामभक्तिस्पृहाः ।
रामजन्मस्थलं तीर्थभूमिर्भवेत् हिन्दु–मुस्लिन्तथेशानुगानां कृते ।

(८)

भारतं राष्ट्रमेकंभवेदाश्रयो राष्ट्रभाषा तथा वै भवेत्संस्कृतम् ।
राष्ट्रदेवोभवेद्रामचन्द्रस्तथा हिन्दु - मुस्लिन्तथेशानुगानां कृते ।

प्रवक्ता—वै० अध्ययनम्
वनस्थली विद्यापीठम्
राजस्थानम् ३०४०२२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतरत्नमम्बेदकरः संस्कृतभाषा च

डा॰ सुरेन्द्र अज्ञातः

★

भारतीयसंविधानस्य मुख्याय शिल्पकाराय, आधुनिकमनवे डा॰ भीमरावमम्बेडकराय देशस्योच्चतमोऽसैनिक सम्मानो भारतरत्नमिति, दत्तोऽभवदप्रैलमासस्य चतुर्दशेऽहनि तस्य नवनवतितमे जन्मदिवसावसर इति जानन्त्येव सर्वे । अस्मात्कारणाद् देशस्य विभिन्नेषु दैनिक-साप्ताहिकपाक्षिक-मासिक-पत्रेष्वम्बेडकरमधि कृत्यानेके लेखाः प्रकाशं गताः । तेषु तस्य जीवनसम्बद्धा व्यतिकराः, तस्यास्पृश्यतोन्मूलनपराः प्रयत्नाः, राजनीतौ तस्योपलब्धयः, संविधाननिर्माणकर्माणि तस्याभिनवमनुत्वेत्यादयो विषयाश्चर्चितास्तैर्लेखनचणैः । परं केनापि संस्कृतभाषायाः सन्दर्भेऽम्बेडकरस्य चर्चा न कृतेति तद् दुनोति नश्चेतो भृशम् । तमेव विषयमत्र प्रमाणैस्सनाथीकृतं समासेन प्रतिपादयामः ।

अम्बेडकरोऽस्पृश्येषु जात इति प्रपञ्चं नार्हति । जीवनयात्रायां पदे पदे दुष्टेन जातिवादेनाहतोऽसौ । स संस्कृतं पिपठिषति स्म । परं जातिवादग्राहग्रस्तेन ब्राह्मणजात्यां जातेन संस्कृतस्याध्यापकेन स परिहृतः । अध्यापक उवाच–'नाहमस्पृश्येभ्यः संस्कृतज्ञान दास्यामीति । अनेन भृशं पीडितोऽम्बेडकरोऽगत्या फारसीमपठत् । संस्कृतपठनाद् वारितोऽहमिति तस्य मनसि शल्यमिव कष्टकरं जातमत्यन्तम् । तेन कतिपयवर्षानन्तरं खिन्नेन चेतसा कथितमासीत्—'संस्कृत प्रति मे मनसि गर्वातिशयः । संस्कृतस्याधिकारी विद्वान् भवेयमिति मेऽभिलाष आसीत् । परं संस्कृताध्यापकस्य संकुचितैर्विचारैरहं तस्माद् वञ्चित इति ।' अम्बेडकरस्य सर्वेऽपि जीवनचरितकारा अमुं व्यतिकरं वर्णयन्ति, तद्यथा, एल. आर. बाली महोदयः स्वीये पुस्तके लिखति—'एल्फिस्टन हाई स्कूल में भीमराव (अम्बेडकर) को एक अन्य चोट लगी, जो उन्हें समस्त जीवन न भूल सकी। भीमराव संस्कृत पढ़ना चाहते थे, परन्तु स्कूल के अध्यापकों ने उन्हें संस्कृत पढ़ने की अनुमति नहीं दी —... विवश होकर भीमराव को फारसी पढ़नी पड़ी ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उन्होंने कहा भी था—'मुझे संस्कृत भाषा पर बहुत गर्व है। मैं चाहता था कि संस्कृत का विद्वान् बनूं, परन्तु ब्राह्मण अध्यापक के संकीर्ण विचारों के कारण मैं संस्कृत से वंचित रह गया १।"

डा० डी. आर. जाटवः (एम. ए., एल-एल. बी., पी एच. डी., डि. लिट्-अध्यक्षः दर्शनशास्त्र-विभागस्य, राजकीयमहाविद्यालये, अजमेरस्थे) स्वीये ग्रन्थे लिखति-"भीम (अम्बेडकरः) और आनन्दराव (अम्बेडकरस्याग्रजः) दोनों संस्कृत पढ़ना चाहते थे; परन्तु संस्कृत के ब्राह्मण अध्यापक ने साफ कह दिया कि वह अछूत लडकों को संस्कृत नहीं सिखाएगा। फिर मजबूरन दोनों को फारसी भाषा लेनी पड़ी जो उनकी इच्छा के विरुद्ध था। अम्बेडकर ने कहा—'मुझे - संस्कृत भाषा पर अत्यन्त अभिमान है और मैं चाहता था कि संस्कृत का अच्छा विद्वान् बनूं, पर ब्राह्मण अध्यापक के संकुचित दृष्टिकोण से मुझे संस्कृत-भाषा से वंचित रहना पड़ा।२'

धनञ्जय कीर-महोदयः स्वीय आंगलभाषानिबद्धे सन्दर्भे लिखति — "Yet the school life of Bhim was to receive its unkindest cut. The cut was too deep which all his life after wards he remembered with strongest aversion. During his High school days both Bhim's elder brother & he were not allowed to take up sanskrit as the second language. Poor Bhim and his brother were torn asunder from sanskrit by the Brahmin teachers as was also done in case of Dr. M R Jayaker in his school days and were compelled to take Persian against their will.

एवमेव लिखति डब्ल्यू. एन. कुबेरः स्वीय आंगलभाषानिबद्धे ग्रंथे ४

———

१. बाली, एल. आर., डा. अम्बेडकर: जीवन और मिशन (१९८०) पृ. १३

२ जाटवः, डी.आर. डा. अम्बेडकर व्यक्तित्व एवं कृतित्व ।१९८४ पृ. २४

३ Keer, Dhananjaya, Dr. Ambedker: Life & Mission (3rd 1971) Pb 18-19

४ Kuber, W. N., Dr. Ambedkar: A critical study (1973) P. 14

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवं संस्कृताध्ययनाद् बलवद् वर्जितोऽम्बेडकरः पश्चाद्वर्तिकाले स्वप्रयत्नैः कतिपयपण्डितानाञ्च साहाय्येन संस्कृताध्ययने प्रवृत्तो बभूव, पाण्डित्यञ्च प्राप्तवान् । संस्कृत–फारसी–भाषयोस्तुलनां कुर्वता तेन भणितं यच्चरमा भाषा प्रथमायाः षोडशीमपि कलां नार्हति यतः संस्कृतं महाकाव्य-व्याकरणराजनय - दर्शन - तर्कशास्त्र - नाटक् - समीक्षादीनां बहुमूल्यो निधिः ।५

जाटवमहोदयः पूर्वोक्ते ग्रन्थे लिखति यद् गच्छता कालेनात्मनः प्रयासैर्भीमरावेण संस्कृतस्य पर्याप्तं ज्ञानमर्जितम्, तस्यां भाषायाञ्च पाण्डित्यमधिगतम् ६ ।

स्वीयविशिष्टभंग्या लिखति बाली-महोदयः 'स्वीय – प्रयत्नैः पश्चवर्तिकाले संस्कृत-निष्णातो बभूवाम्बेडकरः । 'अस्पृश्या के कथञ्च', शूद्राणां विषये शोधः' इति नामकयोर्ग्रन्थयोस्तस्य संस्कृतवैदुष्यस्य प्रमाणं प्राप्नुमः । यद् ब्राह्मणानां सहस्रैरपि दुःशकमासीत्तदम्बेडकरेणात्मना द्वितीयेनैव सुसाधितम् । संस्कृतग्रन्थानामध्ययनेन यज्ज्ञानमर्जितं तस्य सहायकेन प्रणीतो तस्य ग्रन्थो न कोपि जात्यभिमानी ब्राह्मणोऽस्य यावत्प्रत्याख्यातुं शशाक ।"७

अस्माद् विवरणात्स्पष्टीभवति यदम्बेडकरस्य मनसि संस्कृतं प्रत्यनुराग आसीत् । अस्यानुरागवशंवदेनैव तेन तदा संस्कृतं राष्ट्र-भाषा-पदे स्थापयितुं समर्थनं कृतमासीद् यदा भाषामिमां तन्महत्त्व-पूर्णपदप्रदानविषये कतिपयैर्नेतृभिरुदात्तस्वरेण याञ्चैयमुपस्थापिताऽऽसीत् ।

अम्बेडकरो भारतीयसंस्कृतेः परिपन्थीति लोकप्रवादः । तमज्ञान-विजृम्भितमेवेति मन्ये । स. बाल्यादेव जातिवादपिशाचेन पीडित आसीत् । पदे पदे पश्चादपि जीवनयात्रायां पिशाचेनानेन स कष्टे पातितोऽसंमानितश्च । तेन स जातिवादस्य परमः परिपन्थी जातः । तस्मादेव स जातिवादसमर्थकान् निन्दति स्म ग्रन्थान्, धर्मान्, मानवांश्च । जातिवादो हिन्दुसमाजस्य क्षयरोगः । अस्योपचारार्थं समये समयेऽस्य समाजस्य हितं चिकीर्षवोऽस्मान् सावधानान् कृतवन्तः, परमस्माभिस्तत्सर्वमुपेक्षितम् । अद्य तस्य कटुविपाकोऽनुभूयते सर्वैर्भारतवासिभिः ।

---

५ हुडलीकर, प्रो. सत्यबोध, नवयुगः अम्बेडकर विशेषांक, १३ अप्रैल, १९४७

६ जाटवः, डी. आर. पूर्वोक्ते ग्रन्थे, २४ पृष्ठे ।

७ बाली, एल. आर., पूर्वोक्ते ग्रन्थे, १३–पृष्ठयोः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अम्बेडकरस्य कथनमासीद् यद् हिन्दुसमाजाज्जातिवादो दूरीभवति जन्मना न कोऽप्यधम उत्तमो वा मन्यते, न कोऽपि च स्पृश्योऽस्पृश्यो वा प्रकीर्त्यते, तदाऽस्माकं न कोऽपि विरोधस्तेन । वयमपि हिन्दुसमाजस्याङ्गभूताः । अस्माकं मनस्यपि देशस्य हितार्थं तथैवादरो यथाऽन्येषां मनसि वर्तते । संस्कृतं प्रति तस्य सीमातीतस्य प्रेम्णश्चर्चा तु पूर्वं कृतैव । संस्कृतभाषायाः प्रचारस्य प्रसारस्य च कर्मणि दत्तावधानात् प्रतीयं मे विज्ञापना यत्तज्जातिवादस्य शरण्यैन भाव्यं यतो भाषा सर्वजनसाधारणा भवति, न तु केषांचिदेव ।

बाण-वसु-निधीन्दु-तमे ख्रिष्टाब्दे प्रकाशितचरात् स्वोपज्ञादम्बेडकराष्टकादुद्धृत्य कतिपयपद्यान्युपसंहरामः प्रकृते–

अम्बेडकरो जयति शम्बूककुलदीपकः ।
भारतीयं संविधानं रचयामास यो नवम् ॥ १
स आसीत संस्कृतस्नेही, सुरवाणीसमुपासकः ।
शूद्रत्वात् परं न शशाक. अध्येतुं संस्कृतं हि सः ॥ २
अम्बेडकर आसीत्तु विंशशताब्दीज एकलव्यः ।
नवा द्रोणा येन निजसामर्थ्येन सफलीकृताः ॥ ५
भारतस्य स्मृतिकर्ता बभूव स शूद्रेषु जातोऽपि सन् ।
ब्राह्मणाः देवतेजसा तेन तिरोहिता विद्याभास्करेण । ६

— ३-५७, अज्ञातवास
बंगा १४४५०५

पाठकाः प्रार्थ्यन्ते

मान्याः !

प्रवर्तमानवर्षस्यापि अर्धभागो व्यतीतः । पत्रप्रेषणेनापि वार्षिकशुल्कप्रेषणार्थं प्रार्थना कृता किन्तु स्वल्पैरेव महानुभावैः शुल्कप्रेषणं कृतम् । अतः सविनयं प्रार्थ्यते यत् शीघ्रमेव शुल्कप्रेषणेन सहायता क्रियताम् ।

—— सम्पादकः

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(१) तव मित्रतायाः पूर्वम्

कु. कुसुमलता
सुपुत्री सोहनलाल शर्मा

तव मित्रतायाः पूर्वम्
न कोऽपि शत्रुरासीत् ।
तव हासस्य पूर्वम्
न कदाऽप्यहम् अस्मयम् ।
तव आगमनस्य पूर्वम्
न पुष्पाणि, विकासं गतानि ।
मम हृदयस्य त्रोटनात्पूर्वम्
रे निष्ठुर ! स्वल्पमपि
न चिन्तितं त्वया
न चिन्तितं त्वया ॥

(२) कथमिदं भवति ?

कथमयं मे हृदयः
उन्मुख इव प्रतिभाति ।
कथं पुरा अनुभूता. पीडाः
सम्प्रति मयूराः प्रति भान्ति ।
कथं मह्यं आलक्तकवर्णो न रोचते,
गतः महिमानम् इव प्रतीयते ।
कथं मदीयः प्रणयसागरः
गतनीर सर इव प्रतिभाति ।
कथं मम समन्ततः अधुना
शून्यमिव दृग्गोचरी भवति ।

— घिंदसा, पटियाला (पञ्जाब)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

जन-आस्थायाः प्रतीकः-भगवान् परशुरामः

ओमप्रकाश 'राही' शास्त्री
आचार्य, एम. ए., एम. फिल

★

हस्ते परशुधारिणे रेणुकातनयाय वै ।
जमदग्निसुताय परशुरामाय ते नमः ॥

भारतभूः अनेकेषाम् ऋषीणाम्, मुनीनां, तपस्वीनां, सिद्ध-महात्मनाञ्च जननी अस्ति अत्र धर्मविध्वंसक - शक्तीनां विनाशाय सतां च रक्षणाय ईश्वरः यथाकालं स्वयमवतरति । भगवता श्री कृष्णेन श्रीमद्भगवद्गीतायां स्वयमेवैतत्प्रतिपादितम्—

यदा-यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥
परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ।

हिमाचले भूतनाथ,-महासू· रघुनाथ — रेणुका - मणिमहेश व्रजेश्वरी-चामुण्डा-ज्वालामुखी-लक्ष्मीनारायण -परशुराम-मार्कण्डेयादयः देवरूपेण अस्यैव अवतारवादस्य प्रतीका सन्ति ।

वैदिकयुगस्यान्ते भृगुवंशे 'ऋचीक' नामा कश्चित् ऋषिः बभूव, यः हिमालयस्य उपत्यकासु तपस्तेपे । महाभारतस्य वनपर्वणि वर्णितं यत तस्मिन् काले कान्यकुब्जनाम्नि नगरे राजर्षिः गाधिः बभूव । तस्य गृहे अत्यन्तमनोहारिणी 'सत्यवती' नाम कन्या जनिं लेभे । अशीतिवर्षपर्यन्तमखण्ड ब्रह्मचर्यधारिणः ऋचीकस्य मनसि कदाचित् ऋषिकुमारान् विलोक्य गृहस्थस्य इच्छा समुत्पन्ना । एतदर्थं सः राजर्षेः गाधेः कन्यायाः हस्तं ययाचे । श्री लालचन्द प्रार्थी स्व 'कुलूत देश की कहानी' नाम्नि पुस्तके वर्णयति यत् राजा गाधिः वृद्धेन सह स्व सुतायाः विवाहमुचित नामन्यत । परञ्च सः ऋषिशापभीत्या अकथयत् यत

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदि भवान् एकस्यैव वर्णस्य सप्तशतसंख्यकान् अश्वान् आनीयात् तर्हि अहं सहर्षं भवतः हृदयवाञ्छितं विधास्यामि । ऋचीकः गंगायास्तटे तपस्तप्त्वा । गंगाप्रसादेन अश्वान् सम्प्राप्य प्रासादे समुपस्थितः । तदानीं विवशः नृपः अनिच्छन्नपि स्वतनयां ऋषिणा सार्धं समप्रेषयत् । १९८९ फरवरी मासस्य 'हिमप्रस्थ' पत्रिकायां प्रकाशिते डा० अमरदेव आंगिरसस्य 'हिमाचल का लोकदेव - जमलू' नाम्नि लेखेऽपि एवंविधमेव वर्णनमस्ति ।

किञ्चित् कालानन्तरमेव ऋषिः राजकन्यां तस्याः पितृगृहं प्रेषितवान् । एतेन तस्याः पितरौ खिन्नौ । किञ्चित् समयानन्तरं सत्यवती स्वमात्रा सह पुत्रप्राप्तये ऋचीकं प्रार्थितवती । ऋषि ऋचीकः पुत्रेष्टियज्ञं व्यदधात तथा च ब्रह्म - क्षात्रमन्त्राभ्याम् अभिमन्त्रिते फले ताभ्यामदात् । परं फलभक्षणे परिवर्तनं सञ्जातम् । परिणामतः राजपुत्रः सत्वगुणोपेतः ऋषिपुत्रश्च रजोगुणयुक्तः सञ्जातः । कालानन्तरं तौ विश्वामित्र - जमदग्निनामभ्यां विख्यातौ । भृगुवंशीयः ऋषि ऋचीकः तत्पुत्रः जमदग्निः, जमदग्निभार्या रेणुका, रेणुकासुतः परशुरामश्च सत्ययुगस्यान्तिमचरणस्य महात्मानः बभूवुः यैः हिमाचलः अद्यापि सत्ययुगीनः इव परिलक्ष्यते ।

महामना जमदग्निः वेदाध्ययन-स्वाध्यायादिं विधाय राज्ञः प्रसेनजितस्य कन्यां रेणुकां परिणिनाय । रेणुकायाः भगिनीं रेणुकां सहस्रार्जुनः परिणिनाय, यः तदानीं हिमालये प्रशास्ति स्म । भगवतः दत्तात्रेयस्य बरं प्राप्य सहस्रार्जुनः अतीव शक्तिशाली सञ्जातः । वरस्य मदेन अन्धः सः ऋषि मुनि- देवान् अपीड़यत् 'विष्णोः साहाय्यं बिना सहस्रार्जुनस्य वधः न सम्भवः' एतज्जानन् जमदग्निः भगवन्त विष्णुं प्रसादयितुं कठोरं तपस्तेपे । तपसा प्रसन्नः विष्णुः प्रकटीभूय जमदग्निं मनोऽभिलषितं याचितुमकथयत् । यमदग्निः अवदत् – 'प्रभो ! सहस्रार्जुनस्य अत्याचारैः कथं मुक्तिः मिलिष्यति ?' विष्णुः अब्रवीत् - 'अहं सहस्रार्जुनस्य अत्याचारैः सुपरिचितोऽस्मि । तव गृहे पुत्ररूपेण समागत्य अहं तस्यात्याचाराणां समाप्तिं विधा यामि ।' कालानन्तरं जमदग्नेः पञ्चपुत्राः समुत्पन्नाः येषु परशुरामः कनिष्ठतम आसीत् । परशुरामः भगवतः विष्णोः षष्ठोऽवतारः मन्यते । जन्मनैव तस्य हस्ते 'परशुः' अंकितः आसीत अत एव सः परशुरामनाम्ना प्रसिद्धः । सिरमौरजनपदस्य रेणकास्थलस्य समीपे 'जामू की धार' इत्याख्ये पर्वतशिखरे वैशाखमासस्य शुक्लतृतीयायां भगवान् परशुरामः स्वजन्मना एतत्स्थलमभूषयत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परशुरामस्य चरित्रं वीर-तपस्वी — दुष्टसंहारक प्रजोद्धारक आज्ञापालकादिरूपेण अस्माकं दृष्टिपथं समायाति । एकदा स्नातुं गतायाः व्रतशीलायाः रेणुकायाः मनः जलविहारं कुर्वन्तं चित्ररथं विलोक्य विकृतमभूत् । महातेजो जमदग्निः तपोबलेन सर्वं व्यजानात् । क्रुद्धो जमदग्निः तत्रोपस्थितान् चतुरः पुत्रान् स्वमातृवधमादिष्टवान् । मातृमोहेन किंकर्तव्यविमूढास्ते सर्वे आज्ञापालने असमर्थाः सञ्जाताः । मुनिस्तान् सर्वान् शप्तवान् यैस्तेषां विचारशक्तिः नष्टाः । तदनन्तरं तत्रोपस्थितं परशुराममपि पूर्ववदेवादिदेश जमदग्निः । परशुरामस्तत्काल-लमेव पित्राज्ञां पालयन् मातृवधं व्यदधात् । एतेन प्रसन्नः जमदग्निः परशुरामं वरं याचितुमकथयत् । बुद्धिमान् परशुरामः अवदत्-'यदि भवान् वस्तुत एव मयि प्रसन्नस्तर्हि मम माता पुनर्जीविता भवतु मत्कृत्यं च विस्मरेत् तथा चामीः मम भ्रातरः सचेतनाः भवन्तु ' ऋषिणा 'तथाऽस्तु' इति कथिते परशुरामस्य सकला इच्छाः पूर्णा ।

एकदा सहस्रार्जुनः आखेट विदधन् ऋषेः आश्रमसमीपं सम्प्राप्तः । ऋषिः ससैन्यं तं स्वाश्रमे आमन्त्रितवान् । जमदग्निः देवराजमिन्द्रं कामधेनवे प्रार्थयत् । कामधेनुप्रभावेण जमदग्निरेणुकयोः आतिथ्येन चकितः सहस्रार्जुनः तां कामधेनुं ययाचे । यदा देवन्यासरूपां तां गां दातुं स्व असमर्थतां प्रादशयत् ऋषिस्तर्हि सहस्रार्जुनः स्वसैनिकान् तां गां हठात् नेतुमादिष्टवान् । परं दिव्या गौ आकाशमार्गेण देवलोकं सम्प्राप्ता एतेन सहस्रार्जुन ऋषि-अपमानं व्यदधात् यदा परशुरामः समागत्य वस्तुस्थितिं व्यजानात् तर्हि कोपाविष्टः सः स्वपरशुमादाय सहस्रार्जुनस्य राज्यं सम्प्राप्य तत्र युद्धे तं ससैन्यं नाशितवान् । सहस्रार्जुनस्य पुत्राः पलायनं विधाय समाधिस्थं जमदग्निमघ्नन् । स्वसतीत्व रक्षन्ती रेणुका समीपवर्तिनि 'रामसरोवरे' निमग्ना । तदा प्रभृति एतत्सरः 'रेणुकाझील' नाम्ना जनसाधारणे प्रसिद्धिं गतम् । एतेन अतीव क्रुद्धः परशुरामः सहस्रार्जुनस्य सर्वान् पुत्रान् जघान तथा च पश्चात् एकविंशति बारं पृथिवीमिमां निःक्षत्रियां व्यदधात् । अस्मिन्नेव महासंहारे तेन समन्तपंचकक्षेत्रे पञ्चसरांसि रक्तेन पूरितानि ।

एवंविधान् विविधान् सङ्ग्रामान् विधाय परशुरामः हिमालयं प्रति गच्छन् 'निरमण्ड' नाम्नि स्थाने तपस्तेपे । अत्रैव सः प्रायश्चित्तस्वरूपं 'नरमेध यज्ञं' सम्पादितवान् योऽद्यापि 'निरमण्ड भूण्डे' नाम्ना विज्ञायते तथा चात्र द्वादशवर्षानन्तरं एतत्सम्बन्धी समायोजनं विधीयते (कुलूत देश की कहानीः लालचन्द प्रार्थी पृष्ठ-२६१) अत्र महत्वपूर्णं उल्ले-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

खनीया च सा गुहा अस्ति यस्यां परशुरामस्तपः तप्तवान् तथा च यत्र तेन प्रयुक्तानि विविधानि वस्तूनि अद्यापि मिलन्ति।

रामायणे वर्णितं यत् विबाहानन्तरं रामस्य शक्तिपरीक्षणाय भगवान् परशुरामः स्वयं समागतः। यदा श्रीरामः तस्यां परीक्षायां सफलोऽभवत् तदा सः विश्वस्तोऽभवत् यदधुना प्रकृतेः महती शक्तिः समुत्पन्ना। अत स्वसाधनासिद्धिं परिलक्ष्य परशुरामः तपस्तप्तुं हिमालयं सम्प्राप्तः।

महाभारतस्य आदिपर्वणि वर्णितं यत् द्रोणाचार्यः महेन्द्राचलं सम्प्राप्य परशुरामात् प्रयोग-रहस्योपसंहारविधिसहितां शस्त्रास्त्रविद्यां प्राप्तवान्। पितामहः भीष्मोऽपि परशुरामस्य शिष्य आसीत्। वनपर्व-वर्णनानुसारं कर्णोऽपि अस्य शिष्यत्वमुपेयिवान्।

अद्य परशुरामस्य स्मृतौ हिमाचले संस्थापिताः विविधाः देवालयाः एनं प्रति जनसाधारणस्यास्थां प्रकटयन्ति। भगवतः परशुरामस्य 'औटर सिराज-निरमण्ड' स्थाने विद्यमानं मन्दिरं भारतविश्रुतमस्ति। 'अर्की' स्थले प्रसादैः सह 'परशुरामस्य उपनिवास स्थलं (पौल) विद्यमानं अस्ति। रेणुकासरसः समीपे विद्यमानं परशुरामताल' इत्याख्यं सरः परशुरामस्मृतिं कारयति। एतस्यैव समीपे विद्यमानानि मन्दिराणि भक्तानां, श्रद्धालूनां, नवागन्तुकानां पर्यटकानाञ्च आकर्षणकेन्द्राणि सन्ति। माता रेणुका प्रभोः जन्म लब्ध्वा शरीर अपरित्यागस्य वरमपि गृहीतवती। अतः भगवान् परशुरामः सदा चिरजीवी अमरश्चास्ति।

भगवतः परशुरामस्य जीवनचरितं पौराणिकयुगेन सम्बन्धितमस्ति यस्य स्मृतिः हिमाचलस्य देवस्थलेषु लोकविश्वासेषु च विद्यमाना अस्ति। भगवान् परशुरामः सदा स्वभक्तान् रक्षतु, जनकल्याणं विदधातु तथा च जनमानसेषु विश्वशान्तिभावनां समुत्पादयतु अनया प्रार्थनया सः मे प्रणामाञ्जलिं स्वीकरोतु।

— रा० उ० वि० – बोगधार
वाया – राजगढ़ – नौहरा
सिरमौर (हि. प्र.)

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदार्थो विनियोगवादश्च

डा० सत्यदेव निगमालंकारः
प्रवक्ता संस्कृतविभाग

★

विनियोगवादस्तु वेदार्थज्ञाने तृतीयो महाविघ्नः । प्रथमस्तु तावत् विकासवादः, द्वितीयश्चादृष्टवादः, तृतीयश्चास्ति विनियोगवादः । अथ कीदृशः विनियोगवादः वेदार्थे विघ्नकरः कीदृशश्च वेदार्थे सहायकः, इममेवाङ्गीकृत्य प्रबन्धेऽस्मिन् किमपि लिखितुमीहे । अथ कोऽयं विनियोगवादः ?

तत्रोपातानां शब्दानां वाक्यानाञ्च यथास्थानमुपयोगो विनियोग इति विनियोग लक्षणम् । उदाह्रियते एतत् पुष्ट्यर्थं यथा गीतायाः श्लोकोऽयम् —

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्ममृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि । २-२७ ।

यदीमं श्लोकं कश्चिदुपदेशकः कुत्रचित् कस्याचित् पुत्रस्य देशसेवायाः कर्मणि मृत्युर्भवे-त्तदा वदन्तु साधुः विनियोगः इति । किन्तु कस्याचित् कन्यायाः विवाहमाँगल्यप्रसंगे यदीमं पठेत् त्वनुचितमेवोपयोगोस्मात् नाय विनियोगः किन्तु दुर्नियोगस्वयम् । यथास्थानत्वञ्च विनियोज्य वाक्यानामर्थेन संवादिनि स्थाने प्रयोगरूप एव च विनियोज्य वाक्यस्यार्थं परिज्ञाय विनियोक्त्रा स्थाने कृतोऽयं विनियोगोऽस्थानेवेति शक्यते निरूपयितुम् । समुपस्थितेऽस्मिन्निर्णयप्रसंगे विनियोक्तव्य वाक्यानामर्थनिर्णयात् प्रागेव विनियोज्य वाक्यानामर्थनिर्णयो कर्त्तव्यः, तदनन्तरञ्च विनियोगवाक्यं तमर्थमनुवर्तते नवेति निर्णयमनुसंधेयम् । किन्तु अद्यत्वे तु मध्यकालस्थमीमांसकाः विनियोगवाक्यानामर्थं निश्चित्य वेदार्थं विपरीतमेव विनियोजयन्ति । यथा इदमेकमत्रोपन्यस्यते निदर्शनम् । यजुर्वेदस्य सप्तत्रिंशदध्याये द्वादशतमोऽयं मन्त्रः—

अनाधृष्टा पुरस्तादग्ने राधिपत्ये चक्षुर्मेदाः ।
पुत्रवती दक्षिणात इन्द्रस्याधिपत्ये प्रजाम्मे दाः ।
सुषदा पश्चाद् देवस्य सवितुराधिपत्ये चक्षुर्मेदाः ।
आस्र् तिरुत्तरतो धातुराधिपत्ये रायस्पोषम्मे दाः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विधृतिरूपरिष्टाद् बृहस्पतेराधिपत्य ओजोमेदाः ।
विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि मनोरश्वासि: ।।

प्रथमं तावद् प्रदर्शयिष्ये सुविनियोजित: विनियोगोऽर्थ:—

हे स्त्रि, परघर्षणरहिता पूर्वदेशात् पावकस्य अधिपतेर्भावे जीवनप्रदमन्न मह्यं दद्याः, प्रशस्ताः पुत्रा विद्यन्ते-यस्याः सा, पुत्रवती दक्षिणाद्देशात् विद्युत् ऐश्वर्यस्य वा अधिष्ठातृत्वे प्रजां मह्यं दद्याः, सुष्ठु सीदन्ति यस्यां सा, सुषदा, पश्चिमतः देदीप्यमानस्य सवितृमण्डलस्य आधिपत्ये चक्षुः मह्यं दद्याः समन्ताच्छ्रवणं यस्याः सा, आश्रुति धर्त्तुर्वायोः धनस्य पुष्टिं, विविधाधारणा यस्याः सा विधृतिः, ऊर्ध्वात् वृद्धतां पालकस्य सूत्रात्मनो बलम्, सर्वाश्च: मां नष्टभ्रष्टस्वभावाभ्यो व्यभिचारिणीभ्य: पाहि । त्व मे अन्त: करणस्य व्यापिका भवसि ।

हे मनुष्या ! यथाग्निजीवनं, यथा विद्युत् प्रजां, यथा सविता दर्शनं धाता श्रियं महावायोर्बलञ्च ददाति तथैव सुलक्षणा पत्नी सर्वाणि सुखानि प्रयच्छति । तां यथावद्रक्षथ १ ।

हे पत्नि, ममरक्षां कथम् कुरु ? यत्—

मनोरश्वासि=अर्थात् अन्त: करणस्य व्यापिका भवसि ।।

महर्षिदयानन्दकृतोऽयमर्थः अत्यधिकस्पष्टः प्रकरणानुकूलः, युक्तिसंगतश्च दृश्यते । मन्येऽस्मिन् "पुत्रवती" शब्दे पत्न्याः वर्णनमस्मिनिति उद्घोषयति । नात्र किमप्यनुपयुक्तम् । विवाहसंस्कारे पतिः भार्यायै कथयति —

"द्यौरहं पृथिवी त्वम्"

हे पत्नि, अहं द्यौः अस्मि त्वं पृथिवी असि । अत्र द्यौः शब्दः स्त्रीलिङ्गः, पृथिवीचात्र वेदे स्पष्ट रूपेण पत्न्यै समागतः । उपरोक्तमन्त्रे पुत्रवती" इति शब्दस्य पृथिव्या अनुसारमर्थं कुर्युश्चेत् स शिक्षाप्रदः, उत्साहवर्धकश्च गृहस्थाश्रमाय भूयात् । किन्तु मध्यकालीन भाष्यकारैः वेदमन्त्रानुसारं विनियोगो न कृत्वा विनियोगानुसारं वेदमन्त्रस्यार्थः कृतः । तस्यैव मन्त्रस्य महीधरकृतमर्थं विलोकयतु तावत्—

संकेत स्थानानि: —

१ ऋषि दयानन्द सरस्वती कृत यजुर्वेद भाष्य, पृष्ठ १०८३, अध्याय ३७-१२ प्रकाशन वैदिक यन्त्रालयः अजमेरः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अनाधृष्टेति वाचयति प्रादेशमध्यधिधारयन्तम् २ महावीरो पञ्चाङ्गुष्ठाङ्गुलिदेशं धरन्तं यजमानमध्वयुर्मन्त्रान्वाचयतीति सूत्रार्थः । सप्तयजूंषि पृथिवीदेवत्यानि यजमानस्याशीः । हे पृथिवी या त्वं पुरस्तात् पूर्वस्यां दिशि रक्षोभिरनाधर्षिता अग्नेराधिपत्ये स्वामि वे सति मह् यमायुर्दाः देहि । या त्व दक्षिणस्यां दिशि इन्द्रस्याधिपत्ये सति पुत्रयुता सा मह्यं प्रजां पुत्रादिकान् देहि । या त्वं पश्चिमायां दिशि सुखदा भवसि, सुष्ठु अस्यां सीदन्ति जनाइति सुषदा, सवितुर्देवस्याधिपत्ये सति सा त्वं मे चक्षु. नेत्रेन्द्रियं देहि । हे पृथिवी, या त्वमुत्तरस्यां दिशि धातुर्ब्रह्मण आधिपत्ये सति आश्रुतिरसि, आश्रावयन्ति ऋत्विजो यस्यां सा आश्रुतिः, यज्ञियोद्यु-तरदेशः, सा त्वं मे रायो धनस्य पुष्टिं देहि । या त्वमुपरिष्ठादुपरिप्रदेशे बृहस्पतेराधिपत्ये सति विधृतिरसि, विशेषेण धारयन्तीति विधृति. उपरिष्ठाज्जुहू मादिकं ध्रियते, सा त्वं हृ यंबल देहि । हे महावीरदक्षिणभूमे, विश्वाभ्यः सर्वाभ्य नाष्ट्राभ्यः नाशकर्त्रीभ्यः पिशाचादिभ्यो लोकप्रसिद्धं अस्मान् रक्ष । हे धर्म्योत्तरभूमे, त्वं मनोः राज्ञः अश्वा बडवासि वहनाय । अथवा ह वा इयं भूत्वा मनुमुवाह ।३

(१४ १-३१५)

एतादृशोऽयं पृथिव्या सह कृतोऽर्थ कमपि प्रयोजनं न जनयति । केवलमात्रं वेदार्थमेव दूषयति । महर्षिदयानन्दकृते पूर्वस्मिन्नर्थे अस्मिंच महर्षिकृते चार्थे कियदन्तरमिति स्वयमेव विवेचयन्तु सुधियः । अनेन ज्ञायते यद् विनियोगवाक्यस्य नायं दोषः किन्तु यंविनियोगवतं इति पदं विनियोगवाक्यस्य दासतामानीतं, औचित्यं नावलम्बितम्, स एवात्रोपालम्भनायाः सन्ति । अत एव वेदार्थं दुष्कतुं मीमांसकाः विनियोगानुसारं वेदमन्त्राणामर्थम् कृतवन्तः । तस्मादेतत् विनियोगदास्यमवश्यमेव त्याज्यम्, विनियोगस्य च समुचितोऽर्थः ग्राह्यः । न चाग्रे कश्चिद् विनियोगवादं वेदार्थज्ञाने महाविघ्न इति नाम्ना सम्बोधयेदिति विदांकुर्वन्तु सुधियः ।

प्रवक्ता संस्कृत विभाग
गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार

★

---

२ का० २६-३-५ ।

३ महीधर भाष्य, शुक्ल यजुर्वेद संहिता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हरियाणाप्रदेशे संस्कृत-महाविद्यालयानाम् स्थितिश्चिन्तनीया

रामनारायण शास्त्री प्राचार्यः

★

नास्मिन् कोऽपि सन्देहः यत् हरियाणा प्रदेशः भारतीयसंस्कृतेः मूलभूतानां वेदानां, पुराणानाञ्च दर्शनानाम् उपनिषदां धर्मशास्त्राणाञ्च जन्मभूमिरस्ति। अस्मिन्नेव पुण्यप्रदेशे वेदव्यासादयो महर्षयः प्रादुर्बभूवुः। विश्वविख्यातस्य महाभारताख्यस्य ग्रन्थस्य प्रणयनमपि अत्रैव विहितम् यस्य महत्त्वम् प्रतिपादयन् सम्यगेव आह भगवान् कृष्णद्वैपायनः-

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥

विषादग्रस्तं अर्जुनं प्रबोधयता भगवता श्रीकृष्णेन उपनिषदां सारभूतं गीतायाः उपदेशोऽपि अत्रैव विहितः। यतो हि अयं प्रदेशः हरेः- साक्षात् विष्णोः अयनं निवासस्थानमस्ति अस्मादेव कारणात् प्रदेशस्य नाम हरेरयनम् (हरियाणा) इति विश्वविदितमस्ति।

परं खेदस्य अयं विषयः यत् साम्प्रतम् अस्मिन् प्रान्ते गुरुकुलप्रणाल्याः संस्कृतमाध्यमेन शिक्षाप्रदातॄणाम् भारतीयसंस्कृतेः प्राणभूताया देववाण्याः संरक्षणतत्पराणाम् संस्कृतमहाविद्यालयानां स्थितिः अत्यन्तं चिन्तनीया अस्ति। एकतः राज्यसर्वकारः आंग्लमहाविद्यालयानां कृते प्रतिवर्षं कोटिशः रूप्यकाणि व्ययीकरोति अपरतः संस्कृतमहाविद्यालयानां कृते षट्सहस्रपरिमित वार्षिकमनुदानं ददाति यच्च एकस्य चतुर्थश्रेणीकर्मचारिणः अपि वेतनाय अपर्याप्तमस्ति किमुत सर्वेषाम् कर्मचारिणाम्। आंग्लमहाविद्यालयेषु प्रतिवर्षं प्रतिछात्रम् सहस्रशः रूप्यकाणि शिक्षाशुल्करूपेण गृह्यन्ते परं संस्कृतमहाविद्यालयेषु तु न केवलं छात्राः सर्वथा निःशुल्कं एव पाठ्यन्ते अपितु तत्र अधीयानानाम् छात्राणाम् भोजनावासादिव्यवस्थाऽपि प्रबन्धकै रेव

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

करणीया भवति । राज्यसर्वकारः संस्कृतस्य विकासाय प्रसाराय च न किमपि कर्तुं वाञ्छति ।

इतोऽप्यधिकं खेदावह इदमस्ति यत् समस्ते हरियाणाप्रदेशे राज्यसर्वकारेण सञ्चालितः एकोऽपि संस्कृतमहाविद्यालयः नास्ति । राज्यस्थविश्वविद्यालयेषु अन्यतमेष्वपि नास्ति ईदृश यत्र प्राच्यप्रणाल्या शास्त्री आचार्यपर्यन्तं संस्कृतशिक्षायाः कश्चित् संकायः कक्षो वा भवेत् एतत् सर्वं सर्वकारस्य औदासीन्यमेव सूचयति । यद्यपि राज्यस्थ कुरुक्षेत्रविश्वविद्यालयस्य स्थापना मूलतः संस्कृतस्य प्रचाराय संरक्षणाय एव कृता आसीत् अतः एव अस्य प्रारम्भिकम् नामापि संस्कृतविश्वविद्यालयः इत्येव निर्धारितम् परम् कालानन्तरं न केवलं अस्य नाम एव परिवर्तितम् परम् अस्य स्थापनाया उद्देश्यमपि सर्वथा तिरो भूतम् । सम्प्रति अत्रापि आंग्लभाषाया एव प्राधान्यं, वर्चस्वञ्चापि सर्वत्र द्रष्टुं शक्यते । अनेन विश्वविद्यालयेन तु संस्कृतं महाविद्यालयानां अनुमोदनस्य (Affiliation) प्रावधानमपि निरस्तम् ।

एकेन सर्वेक्षणेन इदं तथ्यं अवगतम् यत् साम्प्रतम् समस्ते हरियाणा प्रदेशे संस्कृतमहाविद्यालयानां संख्या केवलं पञ्चविंशति परिमिता अस्ति येषु द्वौ केन्द्रीयसर्वकारेण आदर्शरूपेण अधिगृहीतौ । एकः अम्बालाशिविरस्थो दीवानकृष्णकिशोरसनातनधर्मसंस्कृतमहाविद्यालयः अपरश्च वघौला (पलवल) स्थः संस्कृतविद्यापीठः । अनयोः द्वयोरपि महाविद्यालययोः अधिकतरं आर्थिकम् भार केन्द्रीयसर्वकारः एव वहति । अनयोः आदर्शरूपेण स्वीकृतयो द्वयोरपि महाविद्यालययोः स्तरः अपि राज्यस्य प्रथमश्रेण्या आंग्लमहाविद्यालयात् नास्ति न्यूनतरः । परं इमौ द्वौ परित्यज्य ये अन्ये त्रयोविंशतिसंस्कृतमहाविद्यालयाः सन्ति तेषां स्थितिः सर्वथा चिन्तनीया अस्ति । यतो हि राज्यसर्वकारेण तत्रस्थप्राध्यापकानां कर्मचारिणाञ्च वेतनमानादिकं न निर्धारितम् न च वेतनार्थं नियमितम् अनुदानमेव दीयते अतः तत्रस्थाः प्राध्यापकाः भिक्षावृत्तिमवलम्ब्यैव कार्यं कर्तुं विवशाः सन्ति । एतेभ्यो वराकेभ्यश्च प्रबन्धका यत् किमपि प्रयच्छन्ति तदेव अहोभाग्य स्वीकुर्वन्ति । एतेषां शोषण प्रबन्धकै अहर्निशं क्रियते । यतोऽहि एषां महाविद्यालयानां प्रबन्धे सर्वकार न किमपि हस्तक्षेपं विदधाति अतोऽत्र प्रबन्धकाः स्वेच्छाचारं विदधति ऐषु दशप्राध्यापकानां कार्यं त्रयः चत्वारः वा प्राध्यापका कुर्वन्ति प्राध्यापकानां वेतनन्तु चतुर्थश्रेणिस्थकर्मचारिणा तुल्यं वर्तते नात्र लिपिकः न च सेवकः नचैव पुस्तकालयाध्यक्षः । तेषाम् सर्वेषां कार्यमपि प्राध्यापका एव कुर्वन्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राज्यस्य विश्वविद्यालयैः सह आंग्ल, इंजियनीयरिंग, मैडिकल, आयुर्वेदिक पोलिटैक्नीक, प्रशिक्षणादयः सर्वेऽपि महाविद्यालयाः (Affiliated) भवितुं अर्हन्ति परं संस्कृत महाविद्यालयास्तु अनेन मौलिकाधिकारेणापि वञ्चिताः। कुरुक्षेत्र विश्वविद्यालयेन सन् १९७९ तमे वर्षे एकेन अध्यादेशेन संस्कृतमहाविद्यालयानाम् अनुमोदनस्य अधिकारः सर्वथा निरस्तः। तदारभ्य एते महाविद्यालया केवलं एसोसिएटेडमहाविद्यालयाः एव उद्घोषिताः यत्र प्राध्यापकाः वेतन-मानादिकं विनैव कार्यं कर्तुं विवशाः। तत्र प्राध्यापकानां कृते सेनानि-वृत्तेः, भविष्यनिधेः, वेतनवृद्धेः, गृहभाटकस्य महर्घता भाटकस्य, नगरपूर्तिभाटकस्य च न कोऽपि नियमः। एषां महाविद्यालयानां छात्रास्तु स्वयं पाठिन एव व्यवह्रियन्ते विश्वविद्यालयीयाः अधिकारि-णस्तु तान् सर्वान् सर्वथा उपेक्षावृत्या एव पश्यन्ति न कोऽपि तैः सह वार्तामपि कर्तुं वाञ्छति। महाविद्यालयानां प्राध्यापकाः प्राश्निक, परीक्षक, केन्द्राधीक्षक, निरीक्षकादिरूपेण किमपि विश्वविद्यालयीयं कार्यं कर्तुं सर्वथा अयोग्याः मन्यन्ते। छात्राणां परीक्षापरिणामः न कदाचिदपि यथा समये उद्घोष्यते। विश्वविद्यालयीयासु विविधासु समितिसु न एषां प्रातिनिध्यम् भवति येन एतेषां समस्याः यथावत् अवतिष्ठन्ते। न कोऽपि ताः समादधाति। संस्कृतमहाविद्यालयानां छात्राः विश्वविद्यालयेन समये समये आयोज्यमानासु विविधासु सांस्कृतिकक्रीड़ादिप्रतियोगितासु युवकसमारोहेषु च भागं ग्रहीतुं नार्हन्ति। विश्वविद्यालये यथा अन्येभ्यः आंग्लमहाविद्यालयेभ्यः विवि-धेभ्यः कार्येभ्यः आर्थिकं अनुदानं दीयते तथा संस्कृतमहाविद्यालयानां कृते स्फुटिता कपर्दिकाऽपि न दीयते।

राज्यसर्वकारस्य शिक्षामन्त्रालये संस्कृतमहाविद्यालयानां कृते न कोऽपि पृथक् प्रकोष्ठः निर्धारितः यत्र गत्वा एते स्व कार्यम् साधयेयुः। प्राथमिकविद्यालयात् आरभ्य विश्वविद्यालयपर्यन्तं सर्वेषां अध्याप-कानां कर्मचारिणाञ्च वेतनमानादिकं राज्यसर्वकारेण निर्धार्यते समये समये तत्र सर्वं संशोध्यते तदनुरूपं आर्थिकमनुदानं नैव तेभ्यः दीयते परं संस्कृतमहाविद्यालयानां कृते तु नास्ति ईदृशी व्यवस्था। तत्र तु अनुग्रहरूपेण, षट्सहस्रपरिमितं वार्षिकं अनुदानं सुनिश्चितम् यथा कश्चित् दुग्धदधिमध्यत नवनीतं निस्सार्यं तक्रं इतस्ततः वितरति तथैव हरियाणा सवकार अपि आर्थिकानुदानभूतं नवनीतं अन्येभ्य आंग्लभाषाप्रसारपरायणेभ्योः महाविद्यालयेभ्य प्रयच्छति अवशिष्टं किञ्चित् तक्रं भारतीयसांस्कृतिकरक्षणतत्परेभ्यः संस्कृतमहाविद्याल-येभ्यः प्रयच्छति। संस्कृतमहाविद्यालयानां स्नातकानां कृते ओ. टी.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रशिक्षणस्य व्यवस्थाऽपि विगतेभ्यः षट्वर्षेभ्यः विछिन्ना तिष्ठति येन एते स्नातका. वृत्तिरहिता भूत्वा इतस्ततः पर्यटन्ति। तेषां भविष्यं अन्धकारेण पूर्णं दृश्यते।

हा हन्त ! ईदृशी दुरवस्था अस्ति हरियाणाराज्ये संस्कृतमहाविद्यालयानां यां दृष्ट्वा कोऽपि कथयितुं शक्नोति यत् एषां महाविद्यालयानां समुद्धारणाय यदि युद्धस्तरेण किमपि कार्यं आशु एव न करिष्यते तदा संस्कृतकेन्द्रभूता एते महाविद्यालयाः नेदियस्येव काले समाप्ताः भविष्यन्ति इदृश्यां स्थितौ हरियाणा राज्ये संस्कृत भाषा सर्वथा विलुप्ता एव स्यात्।

परं संस्कृतमहाविद्यालयानां दुर्दशायाः उत्तरदायित्वं यथा सर्वकारे आरोप्यते तथा किमपिउत्तरदायित्वं अस्माकमपि अस्ति ये स्वाधिकारस्य रक्षार्थं न कदाचिदपि संभूय सर्वकारस्य द्वारं खट्खटायन्ते वयं तु यत् किमपि वृत्तिरूपेण लभ्यते तमेव स्वीयमहोभाग्यं मन्यमाना सन्तुष्टाः तिष्ठामः। पर विद्वद्भिः इदमवधेयं यत् रोदनेन विना तु जननी अपि स्वकीयं शिशु दुग्धं न पाययति। अतः बान्धवाः ! हरियाणा प्रदेशे यदि संस्कृतं संस्कृतिञ्च रक्षितुं वाञ्छथ तदा सर्वेऽपि चिरनिद्रां परित्यज्य स्वाधिकारस्य रक्षार्थं सन्नद्धा भवत, उत्तिष्ठत जाग्रत। सर्वकारस्य विश्वविद्यालयस्य च अधिकारिणः मन्त्रिणश्च सम्प्राप्य स्वीयाः समस्याः तेषाम् समक्षे प्रस्तूय तासां समाधानं कुरुत अन्यथा युष्माकं अस्तित्वमपि कदाचित् विलुप्तं भविष्यति।

— प्राचार्य, दी. कृ. कि. एस. डी.
संस्कृत कालेज अम्बाला।

सूचना— शुल्क समाप्ति पर हम सभी ग्राहकों को सेवा में शुल्क भेजने को पत्र भेजते हैं। जो लोग ग्राहक नहीं रहना चाहते उन्हें तुरन्त हमें सूचित करना चाहिए। अनुभव किया गया है कि चार चार वर्षों तक हम पत्रिका भेजते रहते हैं परन्तु शुल्क प्राप्त नहीं होता। न ही कोई हमारे पत्रों का उत्तर। पता बदल जाए तो उसकी सूचना भी तुरन्त भेजनी चाहिये।

वा. शु.

— सम्पादक

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाणिनीयालोचनम्

प्रणेताः— श्री राजनारायण मिश्र 'नूतन' शास्त्री ।

प्राप्तिस्थलम्: - नूतन प्रकाशन १७१, आसफजान, पीलीभीत (उ.प्र.)

मूल्यम् :— पञ्चमुद्राः ।

चत्वारिंशत्—पृष्ठात्मक पुस्तकमिदं विदुषा लेखकेन पाणिने र्व्याकरणालोचनं कुर्वता लिखितम् । ये किल कथयन्ति यदिदानीं संस्कृते आलोचनात्मकसाहित्यनिर्माणं न जायते तेषां कृते सुतरामिदमुत्तरम् । संस्कृत साहित्यस्य तु विकास एव समालोचनाधारितोऽस्ति । टीकाटिप्पणीनां भाष्याणां तत्रैको प्रवाह एव । अस्मिन्—पुस्तके समालोचकेन पाणिनिव्याकरणसूत्रे ये ये दोषाः सन्ति तेषां समन्वेषणं कृतं विदुषां विचारज्ञानाय चेदं पुस्तकं प्रकाशितम् । मुद्रणं शुद्धम् । पुस्तकमिदं हिन्दी भाषायामस्ति ।

—

जन्मभूमिर्मे भारतम्

(संस्कृत खण्डकाव्यम्)

लेखकः— श्री हंसराज नागरः, एम. ए.

प्राप्तिस्थानम् :- ग्राम—तिगांव, १२११०१ तह० बल्लभगढ़ ।
जिला फरीदाबाद— हरियाणा ।

मूल्यम् :— सप्तरूप्यकाणि ।

द्वादश पृष्ठात्मकमिदं पुस्तकमस्ति । अस्मिन् भारतभुवो विलक्षणताया विकासस्य च वर्णनं कृतमस्ति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यथा :— भारतं जन्मभूमिर्मे, सर्वदेशेषु शोभते ।
भूलोकेऽस्मिश्च ताराणां मध्यतश्चन्द्रमा यथा ॥
आकृतिर्यस्य शार्दूल, इव भूमौ च वर्तते ।
तद्विख्यात प्रभावाश्च सर्वदेशेषु विश्रुताः ॥

यत्र तत्र मुद्रणाशुद्धयः सन्ति तथापि पुस्तकं ग्राह्यं पाठ्यञ्च वर्तते ।

●

अलका

लेखक ।— डा. श्री केशवचन्द्र दासः जगन्नाथ संस्कृत विश्वविद्यालय पुरी ।

प्राप्तिस्थानम् :— लोक भाषाप्रचार समितिः, बड़ ओडियामठ, पुरी ७५२००१ (उड़ीसा)

मूल्यम् :— रु. १०

अस्य पुस्तकस्य प्रणेता दिव्यज्योतिषः लेखकः डा. श्री केशवचन्द्रः- संस्कृते नवोपन्यासलेखकोऽस्ति । अष्टचत्वारिंशत् - पृष्ठात्मकं चत्वारिंशत् गद्यगीतयुतं काव्यमिदम् - सुतरां प्रशस्यम् । काव्यसंग्रहेऽस्मिन् — कवयितु :— दार्शनिक विचाराणामङ्कनं स्पष्टतयाऽनुभवितुं शक्यते । सामयिकविषयाश्च कविना सुष्टुस्पृष्टाः । मन्ये संस्कृत- जगदेतस्य स्वागतं करिष्यति ।

●

श्री कृष्णताण्डवस्तोत्रम्

लेखक ।— श्री नरोत्तमदत्त शास्त्री बी. ए. एल. एल. बी., एडवोकेट ।

प्राप्तिस्थलम्:— जीवन कुटीर, बिलासपुर (हि. प्र.)

मूल्यम्:— रु० १०

इदं किलास्य स्तोत्रस्य द्वितीयं संस्करणम् । सप्तादशश्लोकात्मकस्तोत्रस्यास्य रचना सुरतालयपूर्णा छन्दोबद्धा च हिमाचलप्रदेशस्य स्तोत्रसाहित्ये महत्वपूर्णमस्य स्थानं भविष्यति नात्र संशयः । अस्य प्रथमसंस्करणं १९९० विक्रमाब्दे प्रकाशितमभूत ।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वैदिकदर्शनेष्वात्मस्वरूप विमर्शः

प्रणेता :— डा० स्वामी गुरुपादानन्द सरस्वती, व्याकरणाचार्यः ।

प्राप्तिस्थानम्:— श्री कुमार स्वामीमठः, केदारघाट वाराणसी ।
२२१००१ (उ प्र.)

पुस्तकमिदं श्रीस्वामि पादानां शोधग्रन्थोऽस्ति । अस्य प्राक्कथन-लेखकाः सन्ति हि. वि. विद्यालयस्य पूर्वदर्शनविभागाध्यक्षाः । ततोऽस्ति स्वामिमहेशानन्दगिरिमहाराजानां शुभाशीर्वचनानि, हरिद्वारस्थ शिवानन्दाश्रमाध्यक्षाणां स्वामिचिदानन्दानामप्यत्राशीर्वादः प्रख्यातविदुषां श्रीमतां एस. सुब्रह्मण्यशास्त्रिमहोदयानाञ्चापि शुभकामनाः प्रारम्भे वर्तन्ते । एभिरेव पुस्तकस्य महत्ता स्वयं सिद्धा भवति । ऐहिकामुष्मिककष्टनिवृत्यर्थं प्रवृत्तानि दर्शनानि तथापि तत्र परस्परं पृथक् पृथक् - विचाराः सन्ति तत्तद्दर्शननिर्मातृणाम् । एतत्सर्वं पुस्तकेऽस्मिन् श्रीस्वामिपादैर्विस्तरेण प्रतिपादितम् ।

अस्य प्रथमाध्याये दर्शनानां सामान्यपरिचयः । अत्र प्राच्य-पाश्चात्य-दर्शनानां संक्षेपतस्तुलना, वैदिकावैदिकभारतीयदर्शनानाञ्च सामान्यसिद्धान्तविवेचना संक्षेपेण दत्ता वर्तते ।

द्वितीयाध्याये आस्तिकदर्शनानां वैदिकतत्वविमर्शः । अत्रावैदिकदर्शनानामपि आत्मस्वरूपविचार; पूर्वपक्षरूपेणोपस्थापितः । तृतीयाध्याये-षड् - वैदिकदर्शनेषु मध्ये न्याये - वैशेषिके - सांख्ये, योगे, पूर्वमीमांसादर्शने प्रतिपादितमात्मस्वरूपं सारल्येन विवेचितम् । चतुर्थाध्याये - प्रायशः समस्तवेदान्तप्रस्थानानां प्रसंगे ब्रह्मसूत्राण्याश्रित्य विभिन्नाचार्यैः प्रतिपादितं तत्तन्मतानुसारमात्मस्वरूपमुपस्थापयत् - ब्रह्म - जगज्जीवसाधन-मोक्षस्वरूपाणि च तत्तद्दर्शनानुसारं वर्णनप्रयत्नमकरोत् । पञ्चमाध्याये समग्रदर्शनानां यथाक्रम - प्रतिपादितमात्मस्वरूपं शब्दाद्वैतञ्च स्पष्टीकृतम् । अन्ते च सिद्धान्तरूपेण अद्वैतवेदान्तदर्शनमेव सर्वदर्शनानां मुकुटमणिरिति लेखकेन स्वाभिप्रायः प्रकटितः ।

पुस्तकेऽस्मिन् ५० पृष्ठाः सन्ति । आवरणमाकर्षकमस्ति । मुद्रणं प्रायेण शुद्धम् । यत्राशुद्धयः काश्चान सन्ति तासामपाकरणाय शुद्धिपत्रमपि संलग्नमस्ति ।

इत्थं सर्वप्रकारेण सुन्दरमिदं पुस्तकं दर्शनशास्त्रजिज्ञासूनां कृते विशेषतः साधारणतश्च सर्वेषामपि कृते पाठ्यमस्ति । विद्वद्भिरस्याधिकोधिकसम्मानं कार्यम् । स्वपुस्तकालयश्चालंकरणीयोऽनेन सर्वाभिः संस्थाभिः विद्वद्भिश्चेतिशम् ।

——

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समाचाराः

महाकवि कालिदास जन्मभू स्मारक समिति कविठा

चमोली। गढवालान्तर्गत. चमोली जनपदे कविठा स्थाने जून मासेऽस्य ख्रीष्टाब्दस्य महाकवि कालिदासजयन्ती सम्पाद्यते । बहूनां विदुषामयं विचारोऽस्ति यत्कालिदासस्य जन्मभूमि: कविठा आसीत् । अयं हर्षस्य विषय: यत् - कालिदास जन्मभू: समन्वेषण प्रयासा: सर्वदा प्रचलमाना सन्ति । यदि जना: संस्कृतप्रसारविकासकार्याय सर्वात्मना समर्पिता: भवेयुस्तु संस्कृतस्य तेन महती सेवा स्यात्-कालिदासविषये-चाधिकरुचिर्लोकानां स्यात् । अत्र श्री चेतराम भट्ट श्री सुरेशानन्द गौडादीनां सहयोग: सर्वदा प्रशस्योऽस्ति । सर्वैस्व सहयोगो देय: ।

★

मध्यप्रदेश संस्कृत अकादमी वाक्संगोष्ठी-मायोजयति

भोपाल:। मध्यप्रदेश संस्कृत अकादमी ६ जूनत: ११ जूनयावत् अम्बिकापुरे वाक्संगोष्ठीमायोजयति । अत्र विभिन्ना: सांस्कृतिक साहित्यिक कार्यक्रमा: भविष्यन्ति अयं कालिदाससमारोहनाम्ना अपि प्रसिद्धोऽस्ति अत्र अवसरेऽस्मिन् प्रदेशीया: देशीयाश्चानेके विद्वांस सम्मिलिता भवन्ति । भास्कराचार्य त्रिपाठिन साचिव्ये अकादमी अधिकाधिकां सेवां कुर्यात्संस्कृतस्य इति—आशा ।

★

विश्वस्य नवदेशेषु—आयुर्वेदस्य मान्यता

भारत नेपाल-श्री लंका-थाईलैण्ड—भूटान-बर्मा—बांगलादेश-पाकिस्तान-मारिशसदेशेषु आयुर्वेदस्य मान्यता वर्तते—इति भारत-देशाय गौरवावहमस्ति । यतोहि भारतमेव आयुर्वेदस्य जन्मभूमिरस्ति ।

मारिशसदेशेऽधुनैव गतवर्षे मान्यतेयं जाता एतत्कृते च तत्रत्य संसदि प्रस्ताव: पारितोऽभूत । एतत्कृते पं. जगदीश प्रसादशर्मभि:—नववारं तत्र गमनं कृतम् । एतेषामेव प्रयासेन च कार्यमिदं जातम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हि. प्र. क. सं. भाषा अकादमी शिमला

हिमाचलस्य शिमलानगरे तमिलनाडुकलाप्रदर्शनम्

शिमलायाम् २३ जूनतः २६ पर्यन्तं Y. W. C. A. संस्थाया विशाले कक्षे हिमाचप्रदेशकलासंस्कृतिभाषा-अकादेमी-सहयोगेन तमिलनाडुललितकलाअकादम्या तत्रत्यकलाप्रदर्शनमकारि । अभूतपूर्वोऽयमुत्सवोऽभूत । अत्र किल चित्रलेखन—चित्रकलारेखाचित्र—मूर्तिकलादीनां विशाला प्रदर्शनी समायोजिता । एम. के. मुथुस्वामिनः श्री एस. रवि शंकरस्य, सी. जी. एन्टोनीडोसस्य, पी. एल. नरसिंह मूर्ति महाभागस्य, एम० वेलायुतम् महाशयस्य विभिन्नचित्रमूर्त्यादयः प्रशस्याः आसन् ।

शिमलायाः प्रख्याते गैयटीनाट्यगृहे सायं काले तमिलनाडु कलाकारैः समायोजिताः सांस्कृतिककार्यक्रमाः- हिमाचलस्य पञ्च सहस्रै लोकैरवलोकिताः । २४-६-१९९० दिवसे सांस्कृतिक समारोहस्य उद्घाटनं हि० प्र० विधानसभाध्यक्षेण श्री राधारमणशास्त्रिणा कृतम् । आशासे श्री शास्त्री हि. प्र. क. सं. भाषा अकादम्याः-विकासाय विशिष्टप्रयत्नान् करिष्यति यतोहि सः— अकादम्या मूल्याकनं कर्तुमर्हति तस्या विकासाय च तेन महत्वपूर्णप्रयासाः- करणीया इति प्रदेशवासिनामाशा आग्रहश्चापि । यतोहि प्रत्येकविधायकः प्रशासनिक - अधिकारी वा साहित्यकला संस्कृतिभाषासम्बन्धिविषयानां महत्वं तेषां विकासावश्यकताञ्च तथा न परिचिनोति यथा शास्त्री ज्ञातुमर्हति । प्रदेशवासिभिराशा करणीया यदत्र श्री शास्त्रिणा पूर्णसहयोगो करिष्यते ।

★

अकादम्या पूर्वकार्यमूल्यांकनम्

यद्यपि इयं संस्था नवीना आर्थिकसंकटापन्ना च वर्तते तथापि वर्तमान - अकादमीसचिवप्रयासेन गतवर्षेषु महत्वपूर्ण - उपलब्धयः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्राप्ता: । अस्मिन् काले (१) अकादमी - कर्मचारिदले महत्वपूर्णा वृद्धिः सञ्जाता यस्या प्रतीक्षा चिरात् क्रियमाणा आसीत्–कार्याणां विभिन्न-योजनानाञ्च सञ्चालनाय । (२) अकादमी प्रकाशनैः— नूतनरूपं धारितम् । विशेषतः पत्रिकाः स्वकीयां शोभां वर्धयामासुः (३) संस्कृतवार्षिकपत्रिकाप्रकाशनं किमपि महत्वपूर्णं कार्यमासीत् – अस्यापि शुभारंभो गतवर्षे जातः (४) अस्मिन् काले विशेषतः गतवर्ष-चतुष्टयेषु हिमाचललेखकैः पुस्तकक्रययोजनान्तर्गतं यत् प्रोत्साहन-मवाप्तं तेन प्रदेशे विभिन्नभाषालेखकेषु विशेषोत्साहो दृष्टपथं यातः। (५) लघुपत्रिकाभ्यः– अनुदानदानेन तत्र च वृद्धिकरणेन प्रदेशस्य लघुपत्रिकाभिः- नवीनं जीवनं धारितम् । साहित्यिकगतिविधयश्च प्राणान्विता जाताः । यदि - अनुदानमिदं - अकादम्या प्रदत्तं नाभवि-ष्यत् - अथ चात्र उपयुक्ता वृद्धिः कृता नाभविष्यत् प्रदेशलेखकानां बहुमूल्यसाहित्यं कीटैरेवभक्षितमभविष्यत् । अन्या अपि अनेक योजना अकादम्याः सञ्चाल्यन्ते । एतस्य श्रेयोभाक् वर्तमानसचिवोऽपि बहुमात्रायामस्ति ।

श्री दीनानाथ शास्त्रिणा विधानसभासदस्येनापि अकादमी कार्यालये गतम् । अयं महानुभावोऽपि—अत्रत्यकार्यसमीक्षां तन्मूल्यांकनं च कर्तु-मर्हति । भदीयमत्र निवेदनमिदं वर्तते उभयोरपि शास्त्रिमहाभागयोः सेवायां यदुभावप्यत्र सम्यक् - विचारयेताम् अकादम्या धनराशौ वृद्धिरेव करणीया न तु न्यूनता - इति मुख्यमन्त्रिणे परामर्शो देयः। यतोहि उभयोरपि भवतोः मुख्यमन्त्रिणश्च स्वीयोऽयं क्षेत्रः। अकादम्या कार्यं च प्रदेशजनहिताया वर्तते । अहं विश्वसिमि यदुभौ शास्त्रिणौ मान्य-मुख्यमन्त्री च अकादमी विकासायाधिक कार्यं करिष्यन्ति ।

संस्कृतं संस्कृतिश्च

प्रदेश वासिनामियं महती इच्छा वर्तते यत्-भाजपायाः शासनकाले संस्कृतस्य प्रसारविकासकृते अकादमी विशेषरूपेण कार्यशीला स्यात् । नेदमेवापितु प्रशासने विशेषतः शिक्षा विभागे संस्कृतेन साकं योऽहि, अन्यायश्चिरात्-प्रचलति असौ समाप्तो भवेत् दशम – कक्षापर्यन्तं पंचमकक्षातः-- आवश्यकविषयरूपेण पाठितं स्यात । संस्कृत महावि-द्यालयानामधिकारः प्रदत्तो भवेत् शास्त्रिणां वेतनमानेषु च-न्यूनता न कृता स्यात् ।

आशासे मान्यो मुख्यमन्त्री शास्त्रियुगलञ्चात्र न केवलं ध्यानमेव दास्यन्ति अपितु कार्यरूपेणापि किमपि करिष्यन्ति ।

— सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

—: अपील :—

गरीबी एक अभिशाप है। आजादी के ४३ वर्ष बाद भी आज हमारे समाज का एक बहुत बड़ा वर्ग गरीबों की भयंकर यातनाओं में सिसक रहा है। विकास और प्रगति का पूरा लाभ उन तक नहीं पहुँचा।

क्या गरीबी दूर करने की जिम्मेदारी केवल सरकार की है ? शायद नहीं। यह तो एक सामाजिक समस्या है और इसके समाधान के लिए सारे समाज को अपना योगदान देना होगा।

यह सत्य है कि "गरीबी दूर करने का एक ही तरीका है कि हम आपस में बांट कर खायें।" अपने लिये तो सभी जीते हैं। मनुष्य तो वह है जो औरों के लिए भी जिये। जीवन तो वह है जो कभी किसी गरीब के काम भी आये।

प्रदेश सरकार ने इस उद्देश्य की पूर्ति के लिये अन्त्योदय कार्यक्रम प्रारम्भ करने की घोषणा की है। परन्तु कोई भी सरकारी कार्यक्रम इन गरीबों की आकस्मिक जरूरतों को पूरा नहीं कर पाता।

इन गरीब परिवारों की आकस्मिक और न्यूनतम जरूरतों को पूरा करने के लिये और इस पुनीत काम में सारे समाज को भागीदार बनाने के उद्देश्य से हिमाचल सरकार ने एक—

दरिद्र नारायण कोश—की स्थापना की है।

मैं प्रदेश की जनता से अपील करता हूं कि अपनी कमाई का एक हिस्सा इस कोष में अवश्य दें ताकि आपके साथ - साथ किसी गरीब की झोंपड़ी में भी थोड़ी सी खुशी की किरण जा सके।

कृपया अपना चन्दा निम्न पते पर भेजें :-
— कार्यालय सचिव, अन्त्योदय —
हिमाचल प्रदेश सचिवालय
शिमला—२

शान्ता कुमार
मुख्यमन्त्री हिमाचल प्रदेश

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतं केन्द्रीयप्रशासनम् च

नाविदितमिदं भारते देशे केन्द्रीयप्रशासनेन संस्कृतमाधारी कृत्य सर्वप्रथमं "केन्द्रीयसंस्कृतायोगगठनं कृतमासीत् । आयोगस्य प्रस्तावानुसारञ्च संस्कृतसम्बन्धिबिविधयोजना निर्मिता बभूवुः । परिणामस्वरूपं केन्द्रीयसंस्कृतविद्यापीठानां तथा च संस्कृतस्यादर्शमहाविद्यालयानां स्थापनापि जाता । जायमाना अपि बर्तते । सर्वमिदं सुष्टु । सस्कृतपत्राणि अपि केन्द्रीयप्रशासनानुदानेन म्रियमाणान्यपि यथाकथंचित श्वसन्ति चेद्देशे एतस्यापि श्रेयः केन्द्रीयप्रशासनाय गच्छति परन्तु अनुदानराशिर्यत त्रिशत् वर्षपूर्वमासीत तदेवाद्यापि वर्तते । अत्र समयानुसारं चेत् वृद्धिः स्यात्तु संस्कृतप्रसारकर्मणि महीयानयं सहयोगो भवेत् - केन्द्रीय शासनस्य । अस्माभिराशाकरणीया यत् - अत्र वृद्धिर्भविष्यति । केन्द्रीय मन्त्रिमण्डलं बिशेषतश्च प्रधानमन्त्री - अस्माभिः प्रार्थ्यते यत् केन्द्रे संस्कृतयोजनापरिचालनाय पर्याप्तं धनं केन्द्रीयसंस्कृतविकासकृते प्रदत्तं स्यात् । आशासेऽत्र सम्बद्ध - मन्त्रिणः अधिकारिणश्च नूनमेव ध्यानं दास्यन्ति ।

★

हरियाणा प्रदेशः संस्कृतञ्च

दिव्यज्योतिषोऽस्मिन्नेव पृष्ठे मया पञ्चाम्बुप्रदेशे संस्कृतज्ञाः पञ्जाबे संस्कृतोत्थानाय प्रेरिता आसन् । परन्तु संस्कृतज्ञाः जानन्तोऽप्यजानन्तः पश्यन्तोऽप्यपश्यन्तः परमालस्येन निगृहीताः– हस्तोपरि हस्तं निधाय सुप्तप्रायास्तिष्ठन्ति । संस्कृतं निन्दन्ति, परस्परं कलहायन्ते, एकश्चेत् - संस्कृतसमुद्धाराय यतते तदापरो तत्र घोरबाधासमुपस्थापने — आत्मानं धन्यं मनुते ।

दिव्यज्योतिषोऽस्मिन्नङ्के भवद्भिर्हरियाणायां संस्कृतस्य का दुर्दशा इति पठितमेव । तल्लेखेन साकमहमक्षरश, सहमतोऽस्मि । मया केवलमिदमेव निवेद्यं हरियाणाप्रदेशस्य संस्कृतविदुषां सेवायां यत्कथं कुरुक्षेत्रविश्वविद्यालयस्य संस्कृतं प्रति घोरा उपेक्षा भवद्भिः सह्यते ? किमर्थं न संस्कृतज्ञाः संघीभूय संस्कृतरक्षकान् संस्कृतमहाविद्यालयान् - गुरुकुलान् - वा समयानुसारिसुविधासम्पन्नान् कर्तुं प्रयत्नं कुर्वन्ति । हरियाणायां राजनीतौ - अपि प्रभूताः संस्कृतज्ञाः । आर्यसमाजस्यापि प्रदेशेऽस्मिन् - पर्याप्तप्रभावः । परन्तु संस्थेयमपि पब्लिकस्कूलनिर्माणे एव लग्ना । अतः हरियाणायाः संस्कृतज्ञाः उत्थाय स्वकल्याणं कुर्वन्तु आशासेऽत्र स्कूलकालेजसंस्कृतमहाविद्यालयानामध्यापकप्राध्यापकाः संघीभूय संस्कृतस्योद्धाराय तत्र कार्यशीलाः भविष्यन्ति त्वरया नोचेत् कालः पिबति तद्रसम् । इति नयानुसारं ते बहुपश्चाद् वर्तिनः स्थास्यन्ति ।

केशव शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

R ·N 6384/57 ल - 33/एस. एम. / 10/89

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वर्यताम् त्वर्यताम् त्वर्यताम्

*** *** ***

जातक फलादेशस्य दुर्लभो ग्रन्थः

फलादेश कल्पतरुः

सचिव, संस्कृत शोध संस्थान, भारती विहार
मशोबरा शिमला-७
171007 (हि. प्रदेश)

राष्ट्रपतिसम्मानितप्रख्यातविद्वान्सेवानिवृत्तप्राचार्य श्रीमदाचार्य-दिवाकरदत्तशर्मप्रणीतो हिन्दी-आङ्ग्लटीका सहितः चिरप्रतीक्षितः फलादेशकल्पतरुः प्रकाशितोऽभूत् ।

अस्मिन् ग्रन्थे द्वादशभावफलम्, दशाफलम्, आधुनिकाः शुभा-शुभयोगाः, नारीणां जातकफलम्, सन्तानप्राप्तिबाधानिवारण-प्रयोगाः, अनिष्टदशाफलशमनोपचाराश्च निर्दिष्टाः ।

सोऽयं ग्रन्थः श्रीमदाचार्यपादानां चत्वारिंशद्वर्षाणां ज्योतिष-शास्त्रसेवाया अनुसन्धानपूर्णानुभवस्य च दुर्लभा कृति विद्यते ।

स्वनामधन्यानां श्रीमार्तण्डपञ्चाङ्गप्रवर्तकानां विश्वविख्यात ज्योतिर्विदां श्रीमदाचार्यमुकुन्दवल्लभ मिश्र ज्योतिषाचार्य महा-भागानां प्राक्कथनेन च समलङ्कृतः ।

महर्घतावशात्स्वल्पा एव प्रतयो मुद्रिताः । मूल्यमपि केवलं कर्गलमुद्रणादिव्ययपूरकं डाकव्ययसहितं सप्तति (७०) रूप्यकाणि निर्धारितम् । फलादेश कल्पतरोः भारते विदेशेषु च, दैवज्ञैरपूर्वं स्वागतं कृतम् स्वल्पाः प्रतयः अवशिष्टाः सन्ति । द्वितीय संस्करणप्रकाशने विलम्बो भविष्यति । मूल्यं निम्नसंकेते धनादेशद्वारा प्रेष्यताम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः



क्षमाजयन्तिकथानिका
विशेषाङ्कः



पण्डिताया क्षमाया मुद्राद्वयी

संस्कृतस्य सचित्रमासिकम्

शिमला जुलाई, अगस्त, १९९०

षम् ३४

अङ्कः १०-११

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमः

क्र.	विषयाः	लेखकाः	पृष्ठम्
१.	कतिपय कथानिकाः	प्रो. केशव शर्मा	१
२.	मृच्छकटिके रसयोजना	श्री प्रेमपाल राणा शास्त्री मण्डी (हि. प्र)	६०
३.	सम्पादकीयम्	—	

दिव्यज्योतिः

हि० क० सं० भा० अकादमी प्रदत्तानुदानसाहाय्यम् । पत्रिकागतमुद्रणदोषाणां सम्पादकीयनीति-विषये च अकादमीदायित्वं नास्ति ।

हिमाचल प्रदेश—पंजाब-हरियाणा-जम्मूकश्मीर - मध्य प्रदेश—राजस्थान—महाराष्ट्र उत्तरप्रदेश शासन-स्वीकृतं केन्द्रशासनपुरस्कृतं सचित्रं संस्कृतमासिकम् ।

पत्रस्य उद्देश्यानि तथा नियमाः

सरल—सरस-सुबोध-साधनैः सर्वस्मिन् संसारे संस्कृतस्य प्रसारः, साहित्यान्तर्गतानां सकलकलानां समन्वेषणं, संसारस्य हितसम्पादनम्, एवं लौकिक - अलौकिकस्वातन्त्र्यस्य प्राप्तिः ।

"दिव्यज्योतिः" प्रतिमासं पञ्चदशतारिकायाम् (आङ्गलमानेन) प्रकाशितं भवति

पत्रस्य वार्षिक मूल्य ३० रु० अर्धवार्षिकं १५ रु० एकस्याङ्कस्य च रु० २-५० भवति ।

वर्षारम्भः अक्तूबर—मासतः भवति · ग्राहकः कस्मादपि मासाद् भवितुं शक्नोति ।

ग्राहकैः, "सम्पादक, दिव्यज्योतिः, भारती विहार, मशोवरा, शिमला-१७१००७ हि० प्र०" इति संकेते धनादेशेन वा. शु. प्रेषणीयम् ।

परिचयः

संस्थापकाः तथा आद्यसम्पादकाः आचार्यश्रीदिवाकरदत्त शर्माणः, — दूरभाषः 78459

राष्ट्रपति सम्मानिताः

प्रधानसम्पादकः— आचार्य केशव शर्मा एम. ए., एम, फिल, साहित्यरत्नम् - ,, 8200

दिव्यज्योतिः कार्यालयः भारती विहारः, मशोबरा, शिमला-७ (हि. प्र)

मुद्रकः प्रकाशकः—

भारतीमुद्रणालय भारती विहार, मशोबरा-१७१००७ शिमला (हि. प्र,)

स्वामी:- श्रीमती आचार्य रत्नकुमारी शर्मा

जुलाई-अगस्त, १९९० श्रावण-भाद्रपद २०४७ — वर्षम्—३४ अङ्कः १०-११

वार्षिक मूल्यम् ३० रु०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रतीक्षा

प्रातःकालीनसूर्यस्य रश्मयः समस्तविश्वोपरि स्वर्णधूलिं विकरन्ति स्म । दिनेशः- उद्यानस्य कोणानुकोणं परिभ्रमन् - महुर्मुहुः स्वमणिबन्धे संलग्नां स्वर्णघटिकां पश्यन् -अतीतस्मृतिषु विलीनोऽभवत् । वाराणसीयविश्वसंगीतसम्मेलनं नातिदूरमासीत् - यदा तेन सुषमायै लिखितम् – "यद्यपि मया सर्वात्मना समनोयोगं संगीताभ्यासमकारि तथाप्यहं यदा स्वगीतगायनकल्पनां करोमि भावि संगीतसम्मेलने तदा भयेन कण्ठावरोधो भवति । यदि सत्यमेव तस्मिन्नपि काले एवमेवाभविष्यत्तदाहं त्वां कदाचिदपि द्रष्टुं न शक्ष्यामि____।" सुषमया एतत्तदीयं पत्रं यथाकालमुत्तरितमासीत् । तस्मिन् तया लिखितम्—"....कण्ठावरोधो भवति__...सत्यं त्विदमस्ति यत्सर्वेषामेव गायकानामेवं विधकाले कण्ठावरोधः सञ्जायते महान्तः प्रसिद्धाः सिद्धाश्चापि गायका अस्मात् कण्ठावरोधभयात् मुक्ताः न सन्ति । अतोऽहं ब्रवीमि यत् - यदैव तस्मिन् सम्मेलनेऽनेन कण्ठावरोधभयेनाकुलो भवेद्भवान् – तदा स्वकर्णाभ्यां मदीया एषा वाणी श्रोतव्या— यद्यप्यहं कण्ठावरोधभयेन स्वराणामशुद्धसंलापभयेन च स्वकीयान् - स्वरान्साधयितुमसमर्थोऽस्मि, तथापि भयस्य नास्ति किमपि कारणम्, यतोहि हस्ते स्फाटिकमालिकां विदधती, श्वेतवसना, श्री शारदा माता वाग्देवतेव स्वयं धवलहंसाधिष्ठिता वीणां वादयन्ती, विविधान्-राग समूहानालपन्ती मम शिरसि संस्थापितस्ववरदशरदम्भोजकरा सम्मुखे विराजते । एवं करणेनावश्यं विजयिनो भविष्यन्ति श्रीमन्तः, नात्र संशयलेशोऽपि ।

सर्वविदितं खल्विदं यन्मित्राणां शुभकामनाः सत्यमेवातिशयबलशालिन्यो भवन्तीति सर्वविदितम् । दिनेशस्तु वास्तविकरूपेण तस्या एवानवलोकित पूर्वाया अपरिचिताया बालाया वाग्बलेनैव पत्रेण च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मिन् - महति संगीतसम्मेलने विजयं प्राप्य स्वयशो वितानं सर्वत्र प्रसारयामास ।

अद्य तस्य हर्षोऽसीमितः कथं न भवेद्वा ? अधुना किञ्चित्काला-नन्तरमेवासौ तस्या वास्तविकवाणीं श्रोष्यति । अष्टवादनाय कानि-चिदेव क्षणान्यवशिष्टानि । दिनेशः समधिकां समुत्सुकतां भेजे । दिनेशो यद्यपि प्रकृतिसुन्दरः आसीत्तथाप्यद्य न जाने कथं तस्य व्यक्तित्वमधिक-प्रभाववान्—प्रतीयतेस्म । दिनेशेनाद्य वातादवर्णस्य १ कञ्चूकं, हिमधवलः पादायामः कृष्णयाकेटः २ एतद्वस्त्राणि धारितान्यासन् अंगुल्याञ्च मारकतमंगुलीयकं धारितमासीत् ।



इदानीमुद्याने प्रायेण जनसम्मार्दो वर्धमान आसीत् । बहवो लोकाः परितः परिभ्रमन्तः आसन् । एकातिसुन्दरी बाला दिनेशस्य सम्मुखात्-निर्गता । दिनेशः प्रबुद्धः । क्वचिदियमेव सा स्यात् ? अनया बालया स्वकीयकोटे रक्तपुष्पमपि धारितमासीत् । परमिदं कुसुमं शतपत्र्याः कलिकाया एव संकेतो निर्धारित आसीत् । पुनश्चेयं युवतिरेवासीत । अनुमानतोऽष्टावर्षदेशीया । सुषमया तु स्वीयस्यायुषोऽनुमानं त्रिंशद-वर्षीयमंकितमासीत । यदा किल तद्भावुकता—सन्निकृष्टो दिनेशः पञ्चविंशतिवर्षीयोऽपि स्वीयमायुं द्वात्रिंशद्वर्षाणामेवालिखित्—तस्यै ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधुना सा पुस्तिका तस्य स्मृतिपथं समायाता या किलोभयोरेव तयोर्मिथः पत्रव्यवहारकारणमासीत् । यदाऽतीतेषु दिवसेषु स कालिकातायां स्वतन्त्ररूपेण संगीताभ्यासं कुर्वन् आस्ते तु प्रतिदिनमभ्यासार्थं तत्रैकस्मिन् – एकान्तोद्याने प्रकृतेर्मुक्तवातावरणे गच्छति स्म । तस्योद्यानस्यैकान्तभागे न जाने एका युवतिः कुत्र स्थिता कदा वा तस्य कर्णमधुरां संगीतसुरां पायं पायं तृप्तिं न लभते स्म । एष्वेव दिवसेषु स संगीतस्य विशिष्टाभ्यासार्थं वाराणसीगमननिश्चयमकरोत् । स्वप्रस्थानात् पूर्वदिवसे नित्यनियमानुसारमुद्याने अभ्यासायागमत् । स्वकीयमभ्यासं समाप्य यदा तेन स्वकीये चक्षुषी समुद्घाटिते तदा स तत्र पुस्तकमेकं संस्थितमपश्यत् । सो हि स्वीयं तानपूरकमेकतो विश्राम्य पुस्तकं स्वकराभ्यामुत्थापयामास । अहो ! किमिति संगीतसौरभम् ? कुत इदम् ? कस्मादिदमिति क्षणाय चकितोऽभूत् । अथ यदा तेन तस्य पुस्तकस्य कानिचित् पत्राणि परिवर्तितानि तदा एकस्मिन् स्थाने तस्य दृष्टिः सहसा स्थिराभूत् । तत्र कस्या अपि बालायाः संकेतः लिखितः आसीत् । इतः पूर्वं तेन कदापि कल्पितमपि न यत् कापि कामिनी कमपि पुरुषं प्रति एवं विधां सहानुभूतिं प्राकटयत् ।

दिनेशो वाराणसीमागत्य तस्यै पत्रमेकं तत्संकेतोपरि प्रेषयामास । तयापि तदुत्तरितम् । दिनेशः स्वकीयं संगीताभ्यासं सम्यक् वर्धयामास । यतोहि वर्षद्वयानतरं तत्रएकं विश्वसंगीतसम्मेलनं जायमानमासीत् । सोऽपि तत्र प्रथमस्थानं प्रथमपुरस्कारं च विजित्य एव यशोधवलिमानं सर्वत्र प्रसार्य यशः शरीरेणात्मानममरं कर्तुमैच्छत् । इत्थं साधनापरेऽपि तस्य जीवने तयोः पत्रव्यवहारः सर्वदा प्राचलत् । यदि दिनेशः कदाचित् पत्रं नापि - अलिखत् सा पत्रप्रेषणं नैव विसस्मार । अनेन खलु दिनेशः कामपि अनिर्वचनीयां प्रेरणां संगीताभ्यासे चातितरां नैपुणीमवाप्नोत् । तेनानुभूतं यत्स सुषमां प्रति समाकृष्टोऽस्ति सापि च तस्य प्रेमबन्धने वद्धा भवेत् ; किन्तु यदा यदा स तस्याः चित्रमयाचत् -तु तया तन्न स्वीकृतम् अनेन तस्या व्यवहारेण दिनेशो दुःखमवाप्नोति स्म ।

एकस्मिन् दिवसे तया लिखितम् –"...... यदि मां प्रति भवद्भावनासु कापि सत्यता वर्तते तदा मद्रूपरंगास्यां तत्र न किमप्यन्तरमायास्यति । यद्यहं सुन्दरी अस्मि तर्हि मदीयमानसेयमेव विचारः समुत्पतस्यते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्भवान् मया सह तस्मादेव पत्रव्यवहारं करोति । केवलं सौन्दर्यासिक्त-सिक्तं प्रेम मह्यम् अणुरपि न रोचते । यदि चाहं कुरूपास्मि, अस्यैव च सम्भावनापि भवताधिकं करणीया—तदाहमनुभविष्यामि यन्मम चित्रावलोकनानन्तरमपि भवान् एतदर्थमेव मह्यं पत्रं लिखति येन एकाकित्वं भवन्तं न बाधेत । अन्यथा भवत्पक्षतः पत्रप्रेषणं नाभविष्यत् । अत एवाहं स्वचित्रं नाप्रेषयम् । भवद्भिरप्यत्रेऽधिकाग्रहोऽत्र न कार्यः । यदा भवान् - प्रतिनिवृत्तो भविष्यति तदा मामवलोकयिष्यति - एव । तदैव च स्वेच्छापूर्वकं सर्वं निर्णेतव्यम् । तदनन्तरमेवावां स्वकीयं पारस्परिकसम्पर्कं स्थापयितुं समुन्मूलयितुम्वा स्वतन्त्रौ भविष्यावः ।

●

क्षणद्वयमेवावशिष्टमासीदष्टवादनाय दिनेशः सूर्यसंयमं कुर्वन् - तस्मिन्नुद्याने स्थितः आसीत् । तस्य हृदयगतिः तीव्रतरा जायमाना आसीत् । परितः पुष्पाणि विकसितान्यासत् । पक्षिणो मधुरं गायन्ति स्म । तरुषु, तृणेषु पुष्पेषु लतासु च प्रकीर्णास्तुषारबिन्दव :- मौक्तिकमयं जगदिति भ्रामयन्ति स्म दर्शकान्-भावुकान् - च । दिनेशो न जाने किमनुभवति स्म । तदानीमेव एका युवतिः मुग्धा नायिकेव तं प्रत्यागच्छन्ती दृष्टिगोचरतां गता । तस्याः शरीरं किञ्चित् लम्बतरं, सुदृढानि अंगानि चासन् । तस्याः कृष्णाः कुण्डलमयालकाः कर्णकपोललम्बिन आसन् । लोचने युवत्याः कमलायते, मीनचपले मैरेयमये चास्ताम् । अधरेऽपि तस्या कुसुमकलिकाकोमले वर्तेते स्म । पीतां शाटिकां परिधाय सा वासन्तीव लगति स्म ।

दिनेशः-अवलोक्य एव तां प्रति प्राप्तोऽभवत् । असौ किल परवशः सम्वृत्तः । तस्याः सौन्दर्यसुरां निपीय यदनया नैव धारिता शतपत्रिकायाः कलिका । तं स्व निकषा आगच्छन्तं समालोक्य सा सस्मितं स्व वक्राधरेण शरेण तं विद्धं चकार । दिनेशः स्वात्मानं विस्मृत्य तस्याः समीपं गतः । तदानीमेव स सुषमामक्षिलक्षी चकार । कल्पिता सुषमा तु तस्या नवोढायाः पृष्ठभागे एव प्रच्छन्ना आसीत् । अवस्थया सा उल्लंघित चत्वारिंशद् वर्षदेशीया इव प्रतीयते स्म केशराशिश्वेतिमानं भजमाना आसीत् । स्थौल्ययुता स्वकीय स्थूलचरणयोः उच्चोपानहौ-अधारयत् । एकवारं तु दिनेशः चिन्तयामास यदियं सुषमा न स्यात् किन्तु तस्या कोटस्योपरि एका शतपत्र्याः लघीयसी विकासोन्मुखी कलिका संलग्ना आसीत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पीतशाटिकायुता युवतिः तीव्रगत्या गच्छति स्म । चलन्ती सा दिनेशं तस्या अनुगमनार्थं सङ्केतमपि कृतवती ।

दिनेशः क्रकचेन विदीर्यमाणमात्मानमनुभूतवान् । सो ह्यैच्छत् अनुगन्तुं तां पीतशाटिकायुतां वसन्तप्रतिमाम् । परमसौ तामवश्यं मिलिष्यति या तस्मै तस्यातिसंकटमयक्षणेषु धैर्यं प्रेरणां च दत्तवती । अधुना सैव समक्षे आसीत् । तस्या आपीतगोलाकारेण सौजन्यता बुद्धिमत्ता च प्रत्यक्षं भासितेऽभवताम् । तस्याः लोचनयोः सहानुभूतिसागरः आसीत् ।

दिनेशः "संगीत-सौरभम्", नामिकां पुराणीं, लघ्वीं, नीलवर्णावरणमयीं पुस्तिकां स्वहस्ताभ्यां दृढं धृतवान् । इमां पुस्तिकामवलोक्य एव सा मां ज्ञास्यति - इति विचारितं दिनेशेन । इदं प्रेम तु नास्ति परन्तु प्रेम्णोऽप्यधिकं मूल्यवत् - दुष्प्राप्यञ्च वस्तु भविष्यति - एका एतादृशी मैत्री, यत् कृते असौ अद्यावधि कृतज्ञः आसीत् - अग्रेऽपि च भविष्यति ।

स हि तस्या समीपं गत्वा स्थितोऽभूत् । शिष्टाचारपूर्वकमभिवादनं कृत्वा तां पुस्तिकां तस्यै स्त्रियै दातुमैच्छत् । गृहाणेमिदम् - यदाऽसौ अब्रवीदिदं तदैव तस्या आकारं दृष्ट्वा स भग्नसङ्कल्पो जातः । तस्य कण्ठावरोधोऽजायत !

"देवि ! एषोऽस्म्यहं दिनेशः । प्रमत्तगायकः । तथा भवती ..... भवती...... सम्भाव्यते यत् सुषमा ... । अहमात्मानं धन्यं मन्ये यतोहि भवत्याः स्वदर्शनैः कृतार्थी कृतोऽस्मि । किं भवती मदीयं निमन्त्रणमद्य स्वीकरिष्यति ।"

सा मन्दमन्दमहासीत् । "पुत्र ? नाहं जाने यत् किमिदं सर्वम् ?" साऽवादीत् — "किन्तु सा पीतशाटिकायुता युवतिरधुनैवानेन मार्गेण गता, मामिदं पुष्पं धारयितुं कथितवती । तया एवमपि तया कथितं यदि भवान् मया साकं गमनेच्छां प्रकटयेत् तदाहं भवन्तं सूचयेयं यत् सा पुरतः दृश्यमानेऽस्मिन् भवने श्रीमन्तं प्रतीक्षन्ती विराजते । तया इदमपि कथितम्—' यदियं भवदीया निकषा अस्ति ।" मदीयोऽप्येकः पुत्रः संगीतकारः । कस्यापि गायकस्याहं किमप्युपकारं कर्तुमर्हाऽनेन भविष्यामि—इति कृत्वैव मया तस्या इयं वार्ता मानिता ।

●

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पितृव्या

हिमाचल प्रदेशस्य शिमलामण्डलान्तर्गतैकस्मिन् - पर्वतोपनगरे एको दम्पतिर्न्यवात्सीत् । पतिस्तु प्रशासनिककार्यालये सर्वकारं सेवते स्म । पत्नी गृहे गृहकार्यं निभालयन्ती बहुकालं निनाय । दैववशाच्च सन्तानलाभो ऽभवत् । पत्नी गृहकर्मण्यपि तथा दक्षाऽऽसीद्यथा सर्वमपि गृहं स्वच्छतायाः सुगन्धेश्चागार-इवाभातिस्म । सा प्रतिदिनं निकटस्थग्रामवासिनां गृहं गृहं गत्वा तत्रत्य महिला अशिक्षयत् । कथं किल गृहस्य, बालकानां, स्वकीय—पारिवारिकज-नानां, वस्त्राणां, गृहस्य परितश्च भूमेः स्वच्छता रक्षणीया इति ताः सम्यगव-बोधयत् शनैः २ सर्वेऽपि तामादरेण 'पितृव्या' इति सम्बोधनेनाकारयितु-मारेभिरे । सर्वेऽपि तस्या गेहमागच्छन्तिस्म यतोहि उपनगरस्य समीपस्थ-ग्रामाणाञ्च स्त्रीवत् - सा केवलं लोकनिन्दाकरणेन पारस्परिकमिथ्याऽर्थहीन कलहेन, कामेन, द्वेषेण, लोभेन, वा समयं न यापयतिस्म । सा तु सर्वाः स्त्रिय एतत्सर्वं परित्यक्तुं प्रेरयतिस्म पारस्परिकस्नेहवर्धनाय चोत्साहयति स्म सर्वान् । इत्थं तस्या आदरः सर्वेषु प्रारभते, सन्तानहीनतायाः शोकं सा न कदाप्यकरोत् । नं चैवानुभूताऽपि कापि न्यूनता तया यतोहि सर्वदा तस्या गेहे तु स्त्रीणां बालानाञ्च सम्मर्दः सर्वदैव स्थातुमारभत् । तस्या रुचिरासीत् परमस्वच्छतायां सुगन्धिद्रव्येषु च । न केवलं बाह्यस्वच्छता एवापितु आन्तरिकस्वच्छतायाः तथा सुगन्धस्य सा प्रतिमूर्तिरिवासीत अत्यन्तसुगन्धि-तधूपेन भगवतो रामस्य पूजनं स्वगृहे सा नित्यं प्रति- प्रकरोत् । तस्या एकैव मनोकामना आसीद्यत् - सा समीपस्थग्रामे एकं लघुभूमिखण्डं क्रीत्वा तत्र स्वगृहनिर्माणं कुर्यात् । यतोहि सा भाटकोपरि गृहीते गृहे एव निवसति स्म स्व पतिना सह । पतिना स्वकीयायाः पत्न्या इच्छा पूरिता । परिणामतश्च तस्या मनोकामना पूर्णाऽभवत् ।

नवीने स्थाने गृहं निर्माय सा प्रसन्ना जाता । पतिरपि सेवानिवृत्तः । इत्थं किलं दम्पती - अयं तत्र सुखेन वसतिं चकार । अत्र नवीने ग्रामेऽपि सा ग्रामवासिनां गृहेषु गमनमारब्धवती । तेऽपि तस्या गृहमाजग्मुः । न जाने कथं तत्रापि सा पितृव्येति नाम्ना एव प्रख्यातिमाप । सा पुराणे जनावासेऽपि यदा कदाचित् - गच्छति स्म । नवीने तु प्रातः प्रभृति सायं यावत् - सर्वत्र सर्वेषां गृहे गच्छति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सा किलैतादृक् सूत्रमासीद्येन सर्वेऽपि पार्वत्यपरिवाराः ऐक्यसूत्रऽनुबद्धाः । यावत्तत्र पितृव्या नैव समागता आसीत्तावदपि लोकाः परस्परं मिलन्तिस्म । परमिदं सम्मेलनं कदाचित्कमेवासीत् । इदानीन्तु तया सर्वा अपि-अन्याः स्त्रियस्तथा ऐक्यसूत्रे निबद्धा यथा ताः सर्वा अपि एतस्या गृहे सहैव पर्पटनिर्माणमकार्षुः, अन्यस्या गेहे च वटिकाः— निर्मिताः । इत्थं किल सर्वासामैकत्री करणाय केचित् प्रयासास्तस्या प्र ाचलन् - एव ।

अथ बालकानां जन्मदिवसोत्सवाः— अपि प्रारभन्त । प्रतिमासञ्च विशालाः लघवश्च महोत्सवाः अपि मानिता बभूवुः । कस्या अपि गेहे नवीनकाष्ठपीठमागच्छति मृदुपीठो वा, नूतनं विद्युद्व्यजनम्वा लगति तदापि लघुसम्मेलनायोजनं भवति । पितृव्या कमपि न कमपि व्याजमन्विष्यमाणा दृष्टिपथमायातिस्म । तद्व्याजेनैव च तत्रत्यस्त्रीणां सम्मेलनमायोजयति । इत्थं यदा सर्वाः स्त्रियस्तत्रोपविष्टाः- भवन्ति तदा पितृव्या परमसम्मानमाप्नोति । सर्वासां जिह्वासु तस्या एव नाम भवति । कथं न स्यात् - यदा कापि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नूतनं शिशुं प्रासूत सा तस्याः सहायतायै तत्र सम्बद्धा दृष्टिपथमायाता यदा काचित् - पतिप्रताड़नामाप तत्र सा प्रताडिताया: पक्षमग्रहीत् - यदा कस्मिन्नपि परिवारे कोऽपि संघर्षोऽजायत सा तत्र मध्यस्थरूपेण कार्यमकरोत् । कस्या-चन गृहे चायसम्मेलनमभवत् सैव तत्रत्यसर्वव्यवस्थामरचयत् एवं लगति यथा सैव तस्य गृहस्यापि मुख्य - सदस्या तस्या एव च गेहे तदायोजनं यथा स्यात्तथा । एवं सति यदा परस्परं तासां वार्तालापो प्राचलत्तु संलापे पितृव्या कमपि सूत्रं गृहीत्वा तत्तथा विस्तारमनयद्यथा तस्यान्तमेव नायाति स्म । कदाचित् सा स्वजीवने घटितघटनानां वर्णनमकरोत् । कदाचित् - पुराणी-कथा अकथयत् । परन्तु दीर्घतमा अपि एता: कथा केनाप्यपूर्वरसेन परिपूर्णाः भवन्ति स्म । कश्चिदपि सर्वा एतां श्रोतुमैच्छत् ।

तेष्वेव दिनेषु पितृव्या सत्सङ्गमेकं प्राचालयत् सप्ताहस्यैकदिवसे सत्सङ्गोऽयमवश्यमेव तस्या एव गृहेऽभवत् । तस्मिन् दिवसे सर्वा अपि स्त्रियस्तस्या गृहे समवेता अभवन् । मध्यान्हे सायं यावच्च भजनकीर्तनादि-कार्यक्रमा: — अजायन्त । मृदंगध्वनि: घण्टा निनादः, शङ्खध्वनि:, स्त्रीणाञ्च माधुर्यपूर्णाः स्वरः. सर्वत्रमिदं सम्मिल्य वातावरणं पवित्रमकरोत् । समाप्तेऽपि सत्संगे सर्वा स्त्रियस्तत्रोपविष्टा स्युरिति तस्या आग्रहोऽभवत् । सायंकालेऽपि च पितृव्या पुनरेकवारं चायमुपायनो करोति स्म सर्वाभ्य: । अस्मिन् चायपा-नेऽपि पुनरपि - एकहोरायाः समयोऽतिवाहितोऽभवत् । ततश्च सर्वा स्व स्व गृहमगच्छन् आनन्दस्य प्रसारं सर्वत्र कुर्वन्त्यः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रेखा

मौलिचन्द्रः— प्रिये ! सततं कार्यव्यापृतेन मया त्वां मोदयितुं समयो न लभ्यते ।

रेखा:— प्रियवर "नास्ति तादृशं किमपि यद्भवद्भिरनुभूयते । अहन्तु सततं परमसुखान्विता गृहसञ्जायां संलग्ना, आगन्तुक-बन्धुबान्धवसत्कारे च व्यस्ता एव सानन्दा । नवदशहोराणामेव तु कालो भवति यत्रावयो वियोगो भवति । चतुर्दशपञ्चदशहोरावधौ तु सहैव तिष्ठावः ।

मौलिचन्द्र :— तथापि कदाचित्तव वियोगोऽसह्यो जायते रेखा, न त्वं तथानुभवसि ?

रेखा :— किं नहि, अहमपि जड़ा तु नास्मि । परन्तु व्यवहारमयो ऽयं संसारः । अस्य गृहस्थाश्रमस्य सम्यक् - चालनं तदैव भवति यदाऽत्र युक्तं सामञ्जस्यं स्यात् । तत्कृते परिश्रमस्य श्रमेण च धनार्जनस्यावश्यकता अस्त्येव । अतो नरस्य वहिः- श्रम कृत्वा धनार्जनं गृहिण्या च सम्यक् गृहसञ्चालनमिति सामञ्जस्यमेव गृहस्थाश्रमस्य कल्याणाय ।

मौलिचन्द्रः— तत्तु निश्चितम् । अस्माकं ऋषयो महर्षयः पूर्वजाश्च मूर्खाः- अज्ञा वा नासन् - यैरियं व्यवस्था पूर्वं संस्थापिता । तथाप्यहं जिज्ञासुरस्मि कदाचित्त्वमाधुनिकाधिकतम युवतिवत् एकला उदासीना तु न भवसि ?

रेखा: भारतीयसंस्कृतेराधारः- आदिदेवशंकरो भगवान् वर्तते । तस्यार्धनारीश्वररूप एतस्य प्रतीको ऽस्ति यत् - यथा शंकरस्यार्धनारीश्वररूपः परस्परं मिलितोऽस्ति एवमेव पतिपत्न्योर्मिलनं मानसिकरूपेण स्यात् । अतो नाहमेकला उदासीना वा – इतिअनुभवामि । पितरावत्र तिष्ठतः मामतीव स्निह्यतः । तयोः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सेवायामहं किमप्यद्भुतमानन्दमनुभवामि । गृहकार्यात् - निवृत्ता; सत्साहित्याध्ययनेन, किञ्चित्सुरभारत्यां लेखनेन सानन्दं कालो मेऽपयाति ।

मौलिचन्द्रः— धन्योऽस्म्यहं येन त्वादृशी सहधर्मिणी लब्धा ।

रेखा:— (सस्मितम्) अहमपि तु तादृशी-एव धन्यास्मि यया भवादृश एकपत्नीव्रतो भर्ता लब्धः ।

मौलिचन्द्रः— अस्तु तावदिदानीं स्व यन्त्रागारं गच्छेयं समयो जात एव ।

इत्युक्त्वा मौलिचन्द्र उत्तिष्ठति बहिर्गच्छति च । रेखा गृहाङ्गणस्य प्रवेशद्वारं यावत्तमनुसरति प्रेषयति च तं सनमस्कारम् । मौलिचन्द्रोऽपि स्वीयं कारयानं शनैः २ स्वयन्त्रागारस्य कार्यालयं प्रति चालयन् - रेखाया उपरि मन्दहासं विकिरन् - हस्तचालनपूर्वकं स्वगमनं सूचयन् क्षणाददृश्यो भवति । रेखापि हंसगतिमनुकुर्वाणा स्वगृहं



प्रविशति । सा त्रिंशद् वर्षदेशीया सुपठिता, सुसंस्कारवती सुशिक्षिता सुलक्षणा समवलोकितविविधराष्ट्रा, गौरश्यामवर्णाभ्यां गोधूमवर्णा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तीक्ष्णप्रतनुनासिकायुता, कम्बुकण्ठी सूक्ष्मकटितटा, पूर्णाकारा नातिदीर्घा, नाति लघ्वी, विशाललोचना, कृष्णघनदीर्घकेशराशिसमलकृता, काप्यनुपमा सुन्दरी इष्टमिष्टभाषिणी, रतिरिवापरा, मौलिचन्द्रस्य गृहलक्ष्मीः वर्तते । अनेके युवानस्तामीर्ष्ययाऽवलोकयन्ति परं वन्हिज्वालेव प्रज्वलमानचरित्रायास्तस्याः समीपमायातुं न कोऽपि उत्सहते ।

मौलिचन्द्रस्यानेकमित्रेषु रमेशः इन्द्रकुमारः, कृष्णकिशोरः—एतेऽपि सपत्नीकाः मौलिचन्द्रस्य गृहे यदा कदा समायान्ति-उपविशन्ति च चिराय जलपानगोष्ठयामत्र एतेषां गृहे तु प्रायो मधुपानगोष्ठयो भवन्ति । मौलिचन्द्रो यद्यपि सुरां न पिबति तथाप्यसौ तेषां गोष्ठीषु यदा कदाचित - गच्छति । परन्तु रेखा कदाचिदेव एवं विधसम्मेलने कृतेऽत्यन्ताग्रहे एव याति शीघ्रमेव च मौलिचन्द्रं स्वगृहं प्रति गमनाय प्रेरयति । तस्यै पानगोष्ठी, अट्टहासः स्त्रीणां लज्जामुक्तहासपरिहासादयो न रोचन्ते मौलिचन्द्राय - अपि नेदं शोभनं प्रियं वा लगति तथाप्यसौ - एवंविधगोष्ठीनां पूर्णबहिष्कारं कर्तुं नार्हः । केवल तत्र मौनमूकदर्शक इव पद्मपत्रमिवाम्भवसा' सूक्तिमिमां सत्यापयन्निव तिष्ठति । असौ चत्वारिंशद् वर्षदेशीयः, स्फूर्तिमान्, सुशिक्षितः, आदर्शयुवकः दर्शनीयः व्यवहारकुशलः परिश्रमी च वर्तते । शोभनश्च तस्य यन्त्रभागविक्रय-व्यापारः प्रचलति । कृष्णधनार्जने न तस्य कणमात्रमपि रुचिर्वर्तते । परिश्रमेणार्जितधनेनैवासौ स्वपरिवारं साधुतया परिपालयति प्रेरितोऽपि मित्रैः करचौर्यमपि न करोति न च कर्मकरान्-भृत्यानेव शोषयति । इत्थं तस्य आयस्याधिकांशः राष्ट्रकोषेऽथ च भृत्येषु गच्छति । स्वसौख्यसाधनानि तस्यावश्यकान्येव सन्ति । न तु - इतराण्यनावश्यकानि विशालसौविध्यसाधनानि । सर्वेषु सम्मानो वर्तते । एतदतिरिक्तं संस्कृतसेवाकरणमपि तस्य तत्पत्न्याश्चोभयो रेव व्यसनम् । संस्कृतपत्रेभ्यः कथा - उपन्यास - काव्यलेखनम् संस्कृत-प्रसारविकासकार्यसञ्चालनाय च धनसाहायदानं ताभ्यां न बिस्मर्यते ।

कदाचिदुभौ परस्परं विचारयत - संस्कृतस्य वर्चस्व सर्वजन-विद्वज्जनज्ञातन्तथापि - अस्या प्रचारप्रसाराय नेतृबृन्दमपि 'वाचि का दरिद्रतेति" न्यायमवलम्ब्य संस्कृतमहत्ताप्रकाशक – व्याख्यानातिरिक्तं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न किमप्याचरति । केचन शिक्षणधनादिसाहाय्येन संस्कृतप्रचारं करिष्यन्ति - इति तर्पिता अपि यथैव लोकसभायां राज्यविधानसभासु वा निर्वाच्य प्रेष्यन्ते तेऽपि तत्र गत्वा विस्मरन्ति । संस्कृताध्यापकप्राध्यापकैश्छात्रैश्चापि संस्कृतिसंस्काररक्षायै किमपि सोत्साहं न क्रियते । केचन एव तादृशाः संस्कृतसेवासंलग्नाः विद्वांसो यैः स्वीयं सर्वस्वमेव संस्कृतप्रसारविकासकृतेऽर्पितम् । तथापि संस्कृतज्ञेषु जागृतिर्नायाति । कुटुम्बभावना नैव जागर्ति । ईर्ष्याद्वेषवह्निपतङ्गभूताः केचन विद्वांसः संस्कृताहितकरणे संलग्नाः । इतरे संस्कृतमधीत्यापि किं संस्कृतं का च संस्कृतिः के वा संस्कारा इति नैव जानन्ति । अपरे विशिष्टपदाधिरूढाः संस्कृतज्ञाः संस्कृतमेव विस्मरन्ति । परमेवं सत्यपि संस्कृतस्य प्रसारविकासौ मन्दगत्या जायमानावेवास्ताम् । अधुना संस्कृते यत्साहित्यं लिखितं विद्यते प्रतिदिनञ्च यल्लिख्यते तत् - कस्यामपि भाषायां लिखितसाहित्यात् कथमपि न्यूनं नास्ति । एतत्सर्वं साहित्यञ्च निःस्वार्थभावेन लिखितमस्ति तदिदमेवामरभाषाया अमरत्वम् । एवं सति साहित्यभाषाविवाद - भौतिकवाद - पाश्चात्यप्रभावादिभिः प्रभाविते समाजेऽस्मिन् आवयोः संसारः पृथगेव परन्तु यथा चन्द्र एक एव, सूर्य एकलस्तपति तथैवास्माकं यात्रापीयं निर्बाधं प्रचलिष्यति । इत्थं विचारयन्तौ रात्रौ निद्रामलभताम् ।

अपरेद्युः सायंकाले मौलिचन्द्रस्य गृहे सहभोजायोजनमासीत् । सायमष्टवादनं यावत् सर्वेऽपि इतस्ततो नगरेऽटाट्यं कृत्वा समुपस्थिताः बभूवुः रमेशस्तत्पत्नी पुष्पलता, इन्द्रकुमारस्तज्जाया अमला कृष्णकिशोरस्तस्य सहधर्मिणी कमला च ।

भोजनमञ्चस्योपरि सर्वे समुपाविशन् । रेखया कथमेतावतां व्यञ्जनसमूहानां निर्माणमेकलयैव कृतमिति प्रथमं सर्वेषामाश्चर्याय आसीत् । ततश्च रसगोलाः कियन्मधुरा विभिन्नशाकानि परमस्वादयुतानि, अपूपानि तु सर्वेभ्योऽपि व्यञ्जनेभ्यः स्वादुतराणि, दधिसंयुक्ताः वटकाः, वातादमण्डितक्षीरम्, एतादृक्किमस्ति भोज्यं यत् - रेखया नैव निर्मितम् - इति सर्वे मुक्तकण्ठं प्राशंसन् । भुक्त्वा ताम्बूलचर्वणं कुर्वन्तः सर्वे उपवेशनकक्षे समुपविश्य वार्तालापपराः जाताः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रमेशः — मौलिचन्द्र ? अस्माभिः सदा प्रेरितोऽपि त्वं भौतिकेऽस्मिन्युगे विज्ञानस्य प्रभूतप्रकाशप्रकाशितेऽपि जगति पुराणीं विचारधारामाश्रयन्नेव तिष्ठसि।

मौलिचन्द्रः— ततः किम् ? किं युष्माभिः पुराणमेव भोजनं न भुक्तमत्र किं तद्‌रुचिकरं नासीत् ? किमुपवेशनस्य निवासस्य वा तादृशी एव व्यवस्था नास्ति मद्‌गेहे यादृशी युष्माकं गृहे ?

इन्द्रकुमारः— तदिदं सर्वं तथैव यथास्माकं सविधे वर्तते परन्तु विचारैस्त्वं पुराणः । सुरां न सेवसे। कामिनीं न कामयसे। रेखां नृत्यपानगोष्ठीषु - अन्यपुरुषैः साकं नर्तनाय नानुज्ञायसे।

मौलिचन्द्र :- सुरापानेन मानवो दानवो भवति तस्मात्सुरां न पिबामि। रेखा मया गोष्ठीषु नृत्येषु वा भागग्रहणाय न कदापि वर्जिता। एकपत्नीव्रतग्रहणात् अन्यां न कामये।

कमला : – त्व स्वयमपि त्वस्माभिः साकं कदापि नृत्यं न करोषि।

मौलिचन्द :- जीवने पत्नी एकैव भवति । मातरः भगिन्यश्चान्याः स्त्रियः- इति - आर्याणामाचारसंहिता। अस्मिन् - आंग्लानुकृतशास्त्रीये नृत्ये भावदोषः समुत्पद्यते तस्मात् नृत्यं न करोमि।

पुष्पलताः- मौलिचन्द्र ? युष्माकं कृष्णस्तु अनेकाभिः साकं नृत्यं करोति स्म।

रेखा :- भगिनि कृष्णस्तु भगवानासीत्। भगवति मानवे च महीयान् भेदः आकाशपातालयोरन्तरम् अथ च यदि आध्यात्मिकाधारेण विचार्येत तदा सर्वेऽपि जीवाः स्त्रियः परब्रह्मश्च श्री कृष्णः। एवं सति जीवब्रह्मयोर्लीलाया भवत्या उपहासो न विधेयः।

अमला : रेखा ! त्वमेतावत्सुन्दरी असि। तथैव स्वीयं जीवनं यौवनञ्च नाशयसि तवोपरि यूनां सहस्रं जीवनार्पणं कुर्यात्। गोष्ठीषु समागत्य त्वं जीवनस्यानन्दमात्मतुष्टिञ्च प्राप्स्यसि। अस्माकं भर्तारः- अन्याभिललनाभिः साकं सानन्दं नृत्यन्ति। वयमपि स्वेच्छया परपुरुषै सह नर्तनं कुर्मः। अनेन प्रतिदिनं नवीनताया आभासो जायते। पतिपत्न्यो प्रेम तु शनैः शनैः मन्दायते, पुरा-णायते च। तत्र नवीनतां समुत्पादनाय आधुनिकसमाजे प्रथेयं प्रचलति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

रेखाः — पतिपत्न्योः सम्बन्धः जन्मजन्मान्तरीयः इति भारतीयो विचारः। मया वहिरपि बहुषु देशेषु दृष्टम् - यत्रेयं प्रथा वर्तते। तत्रत्य लोकाः पाशविकजीवनमेव जीवन्ति। तत्रत्य परिवारेषु-आत्मसन्तोष - आदर्शप्रेम वा क्वापि न दृश्यते। उदाहरणाय केचन लोकास्तु - सर्वत्र प्राप्यन्ते तादृशास्तत्रापि सन्ति। परं प्रायः स्वतन्त्रपतयः सुरां पीत्वा पानगृहेष्वेव निशां यापयन्ति। पत्न्यश्च स्वैरिण्यः परपुरुषबाहुपाशबद्धा - नृत्यन्ति तेन च क्षुब्धमन्तःकरणास्ता स्वीयां कामबुभुक्षां क्षणाय शमयन्ति।

अस्माकं देशेऽपि क्षयरोगोऽयं वर्धमानो दृश्यते। अधिकारिषु, नेतृवर्गे, सम्पन्नव्यापारिषु, चास्य बाहुल्यम् नीलचित्रपटादयो देशं गर्ते निपातयितुमहर्निशं वर्धमाना सन्ति। विशेषतो महानगरेषु. एतेषां प्रचारः। दूरदर्शनेऽपि- देशचरित्रं लक्ष्यी कृत्य सुधारस्य परमावश्यकता।

अमला :—इति तु सत्यं यत् - क्षणिकशान्तिरेवानेन भवति पिपासा च पुनरावृत्या अहर्निशं वर्धते।

रेखाः— नूनमहर्निशं वर्धते परन्तु यथा २ सौन्दर्यस्य शक्तेश्च लोपो जायते तथा तथा दुःखमपि वर्धते। पूर्वमद्य युगान्तरेष्वपि वा जीवनस्य वास्तविकोऽयं रहस्यः यत् :-

न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते।

मौलिचन्द्र :- एष विचार एव विश्वसाम्यवादस्य स्वच्छो मौलिकाधारः। वर्तमानयुगस्यानेकसमस्यानां समाधानमस्मिन् - विचारप्रयोगे निहितम्।

रेखा :- त्याग - तपस्या - तपोवनाश्रितोऽयं देशः।

मौलिचन्द्र : तथापि अद्य लोकाः वैदेशिकदुर्गुणग्रस्ताः वास्तविकतथ्य-विमुखीभूताः सन्ति। वैदेशिकानां गुणान् प्रत्युदासीनाः दोषाना-मनुकरणे च सिद्धहस्ताः देशं दूषयन्ति।

रेखा – यदा दिशाबोधो भविष्यति तदा सर्वं साधु भविष्यति। समयोऽपि इदानीं जातोऽस्ति पर्याप्तः।

रमेश :- अस्तु तावत्स्व स्व गृहं गन्तव्यमिदानीम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पार्वती

पार्वती, आचार्यकक्षायां शिमलायां संस्कृतमहाविद्यालये पठति । अन्तिमोऽयमस्या वर्षः । इदानीमवकाशेषु गृहमागता वर्तते । पार्वत्याः पितृपादः साधारणकृषको वर्तते । पार्वती यदा गृहमागच्छति तदा सा कृषेः सर्वविध-कार्येषु पूर्णशक्त्या सहयोगं करोति । गृहे पार्वत्या माता, भ्राता, भ्रातृजाया चेति सर्वे सम्मिल्य केवलं पञ्चजनाः— वसन्ति । पितरौ सुशिक्षितौ समवलोकितविविधदेशौ स्तः भ्राता, भ्रातृजाया चापि - उभौ विश्वविद्या-लयतः शिक्षां प्राप्तवन्तौ ।

पार्वत्या शिक्षापि शीघ्रमेव पूर्णा भविष्यति सा एकविंशतिवर्षदेशीया । शरीरेण पुष्टा, वर्णेन गौरा रतिरिवापरा । अद्यारुणोदयेन साकमेव जलं पात्रेण गृहीत्वा गृहीत्वा गृहं परितः प्रसृतां विशालपुष्पशाकवाटिकां सिञ्चति । श्रमेण रक्तानना स्वेदसिक्ता स्वयमपि वाटिकासुमनमिव सौम्या प्रतीयते । एतावदेव नहि पुष्पसिञ्चनं विधाय गृहात् किञ्चिद्दूरं स्थिते गोष्ठे गच्छति । तत्र प्रथमं गोष्ठात् - गोमयं निष्कासयति । ततो गवां मुखाग्रे घासं दत्वा हस्ताभ्यां तासां गलप्रदेशे, शिरसि, पृष्ठभागे च कण्डूयनं कुरुते । गावोऽपि आनन्दसिन्धुनिमग्ना इव स्वात्मानं विस्मृत्य पार्वत्याः स्कन्धोपरि मुखानि निधाय अक्षीणि निमील्य पुनः पुनः कण्डूयनाय कथयन्तीव परिलक्ष्यन्ते । ततो गोदोहनं विधाय दुग्धपूरितपात्रं गृहीत्वा गृहमागच्छति । दुग्धपात्रं मातुः सकाशे पाकशालायां दत्वा, सर्वमपि गृहं बहुकरेण सम्यक् सम्मार्ज्य, स्नात्वा, स्वच्छवस्त्राणि धारयित्वा स्वगृहस्थिते मन्दिरे पूजां विधाय स्वाध्यायार्थं स्वाध्यायकक्षे गच्छति ।

पार्वत्या पिता नगेशः पूजां विधाय, पाकशालायां स्वपत्न्याः मीरायाः-किञ्चित् साहाय्यं कृत्वा स्वगृहोद्याने आसन्दिकां संस्थाप्य तत्र समाचारपत्रं पठन् तिष्ठति । नगेशस्य पुत्रोऽर्जुनः पुत्रवधूः सावित्री च घासं कर्तयित्वा इदानीं गृहमागत्य वासभारौ गोशालायाः पार्श्वे एकस्मिन्— कक्षवत्निर्मित-स्थाने स्थापयतः । पुनरपि गोशालां गोमयरहितां कृत्वा जलेन सम्यक्— प्रक्षाल्य च गृहं प्रविशतः । उभौ स्नानं विधाय, पूजां कृत्वा गृहस्योद्याने बहिरेव यावत् - भोजनार्थं सर्वे उपविशन्ति तावदेवार्जुनस्य कश्चित् सहा-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध्यायी हि भारतीय - प्रशासन - सेवायामुच्चपदमासीनो वर्तते सपत्नीक: समागच्छति । पार्वती शीघ्रमेवाभ्यन्तरं प्रविश्य - आसन्दि - युगलं समानयति तस्या भ्रातृजाया च भोज्यवस्तूनि भोजनमञ्चोपरि ससाधयति । अर्जुनस्य मित्रं सुरेश: सनमस्कारं स्वपत्न्या साकं स्वकीयासनमलकुरुते । "किमु चायपान करिष्यत:- भवन्तौ - उतभोजनमेव वा—" इति यथैवार्जुनपिता पृच्छति- आगतयुगलं तथैव उभौ भोजनार्थमेवाग्रहं कुरुत: । अर्जुनोऽपि किञ्चित्संकोचेन स्वमित्रं कथयति । "वयन्तु ग्रामवासिनो, ग्राम्यभोजनं न जाने कीदृश भविष्यति, रोचिष्यते भवद्भ्यां न वेति ?

मित्रवर ! ग्रामेष्वेवाद्य शुद्धं वस्तुजातं मिलति यत्किञ्चदपि स्यात्- नगरेषु तु विषमपि शुद्धं नास्ति तथापि लोका: नगराणि प्रति धावन्ति अर्जुनस्य माता सर्वेभ्यो भोजनं वितरति ।

सुरेश ! अस्माभिस्तु तस्मादेव निर्णीतं यत् नगरं न गमिष्याम:- आजी- विकार्थम् न चापि भृतिं करिष्याम: । स्वतन्त्रजीवनं यापयिष्याम: । पितृ- पादानामप्ययमेव विचार आसीत् । परिणामतोऽस्माभि:- नूतनप्राक्तनयो- र्मिश्रितरूपेण जीवनं याप्यतेऽत्र ।

साधु अर्जुन ! साधु ! नागरिकाणां ग्रामीणानाञ्चापि अशिक्षितानामर्ध- शिक्षितानाम्बाऽयमेव विचारो यत् श्रमं विनैवाधिकार्थिकलाभो भवेद्यथास्या. तथा । सर्वथा दूषित:, हीनभावनाद्योतकश्चायं विचार समाजं दूषयति देशञ्चावनतेर्गर्ते नियातयति । श्रमस्यादरो नास्ति देशे तस्मादेवास्माकं जीवन- मार्थिकसामाजिकसङ्कटापन्नम् अर्जुन ! अहन्तु—अतीव प्रभावितोऽस्मि भवतां जीवनेन । कथं पूर्णकुटुम्ब: शान्तिमयं सुखपूर्णं सन्तुष्टञ्च जीवनं यापयति । एवमुच्चविचारपूर्णवार्तालापेन साकं भुक्तं सर्वै: । यथैव भोजनं समाप्तं तथैव केनचित् - स्थालिका: अपरेण भोजनसामग्री पात्राणि, इतरेण च जलपानपात्राणि उत्थाप्य मञ्चस्य परिमार्जनं कृतम् ।

सुरेशस्तदीया भार्या चोभौ इतस्तत: पर्यटन्तौ परित: प्रसृतानां कुसुमानां शोभां दृष्ट्वा आश्चर्यान्वितावास्ताम् । अत्र कीदृशी शान्ति: ? आवांतु स्वभ्रातृभि: साकमथवा मात्रा पित्रा च सह दिनमेकमपि यापयितुं न शक्नुम: सर्वेषामयं विचारो यद्ग्रामीणा:- निधना: । परन्तु - एतेषां गृहे तु सर्वा:

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुविधा। नागरिकं वातावरणम् । केवलं परिश्रम एव वर्तते यदस्माभिर्न क्रियते एभिश्च क्रियते सुषमा ! अत्र प्रत्येकं वस्तु जातं परिश्रमेण क्रीतम् । अस्माकञ्च गृहमुत्कोचधनेन कृष्णधनेन वा पूरितं तस्मादेव वयं सर्वदा अशान्ताः । रात्रौ निद्रागुटिकासेवनं विना निद्रापि नायाति । परिश्रमं विना शरीरं यौवनेऽपि जराजीर्णमिव लगति । जलपानपात्रोत्थापनायापि भृत्यस्यावश्यकता भवति । वयं स्वयं किमपि कर्तुमसमर्था एव । आम्, शोभनं स्मारितं श्रीमता अग्रिममासादस्माकं पाचकः भृत्यसंगठनसदस्यो भविष्यति । सोऽकथयत् - यत् - रात्रौ - अष्टवादनकालादुपरान्त तदुपस्थितिर्न भविष्यति । अस्माभिस्तु रात्रौ द्वादशवादनसमये गृहमागम्यते । कोऽस्मान् भोजनमुपहरिष्यति तदानीम् ? सुषमा किञ्चिदशान्ता इव अब्रवीत् । एतत्तु - अतीव दुःखकरं भविष्यति । तर्हि शीतलभोजनमेव करिष्यामः स वक्तव्यो यत् - मञ्चोपरि सर्वां भोजनसामग्रीं पाचयित्वोपस्थापयेत् - गच्छेत् - च कुरेकस्योत्तरमासीत् । भवान् कीदृशः- अधिकारी भवद्भिरसावादेष्टव्यः । नैव प्रिये, एतेषां भृत्यानां संगठनानि - इदानीं सशक्तानि सन्ति । अहन्तु कार्यालयेऽपि किमपि लघुकर्मकरेभ्योऽपि वक्तुं न शक्नोमि । एते लघुकर्मचारिणोऽ प

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अधिकारिणां साम्यं कर्तुमुद्यताः । अनेनैव तु मस्तिष्कं सर्वदाऽशान्तं तिष्ठति । शरीरे उष्णता, जाड्यम्, धमनीषु च प्रकोपो ऽस्माकम् सर्वदा द्रष्टुं शक्यते ।

अद्य पार्वत्या सहचरी रीटापि नगरात्तस्या गेहमागता । सा एम. ए. कक्षाया अन्तिमे वर्षे पठति । तस्याः पिता भारतस्य विदेशमन्त्रालये संयुक्त-सचिवः । सापि ग्राम्यसुषमामालोक्य शुद्धां सुस्वादुभोज्यसामग्रीञ्च प्राप्य भृशमभिभूताऽजायत पार्वत्याः पारिवारिकाणाञ्च पारस्परिक - विश्वास-स्नेहादरादिकमालोक्य परमचकिता बभूव ।

इत्थं किलानेके जना नगेशस्य गृहमागच्छन्ति ग्रामवासप्रेरणाञ्च गृह्णन्ति । तत्पुत्रेणानेकप्रदेशीयाः युवकाः पर्वतीयगौरवेण प्रभाविताः । इत्थमेव वर्तते तस्य पुत्री पार्वती । तया नागरिका अनेक - कुकृत्य - दुर्व्यस-नेभ्यो वारिताः । तस्या मनसि पार्वत्यग्रामनिवासगौरवं विराजते । सा तेन गौरवेण सर्वान् परिचाययति । सर्वा अपि युवत्यो बालाः कश्चिदपि युवकः पर्वतीयसंस्कृतेः निन्दां कुरुते चेत् - सा शास्त्रार्थापेक्षया तान् - सर्वानपि स्वगृहमानीय तदुत्तरं ददाति । तदा सर्वे नतमस्तकतया पार्वत्याः पार्वतीत्वं स्वीकुर्वन्ति ।

पाठकाः प्रार्थ्यन्ते

मान्याः !

प्रवर्तमानवर्षस्यापि अर्धभागो व्यतीतः । पत्रप्रेषणेनापि वार्षिकशुल्कप्रेषणार्थं प्रार्थना कृता किन्तु स्वल्पैरेव महानुभावैः शुल्कप्रेषणं कृतम् । अतः सविनयं प्रार्थ्यते यत् शीघ्रमेव शुल्कप्रेषणेन सहायता क्रियताम् ।

—— सम्पादकः

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अभिशापोऽयम्

अनेकऋषिमुनिगणसिद्धजनसेवितपूर्वस्य हिमाचलप्रदेशस्योत्तरस्यां दिशि शतद्रुतटे - आसीत् कृष्णपुर नाम ग्रामः। तत्रैव जीर्णशीर्णे परितः प्रस्फुटिते - एकस्मिन् - गृहे शिवप्रसादनामकः - कश्चिज्जनः सपत्नीको वसति स्म। न जाने कस्य पूर्वजन्मकृतपापस्य कारणेन लक्ष्मीरनयोः कुपितासीत्। शिवप्रसादस्य गृहिणी निरुपमाऽतिकाठिन्येन यथाकथंचित् गृहकार्यं सञ्चालयति स्म कृषकदम्पतिरयं निर्धनतायाश्चक्रेण चूर्णीकृतः। देवदुर्विपाकात् - प्रभोरिच्छया वाऽनयो गृहे पुत्रस्याभाव आसीत्। तथापि पुत्रीचतुष्टयं दारिद्र्यपीडितं गृहं स्व बालसुलभक्रीडाभिर्मन्दहासैश्च प्राकाशयत्।

यद्यपि दम्पतिरयं स्वकीयक्षेत्रेषु वार्षिकं भोज्यान्नं समुत्पादयति स्म, किञ्चिच्चावशिष्टमन्नं विक्रीय गृहस्यान्यावश्यकताः पूरयाञ्चकार। ग्राम एव प्रशासकीयविद्यालयः आसीत्। अत्र दशमकक्षापर्यन्तं शिक्षायाः व्यवस्था विद्यते स्म। शुक्लपक्षशशिवत् - बालिकाः-अहर्निशं वर्धन्ते। तदनुसारञ्च शिवप्रसादस्य बालिकाः अपि विद्यालये शिक्षार्थं प्राविशन्। "दिनमपि रजनी - सायं प्रातः शिशिरबसन्तौ पुनरायातः" इति श्रीशंकराचार्यश्लोकानुसारं समयस्तु अक्ष्णोः आकुञ्चनमिव व्यपगतः बालिकाश्च विद्यालयतः प्रथमद्वितीयतृतीयचतुर्थकक्षाः समुत्तीर्य क्रमशो दशमीमपि समुत्तर्तुं मारेभिरे।

निरुपमा बालिकानां वृद्धिंगतामवस्थामवलोक्य चिन्तासन्तानवितानाच्छादितमनस्का स्वपतिं प्राबोधयत्। स्वामिन्! बालिकाः- गृहेऽहर्निशं प्रवर्धमानास्तिष्ठन्ति अतस्तासां कृते योग्यवर - चिन्ताया अवसरोऽयं प्राप्तः। शिवप्रसादोऽपि तस्मादेव दिनात् स्वकन्यानां कृते योग्यवरसमन्वेषणे व्यापृतोऽभवत्। सौभाग्येन समीपस्थग्राम एव कन्यात्रयकृते युक्तवरप्राप्तिर्जाता।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"ययोरेव समं वित्तं ययोरेव समं कुलम् ।
तयोर्विवाहो मैत्री च प्रशस्यौ सर्वदा स्मृतौ ।।"

इति शास्त्रवचनानुसारं सर्वं सुष्टुरासीत् । तथापि भोजनादिव्यवस्थायै वरयात्रिणां स्वागतसत्काराय तु किञ्चिद्धनमावश्यकमासीदेव । आगामिनि ग्रीष्मे विवाहमुहूर्तस्तु शुभोऽस्ति - इति ज्योतिषिरभाषत् । शिवप्रसादस्तथा निरुपमा परस्परं विचारमकुर्वताम् ।" मया, गोधूमविक्रयेण यद्धनं भवद्भिः- दत्तमभूत् - काले काले, तस्मात् - स्वल्पं स्वल्पं संगृह्य रक्षितमस्ति । एतत्सर्वं सार्धसहस्रद्वयमितं भवेत्." निरुपमाऽवोचत् । प्रसन्नः शिवप्रसादो बभाषे "निरुपमे ! तदा नास्ति कापि चिन्ता । अस्माकं पर्वतप्रदेशे यौतुकप्रथा तु नास्त्येव । वरपक्षीया न किमपि वाञ्छन्ति ऋते सुकन्यायाः" एवञ्च निश्चिततिथौ पुत्रीत्रयस्य परिणयः सुखेन सम्पन्नः । तिस्रोऽपि कन्याः स्वगृहे विवाहानन्तरं सुखिन्यः—न्यवसन् ।

सर्वाभ्यः कनिष्ठा कन्या सुलोचना आसीत् । सा दशमीं कक्षामुत्तीर्य महाविद्यालये पठनस्याग्रहं चक्रे निरुपमा स्वकीयं भर्तारं तस्या महाविद्यालयीयशिक्षायै सन्नद्धं कर्तुमचेष्टत स्वदारिद्र्यं सम्यक् - जानन् - शिवप्रसादः प्रथमन्तु सन्नद्धो नाभवत्परन्तु यदा निरुपमयाऽधिकाग्रहः कृतः कन्या चापि शतवारमपि प्रकटितायां व्ययभारवहनस्याशक्तयामपि स्वहठं न तत्याज तदा शिवप्रसादो विवशोऽपि सन्-पत्न्याः- कन्यकायाश्चाग्रहं स्वीचकार । कन्या दूरस्थनगरे महाविद्यालये प्रवेशमलभत् ।

सुलोचना महाविद्यालयस्य चाकचक्यं समालोक्य आश्चर्यान्विता शनैः शनैः स्वात्मानं यथा कथमपि तस्मिन् - वातावरणे नियोजयामास वर्षाभ्यन्तरे - एव सुलोचनायाः सर्वमपि परिवर्तनमभूत । इदानीन्तु सा पूर्णमहाविद्यालयीयछात्रा जाता । वार्तालापे, वस्त्रपरिधान, व्यवहारे च । ततश्च तस्या पितरौ धनादिव्ययेन ऋणेन च चूर्णीकृतौ यथाकथंचित् – समयं यापयतः स्म । इदानीं सुलोचना स्नातकोत्तरकक्षायां पठति स्म । शीतकालावकाशे सा विश्वविद्यालयतो गृहमागता । गृहे पितरौ तस्याः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

लावण्यमवलोक्य समारूढयौवनां तां परिज्ञाय तस्या विवाहचिन्तायां मग्नौ। एकस्मिन् दिने सा स्व पितृष्वसाया गृहमनतिदूरस्थग्राममन्यं गता तस्मिन्नेव ग्रामे बलभद्रोऽपि निवसति स्म। असावपि विश्वविद्यालये तया साकमधीते स्म। मार्गे गच्छन्तीं तामसौ मिलितः। अरे सुलोचना? त्वमत्र कथमायातासि? महोदय। मदीया पितृष्वसा ग्रामेऽस्मिन्नेव निवसति तस्या गृहेऽहमत्र तां मिलितुं समायातास्मि।" अस्तु, एवमिदम्। तर्हि - मदीयगृहमपि भवत्याऽलंकरणीयम्, बलभद्रोऽवोचत्।

घना केशराशिः। केशवर्णो निशामिव कृष्णः। दीर्घदीर्घतमा वेणी। गौरवर्णः कपोलौ रक्तसेवत्रणौं। प्रतनु - ओष्ठौ। शुभ्रा दन्तपङ्क्तिः। सुदृढशरीरः। सर्वमिद सुलोचनाया दृष्ट्वा बलभद्रोऽचिन्तयत्"— कदाचिदियं मम गृहलक्ष्मीः - भवेच्चेत् कियदानन्दकरं स्यात्। परं सर्वं मनसा चिन्तितं किं सर्वदा पूर्णं भवति? सुलोचमापि बलभद्रस्य इष्टमिष्टस्वभावं तस्य सौन्दर्यं विनम्रतामलम्पटत्वञ्चाबलोक्य कथञ्चिदपि तं प्रति समाकृष्टाऽभूत्। कानि चिद्दिनानि पितृष्वसायाः– गृहे नीत्वा सुलोचना स्वगृहं प्राप्ता। विश्वविद्यालयोऽपि शीघ्रमेवोद्घाटितो भविष्यति। स्नातकोत्तरकक्षायामन्तिमो ऽयं वर्षस्तस्याः। शोभनांकप्राप्तये पूर्णप्रयासाः- अपेक्ष्यन्ते। कथं किल मम पितरौ एकामेकां कपर्दिकामेकी कृत्य मदीयशिक्षायाः-भारं वहतः। एतत्सर्वं सुलोचना स्वमनसि सदा धारयति। अन्य छात्रा इव सा कदापि स्वीय समयं धनञ्च व्यर्थं नैव व्ययी करोति। विश्वविद्यालयोऽपि उद्घाटितः। अवकाशाः पूर्णाः जाता। सुलोचना विश्वविद्यालयं गता। स्वाध्याये च निमग्ना। बलभद्रोऽपि विश्वविद्यालये तामिलत। परन्तु उभावपि कदाचिदपि - उच्छृंखलतां न कुरुतः स्म अत एव उभावपि परस्परं स्नेहपाशबद्धौ जातौ। सुलोचना बलभद्रगुणमुग्धा आसीत् – एवमेव बलभद्रोऽपि सुलोचनाया गुणैर्निगडितोऽभूत्।

सुलोचनायाः पितरौ तस्या विवाहविषये चिन्तितौ अभवताम्। 'इदानीं तस्या अध्ययनमपि पूर्णं भविता। कन्या यौवनापन्ना वर्तते। अस्यां दशायां युवकयुवतीनां मनसि कामवेगोत्पद्यते तदा चोचितानुचितं किमपि न विचारयन्ति बालाः। तस्मात्तस्या कृते क्वचिद्योग्यवरस्या-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

न्वेषणं परमावश्यकमस्ति जातमिति" शिवप्रसादः स्वपत्नीमवोचत् । सापि तस्यविचारैः साकमेकमत्यं प्रकटयन्ती—अवोचत्—"अहं श्वोभूते ननान्दुः—ग्रामं गत्वा तया साकमपि विषयमिमं विचारयिष्यामि ततश्चापरेऽहनि सा स्वननान्दृगृहं गताऽभूत् तस्या ननान्दुरपि विचारोऽयमासीद्यत् "— "सुलोचनायाः गुणानुरूपं वरस्तु बलभद्र एव । अहं तस्य पितृभ्यां साकं एतद्विषये वार्तालापं करिष्यामि ।"

एवमुभयोः सुलोचनाबलभद्रयो विवाहसम्बन्धो निश्चित इवाभूत्-केवलं जन्मपत्रावलोकनं तत्र च ग्रहमेलनादिकमावश्यककृत्यमवशिष्टमासीत् यथैव उभौ परीक्षां दत्वा स्व स्वगृहं निर्वृत्तौ तथैवोभयोर्गृहे विवाहचर्चा परां कोटिं गताऽभूत् । उभयोः स्वीकृत्याः पश्चात् गणकेन कुण्डलीमेलन कृतम् । 'दैवी विचित्रा गतिः ।" ग्रहमेलापकं सर्वथाशुभमासीत् । परीक्षोत्तरणमपि जातम् । उभाभ्यां स्नातकोत्तरकक्षा प्रथमश्रेण्यङ्कानादाय उत्तीर्णा । उभयत्र विवाहसंस्कारस्य सज्जा प्रारब्धाऽभूत् ।

निरुपमा निगूढं चिन्ताभावं प्रकटयन्ती प्राह–"स्वामिन् ? कन्यायाः परिणयतिथिस्तु निश्चिता परन्तु विवाहोऽयं साधारणो नास्ति । अन्याः कन्याः–तु—ग्रामे साधारणगृहेषु विवाहिताः । परन्तु यत्र सुलोचनायाः सम्बन्धः कृतोऽस्ति ते सुशिक्षिताः सन्ति । पुत्रोऽपि तेषां सुशिक्षितः । न जाने यौतके किं किं याचेरन् ?" "अस्माकं पर्वतप्रदेशे नायमभिशापोऽस्ति । कश्चित् शिक्षितः स्यादशिक्षितो वा यौतकदानमत्र नास्ति । अस्य करणेनैव तु समीपस्थराज्येषु सौम्याः बालिकाः यौतकदानाभावे नारकीयं मृत्युमधिगच्छन्ति । काश्चित् दह्यन्ते, अपरा निपात्यन्ते, इतरा विषप्रदानेन हन्यन्ते, अन्याश्च गृहान्निष्कास्यन्ते । इत्थं किल घोररूपोऽयं यौतकराक्षसः- बालानां कृते बंग-केरल - विहारादिराज्येषु तु परः सहस्रा बालाः एतस्य कारणेन विवाहमेव न कुर्वन्ति । नारकीयं जीवनं च यावज्जीवं जीवन्ति इति हा ?" शिवप्रसाद खिन्नमना बभाषे "ततोऽपि बलभद्रस्तस्य पितरौ वा एतद्विषये प्रथममेव प्रष्टव्याः येन पश्चात् काचित् समस्या समुपस्थिता न भवेत्" निरुपमया कथितम् । अद्यैवाह तेषां गृहं गत्वा सर्वं निर्णीय सायं कालपर्यन्त निर्वृत्तो भविष्यामि. शिवप्रसादेनोक्तम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



शिबप्रसादश्च पश्चात् बलभद्रगृहं गत्वा तस्य पितरौ समक्षमेतद्-यौतकविषयमुपस्थापयाञ्चकार । बलभद्रस्य पितरावपि यौतकग्राहकानां घोरनिन्दामकार्ष्टाम्+ 'अभिशापोऽयं किल भारतीयसमाजे अनेनासख्या कन्या प्रतिवर्षमबिवाहिता - एव निवसन्ति, असंख्यानामकालमृत्युर्भवति । अतोऽयमभिशापोऽन्यत्रैव हिमाचलाद् बहिरेव स्थितो भवेत् —इति अस्माकं प्रार्थना । भवद्भिस्तु केवलं वस्त्रचतुष्टययुता कन्या अस्मत्सुताय देया याऽस्य कुलस्य लक्ष्मीरूपा कुलबधुर्भवेत् आवाभ्यां स्वपुत्रोऽपि एतद्विषये पृष्ठः सोऽप्यतितरां विरुद्धोऽस्ति धिगिदं यौतकं धिक्कारयोग्याश्च सन्ति ते ये यौतकं याचन्ते गृह्णन्ति वा ।"

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

को दण्डनीयः ?

भारतस्योत्तरदिशि विद्यते कर्णपुरं नाम नगरम्। तत्रैव निवसतिस्म राधाकृष्णः। तस्यैका पत्नी एकश्च पुत्र इति सन्ततिद्वयम्। पत्न्या नाम मालती आसीत्। पुत्रस्तु विशालनामा विद्यते स्म। राधाकृष्णो यद्यपि प्रशासकीयकार्यालये लिपिक आसीत्। परन्तु तत्पत्नी सर्वदा अस्वस्था एव वहुकालं व्यत्यापयामास। तस्या चिकित्सायां दाक्तरैर्बहुधनं तस्य लुण्ठितम्। प्रथमन्तु स प्रशासकीयचिकित्सालये तस्याश्चिकित्सां कारयामास। तत्रापि विना धनं कार्यं न प्राचलत्। प्रशासकीयचिकित्सालये नियुक्ताश्चिकित्सकाः परिचारिकाः स्वच्छताकर्मचारिणश्च कमपि रुग्णं तावन्न पृच्छन्ति यावत्किल तेषां हस्ताः -- नवनीतायिता न क्रियन्ते। तेषां परितोषणे एव तस्य बहुधनं व्ययितम्। दैवदुर्विपाकात्एकस्मिन् - दिने तस्य लघुबालको विशालः संग्रहणीरोगेण प्रपीडितोऽभूत्। समीपस्थे चिकित्सालये तं स दाक्तरस्य पार्श्वेऽनयत्। दाक्तरो बालकं बिलोक्य प्राह - "अहमौषधमस्मै लिखामि। औषधविक्रेतुरापणात् - भवद्भिः क्रेतव्यम्।" राधाकृष्णो दाक्तरस्य औषधपत्रं गृहीत्वा औषधविक्रेतुरापणं गतः। असौ औषध - मूल्यं पञ्चाशत् रूप्यकाणि - इत्याह। पञ्चाशत् रूप्यकाणि दाक्तरेण पूर्वमेव गृहीतान्यासन् - रोगपरीक्षायाः। मासस्यान्तिमसप्ताहः - आसीत्। राधाकृष्णस्य पार्श्वे केवलं पञ्चाशत् रूप्यकाण्येवावशिष्टानि - आसन्। कथं वा केन वाऽसौ औषधक्रयं कुर्यात्? कथञ्च म्रियमाणं पुत्रं रक्षेत - इत्यासीत् - गंभीरः प्रश्नस्तस्य मनसि। राधाकृष्णः औषधविक्रेतारं परमदीनतया ऽ प्रार्थयत् - "कृपालो! ममैकैव पुत्र, पार्श्वे एका स्फुटिता कपर्दिकाऽप्यधुना नास्ति। प्रथमदिनमग्रिम मासस्यागमिष्यति तस्मिन्नेव दिने भवदीयाः पञ्चाशन्मुद्राः दास्यामि। अद्य कृपा कार्या। औषधं दीयताम्। येन मम पुत्रो मृत्योर्मुखात् रक्षितो भवेत्। औषधविक्रेता कथमपि - औषधं विना मूल्येन ऋणरूपेणापि दिवसद्वयाय दातुं सन्नद्धो नाभूत्। विवशोऽसौ यत्र तत्र स्वमित्राणां पार्श्वेऽपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पञ्चाशत्रूप्यकाणां प्रबन्धं कर्तुं गतः । परन्तु कुतोऽपि धनस्य व्यवस्था नाभूत् । सायंकाले श्रान्तः– दुःखितश्च राधाकृष्णो यथैव गृहे प्रविष्ट-स्तथैव स्वपुत्रमन्तिमक्षणानि–गणयन्तमपश्यत् - मूर्छितश्चाभूत् ।

—

यद्यपि राधाकृष्णेन मालत्या च विशालस्य जीवनाशा परित्यक्ता-सीत् तथापि:—

"अरक्षितं तिष्ठति दैवरक्षितम्
सुरक्षितं दैवहतं विनश्यति ।
जीवत्यनाथोऽपि वने विसर्जितः
कृते प्रयत्नेऽपि गृहे न जीवति ॥

इति वाक्यानुसारं तस्यायुरवशिष्ट मासीत् । केनचित - प्रतिवे-शिना प्रदत्तेन साधारणौषधेन शनैः २ विशालः स्वस्थो जातः । यथा यथा विशालो वृद्धि गतस्तथा तथोभयो र्मातुर्जनकस्य च तस्य शिक्षा-सम्बन्धि चिन्ता समुत्पन्ना । नवीनेऽस्मिन् - युगे सर्वोऽपि जनः स्वसन्तत्यै सर्वश्रेष्ठशिक्षाप्रदानस्य प्रयासान् कुरुते । इत्थं किल राधाकृष्णोऽपि स्वपुत्रमांग्लमाध्यमविद्यालये पठनाय प्रेषयामास । विद्यालयस्य व्ययोऽपि स्वल्पो नासीत् । राधाकृष्णस्य वेतनं यद्यपि व्ययानुसारं पर्याप्तं नासीत् । तथापि स्वपुत्राय आंग्लमाध्यमबिद्यालये शिक्षादानस्याधुनिक-जनप्रतियोगितामालोक्यासावपि पृष्ठे स्थातुं नैच्छत् । अन्यव्ययेषु न्यूनता कृताऽभूत् । भोजनव्ययोऽपि न्यूनी कृतः । यथा कथंचित् – द्वितीयकक्षामुत्तीर्य विशालो यदा तृतीयकक्षायां प्रबिष्टस्तु अध्ययने-ऽकस्मात् - असौ पृष्ठगामी अभवत । यदा राधाकृष्णो विद्यालय-मुख्याध्यापकस्य पार्श्वे कारणं ज्ञातुं गतस्तु तेनोक्तम् "यदेष विद्यालयोऽस्ति - आंग्लमाध्यमः । येषां गृहे आंग्लभाषामयं वातावरणं भवति तेषामेव वालकाः अत्र सुतरामुन्नति कुर्वन्ति । अतो भवतां वालकस्य कृतेऽतिरिक्ताध्यापनस्यावश्यकता वर्तते । अहमध्यापकस्य प्रबन्धं करिष्यामि योऽतिरिक्तकाले एनमध्यापयेत् । तच्छुल्कञ्च भविष्यति शतद्वयमासिकं, न्यूनातिन्यूनम् ।" विचारयिष्यामीति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उक्त्वा राधाकृष्णो गृहमागतः । तेन नगरस्य तादृशाः जना अप्यन्विष्टाः—येषां गृहे मातृभाषारूपेण आंग्लभाषायाः प्रयोगो भवति स्म । परन्तु तैरपि स्व स्व पुत्रपाठनायातिरिक्तकालीनाध्यापका नियुक्ताः आसन् । राधाकृष्णो विचारमग्नो जातः । यदि - सर्वेषामेव कृतेऽतिरिक्तकालीनाध्यापकानामावश्यकता वर्तते तदा विद्यालयानां काऽवश्यकता ? परन्तु एकलः राधाकृष्णः किं कर्तुं समर्थो भवेत् ? तेन गृहे स्व पत्न्या सह परामृष्टम् । मासिकव्ययस्य पूर्तये पत्नी - अपि एकस्मिन् - विद्यालयेऽल्पकालिकलघुबालकनिरीक्षणसेवाकार्यं महता काठिन्येन लब्धवती । तेन चातिरिक्तकालीनाध्यापकव्ययपूर्तिमकरोत् । राधाकृष्णः । यो हि विद्यालयेऽध्यापयति स्म असावेवातिरिक्तकालीनाध्यापनमप्यकरोत् । राधाकृष्णो नेदं सर्वं ज्ञातुं शक्तोऽभूत् । परमिदं भवति, न चास्य किमपि चिकित्सितम् । यतोहि परीक्षोत्तरणस्य दासोऽद्य देशो नतु विद्याप्राप्तेः । परीक्षोत्तरणे चाद्य धनस्य बहुतरप्रभावो दरीदृश्यते ।

— —

विशालो यथाकथञ्चित् - चतुर्थकक्षायां गतः । तस्य पितरौ धनावश्यकतया चूर्णीकृतावास्ताम् । तथापि पुत्राय शोभना शिक्षा प्रदत्ता स्यादेतदर्थमुभावपि - अहर्निशं कार्यकरणमारब्धवन्तौ

———

विशालस्य विद्यालयभवनं वर्षाकृतौ - अकस्मात् धराशायी जातम् । तत्र दुर्घटनायामनेके छात्राः आहताः । विशालस्तु तद्दिनेऽवकाशं गृहीत्वा गृह एवातिष्ठत् । इयमपि दैवी इच्छा आसीत् । नोचेदसावपि कांश्चनाघातान् प्राप्य चिकित्सालयस्य शरणापन्नोऽभविष्यत् राधाकृष्णस्य कृते च पुनरपि धनसंकटोत्पत्तिरभविष्यत् । परन्तु कदाचित्तु दैवोऽपि दक्षिणो भवति-एव तस्मात् तथा न जातम् ।

बालकानां धनिकपितृभिः— न्यायालयेऽभियोगो विहितः । परिणामतः- विद्यालयभवननिपातस्य कारणानां समन्वेषणं जातम् । प्रथमन्तु प्रकरणमेनं प्रति केनापि ध्यानमेव न दत्तम् परन्तु यदा समाजस्य प्रभावशालिजनैरत्र पौनः पुन्येन प्रयासाः कृतास्तदा केवलं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कारणमेकमेव स्पष्टमभूत् । वास्तुकारेण स्वीकृतधनस्य केवलं पञ्चविंशति प्रतिशतमेव व्ययितं भवननिर्माणेऽन्यत् सर्वं स्वायत्ती कृतम् । स्वसहभागिषु - उच्चाधिकारिषु वा वित्तीर्णं किञ्चिच्च स्वयमधिकृतम् । प्रकरणमिदमत्रैव पूर्णमभविष्यत् - परन्तु समाजे केचन तादृशाः अपि सन्ति लोका ये समाजं सुष्टु रूपेण दिदृक्षन्ते । स्युस्ते स्वल्पा एव । प्रयासान् - तु कुर्वन्ति । तैः पुनर्यदा प्रकरणमिदमुत्थापितम् - तदा लोकनिर्माणविभागस्य सचिवोऽप्यत्रांश . ग्रहीता आसीदिति स्पष्टमभूत् । वास्तुकारो लोकनिर्माणविभागस्य च सचिवः- उभावपि दण्डनीयावास्ताम् । अत्र नासीत् - कस्यापि विमतिः । चिरकालपर्यन्तं प्रकरणमिदं विभागे एव यत्र तत्र प्राचलत् । सम्बद्धप्रकरणस्य पत्राणि (File) कार्यालय एव स्थितान्यभुवन् । अन्ततः प्रकरणमिदं न्यायालये पुरस्कृतम् ।

— —

विशालस्य विद्यालयभवनमिदानीं पुनर्निर्मितं बभूव । परन्तु प्रकरणस्य न कोऽपि परिणामो दृष्टिपथमवतीर्णः कतिचित् वर्षाणि पश्चात् प्रकरणमिदं न्यायालये पुनः पुरस्कृतम् । तत्रापि वर्षत्रयपर्यन्तं तु प्रकरणं न्यायाधीशस्य समक्षमेव नायातम् । ततः पौनः पुन्येन यदा बालकानां तेषामभिभावकैः— येषां पुत्राः— घटनायामस्यां मृता एवासन् - प्रकरणस्यास्यान्वेषणं कृतंन्यायाधीशसमक्षं चेद गच्छेत्-एतदर्थं प्रयासाः कृताः । अधिकारिभिः विभागस्य मन्त्री साहाय्यकरणाय प्रार्थितः । परिणामतः एको विशालभोजः—समायोजितोऽभूत् । अत्र मन्त्रिसहित.- न्यायाधीशा अपि सम्मिमिलुः । रात्रौ सुरासुन्दरीस्वर्ण-स्योन्मुक्तरूपेण प्रयोगोऽभूत् । वर्षद्वयपर्यन्त - प्रकरणमिद न्यायाधीशस्य समक्ष द्वित्रिवारं समीक्षायै समायातम् - यतोहि सर्वे सुरासुन्दरी-स्वर्णप्रभावान्तर्गता आसन् अतो न किमपि शीघ्रं निर्णयरूपेण स्पष्टमभूत् ।

पूर्वसमन्वेषणानुसारं सम्यक्तया स्पष्टमिदमासीद्यद्भवनस्याधारोऽपि दृढो नासीत् किमुतभित्तिनिर्माणमथवाच्छादनफलकनिर्माणम् ? तथापि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri



न्यायाधीशेनान्ते स्वीयो, निर्णय उद्घोषितः। तेन निर्णये कथितं यत्-वर्षाधिक्येन भूमिरेवाधो गता तस्माद्भवनस्य निपातो जातोऽत्र वास्तु-कारस्य, सचिवस्य वा नाऽसीत् कोऽपि दोषः। एवं च लक्षशः रूप्यकाणां दुरुपयोगकर्तारोऽभियोगेऽपि जयमाप्नुवन्। मृतबालकानाञ्चाभिभावकाः रिक्तहस्ता एवातिष्ठन् — यतोहि—शासकीयाधिकारिणस्तु दूरभाषेणैव परस्परं तथा सम्मिलिता भवन्ति येन ते नित्यं नवीनषड्यन्त्राणां निर्माणे संलग्नास्तिष्ठन्ति। न च कोऽपि तेषां बालमपि वक्रं कर्तुमर्हति यतोहि समयस्य प्रवाहोऽयम्।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कणिका

अस्ति भारतस्य जगत्प्रसिद्धं कालिकाता नाम नगरम् - वंगप्रान्ते । प्राचीनतमनगरमति प्राचीनम् । नगरं किमिदानीं त्विदं महामहानगरं जातमस्ति । अत्रैव श्यामाप्रसादभट्टाचार्यनामा कश्चित्प्रख्यातो प्राड्विवाको न्यवात्सीत् । अयं न केवलं कालिकाता नगरस्यापितु भारतदेशस्य प्रसिद्धो वाक्कीलोऽभवत् अस्य कार्यालये ग्राहकाणां तु पंक्तयो भवन्ति- स्म । प्रशिक्षणार्थिनां नववाक्कीलानामपि – एको विशालसमूहः- आसीत् । राजप्रासादमिव तस्य भवनं सर्वाभिराधुनिकसज्जाभिः सुसज्जितं चन्दनसुगन्धिना सुगन्धितमतिष्ठत् । भवनस्य परितः पुष्पवाटिका लताप्रतानसन्तानवितानेनाच्छादिता विराजते स्म ।

तस्यैकः पुत्रः तस्य नाम - विभु भट्टाचार्योऽभूत् । सोऽपि प्राड्विवाकत्वमेवाकरोत् त्रिंशद्वर्षदेशीयो विभुस्तु - आर्याणामिवोन्नतप्रतनुनासिकायुतः, दीर्घलोचनः, गौराङ्गः, सुसंगठितदेहः, स्वस्थशरीरः, घनकेशः, प्रभावपूर्णव्यक्तित्वमधारयत् । तस्यैकमित्रं सुधांशुस्तमेकस्मिन् दिवसे वेश्यालयवीथिकायां नीतवान् । तत्रैको वेश्यालयोऽतीव प्रख्यात आसीत् । अत्र नगरस्य विख्याता श्रेष्ठिनः, उच्चाधिकारिणः, प्रशासनस्य मन्त्रिणस्तथाऽन्येऽनेके प्रतिष्ठिता जनाः अगच्छन् अस्य वेश्यालयस्य मुख्या शान्तिदेवी आसीत् । अस्याः पार्श्वेऽनेकाः सुन्दर्यो व्यापारसंचालनायासन् । परन्तु आसु एको हीरक आसीत् तदासीदनाघ्रातं पुष्पं, विकासोन्मुखा कलिका-यस्या उपरि कोऽपि भ्रमरो नाद्यावधिः गुंजनमपि चकार किमुतरसास्वादनम्- अदृष्टपूर्वं सौन्दर्यम्, सा चासीत् कणिका नाम नृत्यांगना । तत्रत्यभाषायां नर्तकीति कथयन्ति जनाः । सा किल मृगनयनी सन्ध्येव केशपाशैः उषेव मुखकान्त्या वह्निरिव नयनाभ्यां ज्वलतिस्म तस्या अनतिविस्तृतावुरोजौ निम्बुकमिव सुदृढौ–उदीयमानयौवनोन्मादं प्रकटयतः स्म । बिम्बफलाधरोष्ठी सा सुदती तीक्ष्णोन्नतनासा कस्यापि यूनः कृते कामबाणादप्यधिका घातकरी आसीत् ।

कणिकाया पितरौ संगीतनृत्यशास्त्रयोः प्रवीणावास्ताम् । परन्तु दैवदुर्विपाकात् - कणिका यदा पञ्चदशवर्षदेशीया आसीत् तदैव तस्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पितरावपि भस्मतां गतौ। कणिका दिवसे पाठशालायामासीत्। अत एव सा अग्निदाहात् रक्षिता बभूव। यथैव सा गृहमागता तत्र न केवलं स्वकीयमेव गृहं नष्टमवलोकितं तयापितु पूर्णा वीथिरेवाग्निसाज्जाता आसीत्। एतत् भीषण दृश्यं दृष्ट्वा वराकी कणिका विह्वला - भयोद्विग्ना, सिंहभयेनाजामिव भीता क्रन्दनमारब्धवती। परं तस्याः क्रन्दनं श्रोतुं साहाय्यञ्च कर्तुं तत्र न कोऽपि विद्यते स्म। अकस्मात् शान्तिदेवी तत्राजगाम। तं भीषणमग्निकाण्डं श्रुत्वा सा कणिकायाः पितृगृहदर्शनार्थमेवायाताऽसीत्। यतोहि तावस्या गुरू आस्ताम्। ताभ्यामनया नृत्यसंगतयोः शिक्षा कदाचित् - ग्रहीताऽसीत्। परन्तु तत्र तु सर्वमेव प्रणष्टमासीत्। भस्मपरिचयोऽपि नाभूदुभयोस्तयो आम्; तत्कुलभूषणं कणिका चैटर्जी तत्र रुदन्ती दृष्टिपथमवतीर्णा। शान्तिदेवी तां स्वगुरुसुतामिति कृत्वाऽथ च तत्सौन्दर्येण प्रभाविता व्यापार-दृष्ट्या तां स्वकीयमालयं नीतवती। दुर्भाग्याहता कणिका क्व गच्छेत्? तस्या कृते नासीत् क्वापि किमपि स्थानम्। सा विवशा तया साकं तद्गृहागमनमेवैकं शरणस्थलममन्यत। यतोहि सा किञ्चित्पूर्वपरिचिताऽप्यासीत्, सहैव च यदि केचन दुष्टपुरुषास्तत्रागमिष्यन् तु तस्या अपहरणमकरिष्यन्। सभ्येषु च कोऽपि तां पालयितुं स्वगृहं नेतुं च सन्नद्धो नाभविष्यत! सा एका स्त्री-अप्यासीत्। तस्मादपि कणिका तया साकं तद्गृहं गता।

कणिकातो ज्येष्ठा यद्यपि तत्रानेका बालिका आसन् तथापि तत्रत्यवातावरणे साऽतीव क्षुब्धा जाता। एकस्मिन् दिने यदा तस्यां विश्वासो वृद्धिं गतस्तदा शान्तिदेवी तामपि वेश्याव्यवहारकलां शिक्षयितुमैच्छत्। परन्तु कणिका सुसंस्कारेषु पालिताऽसीत् तस्मात्-सा सविनयं शान्तिदेवीमिदमाह-"भवती किल मम पितुः शिष्या तस्मात् मदीया ज्येष्ठा भगिनीव। इदानीन्तु त्वमेव माता च पिता त्वमेव मम। तथापि सानुनयं साग्रहञ्च भवतीमहं प्रार्थये यन्नास्मिन् - कर्मणि घोरे मां नियोजय। मया संगीतनृत्ये गतदशवर्षेषु शिक्षितेऽस्ति। ताभ्यामेव तवातिथीनां मनोरञ्जनं कर्तुमर्हा। न कश्चिदपि पुरुषो मां स्पृशेदपि। यदीयं मदीया प्रार्थना स्वीक्रियते तच्छोभनमन्यथाहं न जिजीविषामि।"

शान्तिदेवी अपि संस्कारवतीयं कन्या नृत्ये चातीव निपुणा तस्माद्विवशा न तामधिकं प्रेरयामास वेश्यावृत्तिकृते। परन्तु कणिकायाः नृत्येनैव तस्या

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्यापारो बहुगुणितो जातः । कणिका नृत्याभ्यासे संगीतशास्त्रस्य च बहुविध-पुस्तकाध्ययने ऽभ्यासे च निरन्तरं व्यस्ताऽभूत् ।

सुधांशुना सह विभुरपि शान्तिदेव्याः- आलये अन्यैः श्रेष्ठिवर्यैः विशिष्टा-धिकारिभिश्च सह उपविष्टोऽभून्महार्हासने । विभुर्न केवल वादकोऽ एवापितु संगीतस्य प्रशंसकोऽध्येता ज्ञातापि चासीत् । 'कालिकातायां प्रायेण संगीतस्य प्रभावोऽस्ति' प्रतिजनं प्रतिगेहं. एषा उक्तिरपि वर्तते । वेश्यालये विभुः नासीद्रुचिमान् । स केवलं कणिकायाः- नृत्यकलां दृष्टुमेवागत आसीत् । यतोहि :—

"अन्यद् भावाश्रयं नृत्यम्
भावाविष्करणं कला'

कलादर्शनात् - रसनिष्पत्तिः । रसानुभूतिरेव च तत्प्राप्तिः । यथोक्तं "रसो वै सः" । अनेन भावेनैव विभुः समाजनिन्दितेऽपि वेश्यालये गतः । नृत्यस्य विभिन्नाभूषणवस्त्रालंकृता कणिका यथैव सर्वेषां समक्षं नृत्यप्रदर्शनायोपस्थिता सर्वैरनुभूत यत्कापि विद्युन्मयी - अप्सरा स्वर्गादवतीर्णा भूलोके । विभुस्तु तस्या दर्शनमात्रेण रससिक्तोऽभूत् तया नृत्यद्वयी प्रदर्शिता । प्रथमं भरतनाट्यम् ततश्च कत्थकनृत्यम् । अष्टवादनात् रात्रौ दशवादनपर्यन्तं - दर्शकैर्नृत्यस्यानन्दो गृहीतः ! होराद्वयस्य समयः कथं किल पूर्तिं गत इति न केनापि ज्ञातम् । यतोहि तस्या नृत्ये प्राचीननवीनयोर्मिश्रणमुभयविधदर्शकानां कृते मोहकमभवत् । विशिष्टानां कृते शास्त्रीयतत्वानां सन्निवेशः साधारणानाञ्च प्रसादाय-सुगमतत्वानां संयोजनमित्यासीत्तस्या नृत्यवैशिष्ट्यम् । प्रथमं तया अवतरणं, प्रणतिः, करणमिति सम्यग् - दर्शितम् । ततश्च त्रिभंगी, - हंसास्य मुद्राप्रदर्शनमकारि । नेत्र - ओष्ठ - ग्रीवा - अंगुलि-हस्त-नासिका—भ्रूभंगमादिभिर्दर्शकानां मनोहरणञ्चकार कणिका । ताण्डवीया शैली. लास्यशैली चोभावपि तस्या नृत्ये तज्ज्ञैर्दृष्टे । शतादप्यधिकमुद्रासु तया काश्चन मनोहारिण्यो मुद्रा स्वनृत्ये प्रदर्शिता ।

दशवादनादप्यधिकः कालः सञ्जातः । निशान्धकारः परितो व्याप्त आसीत् । सर्वेऽपि प्रायः स्व स्वगृहं स्वमनोरञ्जनं कृत्वा निर्गताः । केचन तत्रैकान्तप्रकोष्ठेषु प्रविष्टाः । शान्तिदेव्याः समक्षं विभुना कणिकया सह वार्तालापप्रस्तावः संस्थापितः । सा विभुं जानाति स्म यदयं कालिका-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ताया: प्रख्यातप्राड्विवाकस्य प्रसिद्धो वाक्कीलपुत्रो वर्तते तथापि कणिकायाः स्वीकृतिं विना सा स्वीकृतिप्रदानेऽसमर्थासीत् । कणिकायाः प्रकोष्ठं प्रविश्य तस्या अनुमतिञ्च गृहीत्वा बहिरागत्य विभुं सुधांशुना सह आभ्यन्तरमनयत् । यथैव तौ कणिकाया प्रकोष्ठे प्रविष्टौ तथैव तत्रत्यसुगन्धिना सुवासितौ जातौ । कणिका स्वीयानि नृत्यवसनानि अवतार्य पीतशाटिकां परिधाय केशान् सम्यक् संसाध्य स्वागतं कृतवती उभयोरेव । उपवेष्टुमासने निर्दिशन्ती स्वयमपि ताभ्यां सहैवोपविष्टा । कणिका इदानीं सप्तविंशतिवर्षवयस्का सजाता । संगीते नृत्ये च तस्याः पूर्णाधिकार आसीत्तथापि सा आत्मानं नृत्यविद्यार्थिनं मनुते स्म । स्वभावेनातिनम्रा, शरीरेण कम्रा, व्यवहारे चातीवमधुराऽसीत् । यद्यपि संगीतनृत्ये तस्या सार्वकालिकसख्यावास्ताम् तथापि सा न जाने कथं विभुदर्शनमात्रेण परवशाऽभूत् । विभुस्तस्या नृत्यं प्राशंसत् । "भवत्या नृत्ये तु विचित्रा शक्तिः वयन्तु मन्त्रमुग्धा इव जाता स्तत्र भवत्या नृत्यदर्शनं कृत्वा ।" ... अहं तु वेश्यालयनर्तकी अस्मि । भवन्तस्तु सम्यक् जानन्ति यदेषामालयानामस्माकं समाजे किं स्थानम् ? दैवदुर्विपाकात्—सति सर्वव-स्तुषु - अपि निःस्वा जातास्मि । तेनैवात्र नरक—क्रोडे प्रक्षिप्तास्मि दैवहत-केन " "पङ्केऽपि कमलं विकसति, विष्टायामपि स्वर्णस्य मूल्यं स्वल्पं न भवति तथैव यदि दैववशाद्भवती - अत्रायाता तु तेन भवत्याः कलायाः- उत्कृष्टता तु - अल्पा न भवति भवत्याः भारतीयसंस्कृतेः- मूलस्य संरक्षणं क्रियते । यतोहि 'ता - थे ई' इति नृत्यवाक्यानि कमपि विशिष्टमर्थं प्रकाशयन्ति । त- अर्थात् -तनुः- इदं शरीरम्, थ-स्थले, भूम्यां वा ई- ईश्वरः । अर्थात् -भूम्यां नृत्यमीश्वराराधनमेव भवत्या तु - अनेकजन्मपापानि भस्म-सात् - कृतानि पुण्यानि च प्रतिदिनमर्ज्यन्ते ऽनेन नृत्येन । यथा शास्त्रविदो भणन्ति द्वारिकामाहात्म्ये-

"यो नृत्यति प्रहृष्टात्मा भावैरत्यन्तभक्तितः
स निर्दहति पापानि जन्मान्तरकृतानि च ।

अद्य प्रभृति नाहं केवलं भवत्कलायाः एवापितु भवत्या अपि पुजारी जातोऽस्मि । इति भावविह्वलो विभुर्वभाण । "भवतां संगीतशास्त्रे न केवलं रुचिरेवापितु तस्य ज्ञानमपि भवान् - धारयति । अतीवोपकृतास्मि तत्र भवताऽनया प्रशंसया । अहमलग्ना किमधिकं वक्तुमर्हास्मि केवलं कृतज्ञास्मि", इत्यवोचत् - कणिका ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्त्रीहृदयम्

निशाया एकादशवादनकालो जातः। विभुः स्वमित्रेण सुधांशुना सह स्वगृहं प्रतिगन्तुमाज्ञां ययाचे । शुभरात्रिः शुभरात्रिरिति - उभयतो गमनपूर्वकं विभुः स्वगृहमागतः। गृहमागत्य भुक्त्वा किञ्चित्, कणिकास्वप्नमयी मखिलां निशां तामनिद्रित एव निनाय । तत्र च कणिकापि - यस्याः समक्षं सुन्दरतमाः, गुणिनोऽपि, धनधान्यसमायुक्ता अनेके जना प्रतिदिनमायान्ति स्म तस्या च एकमपि दृष्टिपातं स्वसौभाग्यशिखरमनुभवन्ति स्म तेषु सर्वेषु गतेषु-एकादशवर्षेषु सा पद्मपत्रभिवाम्भसा इव जीवनमयापयत - तान्निशामनिद्रिता एव व्यत्यापयामास । न जाने पूर्वजन्मसंस्कारबन्धनमिव तत् प्रथममिलनमेव तौ एकसूत्रे कथं बबन्ध ।

विभुस्तत्पश्चात् प्रतिनिशायां कणिकाया कलापाशाकृष्टो मृगयुपाशबद्धमृगमिव जातस्तत्र गन्तुमारेभे, सापि यावत् - विभुमुखदर्शन नाकरोत् - तावत्तस्या नृत्ये मनः एव नालगत् । यस्यां निशायां विभुस्तत्र नागतो भवति तस्यां कणिकाया नृत्यमेव न भवति स्म ।

प्रथमदिवसे एवोभयोर्वार्तालापो विस्तरेण जात आसीत । तत्पश्चात् मेलनं तु प्रायोऽभवत् - परन्तु नैकट्येन वार्तालापो नाभूत् । केवलं मनसा एव संलापोऽभवत् एकस्यामपरनिशायां विभुना आलयाध्यक्षा कणिकया सह वार्तालापं कर्तुं प्रार्थिता तदनुज्ञा च लब्धा । कणिका तु स्व नृत्यवस्त्राण्यवतार्य स्व सुकोमलशय्यायां विश्रान्तुं पतिता स्वहृदयोपरि विभुचित्रं निधायाक्षिणि निमील्य परब्रह्ममिव किमपि चिन्तयति स्म । विभुः शनैः २ प्रकोष्ठं प्रविष्टः सन् समीपस्थासनोपरि उपविष्टः । कणिकाया हृदयपटलोपरि स्वीयं चित्रमवलोक्य भावविह्वलोऽभूत् - सोऽपि स्वीयलोचने हस्तधृतकर्गजेन; सहितास्यां हस्ताभ्यामाच्छादयन् - स्वप्रेमाश्रूणि मार्जयितुमारेभे ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुहम्मदखानः

अस्ति जगद्विख्याता देहली (दिल्ली) नाम नगरी। प्राचीनकालात्—अस्या नगर्याः:- विशिष्टमहत्वमस्ति । इदानीन्तु नगरीयं भारतस्य राजधानी । अत्र किलातिनिर्धनजनप्रभृति - कोट्यधीशानां निवासः। विश्वस्य सर्वजाति - सम्प्रदायजना अत्र निवसन्ति। अभ्रंलिहाः प्रासादाः । अनेकानि राजकीयभवनानि। अत्र खलु निशापि दिनायते। इयमेव सा नगरी 'यत्र विश्व भवति - एक नीडम् ।'

अस्या एव नगर्या एकस्मिन् - कोणे निवसति स्म मुहम्मदखानः। अनेन दृष्टमासीद्देशविभाजनम् । कथं तदानीं धर्मजातिसम्प्रदायादिभिः स्वीयं जघन्यनृत्यं कृतम् इति स सम्यक् सस्मार। प्रतिवेशिनो जन्म-जन्मान्तरशत्रवो जाताः । प्रतिवेशी प्रतिवेशिनो हिंसने न कणमात्रमपि संकोचं चकार। ह्यो ये भ्रातरः—आसन् तेऽद्य परस्परं रक्तपिपासवो जाताः ये हिन्दु - यवनाः परस्परं समुपविश्य सह भुञ्जन्ते स्म त एव मिथो युध्यमानाः दृष्टाः मुहम्मदखानस्तदानीं नेदं ज्ञातुं शक्तोऽभूत्-यत्कथमेते मानवाः हिंसकजीवेभ्योऽपि घोरतमाः सञ्जाताः । पशुभ्योऽपि हीनाः, निर्दयाः, निर्लज्जाश्च। कस्येयं भगिनी, माता, स्वसा, दुहिता पत्नी—अस्माकं गेहेऽपि तथास्तीति न केनापि विचारितम् । तत्रत्यधर्मधुरन्धरैः स्त्रियस्तासां वस्त्राण्युत्तार्य वीथिसु सामूहिकरूपेण च चलितुं आज्ञप्ताः । कासांचन तरुणीनां कुचा कर्तिताः, अपराः कांश्चन पुत्रान् - पाचयित्वा तेषां मांसभक्षणाय विवशी कृताः । पतीनां पुत्राणां, पूज्यसम्बन्धीनां समक्षमेव निर्लज्जैर्ललनानां शीलभंगो व्यधायि । जातीयः साम्प्रदायिकश्चोन्मादस्तु हालाहलादप्यधिकविषपूर्णः । तदा मनुष्यै मानवता त्यक्तासीत - ईश्वरः अल्लाह च विस्मृतो आस्ताम्।" एतत्सर्वं स्मारं स्मारं मुहम्मदः- कम्पितुमारभते स्म यदा देशविभाजनं जातं तदानीमयं दशवर्षदेशीय आसीत् केनापि व्यापारिककार्येण सम्बन्धिजनमिलनप्रसंगेन चास्य पिता पाकिस्तानं गतः-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आसीत् । अयमपि तेन साकं तत्र गतः । अकस्मात् - विभाजनं जातम् । मुहम्मदश्च तत्रैवावरुद्धः । परितो निषेधाज्ञा संलग्ना आसीत् । मुहम्मदस्य पिता पाकिस्ताने केनापि दुष्टहतकेन हतः । भारतीयोऽयं कश्चित् गुप्तचर इति व्याजमाश्रित्य । मुहम्मदस्य माता देहली नगर्यां न्यवात्सीत् । सापि पुत्रस्य पतेश्च न किमपि परिचयं चिराय ज्ञात्वा निराशा यथा कथंचिद् दिनानि व्यत्यापयत् । पञ्चवर्षानन्तरं यथाकथंचित् कस्यचन बन्धो प्रयासेन मुहम्मदो भारतमायातः । राजकीयाधिकारि नेतृसाहायेन स्वमातरममिलत् । सापि स्वपुत्रं प्राप्य कीदृगानन्दमनुभूतवतीयं वार्ता केवलं अनुभूतियोग्या न च व्याख्यातुं शक्यते । मुहम्मदस्य मातापि पतिवियोगमसहमानाः पञ्चवर्षाभ्यन्तर एव पञ्चत्वं गता ।

मुहम्मदेन यदा देशविभाजन - कालीनदृश्या अवलोकितास्तदा प्रभृतिरेवासौ जातिवादं धर्मान्धतां च निन्दितुमारेभे । इदानीं भारतभुवमेव स्व जन्मभूमिं मन्यमानः । सर्वानपि स्वजातिबन्धून - धर्मान्धताविषपानात् न्यवारयत् । मुहम्मदो दिवसे श्रमिककार्यं कुर्वाणः रात्रौ पपाठ एवं तेनोच्चशिक्षा प्राप्ता । प्रशासने शोभना भृतिर्लब्धा । कुलीनयवनपरिवारेण सह स्वीयः सम्बन्धः स्थापितः । परिणयं कृत्वा स्वपरिवारेण सह सानन्द न्यवात्सीत् ।

भारत पाकिस्तानयोर्विषये यदापि शिक्षितवर्गे विचारो प्राचलत्-स हि भारतं स्वीयं देशं मन्यमानः धर्मान्धयवनान् – शिक्षयामास 'इयमस्माकीना जन्मभूमिः' अस्या अन्नेनास्माकं देहोऽयं पुष्टस्तदाऽस्य रक्षा करणमथ चास्य सर्वविधोन्नतिकरणे सहयोगदानमेवास्माकं परमं कर्तव्यं यवनाः सन्तोऽपि वयं भारतीयाः यतोहि भारते बसामः । अत्रत्यवायु जलं अन्नञ्च खादामः अतः सर्वैरपि मुस्लिमैः सम्यक्तया भारतीयैर्भाव्यम् । हिन्दू मुस्लिमाः मिथो भ्रातारः सन्ति । तस्मात्-कथं काले २ साम्प्रदायिकराक्षस शिरमुन्नामयते । सर्वत्र च देशेऽशान्तिमसुरक्षाञ्चो पादयते ? एतेन केषामपि कोऽपि लाभो न भवति । केवलं देशद्रोहिणां शक्तिर्वर्धते । प्रजाश्च दुःखिता भवन्ति । तस्मात् - एभ्यः सर्वैः सावधानतया स्वकीया रक्षा कार्या एवं विधशुद्धबुद्धविचारैः पूर्वो मुहम्मदः स्वकीयजीवनस्य पंचाशतं बसन्तानवलोकयामास

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मानवमात्रस्य रक्तं रक्तवर्णमेव। सर्वेषां मानवानामंगानि समानि एव। सर्वधर्माणामादिपुरुषा एकमेव ईश्वरं स्वीकुर्वन्ति। तदा किमर्थमेष भेदभावो मानवेषु ? किमर्थं स्वल्पं स्वार्थं साधयितुं जनाः-मानवान्-कीटपतङ्गवत् - मर्दयन्ति ? तदा तु भृत्यः स्वामिनं स्वामी च भृत्यमपि न परिचिनोति प्रतिवेशी प्रतिवेशिनं न जानाति, मित्रं च मित्रमपि न गणयति। हा ? कीदृशोऽयममानवतायास्ताण्डवः, इति बहुबारं मुहम्मदो विचारयति विस्मरति चात्मानं तासु देशविघटनकालीनासु स्मृतिषु।

—

देहली (दिल्ली) विश्वविद्यालयस्य छात्रा राका एकस्मिन्-दिने स्व सखीभिः साकं यमुनापारं गता। सा एम. ए. कक्षाया अन्तिमवर्षपरीक्षां दत्वा गृहे एवासीत्। सख्यस्तस्या गृहमागत्य वनभ्रमणस्य कार्यक्रमं निर्ममुः। सर्वाभिर्भोजनमपि सहैव नीतम्। यदा यमुनातः किञ्चिद्दूरे एकस्मिन् एकलस्थाने प्राप्ता स्तदा तत्र स्वल्पं विश्रम्य ताभिर्भुक्तम्। तरुतलेषु विविधानालापान् कुर्वन्त्यो यदाता वार्तालापे मग्ना आसन् तन्मध्य एव राका ता विहाय नातिदूरं निर्मक्षिकस्थानं गता नगरस्य कोलाहलादुद्विग्ना स्वान्तः सुखमनुभवितुम्। तत्र तामेकलां दृष्ट्वा कश्चिन्नरव्याघ्रो धूम्रलोचनो दस्युरुत्थाय मुखं च तस्या सम्यङ् मुद्रयित्वा तामतिदूरं नेतुमियेष। सा वराकी महाप्रलयवाताहता कमलिनीव कम्पमाना रोदितुमपि न शशाक। मुखं तु तस्या मुद्रितमासीत् खलेन दस्युना। इत्थमपह्रियमाणा सा - इदानीं कं शरणं गच्छेदिति मनसि चिन्तयन्ती जगन्मातरं भवानीं सस्मार। दैवी विचित्रा गतिरितिउक्त्यनुसारं तदैव कश्चिच्चमत्कारो जातः। लोका - कथयन्ति कलियुगे देवास्तु कलाहीनाः। परन्तु राकायै तु मात्रा तत्क्षणमेव रक्षको प्रहितः।

तं कालयवनं कन्यकापहारकं मार्गे एकोऽपरो यवनो दृढं धृतवान्। 'कोऽसि त्वम् ? ' अहमस्मि भूरिसिंहो दस्युः। नं जानासि किमर्थमत्रागतोऽसि किमर्थञ्च स्वीय कालमाहूवयसि। स्वीयं कार्यं कुरु स्व परिवारमवलोकय। यदि न श्रोष्यसि मद्वाक्यं तदा त्वामधुनैवयमसदनमासादयिष्यामि।" एवं चेत्किमर्थं त्वं कन्यकामेनामपहरसि। किमु-एकलेयमिति कृत्वा। तिष्ठ, धूर्त ! तिष्ठ, पश्यतु लोकः कः कं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यमसदनं प्रेषयति । अहमपि मुहम्मदखानोऽस्मि इत्यादियमपरिचिता तथापि भारतभूबाला । मदीया सुतेव । इति उक्त्वा मुहम्मदस्तं जंघातो निगृह्य नीचैः पातयामास तस्मादेव भूरिसिंहाच्च तस्य छुरिकां गृहीत्वा घातयामास तं येनासौ दस्युराट् भूमौ पपात । मुहम्मदस्तु क्षणाय स्तब्ध इव, आश्चर्यचकित इव नेत्रे विस्फार्य तं दस्युं चिरायापश्यत् । पश्चाच्च तामपरिचितां बालामुत्थाप्य, धैर्यं तस्यै दत्वा तस्या सखीनां समीपे तां सादरं सस्नेहञ्च प्रापयामास ।

राका लज्जाविनम्राऽतीवक्रमा मुहम्मदस्य चरणौ सादरं स्पृष्ट्वा तस्या दस्युहतकात् रक्षाकरणाय परमां कृतज्ञतां ज्ञापयामास । मुहम्मदस्तां तत्र सखीनां पार्श्वे समर्प्य निर्दिष्टवान्—"न कदापीत्थं त्वया निर्जनवनेषु भ्रमणं कार्यम् । इदानीं ऋषिमुनिसिद्धतपस्विजनसेवितानि भारतवनखण्डानि न तानि पूर्वकालीनाश्रमाणि यत्र किल हिंसकजीवा अपि हिंसाभावं परित्यज्य तेषां महापुरुषाणा चरणेषु लुठन्ति स्म । करालोऽयं कलिकालः अद्य ग्रामे ग्रामे, नगरे नगरे प्रान्ते प्रान्ते, सर्वत्र देशे विदेशेषु च हिंसायास्ताण्डवं दृश्यते । अद्यतनः स्वार्थी मानवस्तु पशुभ्योऽप्यधिकं पतितः" अस्तु बाले ? किमप्यधिकमेव मया भाषितं परन्तु पुत्रीस्नेहो मां तथा कथयितुमप्रेरयत् अल्लाहा शुभं कुर्यात् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पाशदण्ड:

लवपुरम् (लाहौर) कियदाकर्षणमस्ति शब्देऽस्मिन् ? कथञ्च न स्यात्तथेदम् । मर्यादापुरुषोत्तमस्य श्रीरामस्य पुत्रनाम्ना सम्बद्धमिदं पुरम् लवपुरम् । लवपुरम् शनैः २ विद्याकेन्द्र जातमासीत् । सहैव व्यापारस्यापि प्रभूता वृद्धिस्तत्र जाता । परन्तु विद्या-दृष्ट्या तु नगरमिदं परां कोटिमाप्तवान् आंग्लानां कूटनीतिप्रचारप्रसारकालोऽयमासीत्-देशेऽस्मदीये । एकतस्तु ते विद्याप्रचारं, निर्धनानां सेवां असमर्थानां विद्यावतां च सम्मानं कुर्वन्ति स्म । अन्यतस्तु विद्याप्रचार तादृशं येन भारतस्य नाम एव प्रणश्येत्, निर्धनसेवाव्याजेन गृहकलहोत्पादनम् चिकित्सामाध्यमेन स्वधर्मस्य प्रचारं विद्यावतां सम्मानश्च तान् स्वपक्षे करणाय एव स्वार्थवशीनाचरन्ति स्म । सर्वस्यापि लक्ष्यमासीत्-भारतीय-संस्कृतिपरिवर्तनम् ।

सुधीरः सर्वमिदं गूढतयाऽजानत् । असौ लवपुरस्य सनातनधर्म संस्कृतमहाविद्यालये शिक्षां गृह्णाति स्म । शास्त्री परीक्षामुत्तीर्य आचार्यकक्षायां प्रवेशस्तेन गृहीतः परन्तु तदैव महात्मना देशस्य स्वातन्त्र्यकृते युवकानां योगदानस्याभ्यर्थना कृतासीत् । सुधीरस्तया-तीवप्रभावितः सन् · महाविद्यालयपरित्यागाय निश्चयमकरोत् । सुधीरः सम्पन्नगृहस्य बालक आसीत् तत्पिता लवपुरस्य प्रख्यातो विद्वानासीत् । तेन गृहे स्वकीय मन्तव्यं प्रकाशितम् । स्वपित्रोः भ्रातॄणां च समक्षं तेन सर्वं निवेदितम् । पिता माता चोभौ प्रार्थितौ यत् भव-तामन्ये पुत्राः सन्ति ये - भवदीयं मनोगतं सर्वं पूरयिष्यन्ति यतोहि देशः पारतन्त्र्यशृंखलासु दृढं सुबद्धोऽस्ति । तन्मुक्तये महात्मना सर्वेऽपि भारतीयाः स्वयोगदानाय निवेदिताः सन्ति भवद्भिरयं स्वीयः पुत्रो देशकार्यायार्पणीयः । अतो दुःखं न कार्यम् ।

मात्रा, पित्रा भ्रातृभिश्च बहुरुद्बोधितोऽपि सुधीरः स्वनिश्चयं न तत्याज । असौ महाविद्यालयं परित्यज्य मातृभूमिदासो जातः । तेन

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सहैव तन्महाविद्यालयीया अन्येऽपि विद्यार्थिनः- कामिनी शास्त्री, रघुराजश्चापि तेन साकं गन्तुं सन्नद्धौ जातौ । कामिन्या साकं सुधीरस्य सम्बन्धोऽपि जात आसीत् । एवमेषा मित्रत्रयी संकटापन्नेऽस्मिन् - कर्मणि संलग्नाऽभूत ।

—

मध्यभारतस्यैकस्मिन् - गहने वने गुहायामेकस्यामेषा त्रयी बहूनां दिनानां पदातियात्रानन्तरं प्राप्ता तत्र एभिः किं किं केन कार्यमिति निश्चितम् । प्रथमम माभिः- भारतस्य ग्रामवासिषु जागृतिरानेया इति निश्चित्य तैः मध्यभारततः स्वीया ग्रामयात्रा प्रारब्धा । यात्राप्रसंगतः कानिचन नगराण्यपि मध्ये मध्ये आगच्छन्ति स्म । तत्रापि तैः–नागरिकाणां, तत्रत्यसंस्थानां कांग्रेसजनानाञ्च विचाराः, श्रूयन्ते स्म स्वतन्त्रतायाः सन्देशश्च प्रतिग्रामं प्रतिजनं यथाशक्त्या प्रसार्यते स्म ।

—

आंग्लानां गुप्तचरा अपि तेषां पृष्ठे संलग्ना आसन् सुधीरो हिंसायाः- विरोधं करोति स्म असौ लोकानां विचारपरिवर्तने विश्वसति स्म तस्यायं विचार आसीत् - यत् - लोकाः- भारतस्य गौरवं जानीयुः । तद्गौरवानुसारञ्च ते वर्तेयुः कामिन्या अपरमत्र संशोधनमासीद्यत् - वर्षाणां बहूनि दशकानि - अनेन प्रकारेण भारतजनजागरणे लगिष्यन्ति । अस्माकं स्वप्नश्च यावत् पूर्तिमेष्यति तावत् आंग्लानां तादृशी संस्कृतिपरिवतनयोजना देशं निर्जीवमांग्लप्रायं करिष्यति यतोहि तेषां हस्ते राज्यशक्तिरस्ति यत्कार्यं कर्तुं वयं वर्षैनैकेन समर्था भवामस्तं ते एकेनैव दिनेन कर्तुमर्हन्ति । रघुराजोऽपि स्वविचारान् - प्राकटयत ।" देशेऽधुना अहिंसाहिंसयोरुभयोरेव विचाराः — देशभक्तेषु सन्ति । केचनाहिंसया स्वराज्यं प्राप्तुमिच्छन्ति अपरे च हिंसया अत्र विचार परिवर्तनेन प्रत्येकभारतीयो विचारेण यदा स्वतन्त्रो भविष्यति तदा तु कोऽपि कीदृशोऽपि विदेशीशासकः स्यादसौ स्वयमेव पलायनं करिष्यति । परन्तु शताब्दानां प्रयासेनापि इदं सम्भवं नास्ति ।" सुधीरोऽव्यत्र निरुत्तरोऽभूत् । कामिनी रघुराजाभ्यामसौ दिशा निर्देशं कर्तुं पुनरपि प्रेरितः । तदा सुधीरो विचार्य आह — ' विचारपरिवर्तनस्य मदीयो विचारस्तदोदितो यदा मया चिन्तितं यत् अहिंसायामपि दोषाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सन्ति। हिंसा तु दोषपूर्णा अस्त्येव। अहिंसायामयं दोषोऽस्ति यदस्य व्रतस्य परिपालनमंगुल्यग्रगण्या एव कर्तुं पारयन्ति। नाम मात्र तु सर्वेऽहिंसावादिनो भवितुमर्हन्ति परन्तु वास्तविकरूपेण नास्य परिपालनं सर्वः कर्तुमर्हति। हिंसा तु दोषपूर्णा एव नात्र सन्देहः। अत एव मया चिन्तनपरिवर्तनस्य विचारो विहितः। परन्तु स शिक्षाधिष्ठितः। अतोऽहिंसाहिंसयोर्मध्य एवास्माभिरेको ग्राह्यः।" अहिंसापूर्वकं स्वतन्त्रताप्राप्तये प्रयासकरणमेव शोभनमिति सर्वैः स एव पन्था निर्धारितो यस्य पालनं तैर्बहुकालात् – क्रियते स्म।

—

एवं किल स्वोद्देश्यपूर्तये तेररण्येषु नदीषु, पर्वतेषु गुहासु, बुभुक्षितैः, पिपासुभिः, कदाचिच्चरुग्णैः स्वकीयानि तानि कठिनदिनानि यापितानि। आंग्लानामत्याचारेषु वृद्धिरेव जायमाना आसीत्। कामिन्याः सुधीरस्य चोभयोरपि एकः स्वप्नः आसीत्। एष एव स्वप्नःअसंख्यानां देशसेवकसेविकानामपि–अभवत्। स्वप्नश्चायमासीदुभयोर्यत् यदा देशः स्वतन्त्रो भविष्यति तदा एव वयं परिणेष्यावः। यतोहि खीष्टाब्दस्य विंशतिशतकस्य पञ्चत्रिंशद्वर्षाणि व्यतीतान्यासन्।

एकस्मिन् दिवसे पश्चाम्बुप्रदेशस्यैकस्मिन् ग्रामे एषा त्रयी ग्रामवासिनो जनान् सम्बोध्य समीपस्थोपनगरं गच्छति स्म। मार्गे केनापि दुर्दान्तहतकेन गुलिकाप्रहारो विहितः रघुराजो राम ! राम ! इति ब्रुवन् - धराशायी जातः। महाप्रयाणकाले स सुधीरमाह "सुधीर ? त्वया कामिनीयं परिणेया। दुष्टाः सन्ति धूर्ताः आंग्लाः। एतेऽहिंसाया उपहासं कुर्वन्ति।" न दृष्टस्त्वयाऽयं घोर उपहासो कथमहं निःशस्त्रो भूमौ छलेन पातितः। क्वचिदुभयोर्युवयोरिच्छाऽपूर्णा एव न तिष्ठेत्। तस्माच्छीघ्रं परिणेतव्यम्" एते देशद्रोहिणश्च यत्र कुत्रापि प्राप्ताः स्युः हिंसनीयाः। "इति वदन्नेवरघुराजो प्राणान् तत्याज। कामिनी दृश्यमिदमवलोक्योच्चैः- रुरोद। सुधीरस्तत्क्षणमेव कामिनीं सान्त्वयन्नाह: "नायं कालो रुदनस्य। ममाप्यसौ किमपि अभवत् मामकीनमपरहृदयमिव प्रियमित्रम्। परन्तु-अस्माकमग्रे एतादृक् - लक्ष्यमस्ति यत्प्राप्तये न केवलं प्रियजना एव त्यागयज्ञे ऽस्मिन् - आहुतिरूपेण त्याज्या अपि तु स्वीयस्यास्य क्षणभंगुरदेहस्यापि तत्र हवनं चेद् भवेत्तु न भेतव्यम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अतः- आगच्छ स्वमित्रस्य शवदाहायोजनं कुर्मः ।" एवं विचारलग्ने तद्युगले मार्गस्य एकभागोपरि वृक्षेभ्यः केचन भुशुण्डिधारिणो गौरांग-सैनिकास्तत्रोपस्थिताः। सुधीरं कामिनीञ्चैकतो निःक्षिप्य शवं घर्षयन्तं वलपूर्वकं कमप्यज्ञातस्थानं याने समारूह्य नीतवन्तः। सुधीरः कामिनी च चित्रलिखिताविव असमर्थौ; असहायौ कथञ्चिदात्मानौ सम्भाल-यन्तौ-एकस्मिन् कन्दरायुतस्थाने प्रच्छन्नौ जातौ।

गौरांगसैनिकाः- शवमाच्छिद्य यदा गता आसन् तदैव तैः कथितमा-सीद्यत् - "तिष्ठतु तावदयं युगलः। पश्चात् - अस्य चिकित्सां करि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ष्यामः ।" सुधीरः कामिनी चोभौ जातायां निशायां दिनचतुष्टययावद्बुभुक्षितौ तस्यामेव कन्दरायां कालमतिवाहितवन्तौ । यथैव प्रातःकालो जातस्तथैव धूर्ता आंग्लसैनिकाः तं स्थानं मण्डलाकारेण समन्वेष्टुमारेभिरे । अन्वेषणं कुर्वन्तो दर्यां प्रविष्टाः । अन्वेषकदीपकेन च प्रच्छन्नौ कामिनीसुधीरौ निगड़यित्वा सैनिकशिविरं प्रापयामासुः । सैनिकशिविरे सुधीरस्य मारयित्वा या गति सैनिकैः कृता तां द्रष्टुमपि साधारणो जनो न शक्नोति । कामिनीं च कशाभिर्यथेच्छं ताड़यित्वा मूर्छितावस्थायां शिविराद्बहि प्रक्षेपयामासुः ।

तद्दिनात् सा उन्मत्ता जाता । सुधीरोऽपरस्मिन् दिने न्यायाधीशस्याग्रे नीतोऽभूत् । न्यायाधीशस्तं मृत्युदण्डेन दण्डयामास । बधिकस्थानं नीतः । गोरांगैः कथितम् "सुधीर या कापि तवेहा तां कथय मरणात्पूर्वं तत्पूर्तिं करिष्यामः ।" सुधीरेण धीरगभीरस्वरेणोक्तम् :—इतोऽधिका न कापि मम इच्छा यदहमद्य देशस्वतन्त्रतायै स्वीयामाहुतिमर्पयामि । यतोहिः— "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।" मह्यं पाशदण्डं दत्वा न्यायाधीशेन भारतस्य स्वतन्त्रताया उपकार एव कृतः । यतोहि मदीयं मृत्युदण्डं दृष्ट्वा ऽनेके देशभक्ताः— युवकाः स्वप्राणानामाहुतिप्रदानं करिष्यन्ति देशस्य स्वतन्त्रतायै । 'जयतु भारतं जयतु भारती' अनेन जयकारेण साकमेवासौ पाशरज्जौ बद्धः सन् तत्कालं महाप्रयाणञ्चकार ।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुधा

भारतस्योत्तरस्यां दिशि रूपगढनामकग्रामः सौन्दर्याय प्रसिद्धः—आसीदिति भणन्तिस्म ग्रामवृद्धाः। अत्रत्या महिलाः परमसुन्दराः भवन्ति स्म तस्मादेवास्य ग्रामस्य नामकरणं रूपगढमिति जातमासीत्। इयं किंवदन्ती स्यादथवा सत्यं परन्तु सुधा नूनमेवाति सुन्दरी आसीत्। केयं सुधा? इयं सुधा ऽऽसीदस्य ग्रामस्य मातृपितृविहीना कन्या। ग्रामोऽयं निर्धनताप्रपीडितोऽभूत्। सुधाया जन्मकाल एवास्या माता लोकमिमं जहौ। वृद्धावस्थायाः सन्तानमासीत्तदपि-एकमात्रम् पुत्रोऽपि न जातः। पत्नी-अपि गता। वराकः सुधाया पिताऽपि वर्षानन्तरं प्राणान्-तत्याज। ग्रामवासिभिः सर्वैः सम्मिल्य यथाकथञ्चित्-वृद्धस्य औध्वंदैहिकसंस्कारो विहितः। कन्यां कः पालयेदित्यासीत्-गंभीरप्रश्नः। सर्वे विचार्य निर्णीतं यदस्याः परिपालनं सर्वे मिलित्वा करिष्यन्ति। यतोहि एकलः कश्चिदपि तादृशः सम्पन्नो नासीत् योऽस्याः पालनं कर्तुमर्हो भवेदिति। ग्रामेऽस्मिन् सप्तपरिबारा आसन्। प्रतिदिनमेकस्य परिवारस्योपरि परिपालनभारः समर्पितोऽभूत्। इत्थं पोषणं लभमाना सुधा शनैः २ षोडशवर्षदेशीया जाता। यौवनं तस्या देहमालिलिङ्ग कृष्णवर्णापि सा तीक्ष्णनासा कृशापि दृढशरीरबन्धा, घनदीर्घतमकृष्णकेशयुता कामपि दर्शनीयशोभामाप्तवती। प्रतनुहस्तपादयुता सा सप्तगृहाणां कन्या जाता।

सर्वेऽपि तां स्निह्यन्ति स्म। तथापि सुधा शनैः शनैः वयसा वर्धमाना स्वीयां स्थितिमपि सम्यग् ज्ञातुमर्हा जाता मम पालने लालने च सर्वेणापि ग्रामेणानेन कियत्कष्टमाप्तं स्यात्। यतोहि निर्धनतापीडिताः सर्वेऽपि स्वसन्ततिपालनमपि काठिन्येनाकुर्वन्। न जाने कानि कानि कष्टानि सोढ्वा ऽहं षोडषी कृता एभिः। एतत्सर्वं साधु ज्ञात्वा सा सर्वेषां सम्मानं सेवाञ्चाकरोत। कठिनादपि कठिनं, कठोरादपि कठोरं कृषिकार्यं सा प्रसन्नता पूर्वकं करोति स्म। पशुचारणं गोदोहनं,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

महिषीपरिपालनं मेष-अजादीनां कृते वृक्षेभ्यः पत्रानयनं, गोष्ठमार्जनं क्षालनञ्च सर्वमपि कार्यं सा सुखेन चकार परन्तु सर्वेषां ग्रामवासिनां तोषाय सा सर्वेषां पशून् सायं सप्तवादनं यावत् पञ्चवादनप्रभृति प्रातश्च सप्तवादनात् नववादनं यावत् चारयामास । तेन कर्मणा सर्वेषां समानसेवा भवति स्म । दिवसे तु सा विद्यालये शिक्षा-ग्रहणायागच्छत् । एवं किल तस्या बाल्यं निरन्तरं कर्मबद्धमासीत् । इदानीं यदा सा षोडषी सम्वृत्ता तु ग्राम्याणां चिन्ता तस्या विवाहविषये जाता । समीपस्थ एवान्यग्रामे एको युवकः- विंशतिवर्षीयः- मधुकर नामा तस्मादेव ग्रामविद्यालयात् दशमकक्षां वर्षद्वयपूर्वमेव उत्तीर्य नगरे महाविद्यालयं गतोऽभूत् । तस्य चर्चा सर्वत्र भवति स्म । यतोहि सोऽपि एकल एव पुत्रः- आसीत् । तस्यापि पितरौ बाल्य एवावसितौ ग्रामवासिभिः पालितोऽसौ पूर्वजन्मसंस्कारवशात् - दशमकक्षापर्यन्तं शिक्षामवाप्यापि तुष्टो नासीत् । ग्रामे यत्तस्य भूखण्डमासीत तद्विक्रय कृत्वा ऽसौ नगरे महाविद्यालये स्वीयमध्ययनमकरोत । शास्त्रीपरीक्षा-मुत्तीर्यापि गृहमागतोऽपि - इदानीं स्वभूखण्डादपि वञ्चितोऽभूत् । दैनिकश्रमिककार्यं कुर्वाणो यथाकथञ्चित् स्वदिनानि यापयति स्म । भूति - प्राप्तये कृतबहुप्रयासोऽपि न क्वापि तल्लब्धवान् ।"

रूपगढ़वासिना एकेन वृद्धेनासौ सुधाया कृते शोभनोऽयं वर इति विचार्य अन्यग्रामवासिभिः सह एतद्विषये विचारो विहितः । सर्वे एकमता आसन् । मधुकरस्याग्रे प्रस्तावोऽयं तेन ग्रामवृद्धेन गत्वा तद्गेहमुपस्थापितः । "अहं न कामपि भृतिमेव करोमि श्रमिककार्येण काठिन्येनोदरपूर्तिर्भवति अस्यां परिस्थितौ कथमपरं जनमपि कष्टेऽस्मिन् पातयामि ? इत्युवाच मधुकरो ग्रामवृद्धस्य प्रस्तावं श्रुत्वा । "सुधाया वर्तते एकं भूखण्डमपि । त्वं तत्रैव तया सह निवसिष्यसि । भूमिर्मातास्ति सा युवयोः पालन सम्यक्करिष्यति । अतस्तस्य चिन्ता न कार्या । केवलं मम प्रस्तावः स्वीकरणीयो भवता अस्माकं ग्रामवासिनो जनाः युवयोर्विवाहस्य यत्किमपि साधारण व्ययो भविष्यति तत्करिष्यन्ति । कापि तद्विषयका चिन्ता न कार्या सुधा साधारणबाला नास्ति । सा तव जीवनमपि सुधापूरितं करिष्यति", वृद्ध एकेनैव श्वासेन सर्वमकथयत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिणामस्वरूपमुभयोः सुधामधुकरयोः - ग्रामस्य मन्दिरे वैदिकविधिना विवाहो जातः। मधुकरस्यायोऽतिसीमित आसीत्। सुधाया कृते वस्त्रयुगलमपि ग्रामवासिभिरेव सर्वैः सम्मिल्य दत्तः। एवं किल सुधाया पितृगृहे एव उभावपि यथाकथमपि— अनयोः जीवनयात्राऽग्रिमा गृहस्थाश्रमस्य प्रचलमानाऽभूत। ग्रामवासिभिरेव मासद्वयस्य खाद्यसामग्री - अपि सुधाया गृहे संस्थापिता। मधुकरोऽपि तद्ग्रामवासिनां सौजन्यं सौहार्दं च प्रतिदिनं सस्मार। "मद्ग्रामवासिनोऽपि सन्ति यैरहं भूखण्डादपि वञ्चितः। मदीयगृहेऽपि मद्ग्रामधनिकेनाधिकारो विहितः। कीदृशाः भवन्ति लोकाः? क्वचित् - देवतुल्या क्वचिच्च राक्षसेभ्योऽपि भयंकराः" मधुकरोऽवदत्। सुधया तद्विचारैः साकं सहमतिः प्रकटिता कथितञ्च, "प्राणेश्वर? भवान् क्वापि नगरं गत्वा कामपि निश्चित - आजीविकादायिनीं सेवामन्विष्यतु।" त्वां कस्य पार्श्वे समर्पयेयम्। मम मनस्त्वामेकलां त्यक्तुं नानुमनुते' मधुकरेणोक्तम्। नैव न कापि चिन्ता कार्या। भवद्भिर्दृष्टमेव कथमेतेऽस्मद् ग्रामजना सर्वदाऽस्माकं साहाय्यं कुर्वन्ति। एतेषां पार्श्वेऽहं सर्वथा कुशला अस्मि। यतोहि जीवनममूल्यमस्ति। एतस्य सदुपयोगो मानवेन विधेयः। यदि भवद्भिः क्वचित् सेवा लभ्यते तदा आवयोः गृहस्थसंचालनं सुखेन स्यात्। स्वीयं वस्त्रभोजनादिकम्, सन्ततेः परिपालन अभ्यागतसेवा परोपकारश्चेदं तदा सर्वं सेत्स्यति। एवं सुधया प्रेरितो मधुकरः सेवादानकार्यालये गतः, कथञ्चित - अन्तर्व्यूहकृते कार्यालयात्-किमपि - उत्कोचं दत्वा पत्रं प्राप्तम्। अध्यापकानां पदेभ्यः साक्षात्कारोऽयमासीत्। परन्तु - तत्र तु पूर्वमेव नामानि निर्धारितान्यासन्। केचन मन्त्रिणो जना आसन्। अपरे विधानसभासदस्यानाम्। इतरे तत्रत्याधिकारिणां समर्थनवन्तः। एवं बहुबारं जातम्। मधुकरो वराको न क्वापि राजकीयसेवामाप्तुं समर्थोऽभूत् अन्ते स्वग्रामं निर्वृत्तः। गृहमागत्य खिन्नो भूत्वा आह-सुधेऽहं पराजितः सन् - प्रतिनिवृत्तोऽस्मि। यतोहि देशे उत्कोचस्य मन्त्रि विधानसभासदस्य - अधिकारिणाञ्चान्यायः सर्वत्र सम्यक् प्रचलति। निः सहायान् - न कोऽपि पृच्छति। गणतन्त्र यद्यपि लोककल्याणकरमिति व्याख्यातमस्ति गणतन्त्रस्य व्याख्यातृभिः। परन्तु – अत्र बलवन्तः, धनवन्तः, एव अग्रिणः सन्ति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्धनान्, असहायान्, आवश्यकतापरान् न कोऽपि पृच्छति ।" चेदेवं तर्हि व्यर्थं समयो नातिवाहितव्यः इदं भूखण्डं वर्तते । अस्यैव सेवा सम्यक् कार्या । द्वौ गावौ रक्षणीयौ । दुग्धमपि भविष्यति गोमयमपि च कृषिकृते प्राप्स्यते एवं सुधया पुनरपि उत्साहितो मधुकरः- ग्रामवासिभ्यो गावौ ऋणरूपेण गृहीत्वा कृषिकर्मणि व्यापृतोऽभूत् ।

सम्यक् सेवितायां भूमौ तयोर्निर्वाहयोग्यधनं प्राप्तुमारब्धम् ? कालानुसारं सुधा गर्भिणी बभूव । यदा प्रसवकालो निकटमायातस्तदा मधुकरेण स्वीया पत्नी राजकीयचिकित्सालये समीपस्थोपनगरस्थिते नीता । प्रातः कालात्सायं कालो जायमानः आसीत् । परन्तु - न कोऽपि चिकित्सकः सुधामलोकयत् - न च तां चिकित्सालय एव प्रवेशं ददौ। मधुकरस्य बहुतरानुनयविनयाभ्यां कश्चिच्चिकित्सकः जाते सायं काले सुधां चिकित्सालये प्रवेशानुज्ञामदात् सा वराकी प्रसवकालीन-पीड़ाभिश्चीत्कुर्वाणा प्रसूतिगृहं नीताऽभूत् रात्रिर्जाता । शीतकालस्य निशा । मधुकरस्तु कम्बलेनात्मानमाच्छाद्य चिकित्सालयस्य बहिरेव स्थितोऽभूत् , स सुधायाश्चीत्काराणि अश्रृणोत् परन्तु कथमपि तत्र प्रवेष्टुमशक्तोऽभूत् । यतोहि नरस्य प्रवेशस्तत्र वर्जितः- आसीत् . चिकित्सकाः स्वीये स्वीये गृहे सानन्दं सुप्ता आसन् । एका चिकित्सिका काश्चन च परिचारिका स्वीये आरामगृहे एव सुप्ता बभूवुः । परन्तु न कोऽपि तां वराकीं शीतेन कम्पमानां पीड़ाभिश्च चीत्कुर्वन्तीं सम्भालयितुं तत्र गतः । मधुकरस्तु चिन्तयन्नासीत् - यदत्र चिकित्सिका तस्या सम्यक्चिकित्सामकरिष्यन् सोऽप्यीदानीं निद्रापरवशः उपविशन्नेव वाह्यभवनस्य भित्तिसाहाये आत्मानं निवेश्य निद्रयाऽभिभूतः सुष्वाप

यदा चिकित्सिकाया निद्रा पूर्णा जाता प्रातः कालस्य चतुर्वादन-समयोऽभूत् ? सा कतिपयपरिचारिकाभिः साकं प्रसूतिकक्ष प्राप्ता . तत्र तु भयंकरदृश्यः- आसीत् । बालकस्तु मातुः पादयोः पतितः शीतेन तथा जड़ीभूतोऽभूत - यथा न तां निद्रां जहौ सुधापि पीड़ाभिः- श्रमेण चातितरां श्रान्ता मूर्छामाप । एतत्सर्वं दृष्ट्वा चिकित्सिकया परिचारिकाभिश्च प्रचारितं यन्मृतबालस्य जन्म अभूत् । सुधां कथमपि सूर्योदयपर्यन्तमपगतमूर्छामकुर्वन् । मधुकरस्तु शुभसमाचारश्रवणाय द्वारमुपस्थितः — एकया परिचारिकया तथा प्रताडितो येनासौ सर्वमपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनसि चिन्तितमानन्दं क्षणादेव जहौ। "न जाने कुतः ग्रामेभ्य एते मूर्खाः समायान्ति। न शोभनं भोजनं यच्छन्ति स्वस्त्रीभ्यो न च तासां कृते किमपि शक्तिवर्धकमौषधमेव। गृहाण स्वीयं मृतपुत्रम्। शीघ्रञ्च चिकित्सालयस्थानं रिक्तं कुरु नयेमां स्वीयां पत्नीम्। अपरेऽपि रोगिणः समायान्ति तेभ्यः स्थानमपेक्ष्यते" मधुकरो वराकः किं कुर्यात। हस्तौ संहतौ कृत्वा ऽ प्रार्थयत्– 'महोदया! अद्य एनामत्रैव रक्षतु भवती। इयमतीव श्रान्ता, क्लान्ता निर्बला च वर्तते। एतावती कृपा भवत्याऽवश्यं कार्या श्व एवाहमेनां यथापि भवेदितो नेष्यामि।" इति बारं बारं प्रार्थयित्वा न तां पाषाणहृदयां सहमतां कर्तुं समर्थोऽभूत्। निर्धनोऽयमिति कृत्वा चिकित्सिकयाऽप्यत्र ध्यानं न दत्तम्। सुधां कथमपि स्वस्कन्धाधारं प्रयच्छन् - मृतपुत्रं चांके गृहीत्वा राजकीयचिकित्सालयं नमन् - न कदापि पुनरत्र भगवान् मां प्रेषयेदिति मनसि प्रतिज्ञां कुर्वाणः स्वग्राममागतो मधुकरः।

कतिपयदिवसविश्रामेण स्वस्था जाता सुधा। एकस्मिन् दिने उभावपि परस्परं वार्तालापमग्नावभवताम्। "अहं भवद्भ्यो दायग्राहकं दातुमशक्ताभूवम् गतवर्षे परन्तु इदानीं पुनः सम्भावना वर्तते। अतो गृह एव स्वसन्तति जन्म दास्यामि न तु तत्र चिकित्सालयं गमिष्यामि, सुधा प्रोवाच। मधुकरोऽपि तया सह सम्मतः सन् - अकथयत्-" कीदृशाः सन्ति चिकित्सकाः वा राजकीयचिकित्सालयानाम्? दयायास्तु नास्ति लेशोऽपि तेषु। प्रथमदिवसे प्रतिमास वेतनं प्राप्यते कार्यं किमर्थं करणीयम्? रुग्णाः, अस्वस्था म्रियन्ते चेत् - म्रियेरन् - तेषां का हानिः? अस्तु तावत्। अस्माभिः केवलं वार्तालापादतिरिक्तं किमपि कर्तुं न पार्यते। बलशालिनां, धनवतां अधिकारिणां मन्त्रीणां सांसदानामेवानन्दो वर्तते जनास्तु निष्पीड्यन्ते एभिः। प्रभुरेव न्यायं कुर्यात्।" एवं विचारमग्नौ उभौ निद्रामलभताम्।

अपरेद्युरेकं युगलं तत्रागतम्। ग्रामजनैः पृष्टौ उभावपि तत्र ग्रामे एकमायुर्वेदचिकित्सालयं सञ्चालयितुमुक्तवन्तौ। "स्वागतार्होऽयं निर्णयः। वयं स्थानस्य व्यवस्थां करिष्यामः" इति ग्रामीणाः ऊचुः। एवं सति जातायां स्थानव्यवस्थायामायुर्वेदज्ञेन युगलेनानेनात्रैव चिकित्सालयः सञ्चालितः। 'अहमस्मि ग्रामीणः। ग्रामीणानां दुर्दशां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्यक् · जाने । इति विचार्य एव - यदहं आयुर्वेदशिक्षां गृहीत्वा ग्रामसेवां करिष्यामि - मया ऽध्ययनं कृतम् । इयं मम पत्नी-अपि आयुर्वेदे गृहीतशिक्षा । अतः आवाभ्यामओषधालयोऽयं स्थापितः । यथाशक्तिर्भवद्भिरस्मदीया सहायता कार्या । आवाञ्चापि भवतां सेवाकरणे पृष्टवर्तिनौ न भविष्यावः ।" इत्याह चिकित्सकः । रूपगढ ग्रामस्तु नगरमिव सुविधासम्पन्नः सञ्जातः । यतोहि लोका अत्र परस्परसहयोगकर्तारः सुधियः, प्रेमपूर्णाः, चरित्रवन्त आसन् । "विद्युत्, जलं, पाठशाला, चिकित्सालयः सर्वमपि — इदानीमस्मिन् - ग्रामे वर्तते मधुकर आह - वयमिदानीं सर्वथा सुखिनः ।" श्रूयते यदग्रिमवर्षे बसयानमार्गमप्यत्र पर्यन्तं निर्मितं भविष्यति ।



CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुधायाः प्रसूतिकालः पुनरागतः । इदानीन्तु षष्ठमासादूर्ध्वं चिकित्सिकया सा सम्यगवबोधिता किं कदा कार्यं किं च न कार्यमिति । प्रसूतिदिवसे उभौ चिकित्सकः चिकित्सिका च तस्या एव गृहे-उपस्थिता-वास्ताम् । यथाकाल सा पुत्ररत्नमजीजनत् । पूर्वकालीनं पुत्रमृत्युदुःखं सर्वमपि विस्मृतम् चिकित्सकाभ्यां गृहजनमिव सेवा प्रदत्ता पर्यङ्को-परि सुप्ता सुधा प्रसन्नासीत् - सा स्वपतिमाह " गृह्यतामिदानीं सुदायो-ऽयम् " चिकित्सको ऽस्या एव पार्श्वे आस्ताम् । पृष्ठतः स्थितो मधुकरोऽवोचत् 'इयं तु अनयोर्महानुभावयोः कृपा वर्तते । न स्मरसि तेषां तथाविधनागरिकसभ्यतासम्पन्नानां व्यवहारं यदा त्वं प्रथमपुत्रं.... ।" मधुकरस्य नेत्रे ऽश्रुपूर्णे आस्ताम् ।

किं भविष्यति देशस्य कथं नास्ति लोकेषु - प्रायेण सहयोगभावः । प्रशासने भृतिं लब्ध्वा कथं विस्मरन्ति प्रशासकीयसेवारताः—जना यत्तेषां वेतनानि जनानां धनेन दीयन्ते । किं तेषां नास्ति कर्तव्यं यत्ते ऽपि जनसेवां कुर्युः । तदर्थं तु तेभ्यो वेतनं दीयते । परन्तु ते सर्वदा स्वा-धिकारानेव चिन्तयन्ति न तु स्वकर्तव्यं कदापि स्मरन्ति । अहो—कदाचित्ते चिन्तयेयुः स्वकर्तव्यानपि ?

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

उपहारः

उत्तरस्यां दिशि पर्वतीयश्रृंखलाया एकस्यामुपत्यकायां प्रकृतिः स्वीयां शोभां मुक्तहस्ताभ्यां विस्तारयामास । उच्चश्रृंगेषु - उपत्यकायाः सर्वदा हरितवर्णदेवदारु वृक्षैः काप्यनुपमा छटा उत्कीर्णा । निच्चै- विशालक्षेत्रमासीत् । पर्वतेभ्यः- लघुनद्यौ - ग्रामस्योभयतः— वहतः स्म । विशाले समक्षेत्रे ग्रामस्य निकटभूम्यामन्नक्षेत्राण्यासन् । किञ्चिद्दूरे पशूनां कृते घासक्षेत्राणि विद्यन्ते स्म । इतस्ततश्च दैनिकोपयोगिनो वृक्षा आसन् । एभ्यो-ग्रामकृषकाः आवश्यकतानुसारं पशूनां कृते हरितपत्राणि प्रज्वालनाय च काष्टं समिधाश्च गृह्णन्ति स्म । ग्रामोऽयं देवपुरः । यथा नाम तथैवास्य रचनापि सर्वथा मोहका आसीत् ।

अत्रैव जगदीशप्रसादस्य गृहमासीत् जगदीशप्रसादस्यैक एव पुत्रः सञ्जयनामकः । असौ शास्त्री परीक्षामुत्तीर्य सेनायां प्रवेशाय प्रार्थना- पत्रमदात् । दैववशात् - स सेनायां निर्वाचितोऽभूत् । मात्रा पित्रा च सेनागमनं तस्य न भवेदेतत्कृते प्रयासाः कृताः । "त्वमेकल एवास्माकं पुत्रः आवामिदानीं वृद्धावस्थाया विवशतया - आक्रान्तौ अतस्त्वं कृषिकार्यमेव कुरु येनावां सुखेन प्राणांस्त्यक्तुमर्हौ भविष्यावः ।" इति तत्पितरावूचतुः । परन्तु सञ्जयस्तु दूरदर्शी- आसीत् । तेनोक्तम्- 'पितरौ भवन्तावधुना सुदृढाङ्गौ नीरोगौ च । अहं सेनायां कतिचिद् वर्षाणि भारतमातरं संसेव्य पुनर्भवतां सेवायां शीघ्रमागमिष्यामि । पूर्णवार्धक्ये च यदा भवन्तौ काठिन्यमनुभविष्यतस्तदाऽहमत्रैव भवत्सेवाया- मेवोपस्थितो भविष्यामि । अतोऽहमनुज्ञातव्योऽस्मि भवद्भिरिति " एवं पुत्राग्रहग्रस्तौ - उभौ तं सेनायां गन्तुमाज्ञां ददतुः ।

सञ्जयस्तु शरीरेण स्वस्थो मनसा बुद्ध्या च प्रखरः आसीत् । असौ सेनायां प्रशिक्षणं प्राप्य कतिपयवर्षैरेव सैन्यदलप्रमुखो जातः । वर्षचतुष्टयानन्तरमसौ गृहमागतः । तेन मासद्वयस्यावकाशो गृहीतः । पितरावति प्रसन्नावास्ताम् । अस्मिन् काले तेन गृहनिर्माणं कृतम् पूर्वं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यद्गृहमासीत्तत् - जीर्णशीर्णावस्थायामासीत् । तस्यैव पूर्णतो जीर्णोद्धारो विहितः। लघुगृहमासीत् सञ्जयस्य चत्वारः कक्षाः आसन्, रसवती, स्नानागारः शौचालयश्चेति । तेन किञ्चिदन्यत्तत्र समावेशो विहितः। गृहमिदानीं सर्वसुविधायुतं जातम् । तस्य पितरावपि प्रसन्नावास्ताम् ।

अवकाशाः समाप्ताः। सञ्जयः पुनः सेनायां स्वकर्तव्यकर्तुं गतः। वर्षानन्तर यदाऽसौ पुनर्गृहमागतस्तदा जगदीशप्रसादेन तस्य परिणयायोजनमकारि । निकटस्थग्रामादेव सुषमा नाम कन्या परिणयाय निर्वाचिता ग्रहादिमेलनं पूर्वमेव मातापितृभ्यां कृतमासीत् । केवलं सञ्जयस्य सुषमायाश्च स्वीकृतिरेवावशिष्टा आसीत्। यतोहि ग्रामेष्वपीदानीं वालिकायाः बालकस्य च विचाराः परिणयात् - पूर्वं ज्ञातव्या इति प्रथेयं प्रचलमानास्ते । उभयोरपि कापि आपत्तिर्नासीत् तस्मात्-परिणयोऽयं सामान्यरीत्या जातः । धन्योऽयं हिमाचलो यत्र यौतकं न याच्यते, कापि परिणीता च धनलोभेन न हन्यते । अस्त तावदेवं किल सञ्जयो मासमेकं यावत् गृहे स्थित्वा सुषमाया मनोरञ्जनं स्वीधर्मपि च कुर्वन् - पितरावपि सेवयामास । गृहे आनन्दस्य सिन्धुरेवायातोऽभूत् । परन्तु यथा यथा सञ्जयस्यावकाशदिवसा न्यूनाः भवन्ति स्म तथा तथा उभयोरपि मनसि क्वापि कश्चित् - शूलो वेदनां कामप्यतिगहनामुत्पादयति स्म । परन्तु कर्तव्यः भावनातः उच्चतरो भवति । तस्मात् सञ्जयः-समाप्तेषु - अवकाशेषु - मनसि पाषाणं निधाय पुनः सेनायां स्वकर्तव्यपालनाय गतः ।

को नाम सांसारिको न जानाति यन्नवीनविवाहितयुगलाय वियोगः कियत्कष्टकरो ऽस्ति । परन्तु कर्तव्यस्य सर्वोपरित्वादथ च मानवस्यावश्यकतापूर्तये सर्वमिदं भवति । सेनायां सततं कार्यव्यापृततया सञ्जयः समयं सुखेनातिवाहयति स्म परन्तु यथैवावकाशकालो भवति तथैवासौ - एकमासस्य स्वधर्मपत्न्या सह यापितकालं स्मारं स्मारं विह्वलोऽभवत् । उतश्च सुषमाया अपि सैवावस्थाऽभूत् ? सा दिवसे तु कर्मणि व्यापृता स्व श्वश्रुणा श्वशुरेण च सह वार्तालापान् कृत्वा समयमयापयत् परन्तु रात्रौ स्वपतिचिन्तामेवाकरोत् । न जाने स कियत्कठिनकर्मणि नियुक्तो भवेत् – अथवा कुत्र कुत्र भयंकर कठिन-स्थानेषु तेन गतव्यमिति सा सर्वमचिन्तयत । एवं किल

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्षद्वयस्य कालो व्यपगतः। सञ्जयः पत्रेषु लिखति स्म यदसौ शीघ्रमेव गृहमागमिष्यति अवकाशेषु परं भारतस्य सीमाप्रान्तेषु सर्वत्र अशान्तेः साम्राज्यमासीत्। कदाचित् असमसीमायां, कदाचिच्च कश्मीरेषु, कदाचित् पञ्जाबे एवं कठिनतमस्थलेषु - एव सञ्जयस्य नियुक्तिरजायत। यतोहि तादृशमेव तस्य प्रशिक्षणमासीत् - सेनायाम्। यदा वर्षा ऋतु भवति तदा आतंकवादिभ्यः जनरक्षणायासौ प्रेषितो भवति स्वसैनिकदलेन साकम्। यदा च बहु हिमपातो भवति तदापि तस्य गमनं हिमालयस्याभ्रंलिहशिखरेषु भवति तत्रत्यजनसमुदायरक्षायै। एवमहर्निशं सञ्जयो भारतसेनासेवायां सर्वात्मना संलग्नोऽभूत्। प्रतिवर्षमसाववकाशायावेदनमकरोत्। परन्तु देशे वृद्धिगताभिः समस्याभिरसौ तथा परितो बद्धो यथा कथमपि ताः कर्तव्यशृंखलास्त्रोटयितुं समर्थो नाभूत्।

—

सुषमा प्रतिवर्षं स्वपतिं प्रतीक्षमाणा वर्षाणां चतुष्टयीं यापयन्ती शतवर्षाणां वियोगमिवानुभवन्ती सञ्जयस्य चिन्तया रुग्णा जाता कृतेऽपि बहुतरप्रयत्ने सम्पादितासु चापि विविधचिकित्सासु न सा स्वास्थ्यलाभमवाप्नोत्। परिणामतः शय्यामधिष्ठितवती। यद्यपि सञ्जयस्य नियुक्तिरिदानीं समीपस्थपञ्चाम्बुप्रान्त एवासीत्तथापि तत्र सीमासु अहर्निशं मृत्योराशंका आसीत्। एतद्भयेनैव गृहे सुषमायास्तादृशी स्थितिरजायत। पितरावपि पुत्रस्य चिन्तया अतिकृशौ कथंचिदेव दिनानि नयतः स्म।

रात्रेर्घोरान्धकारे दिवसे - एकस्मिन् - सीमायामेकसहस्रतंकवादिनो राक्षसा भुशुण्डिभिः सन्नद्धाः भारतसीमायां प्रवेष्टुमागताः सीमापारतः। सञ्जयः स्वसैनिकान् - वृत्तस्यास्य सूचनामदात्। सतर्कान् - चाकरोत्। परन्तु स्वल्पाः सैनिका अनुमानतः शतसङ्ख्यकाः केवलं कथमस्यैकसहस्र सैनिकसमुदायस्य साम्मुख्यं करिष्यन्तीति विचिकित्सायां सर्वेऽपि तदधीनाः सैनिकाः हतोत्साहा अभूवन्। सञ्जयस्ततोऽपि सोत्साहः सन्नुवाच-' न केनापि कणमात्रमपि भेतव्यम्। मया पृष्ठवर्ति - समूहः सैनिकानां शस्त्रास्त्रसामग्रीसहितोऽत्रायातुं संकेतितो वर्तते ऽतो न भयस्य किमपि कारणम्। शीघ्रमेवासौ विशाल-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समूहो विशालां युद्धसामग्रीं गृहीत्वा आगच्छन्नेव स्यात् ।" पाकिस्तान-प्रेरिता:- आतंकवादिसैनिका - जवेन धावमाना: सीमायां प्रविविक्षव एवासन् । सञ्जयोऽपि संशयापन्नोऽभूत् - यत् न को ऽपि सैनिक.- पृष्ठ-वर्तिस्थानात्समागच्छति न च कोऽपि सन्देश एव प्राप्यते । ये सैनिका: सञ्जयस्य सहाय्यतायै तेनोक्ता आसन् । तेऽपरस्मात् सीमाक्षेत्रात्-प्राप्तायां तादृश्यामेव सूचनायामन्यत्र गता: । अत: किं कर्तव्यविमूढ: किमपि निर्देष्टुं नाशकत् - स्वसैनिकान् । सर्वेऽपि भयभीता: बभूवु: स्वमृत्यु-क्षणानि - च गणयितुमारेभिरे ।

गृहे सुषमाया: स्थितिरपि दिनानुदिनं चिन्तनीया जाता । साऽप्यस्यां निशायां मातु: जगदम्बिकाया: मूर्ति - अग्रे होराद्वयमशक्ताऽपि प्रार्थयामास "मात: ? रक्ष मम सौभाग्यम् । ह्य रात्रौ दु:स्वप्नैरहं निखिलाया-मपि निशायां भृशं सन्तापिता । न जाने मम भर्ता कथमस्ति । तस्य का दशा स्यात्तत्र नाहमिदं सर्वं जाने ।" इति प्रार्थ्य सा शय्यायां गतापि निद्रां न लब्धवती ।

सीमायां सञ्जयस्तादृशीं भयंकरस्थितिं दृष्ट्वा समीपस्थग्रामीण-युवकानामेकं विशालसमूहं क्षणादेव एकत्रितमकरोत् । परन्तु सैनिक-शिक्षणरहिता तेऽपि विशेषसाहाय्यं कर्तुं न शक्ष्यन्ति तस्मात्-तेषां गृहं प्रति एव प्रेषिता: । सैनिका: स्व स्वामिन: सञ्जयस्यादेशं प्रतीक्षन्ते स्म । यतोहि - सञ्जयेन स्वसैनिका: मार्गोपरि विस्फोटकपदार्थस्थाप-नाय समादिष्टा: आसन् । सर्वमपि मार्गं - येन शत्रव: आगच्छन्तिस्म-विस्फोटकपदार्थैराच्छादितमभूत् । यथैव ते दुर्दान्ता: शत्रव: भारत-सीमायां प्रविष्टास्तथैव बन्हिना प्रज्वालितेभ्य: विस्फोटकपदार्थेभ्य: बम् बम् बम् - इति ध्वनिरायाता । शत्रवश्चकिता: बभूवु: । अन्यतश्च संजयेन शतसैनिकानां साहाय्येन शत्रवस्तथा मारिता गुलिकाभिर्यथा एकोऽपि पलायितुं प्राणान् रक्षितुं वा समर्थो नाभूत् । एवं च तेन स्वप्राणान् - मृत्युमुखे पातयित्वाऽपि शत्रवो निहता: । देशस्य सीमा-याश्च सुरक्षा सावधानतया कृता ।

सेनाशिविरे सञ्जयस्य जयजयकारो ऽजायत । असौ वीरता-प्रदर्शनाय भारतीयसेनाया विशिष्टवीरतापदकेन सम्मानितोऽभूत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एकवर्षस्य चावकाशोऽपि तेन लब्धः । त्वरया गृहागमनसञ्ज्ञां कृत्वा मृत्युमुखाद्रक्षितोऽसौ सञ्जयः सर्वान् सम्मिल्य गृहं प्रति प्रस्थानमकरोत् । यथैव गृहं प्राप्तो हर्षेण स्वमातरं पितरं प्रणम्यालिङ्ग्य च तान् स्वप्रकोष्ठं प्रविष्टः तत्र शय्यायामपि सुप्तां सुषमामुपहारं उपायनी कुर्वन्नाह 'किमर्थं सुप्तासि · उत्तिष्ठ गृहाणेदमुपहारम् ।" परमवीर-चक्रस्य प्रमाणपत्रमिदमवलोकय । त्वद्भर्ता शत्रूणां विनाशं कृत्वा पूर्णस्य एकवर्षस्यावकाशं गृहीत्वा समायातोऽस्ति । इदानीं युद्धक्षेत्रेषु मदीया नियुक्तिर्न भविष्यति चिरकालं यावत् । अहं त्वां स्वसाकमपि नेष्यामि । नगरे एव मदीयाऽग्रिमनियुक्तिर्भविता अतश्चिन्तां त्यज उत्तिष्ठ स्वस्था भव " स्वभर्तारं विजयिनं स्वकीयाग्रभागे दृष्ट्वा सुषमाया आनन्दातिरेकस्तु अश्रुभिरेव प्रकाशं गतः । सा जगदम्बिकाया-श्चरणयोर्निपत्याशीर्वादं गृहीत्वा पर्यङ्कं परित्यज्य स्वभर्तारमालि-लिङ्ग । क्षणाद् व्यपगता तस्या व्यथा दूरीभूतश्च रोगः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निशान्तः

सरला षोडषवर्षपूर्वं पुत्रीमेकामसूत । पुत्र्या नामकरणं मदनिका कृतम् । सरलायाः पतिः- राजयक्ष्मापीडितः— ग्रामे तस्य रोगस्य समुचितचिकित्साभावात् - लोकमिमं तत्याज । तदा मदनिका केवलमेकवर्षस्यासीत् । सरला साधारणपरिवारसदस्यासीत् यत्किमपि धनं पार्श्वे विद्यते स्म तत्सर्वं स्वपत्युः उपचारे तथा च तस्य श्रौर्ध्वदैहिकसंस्कारे समाप्तिं गतम् । तस्याः पत्युः जीवनकाले ये बन्धुबान्धवाः, मित्राणि सम्बन्धिनश्च यदा कदाचिदागच्छन्ति स्म गेहे तैरपि सा निराश्रया इदानीं परित्यक्ता । परित्यागकारणं केवलमिदमासीद्यत् – कदाचित्सा किमपि याचेत्, यतोहि नास्ति तस्याः किमपि आयसाधनम् । भूमिरपि पर्याप्ता न वर्तते । केवलमेकक्षेत्रम् । तस्मिन् केवलं मासद्वयस्यान्नमात्रमुत्पद्यते स्म । अग्रिमजीवनयात्रा कथं पूरिता स्यात् ? मदनिकायाः पालनं कथं क्रियेत् - अस्यां स्थितौ इति विचारयन्ती सरला समीपस्थोपनगरे कस्य चिदधिकारिणः प्रशासकीयसेवायां नियुक्तस्य गृहे भाजनमार्जनकार्यमकरोत् । एतेन पञ्चाशत् रूप्यकाणि मासिकमर्जयित्वा यथा कथंचित् सा स्वजीवनं यापयन्ती स्वीयां पुत्रीं पालयामास । ग्राम्यास्तां एवं सम्यक् प्रकारेण जीवनं यापयन्तीं दृष्ट्वा तस्योपरि विविध लाञ्छनानि प्रक्षेप्तुं प्रारब्धवन्तः यतोहि भारते ग्रामाणामपि विभिन्नकोटयः सन्ति । केचिद् ग्रामाः परमसभ्याः सन्ति परन्तु केचिद्ग्रामाः— असभ्यप्रायाः अपि सन्ति नात्र कोऽपि सन्देहः एतादृश एवासीदयं सरलाया ग्रामः । "इयं नगरे प्रतिदिनं गच्छति । स्वच्छवसनानि धारयति । श्रृंगारं कृत्वा गच्छति कस्मै अस्याः अयं श्रृंगारः वर्तते कापि वार्ता स्यात्तत्र कश्चिदयो हि अस्याः श्रृंगारस्य मूल्यमस्यै यच्छति ......—" इत्यादिमाक्षेपबाणैस्तां वराकीं पीड़यन्ति स्म परन्तु सरला तु सरलैवासीत् । तस्या व्यवहारः सर्वैः साकं सरल एवाभूत् । यदा कन्या पञ्चवर्षदेशीया जाता तयाऽपि सा पाठशालायां षष्ठे वर्षे प्रेषिता ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मदनिका पठनेऽतीव निपुणा आसीत्। सा शीघ्रमेव स्वकक्षायां प्रथमस्थानमेवार्जितवती। एवं प्रतिवर्षं परीक्षोत्तरणं विधाय अष्टम-कक्षापर्यन्तं प्राप्ता। अष्टमकक्षापि तया सर्वाधिकाङ्कैः समुत्तीर्णा। प्रशासकीया छात्रवृत्तिश्च तया मासिकी पञ्चाशत्रूप्यकाणामर्जिता। अनेन सरलाया काचित्सहायता एव जाता। माता-सुता चोभे स्वीयं कालक्षेपं किञ्चित्सारल्येन कर्तुमारेभाते।

—

श्रावणमासस्य घोरनिशा आसीत्। परितो वर्षाऋतु प्रभावात्-धूम एव धूमः समाच्छन्नः। प्रकाशोऽप्यन्धकारायते स्म। वाष्पेन तथा समाच्छादिता भूमिर्यत् – गृहाण्यपि लोकानां दृष्टिपथं नायान्ति स्म कृतेऽपि प्रकाशे। "शोभनोऽयं कालः। अर्धरात्रिर्वर्तते।" इति कालूराम नामा कश्चिद् - उपनगरादागतः श्रमिकवेषेण कश्चिद् दुष्टः सरलाया गृहं प्रविष्टः। असौ कतिपयदिवसेभ्यो जघन्यापराधकरणाय विचार-यति स्म। कामवेगाविष्टोऽसौ यथैवाभ्यन्तरं प्रविष्टः सरलाया शयनकक्षं प्रति प्रचलितः। तत्र गत्वाऽसौ यथैव सरलाया शय्यासमीपं गतस्तथैव सरलाया निद्रा कस्यचन मन्दपादध्वनिर्भवतीति श्रुत्वाऽपगता। सा पृष्ठवती "कोऽस्ति? कालूरामो मन्दध्वनिनाह"– मा भैषी-अहमस्मि कालूरामस्त्वां स्वपत्नीं निर्मातुमिच्छामि। निःशब्दं ममानुकूला भव नो चेत्त्वामपहरिष्ये। रात्रिरियं घोरा। तव मुखमुद्रणं कृत्वा नेष्यामि। न कोऽपि रात्रौ त्वदीयं साहाय्यं कर्तुमागमिष्यति। कन्या त्वदीयाऽत्रैव त्वामप्राप्य रुदन्ती मरिष्यति। अतो निर्विरोधं मदीया भव। बालिकेय जागृता न स्यात्तस्मादपरस्मिन् -प्रकोष्ठमागच्छ। प्रतीक्षेऽहं त्वां वहिः।" वराकी सरला किं कुर्यात्? कथं वा दानवादस्मात् - स्वरक्षां प्राप्नु-यादिति क्षणाय तूष्णीं स्थित्वोवाच "तिष्ठ बहिरेवापरस्मिन् - प्रकोष्ठे अहमागच्छामि। कामपि मन्दप्रकाशव्यवस्थां प्रथमं कुर्याम्। त्वं तत्रैव मौनस्तिष्ठ।" सरला समीपस्थं दात्रमुत्थाप्य कालिकेव कराला तं घातयितुमपरस्मिन् - प्रकोष्ठं गत्वा तस्योपरि प्रहारं चकार चीत्कारैश्च ग्रामवासिनो जनान् - उत्थापयामास। सर्वोऽपि ग्रामः एकत्रितः। वराकी सरला ऽर्धनिशायां नैशं प्रकाशमिवात्मानं संकोच-यन्ती- ग्रामीणेभ्यस्तं दुर्दान्तदैत्यं दर्शयामास। असौ परितः रुधिरसिक्तः-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आसीत् । ग्राममुखरेण प्रातः काले समीपस्थ - आरक्षिकार्यालये प्रकरणमिदं प्रस्तुतम् । आरक्षिभिः कालूरामोऽपि निगडितः सहैव सरलापि आरक्षिकार्यालये बद्धा जाता । द्वितीयदिवसे यदा सरलाया प्रकरणं न्यायालये गतम् । तत्र बुद्धिमता न्यायाधीशेन "स्वरक्षाकर्तुं किमप्यन्यसाहायाभावे सरलया शस्त्रप्रहारो विहितस्तस्मात् - सा निर्दोषेति" स्वीयनिर्णयघोषणा कृता । घोषणायाः पश्चात् त्वरितमेव सरला स्वगृहमायाता ।

—

मदनिका षोडषी सम्वृत्ता । दशमकक्षापि तया समुत्तीर्णा । सायं प्रातः उपनगरे भाजनमार्जनं कृत्वा दिवसे स्वक्षेत्रे कृषिकार्यं क्रियते स्म उभाभ्याम् एवं माता पुत्री चोभे समयमतिवाहयतः स्म ।

—

सरलाया गृहं ग्रामस्य एकस्मिन् कोणे विद्यते स्म । एकान्तस्थाने । भाद्रपदस्य निशाकालः । परितो मेघा भयङ्कराकृतिमन्तो मूसलाधारवर्षा कुर्वन्ति स्म । अकस्मादेव सरला तस्यां निशायां वमनरोगेण पीडिता जाता । निशाया एकादशवादनकालोऽयमासीत् । प्रातः कालं यावद्यदि वमनानि - अनेनैव क्रमेण जातानि तु प्रभातात् पूर्वमेव सरलाया जीवनं समाप्तं भविष्यति । इति चिन्तयन्ती मदनिकापि निद्रां न लेभे सरला तु वराकी निश्चेष्टा शय्यायां पतितासीत् ।

—

प्रकाशोऽस्मिन् झञ्झावाते निमग्नः । तस्य प्रकाशदीपोऽपि प्रकाशनेऽसमर्थो जातः कथमग्रे गच्छेत् भीषणेयं वृष्टिः । मार्गस्तु किं स्वीयाङ्गान्यपि अन्धकारे न दृश्यन्ते यदा विद्युत्तड़तड़शब्दमकरोत् तदैव कतिपयपदा-यसौ अग्रे गच्छति स्म तत्प्रकाशे । पुनश्च तत्प्रतीक्षां कुरुते स्म इत्थं काठिन्येन सरलाया गृहं यावदसौ साहसं कृत्वा प्राप्तः । समक्षे गृहमिति तडित्प्रकाशे ऽवलोक्य किञ्चिद्धैर्यमवाप्तवान् । गृहसमीपं गत्वा उच्चस्वरेण द्वारमुद्घाटयितुमप्रार्थयत् मदनिका तन्माता चोभेऽपि जागृते एवास्ताम् । मदनिका शीघ्रं काचदीपं प्रज्वाल्य द्वारदेशं गता । पृष्ठे पृष्ठे सरलापि पतमाना समागता । "कोऽयं घोरनिशायामर्धरात्रिकाले आह्वयत ।" इति सहस्रचिन्तासन्तानवितानावृता मदनिका दृष्टवती एकं युवकम् । मातः कश्चिदज्ञातपथिको-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽस्ति । सरला कथंचित् - उक्तवती प्रवेशय प्रवेशयाभ्यन्तरं वराकम् । मदनिकया द्वारः उद्घाटितः । प्रकाशश्चाशिखनख वर्षाजलसिक्तः प्राविशद्वेगेन । गृहाभ्यन्तरमागत्य - आश्वस्तो जातः । मदनिका पटखण्डमेकं प्रोञ्छनाय ददौ । प्रकाशेन जलप्रोञ्छनं कृतम् । तथापि वस्त्राणि तु सर्वथा क्लिन्नानि - आसन् । मदनिकया स्वमातुः शाटिकाः स्वच्छा धौता च परिधानाय दत्ता । श्रीमन्तः ! वस्त्राणि—अवतार्य शाटिकामिमां किञ्चित्कालाय धारयन्तु । अहं चुल्हिकायामग्नि प्रज्वालयामि । तेन भवतां वस्त्राणि शुष्कानि भविष्यन्ति । सरला तु शय्यायां पतिता आसीत् । वमनाय तत्रैव पात्रमेकं स्थापितमासीत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"अहो किमिदं मातः ?" प्रकाशेन पृष्टा कथञ्चिदवोचत् पुत्र ! अहं वमनरोगेणाद्यैव पीडिता जाता । परन्तु - इदानीमेतादृशी स्थितिरस्ति यया जीवनसंकटमेवोपस्थितम् ।" मातः ! मा भैषि । अहं त्वामधुनैव स्वस्थां करिष्यामि । असौ कञ्चुकमेवावतार्य शीघ्रं स्वमञ्जूषामुद्घाट्य किमप्यौषधं ततो निष्कास्य तां जलेन साकमपाययत् । प्रकाशेन स्ववस्त्राणि शोषयितुं मदनिकायै दत्तानि स्वयञ्च सरलाया शाटिका धारिता । चुल्यां अग्निः प्राज्वलत् । कक्षे काऽप्युष्णता समायाता । होरानन्तरं सरलाया स्वास्थ्येऽपि सुधारो जातः । "तात ! त्वया परिरक्षिताहं निः सहाया नोचेदिदानीं यावत् - मृताऽभविष्यम् त्वया ऽज्ञातपथिकेन जीवनदानं दत्तं महत्त्वम् । मत्पार्श्वे तादृश किमपि नास्ति यदहं तुभ्यं यच्छेयम्" सरलाऽब्रवीत् । प्रकाशेन तत्क्षणमेवोक्तम् "नहि मातः ! अहं तु चिकित्सकोऽस्मि । अनेके सन्ति येभ्योऽहं धनं गृह्णामि । पूर्वदिनान्ते ग्रामे एकः रुग्ण आसीत् । तं चिकित्सितुमेवाहमागत आसम् । परन्तु मदीयं स्थानं तस्माद्ग्रामात् दूरमासीत् । अतोऽहं निशायां मार्गे वर्षाऋतुझञ्झावाते निमग्न आसम् । भवत्या मदीया रक्षा कृता ।" "अतो नूनमेव भवती मदीया जननी । नास्ति अन्योऽत्र कोऽपि मदीयः ।" सरलाऽव्रतीत् – पुत्र यद्येवं तर्हि तुभ्यमहं स्वपुत्रीमेकाकिनीं निः सहायां पितृविहीनामेनां मदनिकामर्पये । इतोऽधिकं किमप्युपायनं मत्पार्श्वे नास्ति येनाहं ऋणमुक्ता भवेयम् । यथैव सर्वलोकजीवनभूतः सूर्यः समुद्गतस्तस्य स्वर्णिम किरणजालेन सहैव–एतेषां जीवनेऽपि सुप्रभातमभूत् ।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मृच्छकटिके रसयोजना

रसस्य महत्वं स्वरूपञ्च :—

ब्रह्मनिर्मित संसारे भौतिकदृष्ट्या रसनेन्द्रियग्राह्य गुणविशेषः रसः यथा मधुराम्ललवणकटुतिक्तकषाय भेदात् षड्विधः । परञ्च कविरचनाया रसः अस्मात् पूर्णतः विलक्षणः अनिर्वचनीयो हृदयसंवेशः आनन्दविशेषः न इन्द्रियग्राह्यः । काव्यपठनश्रवणदर्शनानन्तरं सहृदयाः जनाः मनसानुभवन्ति तद् काव्यीयरसम् ब्रह्मास्वादक्षणे यथा योगी स्वव्यक्तित्वं विस्मृत्य तन्मयो भवति. स्वपरिवेशविषये न शोचति न चाकांक्षते सः। रसज्ञोऽपि योगीवत् आनन्दसागरे निमग्नः जायते । रमणानन्दे संसारिकविषयानां संबन्धः न पुनः ब्रह्मानन्दे । यथा सम्यगेवोक्तम् केनचिद् सहृदयेन :—

"पुण्यवन्तः प्रमिण्वन्ति योगिवत् रससन्ततिम्" १

रस निष्पतेर्विषये अनेकैराचार्यैः स्वविचाराः प्रकटिता परञ्च रसनिष्पतेः सर्वप्रथममुल्लेखः भरतमुनिना स्वनाट्यशास्त्रे कृतः । एतदेवसकलरससिन्द्धान्तस्याधारभित्तिरस्ति ।

"विभावानुभावव्यभिचारि संयोगाद्रसनिष्पतिः ।" २ भरतमुनेः रससूत्रव्याख्यानेकैः व्याख्याकारैः विविधरूपेण कृता । तेषु भट्टलोलटशङ्कुकभटनायकाभिनवगुप्तादयः मुख्यव्याख्याकाराः । तैः क्रमशः निष्पतिशब्दस्योत्पत्तिअनुमितिभुक्तिनिरुक्त्यादिशब्दैराभिव्यक्तेर्ग्रहण सम्पादितम् । भट्टलोल्लटेकविवादः—

भट्टलोल्लटमते बिभानुभावादिनां संयोगाद् अनुकार्य रामादिषु रसोत्पत्तिर्भवति तेषु विभावाः सीतादयः मुख्यरूपेण रसोत्पादकाः अनुभावः उत्पादितरसस्य बोधकाः । व्यभिचारिभावः रसस्य पोषकाः भवन्ति । अतः स्थायीभावैः सह विभावानां उत्पाद्योत्पादकभावः अनुभावानां गम्यगमकभावः व्यभिचारिणां पोष्यपोषकभावसम्बन्धाः एतैः सह क्रमशः उत्पतिः निष्पतिः पुष्टिः अर्थाः जायन्ते ।३

शङ्कुकानुमितिवाद :—

अस्यानुसारेण नटः कृत्रिमरूपेणानुभावादिनां प्रकाशनं करोति । परञ्च सौन्दर्यवलेन नटे वास्तविकता एव प्रतीयते । नटे—

अविद्यमानानुभावादीन् दृष्ट्वा तस्मिन् रसमनुमीयते एवं सामाजिकः वासनावशीभूतो अनुमीयमान रसास्वादनं करोति ४

— — — —   — क्रमशः

१ साहित्यदर्पणे – भूमिकायां पृ. सं. ११- २ ।
२ काव्य प्रकाशे—चतुर्थोल्लासे पृ, सं. १०० ।
३ ,, ,, ,, १०१ ।
४ ,, ,, ,, १०२ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

पण्डिता क्षमा जयन्ति विशेषाङ्कः

स्वतन्त्र भारतात्-पूर्वं संस्कृतसाहित्यनिर्माणे महद् योगदानमकारि क्षमया। पण्डिताया जन्म १८९० खीष्टाब्दे जातमासीत्। तदानीं लोकाः संस्कृतं मृतभाषेति कथयन्ति स्म। संस्कृतविद्वांसस्तु शास्त्रार्थकरणे रूढिवादग्रस्ताः संस्कृतभाषायाः ह्रासकरणे संलग्नाः आसन्। शिक्षायामपि संस्कृतस्याभावो जातः। संस्कृतज्ञाः संस्कृतमपरः कश्चिन्न पठेत् – अनेन हीनभावेन ग्रस्ताः संस्कृतभाषामेव "मृतभाषेति" कथनाय लोकानां प्रोत्साहनमकार्षुः स्वकर्मभिः। वैदेशिकास्तु भारतीयसंस्कृति - समुन्मूलनाय बद्धपरिकरा आसन्नेव। इदं च संस्कृतह्रासेन स्वयमेव भविष्यतीति ते जानन्ति स्म।

अस्मिन्नेव कराले काले – यदा भारतीययुवकाः संस्कृतमेव मृतभाषां कथयन्ति स्म–पण्डितया संस्कृतसाहित्यस्य विभिन्नक्षेत्रेषु साहित्यनिर्माणं कृत्वा संस्कृतज्ञानां, संस्कृतसाहित्यस्य सर्वोपरि च देशस्य कल्याणं कृतम्। तया तुकारामचरितादिमहाकाव्यलेखनं व्यधायि सहैव कथापञ्चकमिति कथानिकापुस्तकं लिखित्वा च सम्यक् - साधितं यत्संस्कृतभाषा तु दैनिक-व्यवहारभाषा वर्तते। तस्या लेखनी यद्यपि आंग्लभाषायामपि तथैव शक्ता आसीत् - परन्तु तया केवलं संस्कृतं जीवितभाषा वर्तते – इति साधनाय संस्कृते एव स्वीया लेखनी प्रयुक्ता। परिणामतश्च तस्याः साहित्यस्य मूल्यमद्य बहुभिः-युवभिः संस्कृतानुसन्धानलग्नैः- सम्यगवधार्यते।

पण्डितया केवलं संस्कृते स्वीया लेखनी एव न प्रवर्तिता परन्तु स्वीयं समस्तसाहित्यं प्रकाशितमपि। तस्या काव्यानि कथासंग्रहाश्च सुन्दरमुद्रणस्य प्रकाशनस्य चापि - आदर्शभूतानि सन्ति। जीवलाई (जलाई) मासस्तस्या जन्ममासः। अस्मिन्नवसरे प्रतिवर्षं दिव्यज्योतिस्तां स्मरति। पण्डितायाः पुत्री सुश्री लीलादेवी - दिव्यज्योतिषः आजीवनसंरक्षिका। तां प्रति वयं सर्वदा कृतज्ञतां ज्ञापयामः। तस्या मात्रा यद्दीपज्वालनं कृतमासीत् - सा सतत तत्प्रकाशने सर्वात्मना संलग्ना।

अस्मिन् जयन्त्यवसरे कथानिकाविशेषांकप्रकाशनेन महापण्डितायाः क्षमायाः स्मरणं करोति - भवदीयं दिव्यज्योति मासिकम्। मन्ये पण्डितायाः आत्मा अनेन प्रमुदितः स्याद्यत् - अद्यापि तस्या विचाराणामनुगमनं कुर्वद्भि-रस्माभिःसामयिकसाहित्यप्रकाशनं क्रियते। नाद्य कश्चिदपि संस्कृतं मृतभाषेति वक्तुमर्हति। आशासे च यल्लोकाः विशेषतः संस्कृतज्ञाः विशेषा-ङ्कस्यास्य समादरं करिष्यन्ति यत्प्रकाशनं सचित्रमस्माभिरुपस्थापितं सामयि-कमस्याः प्रति संस्कृतलेखकाः सर्वदा जागरूकाः इत्यपि च संसाधितम्।

— केशव शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R. N. 6384/57 ल—33 /एस. एम. / 10/89

अध्ययनरता

महापण्डिता क्षमा



पण्डिताया

हस्तलेखः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिव्यज्योतिः

संस्कृतस्य सचित्र मासिकम्



जर्मनदेशे संस्कृतनाटकाभिनयः ।

शिमला सितम्बर, १९९०

वर्षम् ३४ अङ्कः १२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विषयानुक्रमः

क्र.	विषया:	लेखका:	पृष्टम्
१.	कतिपय कथानिका:	प्रो. केशव शर्मा	१
२.	सम्पादकीयम्		

दिव्यज्योतिः

हि० क० सं०भा० अकादमी प्रदत्तानुदानसाहाय्यम् । पत्रिकागतमुद्रणदोषाणां सम्पादकीयनीति-विषये च अकादमीदायित्वं नास्ति ।

हिमाचल प्रदेश—पंजाब-हरियाणा-जम्मूकश्मीर - मध्य प्रदेश—राजस्थान—महाराष्ट्र, उत्तरप्रदेश शासन-स्वीकृतं केन्द्रशासनपुरस्कृतं सचित्रं संस्कृतमासिकम् ।

पत्रस्य उद्देश्यानि तथा नियमाः

सरलसरससुबोध-साधनैः सर्वस्मिन् संसारे संस्कृतस्य प्रसारः, साहित्यान्तर्गतानां सकल कलानां समन्वेषणं, संसारस्य हितसम्पादनम्, एवं लौकिक - अलौकिकस्वातन्त्र्यस्य प्राप्तिः ।

"दिव्यज्योतिः" प्रतिमासं पञ्चदशतारिकायाम् (आङ्गलमानेन) प्रकाशितं भवति
पत्रस्य वार्षिक मूल्य ३० रु० अर्धवार्षिकं १५ रु० एकस्याङ्कस्य च रु० २-५० भवति ।
वर्षारम्भः अक्तूबर—मासतः भवति । ग्राहकः कस्मादपि मासाद् भवितुं शक्नोति ।
ग्राहकैः, "सम्पादक, दिव्यज्योतिः, भारती विहार, मशोबरा, शिमला-१७१००७ हि० प्र०" इति संकेते धनादेशेन वा. शु. प्रेषणीयम् ।

परिचयः

संस्थापकाः तथा आद्यसम्पादकाः आचार्यश्रीदिवाकरदत्त शर्माणः, — दूरभाषः 78459
राष्ट्रपतिसम्मानिताः
प्रधानसम्पादकः— आचार्य केशव शर्मा एम. ए., एम, फिल, साहित्यरत्नम् — „ 8·200
दिव्यज्योतिः कार्यालयः भारती विहारः, मशोबरा, शिमला-७ (हि. प्र)
मुद्रकः प्रकाशकः—

भारतीमुद्रणालय भारती विहार, मशोबरा-१७१००७ शिमला (हि. प्र,)
स्वामी:- श्रीमती आचार्य रत्नकुमारी शर्मा

सितम्बर. १९९० — आश्विन २०४७ – वर्षम्–३४ — अङ्कः १२

वार्षिक मूल्यम् ३० रु०

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कस्य दायित्वम्

जयपुरसमीपे राजस्थाने एकस्मिन् ग्रामे श्रेष्ठिवर्यः काहनसिन्हो ऽस्य वास्तीत् । अस्यासीद्व्यापारो विपुलः । समीपवर्तिग्रामाणां कश्चिदपि तादृशः कृषकः, श्रमिको वा नासीत्-योऽस्य ऋणी न स्यात् । सप्ततल-निर्मितमस्य भवनम् । साधारणो जनस्तु तद्वैभवं दृष्ट्वैव मूर्छितो भवेत् । अस्यानेके कर्मचारिणः— व्यापारकार्यमस्य सञ्चालयन्ति स्म । अस्य पूर्वजाः परमधार्मिकाः परिश्रमेण व्यापारलब्धेन धनेन सर्वत्र सर्वदा लोकेषु यशोगरिमां प्रचारयामासुः । पूर्वपुरुषलब्धधनं विशाल-भवनं च वीक्ष्य दौर्भाग्यादयं कुव्यसनेषु लिप्तः । सुरासुन्दरी चास्य दैनिकव्यापारो जातः । कार्यसंचालनस्य चिन्तैव नासीत । यतोहि कार्यं तु भृत्या एव चालयन्ति स्म सर्वम् ।

अस्य पूर्वजानां कानिचन क्षेत्राण्यपि ग्रामे एकस्मिन् आसन् । तानि जालमस्य पूर्वजा चालयन्ति स्म । यत्किमपि धान्यं समायाति स्म तस्यार्धभागो श्रेष्ठिवर्याय देयो भवति स्म अर्धेन च जालमः स्वजीवनं यापयति स्म । जालमस्य गृहे तस्य विधवा माता नवविवाहिता च पत्नी आस्ताम् । इत्थं किलैषां जीवनमपि सुखेन गच्छति स्म ।

एकस्मिन् दिवसे काहनसिंहः- अश्वोपरि समारुह्य स्वक्षेत्रा-ण्यवलोकयितुं तद्ग्रामं गतः । तत्र गत्वा यथैवासौ जालम-जालमेति त्यागादीत्तथैव जालमस्य जाया किशोरी कुटीराद वहिरायातो । सा श्रेष्ठिवर्यं न जानाति स्म । "कोऽस्ति भवान् किमर्थं वागतोऽसि" ? इति तया पृष्ठोऽसौ क्षणाय नु स्तब्ध इवावतिष्ठत् किशोर्याः सौन्दर्य-मालोक्य ततश्चाह "न जानासि मां स्व स्वामिनं काहनश्रेष्ठिवर्यम् ?" क्वास्ते जालमः ? यावत् सा उत्तरं दातुमीहते स्म तावदेव तत्पतिः स्कन्धोपरि हलं धृत्वा भृषभौ बाहयन् - तत्र प्राप्तः । श्रेष्ठिनमश्वोपरि दृष्ट्वा भयविह्वलः हलमेकतः प्रक्षिप्य भृषभौ तत्रैत घासं चरन्तौ-त्यक्त्वा धावन् - स्वस्वामिनः पार्श्वमागतः । "एषोऽस्मि राजन् ! कृतार्थिताः—वयं भवद्भिरत्रागत्य, किमर्थं वा कष्टमकारि, आहूतो ऽ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भविष्यम् ।" इति सर्वमेकश्वासेनैवावदत् - जाल्मः । तदुत्तरे श्रेष्ठिवर्यो ऽवदत्–"अरे धूर्त ! क्षेत्रान्नं भुक्त्वा भुक्त्वा शूकरवत् - स्थूलोऽसि सम्वृत्तः । मां द्रष्टुं चिरान्नायातोऽसि ।" नैव राजन् ! इदानीं किमपि क्षेत्रेषु उपहाराय नासीत् । चिन्तितं यत्कतिचिदिद्वसेभ्यः फलशाकादिकं भविष्यति तदैव गमिष्यामि । रिक्तहस्ताभ्यां स्वामिनः पार्श्वे गमनं शोभनं न भवतीति कृत्वैव गतमासेभ्यः- नायातोऽस्मि श्रीमतां दर्शनार्थम् ।" अस्तु तावत् -अहमेव यदा कदाचिदत्रायास्यामि । शोभनमस्ति स्थानमिदम् । मया तु प्रथमवारमेव दृष्टम् ।" श्रेष्ठिरुवाच इत्युक्त्वाऽसौ स्वगृहं प्रति निर्वृत्तः । जाल्मस्य पत्नी किशोरी श्रेष्ठिवर्यस्य परीक्षां प्रथमदृष्टिपातेनैवाकरोत् । तथापि तया स्वमनोगतं न कस्यापि पार्श्वे कथितम् ।

श्रेष्ठिः काह्नः स्वगृहं प्राप्य-अचिन्तयत् । "अहो नु खलु नीचेष्वपि तादृशं सौन्दर्यम् न जाने विधाता किं करोति ? कीदृशस्तस्या सूक्ष्मकटितटः, विकसमानावुरोजौ, दीर्घा नासिका कोमलौ हस्तौ रक्ताभौ पादौ, आनितम्बलम्बिकेशाः, दीर्घे धनुराकारे लोचने ।" इति चिन्तयन् – असौ तस्या मूर्तिं बारं बारमचिन्तयत् - स्वमनसि । निशायामपि तामेव स्वप्ने ददर्श । सत्यमेवास्ति गीताज्ञानम् :–

"ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते ॥
क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥"

परन्तु धूर्तेषु - ज्ञानं न तिष्ठति । केन प्रकारेण स तां लभेदिति सततं चिन्तनपरो बभूव । एकस्मिन् दिने पुनः प्रबृद्धकामावेगः श्रेष्ठिवर्यः अश्वमारूढः स्व ग्रामं गतः । जाल्मस्य कुटीराग्रेऽश्वादवतीर्य आह्वयत् "जाल्म !" अद्यापि गृहे किशोरीमपहाय न कोऽप्यासीत् सा श्रेष्ठिवर्यस्य ध्वनिं परिज्ञाय अवगुण्ठनं कृत्वा बहिरायाता प्रणतिपूर्वकञ्च निवेदयामास "प्रभो ? मम पतिस्तु क्षेत्रेषु कार्यकरणाय गतोऽस्ति श्वश्रूश्च समीपवर्तिनि ग्रामे कस्यचन सम्बन्धिनो गृहं गता वर्तते ।" श्रेष्ठिवर्यस्तु पुराणः शाकुनिकः आसीदसौ मृदुहासं विकिरन्नाह-ततः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

किम् · किञ्चित्कालाय अत्रैव विश्रामं करिष्यामि । त्वं जलं तु पायय ।" प्रभो ! भवद्भि र्मम स्पृष्ठम् · जलमित्यर्धोक्त एवाह काहनः- मा भैषि - अहं न करोमि तादृशं भेदभावम् - न च विश्वसिमि - एषु पुरातन-विचारेषु, त्वं जलमानय । "किशोरी कुटजाभ्यन्तरं गत्वा पात्रे जलमानयत् । तस्या हस्तात्पात्रं गृहीत्वा जलं पपौ । पानान्ते "अहो ? मधुरं खलु जलमत्रत्यमथवा तव हस्तस्पर्शमाधुर्यमस्मिन् वर्तते ?" किशोरी तस्य हस्तात्पात्रं गृहीत्वाऽभ्यन्तरं प्रविष्टा । पात्रमभ्यन्तरे निधाय सापि बहिरायाता । तस्या मनस्यपि श्रेष्ठिवर्यस्य दर्शनलालसा जागृता । अवगुण्ठनादेव तस्या मनः स्थितिमुत्तोल्य श्रेष्ठिरुवाचः- किशोरी ! अहन्तु भवतां स्वामी अस्मि तर्हि मत्सकाशे ऽवगुण्ठनं कीदृशम् ?" इत्युक्त्वा च स्वयमेव तस्या अवगुण्ठनमुत्तार्य तत्सौन्दर्यसुधां यथेच्छं पपौ । किशोरी-अपि तत्प्रति स्वीयमाकर्षणं रोद्धुं न शशाक । प्रभो ! बहिरातपो वर्तते यदि रोचेत तर्हि मम कुटजे प्रवेशं कुरु । श्रेष्ठिवर्यस्तु कामपि दीर्घतमयोजनां मनसि - अचिन्तयत् तेनोक्तम् - ' नैवाद्य कश्चिदपि तव गृहे नास्ति । पुनरायास्यामि निश्चिन्ता भव ।" इत्युक्त्वा ऽश्वमारुह्य स्वगृहं प्रतिनिवृत्तः काहनः ।

अपरेद्युरेव तेन सन्देशवाहको जाल्मस्य पार्श्वे प्रहितः । जाल्मसौ स्वावासे उपस्थातुमादेशं प्रेषितवान् · जाल्मस्तु आशिखनखं श्रेष्ठिवर्यस्य ऋणे निमग्न आसीत् · हस्तौ संहतौ कृत्वाऽसौ दीनो भयविह्वलोऽप्रार्थयत् — "राजन् ! आदेष्टव्योऽयं जनः किं कुर्यादिति " काहनोऽवोचत् - जाल्म त्वं तु जानासि स्वीयां दरिद्रतां जीवनकाठिन्यञ्च । त्रयाणामप्युदरभरणं त्वत्कृते दुष्करमस्ति जातम् । तव गृहं गत्वा मया सर्वं दृष्टम् · अत एवं कुरु अतत्स्वीयां भार्यां मद्गृहसेविकाकार्यकरणाय प्रेषय वस्त्राणि, भोजनं तथा च वेतनमपि मासिकं मिलिष्यति । यदा कदाचित् - त्वमपि आगन्तुं शक्नोषि । सप्ताहान्ते इयं तव गृहं प्रेषिता स्यात् । एक दिवसानन्तरं पुनरागच्छेदिति ममादेशः · अनेन तव कार्यमपि सुगमं भविष्यति - अस्माभिरपि च यद्वेतनं अन्यस्मै देयं भविष्यति तत्तस्यै दास्यते उभयोः कार्यं सम्यक् प्रचलिष्यति ।" इति श्रुत्वा जाल्मस्त्वतीव प्रसन्नो बभूव । प्रभो ! भवद्भिरहमार्थिककाठिन्यस्यास्य घोरदारिद्र्यस्य पाशान्मुक्तः । मदीयमनेन बहुसाहाय्यं भविष्यति ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अहमिदं स्वीकरोमि । जाल्मस्य स्वीकृतिं प्राप्य काहनः पुनरेकं प्रलोभनबाणं प्राक्षिपत्—"यदर्धमन्नभागस्त्वयाऽस्मभ्यं दीयते तदपि त्वया न देयः। अनेन तव त्वदीयमातुश्चान्नसमस्या समाहिता भविष्यति। अतस्त्वं श्व एव किशोरीमत्र प्रेषय।"



अपरस्मिन्दिने किशोरी काहनस्य राजभवने विराजिता । काहनस्तां नूत्नवसनानि धारणाय ददौ कथितवान् च स्नात्वा स्वीयं शरीरं स्वच्छं कृत्वा वसनानीमानिधारय । एवं तयोर्द्वयोः प्रेमलीला प्रारब्धा । "त्वं किल निम्नजातीया अपि मया स्वीकृतासि परन्तु चिराय किमपि सन्तानं तव सकाशान्न भवेत्"- काहनोऽवदत् । "प्रभो ! तत्कथं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भवितुमर्हति ? त्वमेतस्य चिन्तां न कुरु। एवं प्रतिदिनं तां काममपि औषधं दत्वा दशवर्षाणि यावत् बुभुजे। इदानीं सा अष्टाविंशति वर्षदेशीया ऽजायत। प्रभोरिच्छा बलवती। किशोरी गर्भवती जाता। तस्या एतानि लक्षणानि दृष्ट्वा श्रेष्ठिवरस्तां निजगृहं प्रेषयामास। यतोहि इदानीं काप्यपरा तस्य मनसि समायाता। जाल्ममाहूय श्रेष्ठिना कथितम् —"इदानीमावश्यकता न वर्तते तव पत्न्याः। इयं किञ्चिद् रुग्णा। अतो न प्रेष्या पुनरत्र। जाल्मः किं कुर्यात् ? असौ वराकः-यथाज्ञेति उक्त्वा गृहं गतः। जाल्मेन यदा शनैः २ उभयोः प्रेमप्रसङ्गविषये श्रुतमिदानीञ्च स्वयं तेन ज्ञातं यत्तत्पत्नी गर्भवती वर्ततेऽसावपि गृहं तत्याज। मया तु स्वपत्नी गतदशवर्षेषु स्पृष्टापि न। अतो नैषा मम सन्ततिः। यथाकालं सा पुत्रं सूतवती। श्रेष्ठिना तु पूर्वमेव त्यक्ता स्वपतिनापि परित्यक्ता एव। गृहे श्वश्रुस्तां प्रताड़यामास "नय बालमिमं जीवितमेव भूमौ निखणनं कुरु-अस्य। अयमत्र स्थातुं न शक्नोति जारपुत्रः। वराकी किशोरी किं कुर्यात् अथवाऽसौ बालकः किं समाचरेत् तस्य कोऽपराधः ?

पाठकाः प्रार्थ्यन्ते

मान्याः !

प्रवर्तमानवर्षस्यापि अर्धभागो व्यतीतः। पत्रप्रेषणेनापि वार्षिकशुल्कप्रेषणार्थं प्रार्थना कृता किन्तु स्वल्पैरेव महानुभावैः शुल्कप्रेषणं कृतम्। अतः सविनयं प्रार्थ्यते यत् शीघ्रमेव शुल्कप्रेषणेन सहायता क्रियताम्।

—— सम्पादकः

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मुक्तिः

भारतस्य दक्षिणदिशि उडुपिनामग्रामे शम्भुः एतन्नामा एको द्विजः प्रतिवसति स्म तस्य पत्नी शारदा साध्वी सुशीला चासीत् । उभयोर्जीवनमार्थिककाठिन्येन कठिनमेवासीत । तयोरेकैव सन्ततिरासीत् । असौ चासीत दिनकरः । ग्रामविद्यालये दिनकरः दशमकक्षायां सर्वाधिकाङ्कान् प्राप्तवान् । पितुरिच्छा - आसीदयं क्वचित्कामपि भृतिं कुर्यादथवा कमपि कार्यं कुर्याद्यतोहि पिता तस्याध्यापने ऽसमर्थ आसीत् । प्रभुकृपया दिनकरस्य परिणामं दृष्ट्वा शिक्षाविभागस्तस्मै शतरूप्यकाणां मासिकीं छात्रवृत्तिमग्रिमाध्ययनाय दत्तवान् । दिनकरस्तु—अतीवप्रसन्नः स्व गृहे वृत्तमिदं श्रावयामास । पिता यद्यपि दिनकरस्याग्रिमाध्यापने ऽसमर्थतां प्राकटयत् । तथापि यदेयं छात्रवृत्तिर्लग्ना तु - असावपि किञ्चित्साहसं प्राप्तवान् । दिनकरश्च नगरे महाविद्यालये प्रविष्टः । यद्यपि शतंरूप्यकाणि मासिकव्ययाय दिनकरस्य पर्याप्तानि भवन्ति स्म यतोहि स तु साधारणतमजीवनमयापयत् स्वशिक्षाकाले । पितरावपि स्वोदरयोर्ग्रन्थिं दत्वा किमपि स्वल्पं धनं तस्मै प्रेषयतः स्म । यतोहि तयोर्जीवनन्तु दिनकर एवासीत् । तयोः वार्धक्यस्यालम्बनम् ।

महाविद्यालयेऽपि दिनकरणेन सर्वोच्चाङ्काः प्राप्ताः । राजकीया छात्रवृत्तिस्तेन विश्वविद्यालयायापि लब्धा । विश्वविद्यालये तेन विज्ञानविषयमधिकृत्य प्रवेशो प्राप्तः । विश्वविद्यालयप्राध्यापकास्तस्य प्रतिभामालोक्य चकिता आसन् - यदयं ग्रामीणः कथं सर्वानपि सर्वविषसुविधासम्पन्नान् - छात्रानतिशेतेऽध्ययने, सभ्यतायां, व्यवहारे च । सर्वेऽपि गुरुजनास्तं सर्वदा आशीर्वादं ददुः परन्तु छात्राः विशेषतश्च तत्सहाध्यायिनस्तं घृणयाऽवलोकयन्ति स्म । यदयं निर्धनः, एकमेव वसनयुगलं सप्ताहं यावद्धारयति । एवं किल तस्यावहेलनं कुर्वन्ति स्म ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दिनकरस्तु न तेषामवहेलनां तिरस्कारं वा गाम्भीर्येण गृह्णाति स्म। असौ रात्रौ वस्त्राणि प्रक्षाल्य प्रातः काले धौतानि तानि पुनर्धारयति स्म। रात्रौ नग्न एव च स्वविद्याभ्यासं कुरुते स्म। इत्थमहर्निश-घोरपरिश्रमेणासौ स्नातकोत्तरकक्षामपि सर्वाधिकाङ्कैः उत्तीर्णामकरोत्। पितृणां गुरूणामाशीर्वादेन तेन परीक्षा तु समुत्तीर्णा परन्तु - न क्वापि भृतिर्लब्धा। विज्ञानविभागस्याध्यक्षस्तं बहुमन्यतेस्म। निराशो दिनकरस्तेन धैर्यधारणायोक्तः 'दिनकर! त्वमत्रैवानुसन्धानकार्यं कुरु। अहं तवार्थिकीं स्थितिं सम्यक् - जानामि। त्वया चिन्ता न कार्या अहं तव साहाय्यं करिष्यामि। येन विश्वविद्यालयानुदानायोगस्य छात्रवृत्तिस्त्वया लब्धा स्यात्तथा प्रयासं करिष्यामि।" दिनकरस्तु स्वपितुः साहाय्यं चिकीर्षति स्म। तेनोक्तम्- "गुरुवर! मम पित्रा मात्रा च शिक्षणकाले कानि कानि कष्टानि सोढानि तदिदं श्रीमन्तो न जानन्ति। अहं शीघ्रातिशीघ्रं तयोः साहाय्यं कर्तुमिच्छामि। अनुसंधानेन किं भविष्यति। अहन्तु आजीविकां प्राप्तुमिच्छामि। यदि न क्वापि लप्स्यते ततोऽपि गृहे कृषिकर्मणि लग्नो भविष्यामि। तेन किमपि साहाय्यं पित्रोर्भविष्यति।" गुरुवरेणासौ पुनरपि धैर्यं धारयितुमुक्तः कथितञ्च अत्रैव भृतिकृतेऽपि प्रयासान् करिष्यामि। त्वं स्वकार्यं प्रारभस्व।

दिनकरेण स्व मात्रा पित्रा च सह मन्त्रणां कृत्वा विश्वविद्यालयेऽनुसन्धानाय आवेदनमकारि। छात्रवृत्तिरपि लग्ना प्रवेशश्चापि जातः। गुरुकृपया विश्वविद्यालयीयविज्ञानविभागे एव चाध्यापनकार्यमपि प्राप्तम् विद्यार्थिजीवने दिनकरेणार्थिकपक्षतो यत्कठोरकाठिन्यमनुभूतं धनिकवर्गछात्रवृन्दसकाशाच्च यदपमानं महाविद्यालयात् - विश्वविद्यालयं यावत्तेन प्राप्तं तदप्यसौ कदाचिदपि विस्मर्तुं नाशक्नोत्। इयं स्मृतिश्च तन्मनसि प्रतिकारग्रहणरूपा नासीदपितु निर्धनयोग्यछात्राणां साहाय्यकरणरूपाऽभूत्।

— —

रश्मिः ग्रामस्यैवैका बाला-यस्या माता तु तज्जन्मकाल एव मृताऽभूत्. केवलं पितुः साहाय्येन - स्नातकोत्तरकक्षायां विश्वविद्यालये प्रवेशं लब्धवती। पठने सापि तीव्रा आसीत्। परन्तु आर्थिकपक्षतः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रपीड्यमाना सर्वदा दुःखिता ऽभूत्। एकस्मिन् दिने ग्रामात् - पत्रमेक मायातम्। यथैव रश्मिः पत्रमुद्घाटयित्वा पठितुमारब्धवती तथैव तस्या अक्षिणी जलधारावर्षणे लग्ने। अन्याभिः सहाध्यायिनीभिः सा दिनकरसमीपं नीता। बालिकाः— जानन्तिस्म यद्दिनकरः गुरुसुलभं मनो धारयति अन्ये तु केवलं स्थूल वेतनभोगिनः श्वेतहस्तिन एवासन्। दिनकरस्तां पप्रच्छ, बाले ! किं जातं कथं रोदिषि किं गृहस्मृतिरायाति, अथवा क्वचिद् वेदना वर्ततेऽथवा विश्वविद्यालयस्य शुल्कप्रदाने किमपि काठिन्यमस्ति। यत्किमपि वर्तते तद् भण वयं तव साहाय्यं करिष्यामो मा रोदिषि। इति बहुशो धैर्यं नीयमाना सा ऽवोचत्।

श्रीमन् ! मदीया माता मम जन्मकाल एव मां परित्यज्य गता। तत्पश्चात् - मम पित्रा एवोभयोरुत्तरदायित्वं गृहीतम्। स एव एकलो ममाश्रयोऽद्य मां परित्यज्य - अभागामेकलामत्र दुःखदारिद्र्यपीडितां स्वर्लोकं यातोऽस्ति। अहमेकाकिनी कथं जीवनं यापयिष्यामि" इत्युक्त्वा पुनरपि रुरोद। दिनकरस्तु तत्पीड़ापीडितस्तस्या सहाध्यायिबालासहयोगेन कथमपि तां धैर्यं दत्तवान्।

—

स्वपितुः— और्ध्वदैहिक संस्कारं कृत्वा रश्मिः पुनरपि स्नातकोत्तरपरीक्षाया अन्तिमवर्षस्याध्ययनाय विश्वविद्यालयमायाता यतोहि दिनकरेण पूर्वमेव तथादिष्टमासीत्। और्ध्वदैहिकसंस्कारकर्तुञ्च धनमपि दत्तम्। रश्मिः स्नातकोत्तरकक्षां समुत्तरेदित्येतदर्थमपि पूर्णप्रबन्धो विहितो दिनकरेण। दिनकरस्य समस्यासमाधाने यथा तद्गुरुणा स्वप्रेमवर्षणं कृतं तदुपरि सहायता च तस्य कृता तथैव निः सहाया रश्मिः— दिनकरेण स्वपरिवारसदस्या विहिता। यतोहि नासीत्तस्या अन्यः कोऽपि कुत्रापि कश्चिदपि सहायकः। सा हि स्वस्नेहवर्षणेन कृतार्थिता तेन।

होलिकोत्सवः समीपवर्ती आसीत्। गते होलिकोत्सवे हिन्दू मुस्लिमछात्रेषु विश्वविद्यालये महीयान् संघर्षो ऽभूत्। अस्मिन् - वर्षे काचिदेतादृशी दुर्घटना न भवेत्तत्कृते पूर्वमेव प्रयासाः प्रारब्धाः। दिनकरश्च एतत्प्रबन्धकरणाय नियुक्तोऽभूत्। तेन एकस्मिन्दिने हिन्दू-मुस्लिमछात्राः सामूहिकरूपेण सम्बोधिताः -

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"प्रिय छात्राः ! अयमस्माकं देशो भारतः उत्सवानां, उल्लासानां नृत्यगीतानाञ्च देशोऽस्ति । प्रतिमासं कस्यापि सम्प्रदायस्य कस्या अपि जातेः कस्यापि समाजस्य च उत्सवोऽत्र जायते सोल्लासञ्च जनास्तत्र भागं गृह्णन्ति । गतवर्षमिवास्मिन् वर्षेऽपि होलिकोत्सवोऽत्र मानितो भविष्यति गतवर्षे उत्सवोऽयं हिन्दूयवन छात्रेषु परस्परं विवादविषयो जातः ।

"आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।" अस्य नियमस्य यदि पालनमस्माभिः क्रियते तदा संघर्षाय नास्ति क्वापि किमपि स्थानम् । होलिकोत्सवस्य यद्यपि पौराणिकं धार्मिकमपि महत्त्वमस्ति हिन्दूनां कृते परन्तु भारतीया संस्कृतिस्तु मानवमात्रस्य संस्कृतिर्वर्तते । अत एव होलिकोत्सवस्य तादृगपि वर्तते महत्त्वं येन

मानवमात्रस्य कल्याणं भवति । 'होलिकोत्सवोऽस्ति रंगानामुत्सवः । विभिन्नरंगैरत्र क्रीड्यते उत्सवश्चायं वर्षस्य तस्मिन्काले समायाति यदा सकलापि सृष्टिः नवरसपूरिता भवति । मानवानां देहेषु इदानीं नवीनरक्तसंचारो भवति । सूर्यस्य सप्तरश्मिभिः संसारस्य सम्पूर्णा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सृष्टिः प्राणान्विता बलान्विता च भवति। एवमेव रंगैः क्रीडनेन मानवस्य मनसि विभिन्नभावसमृद्धिर्भवति । रक्तरंगः - उत्साहस्य श्रमस्य, शृंगारस्य च प्रतिनिधिरस्ति । पीतवर्णः- त्यागस्य सौजन्यतायाः, वसुधैवकुटुम्बकमितिभावस्य च पोषको ऽस्ति । एवमेव हरितवर्णश्च समृद्धेः प्रतीकोऽस्ति । श्वेतवर्णश्च शान्तेः पुष्टिकारकः । एवं किल वर्णानामस्माकं जीवने महत्त्वपूर्णस्थानमस्ति । न केवलं साधारणजना एवापितु भगवान् श्री कृष्णोऽपि राधया साकं होलिकोत्सवं मानयन् रंगवर्षां कुरुते । परन्तु सा क्रीडास्तु ब्रह्मस्य तच्चिच्छक्तेश्च क्रीडाऽस्ति । तथापि इयमपि - अस्माकं होलिकोत्सवक्रीड़ापि पारस्परिकस्नेहवर्षणं कुरुते रंगव्याजेन च मानवानां कल्याणं भवति। "वैज्ञानिकोऽयमुत्सवस्ततो नास्य गरिमा छात्रैर्निपातनीया" छात्राश्चापि रंगानां वैज्ञानिकतां परिज्ञाय शान्तिपूर्वकं पारस्परिकस्नेहपूर्वकं होलिकोत्सवायोजनं चक्रुः रंगानाञ्च तथा वर्षा-जाता येन न केवलं छात्राणां शरीराणि एव विलक्षानि जातानि-अपितु पारस्परिकस्नेहवर्षणेन तेषां मनांस्यपि सिक्तानि बभुवुः ।

—

रश्मिः स्वीयामन्तिमवर्षीयपरीक्षां शोभनाङ्कैः पारयामास । दिनकरेण तस्या विवाहश्च एकेन सौम्ययुवकेन साकं विहितः । ताञ्चासौ स्वभगिनीमिति कृतवान् । यथाकालं दिनकरस्यापि विवाहो रजन्या साकं जातः । रजनी तत्रैव एकस्मिन् महाविद्यालये प्राध्यापिका आसीत् । दिनकरः स्वपितरावपि स्वपार्श्वमानयत् तयोः सेवाकरणञ्च स्वीयं स्वपत्न्याश्च कर्तव्यं मन्यमानः सुखेन जीवनमयापयत् । गुरुपितृदेवादिऋणेभ्यश्चात्मानं मुक्तञ्चकार ।

★

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वप्नभंगः

"कदाचित् भारते रामसदृशाः- राजानो बभूवुः। राज्ञो भगीरथस्य महानताद्योतिका पतितपावनी गंगा अद्यापि तस्य महानतायाः साक्षित्वं ददाति। परन्तु हिन्दूराज्ञां हिन्दू समाजस्य च एका महती त्रुटिरस्ति या काष्ठकीटमिव समाजमिमम्भ्यन्तरतः- एव खादति विनाशयति च अहो नु खलु-अस्या जातेः समाजस्य चाज्ञता ? नास्य पण्डितेषु-एकता, न साधुषु न चापि नेतृवर्गे इत्थं किल प्रचण्ड-शक्तिपुञ्जः स्वयमेवात्मानं विनाशने संलग्नस्तथापि तज्ज्ञानं न करोति।

अत एव वैदेशिकशासकानामुत्साहो भारतप्रवेशस्य जातः। अत्रापि विशिष्टमेकमन्यदस्ति कारणम्। राजानोऽन्त्याः- ये श्रीराम-कृष्णवंशजाः आत्मानं कथयन्तो श्रान्ता न भवन्ति त एव स्वीय-संस्कृतिविनाशे सर्वप्रथमशक्तिशालिसाधनत्वं गताः। परस्परं तेषु-ऐक्यस्याभावस्तु आसीदेव। केचन यवनैः आक्रमणकारिभिः सम्मिल्या-न्यक्षत्रियराजभिः सह युद्धमकार्षुः, अपरे च गौराङ्ग - व्यापारिभिः सह मिलित्वा स्वीयां भारतमातरं दासताया दृढतमशृंखलासु निगड़या-मासुः। अनेनात्मावहेलनेन क्षत्रियाणां द्विजराज्ञाञ्चा शक्तिक्षीणता-मुपगता। भारतस्यातुलनीया सम्पत्तिः- वैदेशिकैर्लुण्ठिता। राजानश्च शनैः शनैः दासी कृताः।

महाभारतयुद्धानन्तरं भारतस्य शक्तिस्तथा क्षीणाऽभूत् - या क्रमशः क्षीणतामेव गता। अनेकजातिभिरत्र प्रवेशो विहितः। मुख्यतस्तु यवनैः स्वीयं प्रभुत्वं भारतस्यानेकराज्येषु संस्थापितम्। आरव्यभाषायाः सर्पाकाराक्षरलिपेश्च प्रभूतोऽत्र प्रचारो जातः। भारतीयं साहित्यं प्रज्वालितम्। एवमनुश्रूयते यदत्रत्यनालन्दा - तक्षशिलादिविद्या केन्द्र पुस्तकागारेषु षाण्मासिकी - अग्निज्वाला सर्वमपि संस्कृतसाहित्यं भस्म-साच्चकार। अहो नु खलु करुणकथा भारतीयदासतायाः। अनेन भारती-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यसंस्कृतेः प्रगतिशीलयात्रायां महद्विघ्नमभूत् । तथापि यवनसंस्कृतिः भारतीयसंस्कृतिविशेषताभिरात्मसात् - कृता । अस्तु नाम तत् ।

तत्पश्चात् - आंग्लै - स्वीयमोहजाले निबद्धाः अत्रत्याः यवनशासकाः क्षत्रियाश्च । सुरासुन्दरीमदघूर्णिताः राजानः चूर्णिता किल भोगवासनाभिः । अनेकराजभिः- आंग्लमहिलाभिः सह विवाहायोजनमकारि । एवं च शनैः शनैः भारतीया जनास्तु दासी कृता एवांग्लैः परन्तु भारतीया भाषाः अत्रत्या भूषाः, संस्काराः सर्वमपि इदं लोपितमेव । एवं किल जर्जरीभूतो ऽयं देशः सर्वथा पराधीनतां गतोऽभूत् ।

आंग्लानां यदा शासनं वृद्धिमगात्तु तैः भारतीयाग्रामधिकाधिकासम्मानं कृतम् । राजानो धूलिसात् कृताः । समाजे च परस्परं घृणा-द्वेषादयो प्रचारिताः । महिलानाञ्चासम्मानमस्मिन् देशे चरमसीमां प्राप्तम् ।

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः" अस्या विचारधारायाः समुद्घोषकः, समुपासकोऽयं भारतदेशस्तासामसम्मानकरणेऽग्रणिर्जातः । राजानोऽहर्निशं सुरापानेन नपुंसकी कृताः, पण्डिताः विद्वांसश्च रूढिवादग्रस्ताः स्वीयसंस्कृतिनाशे कारणानि बभूवुः । वर्णाश्रमव्यवस्था या किल लोकानां जीवनं सुखमयं स्यादनेनोद्देशेन स्थापिता आसीत् सा पारस्परिककलहद्वेष-युद्धकारणतां प्रापिता देशस्य यदा एतादृशी स्थितिर्जाता तदा आंग्लैः यवनैस्योऽवशिष्टा सम्पत्तिः- इतो नीता साहित्यमपि तैः स्वदेशे प्रापितम् । भारतस्योर्वरा मृत्तिका अपि-आंग्लैनीता किं नामधनधान्यस्वर्णरजतरत्नादिकम् । एवं क्षीणोऽयं देशः-यो पूर्वं विश्वगुरुरासीत् यस्य विषये च ऋषीणामयमुद्घोषो यत्—

"एतद्देश प्रसूतस्य सकाशात - अग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् - पृथिव्यां सर्वमानवाः ।।"

स एव देशः सर्वथा परमुखापेक्षको जातः । अशिक्षारोग शोक-रूढिवाद ग्रस्तोऽयमधः पातस्य चरमसीमां नीतोऽभूत् ।

एतत्सर्वं स्व पितामहस्य सकाशात् - श्रुत्वा रञ्जनः स्वपितामहं पृष्टवान् - यस्मिन् - देशे रामकृष्णादयो बभूवुस्तस्य देशस्य कश्चिदेको-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऽपि जनः स्वदेशजागरणस्य कार्याय सन्नद्धो न जातः।" नहि तात। एवं नास्ति अनेके जनास्तादृशा - आसन् - ये किल देशस्य गौरवरक्षाविषये चिन्तयन्ति स्म। तस्मिन् काले ते प्रयासानपि - अकार्षुः परन्तु यवनैरांग्लैर्वा ते ऽकालमेव मृत्युमुखे तथा निपात्यन्ते स्म यथाऽन्यः कश्चिदपि ज्ञातुं न शक्नोति स्म यत्कश्चिदपि देशरक्षायै, जातिगौरवाय, भारतीयसमाजोद्धाराय वा किमपि कृतवान्। गौराङ्गैर्हिंसायास्ताण्डवं सर्वत्र प्रसारितमासीत् - परन्तु कश्चिदपि तद्विषये न किमपि जानाति स्म। भौतिकरूपेण दरिद्री कृतोऽयं देशः विदेशिशासकैः। मानसिकरूपेणापि च लोका दरिद्रतायाः महान्धकारमयेऽज्ञानसागरे पतिताः।" इति प्रोवाच रञ्जनस्य पितामहः। विंशतिवर्षीयो रञ्जनः स्वपितामहमूचे। तात! मुष्टिमिताः आंग्लाः- कोटिशो भारतीयान् - विजित्य चिरमत्र शासनमकार्षुः। परन्तु भारतीयाः सुप्ता एवातिष्ठन्।" नहि प्रिय रञ्जन! भारतीयेषु स्वल्पैः जनैरेष प्रयासः सततं चालितो यत्देशोऽयं पुनरपि स्वाधीनो भवेत्। न केवल पुरुषा एवात्र गणनीयाः। परं स्त्रीभिरप्यत्राभूतपूर्वंशौर्यस्य प्रदर्शनं कृतम्। आस् "झांसी राज्ञी सर्वोत्कृष्टा बभूव।" तातपादाः! मया तस्या कथा पठिता आसीत् बाल्ये। सा किल वीरांगना आसीत् रञ्जन प्राबोचत्। 'एवमस्ति प्रियरञ्जन! परन्तु यदपि - इतिहासमद्य युष्माभिः पठ्यते पाठ्यते वा विद्यालयेषु तत्र केवलं सर्वत्र हिन्दूनां पराजयगाथा आक्रामकाणाञ्च विजयगानं विद्यते। तत्सर्वं पठित्वा भारतीयछात्राः स्वात्मानं सर्वदा हीनदृष्ट्या ऽवलोकयन्ति। अत्र त्वरया संशोधनकरणस्यावश्यकताऽस्ति" पितामहेनोक्तम्। रञ्जनस्तु पितामहं प्रति बहुस्नेहमधारयत्। स तन्मुखादधीतेतिहासोऽपि पुनरग्रे किमपि श्रोतुमिच्छति स्म। अतः प्रोवाच किम् महात्मगान्धिना एव स्वतन्त्रतायै जागृतिरानीता लोकेषु? नहि रञ्जन! इतः पूर्वमेव देशस्वाधीनताप्रयासाः यत्र तत्र जायमाना आसन्। परन्तु - ऐक्याभावे तत्र सफलता न भवति स्म। बालगंगाधर तिलकः सर्वप्रथम "स्वाधीनता ऽस्माकं जन्मसिद्धोधिकारः" इति समुद्घोषयाञ्चकार। पश्चात् महात्मना गान्धिना भारतीया ऐक्यसूत्रे निबद्धाः। ततश्च स्वाधीनताप्रयासास्तीव्रतामापुः। गान्धिमहात्मनो उपरि भारतीयविचाराणां पूर्णप्रभावः- आसीत् असौ यत्स्वयं करोति स्म तत्करणाय एवापरानपि कथयति स्म। तस्याचरण-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गीतायामपि अस्य कथनाचरणयुगलस्य प्रभावविषये प्रतिपादितमस्ति:-

"यद्यदा चरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।।"

सत्य- अहिंसाव्रतमसावपालयत् । तत्प्रत्यक्षचमत्कारश्च कोटिशो विश्वजनैर्भारतस्य स्वतन्त्रतारूपे दृष्टः ।

रञ्जनस्य पिता शशिधरो माता च सुलभा भगिनी गार्गी - एते सर्वे दिवसे स्व स्व कर्मणि निरता आसन् । रञ्जनस्तु अवकाशेषु विश्व-विद्यालयतो गृहमागत आसीत् । असौ दिवसे स्व पितामहेन साकं स्वदेशस्य प्राचीनतम-इतिहासविषये वार्तालापमकरोत् ।

——

रञ्जनस्य पिता शशिधरः प्रशासकीयमहाविद्यालये प्राध्यापकः आसीत् तन्माता च सुलभा उच्चविद्यालये प्रधानाध्यापिका विद्यते स्म । भगिनी कमला एकस्मिन् - औद्योगिकप्रतिष्ठाने प्रबन्धनिदेशकस्य सचिवा आसीत् । पितामहः सेवानिवृत्तः- गृहे स्वाध्याये - भगवदाराधने च व्यस्तो तिष्ठति स्म । एवं किल परिवारोऽयं सर्वथा सुखी आसीत् । रञ्जनोऽपि स्नातकोत्तरकक्षामुत्तीर्य शीघ्रमेव शिक्षातो निवृत्तो भविष्यति ।

सायंकालो जायमान आसीत् । शरदृतौ मधुरवातावरणे पक्षिणोऽपि स्व स्व नीडं प्रति उड्डयनमकुर्वन् । आकाशः स्वच्छस्तत्का-लधौत इव प्रतिभाति स्म । सर्वेऽपि रञ्जनस्य पारिवारिकाः गृहमागता अभवन् । आगत्य सायंकालीनचायपानं कृत्वा सर्वेऽपि सम्मिल्य भोजन-साधने संलग्नाः बभूवुः । शिमला नगरस्य 'जाखू' इति - स्थाने एतेषां निवासोऽभूत् । गृहं, यद्यपि भाटकोपरि गृहीतमासीत्तथापि तत्सर्वं सुविधासम्पन्नमासीत् । देवदारुवृक्षा यद्यपि - प्रायेण छिन्नाः गृहनिर्मातृ-भिस्तथापि यत्र तत्र ये वृक्षाः आसन् - तेभ्यः शुद्धवायुः प्रवहमाणो गृहेषु प्रविश्य कामप्यनिर्वचनीयस्फूर्तिं जीवनीयशक्तिञ्च प्रयच्छति स्म । पूर्वदिशि समुदितः शशिः- अनिर्वचनीयशोभया परितः प्रकाशं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शीतलताञ्च प्रासारयत् । स्वच्छाकाशे तारागणाः- विभिन्नान्-गणितीयकोणान् - निर्मान्ति स्म । जाखूतः शिमलाया अन्यभागेषु रात्रौ विद्युद्दीपा अपि नीलाकाशे प्रकाशमानतारागणा इव शोभन्ते स्म । रात्रौ नववादनकाले भोजनं पक्वमभूत् । सर्वैः पारिवारिकैस्तत्- भोजनफलकोपरि स्थापितम् । भोक्तुञ्च सर्वे सहोपविष्टाः । पूर्वमीश्वरार्पणं कृत्वा पश्चात् - भोजनं भुक्त्वा सर्वे परस्परं वार्तालापकरणे संलग्नाः । एकस्यैव परिवारस्य त्रियुगी एकत्रिता आसीत् ।

पितामह ! असंख्यानां देशप्रेमिजनानां सहयोगेन यद्यपि महात्मनः प्रयासैः- भारतोऽयं स्वतन्त्रो जातस्तथापि " शान्त्याः स्वतन्त्रता लब्धा, स्वातन्त्र्यप्राप्तौ - एकोऽपि विन्दुः- रक्तस्य नैव प्रावहत्, इति लोका वदन्ति, परन्तु विभाजनकाले तु रक्तनद्य एव प्रावहन् । नेदमेवापितु लज्जाजनकघटनानां बाहुल्यं तत्रासीत् अत्र श्रीमतः को विचारः, तात रञ्जन, अत्र मदीयमस्ति कथनमिदं यत् - आंग्लानां कूटनीतिः जयं लब्धवती यतोहि जिन्हा महोदयो यो हि यवनानां नेता आसीत् - असौ - आंग्लैः सह सम्मिल्य यवनानां कृते पृथक्राज्यं ययाचे । प्रथमं तेषां विचारोऽयमासीत् - यदत्रत्याः षट्शतादप्यधिकसंख्यायां राजानः सन्ति ते देशं स्वयमेव छिन्नभिन्नं करिष्यन्ति । परं तेषां विचारः च्छिन्नभिन्नोऽभूत् यदा बल्लभभाई पटेलस्य प्रयासैः प्रायेण सर्वेऽपि राजानः भारतविलयार्थं सन्नद्धाः जाताः । ततोऽपि विभाजनन्तु जातमेव महात्मनश्च देशैक्यस्य स्वप्नभङ्गो जातः । कश्मीरकर्तनायापि तदानीमेव प्रयासाः जाताः । परन्तु तत्रापि तत्कालीनगृहमन्त्रिणः पटेलस्य प्रयत्नैस्तच्छेदने ते समर्थाः न बभूवुः । यश्च रक्तपातो जातस्तत्कृते तु पाकिस्थानस्थिताः- धर्मान्धाः उत्तरदायिनः । परन्तु एष रक्तपातस्तु विभाजनानन्तरं जातः । तथापि - आंग्रजकानां पुनः स्थापनाकार्यं भारतेन योग्यतापूर्वकं कृतम् ।" मध्य एव शशिधरोऽप्यत्र स्वविचारानुपस्थापयामास - पितः ? यदा विभाजनमेव जातमासीत्तदानीं कथं न सर्वे यवनाः पाकिस्तानं प्रेषितास्तत्रत्या हिन्दवो वा कथं न भारतमायाताः "

पुत्र सीमादिसम्बन्धिनोऽनेकप्रश्ना अत्रासन् । तदानीं नेतॄणां विचारो विशेषतश्च महात्मनः चिन्तनमिदमासीद्यत् - देशस्य विघटनमिदं स्वल्पकालीनमस्ति । पारस्परिकद्वेष - मल - प्रक्षालनेन पुनरपि उभौ एकदेशे

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिवर्तितौ भविष्यतः, इति। परन्तु गांधी स्वतन्त्रताप्राप्तेः पश्चात् शीघ्रमेव लोकमिमं जहौ। तत्पश्चाच्च राजनैतिकधरातले विशुद्ध-भारतीयचिन्तनमपि - समाप्तम्" परन्तु पितः ? नेहरूस्तु गान्धिनः प्रमुखानुयायी विद्यते स्म। तेन कथं गान्धिनो विचाराणामवहेलना कृता ? "पुत्र शशिधर, उभयोः संस्कारशिक्षादिकारणाद्विचारेषु पूर्ण-मैक्यं नासीत्। तथापि श्री जवाहरलालस्य हृदयं सर्वथा स्वच्छमस्ति इति कृत्वैव गान्धिनाऽसौ प्रधानामात्यपदाय निर्वाचित आसीत्। आंग्ला-नाञ्चाप्यत्र महीयान् - सहयोगोऽभूत् व्यक्तित्वञ्च श्री नेहरोस्तदानी-मतुलनीयमासीत्। सामयिकसमस्याकारणादपि च भारतपाकयो-रैक्यं नाभूत्। कूटनीतिपरांगतैः गौरांगै र्यवनास्तथा प्रेरिताः येन ते भारतेन सह सर्वदा संघर्षमेव कुर्युः।' यदा देशः स्वतन्त्रोऽभूत्-स्वतन्त्रदेशे वयमधिकसुखिनो भविष्यामः- इत्यासीदस्माकं विश्वासः। अद्य स्वतन्त्रदेशोऽपि चत्वारिंशद् वर्षदेशीयः सम्वृत्तस्तथापि लोकानां दुःखानि प्रतिदिनं वर्धमानानि सन्ति न कश्चिदपि सुखिनमात्मानं मनुते। किमेतत्कृते एव भारतस्यानेकैः जनैरात्माहुतयः प्रदत्ता आसन्। स्वातन्त्र्यसंघर्षे देशस्य संस्कृतिरक्षायै एव तु असंख्यमातृभिः स्वीय-पुत्राणां, आगणितपरिणीताभिश्च स्वीयसौभाग्यदानमकारि किमेतत्कृते एव एते प्रयासा आसन् ? यथा यथा देशस्य स्वतन्त्रतावर्षाणि वृद्धिमुपयान्ति तथा तथा नवनवाः समस्याः, नूतनानि संकटानि, अदृष्ट-पूर्वाः व्याधयः अश्रुतपूर्वाश्च प्रकृतिप्रकोपाः परितः लक्ष्यन्ते। सर्वमवा-प्यापि सर्वेषां मनांसि - अशान्तिपूर्णानि सन्ति दुःखमनुभवन्ति" चेत्याह शशिधरः। सुलभापि स्वविचारानेवं प्राकटयत् – एवं तु न कथयितुं शक्यते यन्न कापि प्रगतिः कृता देशेन स्वतन्त्रतोपरान्तम्। पूर्वं सीवन-यन्त्रस्य सूचिकापि विदेशेभ्योऽत्र समायाति स्म। परन्तु अद्य भारत-निर्मितयन्त्राणां निर्यातोऽपि भवति। उद्योगैरपि प्रभूता प्रगतिर्विहिता। यातायातसाधनैर्न केवलं भूमिरेवापितु जलस्थलाकाशादयो ऽपि व्याप्ताः सन्ति। सुरक्षाक्षेत्रेऽभूतपूर्व - यन्त्राणि तन्त्राणि चाविष्कृतानि। सञ्चारमाध्यमानि कियद्विस्तारमकार्षुः। कठिनतमेषु पर्वतखण्डेष्वपि मार्गाणां जाल इवाभिव्याप्तः। लोकाः शोभनं खादन्ति, सुन्दरं धारयन्ति, सुखसुविधापूर्णगृहेषु च निवसन्ति। रञ्जनो गार्गी उभावपि स्वमातुः- विचाराणामनुमोदनमकुरुताम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पितामहस्तु बुद्ध्या अनुभवेन च सर्वेभ्यो ज्येष्ठ आसीत् विद्वानपि वर्तते स्म । सेवानिवृत्तो न्यायाधीशः । सर्वेषां विचाराणां श्रवणं कृत्वाहः—भवतां सर्वेषामेव विचाराः सत्यतथ्यपूर्णाः नात्र कोऽपि संशयः । तथापि सत्यमिदं यत्क्वापि त्रुटिर्जाताऽस्माकं स्वातन्त्र्योत्तरशासने । अत एव वयं नगरनिवासिनोऽपि प्राप्तासु सर्वसुविधासु सततं चिन्ता-ग्रस्ताः हिमाचलस्तु देवभूमिः । अत्र निःसन्देहं दैवी कृपा विराजते तथापि शिमलायां लघुपनगरेषु च यदा जलस्य ऊर्जासाधनानां स्वल्पता भवति तदा कियत्कष्टकरं भवति तत्सर्वम् ? महानगराणान्तु कथैव का तत्र केवलं सर्वोच्चवर्ग एव सुखसुविधापूर्णो भवति । परन्तु विविधरोग - ईर्षाद्वेषाहंकारादिभिरसावपि कथमिव परिपीडितः अस्ति-एतस्य कल्पना कार्या देशस्याधिकायभागो नगरविकासे एव प्रणष्टः । ग्रामास्तु - अद्यापि पूर्ववत् - पृष्टवर्तिनः सन्ति नात्र सन्देहोऽस्ति । अद्य महानगराणां नगराणां वा समीपे सन्ति ये ग्रामास्ते कामप्युन्नतिं कुर्वन्ति । अन्यथा प्रायेण- उपेक्षिताः सन्ति ग्रामाः । ये किलान्नेन शाकैः फलादिभिर्वा देशवासिनामुदराणि पूरयन्ति ते स्वयमर्धरोटिकाभक्षणेनैव सन्तोषं कुर्वन्ति । अत्र व्यवस्थाया दोषः ।" सत्यमस्ति पितः ? शशिध-रोऽप्याह मया गतवर्षे ग्रामाणां सर्वेक्षण कृतमासीत् । यद्यपि वैज्ञानिक-साधनानि कृषकाणां सेवायै उपयुक्तानि सन्ति तथापीदं विचारणीयम-स्ति यत्कस्यौषधस्य कियन्मात्रायां कदा क्षेत्रेषु धान्येषु, शाकेषु फलेषु वा दानस्यावश्यकता वर्तते ? एतन्न कोऽपि जानाति । तेन भूमेः उर्वरताया विनाशो भवति, धान्येषु शाकेषु फलेषु च विषविसर्पो भवति । उपयोक्तारश्च भयंकरव्याधिग्रस्ताः जायन्ते । ग्रामीणाः- दुग्धं नगरेषु विक्रीणन्ति स्वयं च दुग्ध-घृत-नवनीतादिभिः सर्वथा वञ्चिता-स्तिष्ठन्ति । कृतासु दुग्धवतीनां महिलानां परीक्षासु तथ्यमिदं समक्षमा-यातं यद्बालकाः मातृदुग्धेन साकमेव विषमपि पिबन्ति । किमिद-माश्चर्यकरं, पीड़ाकरं लज्जास्पदञ्चापि नास्ति यदस्माकं वायुः, जल-मन्नञ्च सर्वमपि दूषितं जातमस्ति तथाप्यस्माभिः अस्माकं शासकैश्च न कदापि चिन्तितं यद्भारतीयानामितिहासः कोटिवर्षपुराणोऽस्ति । अतस्तत् - समीक्ष्य प्राचीननवीनविषयानां ग्रहणं कार्यम् न चान्धेन नीयमानाः यथान्धाः इतिवत् - पाश्चात्यानुकरणमेव कार्यम् ।"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शशिधर ? शोभनमुक्तं त्वया न केवलमिदमेवापितु यद्वस्तुजातं विदेशेषु प्रतिबन्धितं भवति तत्प्रचलनमत्र प्रारभते। अमेरिका देशे धान्यफलशाकादिषु विभिन्नकीटाक्रमणनिरोधाय हानिकारककीटनाशकानां तेषां शत्रूणामुत्पादनं कृत्वा तेषामुपयोगः प्रारब्धो ऽपि। यतोहि प्रकृतिः स्वव्यवस्थां स्वयं सुचारुतया सञ्चालयति परन्तु मानवः ईश्वरीयशक्तिनिरादरं कुर्वन् त्रुटिपूर्णापराधान् करोति तत्फलञ्च भुङ्क्ते। किं नास्ति मूषकानां शत्रुः- मार्जारः, अथवा विषयुक्तवायुपानं वृक्षाः सर्पाः वा न कुर्वन्ति ? अतोऽत्र व्यवस्थाया दोषो वर्तते, चिन्तनस्य दोषो विद्यते, भारतीयविचार - साहित्यादीनामध्ययनाभावस्य तत्र विश्वासाभावस्य तत्रानुसन्धानकरणे उपेक्षाया वा फलमिदं सर्वम्, इत्याह पितामहः।" सुलभाऽपि स्वपत्युः श्वशुरस्य च विचारैः साकं साम्यं प्रकटयन्ती प्रावोचत - मया क्वचित्पठितमासीत् - यदस्माकं शास्त्रेषु सन्ति तादृशाः प्रयोगाः- यैर्ननु दैवीविपत्तिभ्यो मुक्तिर्भवति। किमिदं सत्यमस्ति ?" पितामहः- "किं नहि अकालवर्षा, जलौघागमनम्, अवर्षणम्, भूचालः, शलभाः, मूषकाः, एतत्सर्वं ईतिः" नाम्ना शास्त्रेषु वर्णितम् एतेषां निराकरणाय च विभिन्नप्रयोगाः शास्त्रेषु वर्णिताः। परन्तु तत्रानुसंधानकरणस्यावश्यकता वर्तते भारतीयविद्यासु - अनुसंधानकरणाय भारतीयप्रशासनं धनाभावमुद्घोषयति विदेशीयानामुच्छिष्टस्वादनाय च कोटिशो रूप्यकाणां व्ययं करोति।" गार्गी—पितामह ! ह्य एवास्माकमौद्योगिकप्रतिष्ठाने बम्बईनगरादेकश्चिकित्सकः समायातः। असौ समस्तभारते विख्यातः यद्यपि सोऽस्तिआंग्लपद्धतिचिकित्सकस्तथापि स्वयं आयुर्वेदीयौषधीनां प्रयोगं करोति। असाववोचत् यदांग्लौषधीनां प्रयोगेणैकस्य रोगस्य विनाशो भवति - अपरश्च तेनोत्पद्यते तस्मादायुर्वेदीयौषधानामुपयोगं करोमि।" शशिधरोऽपि पुत्र्याः समर्थनमकरोत। एतत्तु सत्यमस्ति। इदानीं विश्वस्य सम्मान्याचिकित्सका आयुर्वेदपद्धत्या महत्तां स्वीकुर्वन्ति परन्तु स्वदेशे तस्या कृते द्वितीयमेव स्थानं दीयते।"

"न केवलं वैज्ञानिकदृष्ट्या एवापितु आचारेण विचारेणापि च वयं प्रायेणाधो गच्छामः।" गार्गी प्रारभत्। अस्माकं कार्यालये येऽपि भारतीयाः समायान्ति तेऽक्षीणि विस्फार्यातीवदूषितदृष्टि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धारयन्ति । महिलानामसम्मानकरणस्य चानेकाः घटना महानगरेषु प्रतिदिनं जायन्ते । ग्रामेष्वपि सर्वोऽपि कार्यभारस्तासामेवोपरि भवति । कथं न भारतीयाः चिन्तयन्ति यत्तेषां गृहेऽपि कापि माता, पत्नी, पुत्री, भगिनी, वा वर्तते । दृष्टिदोषं कथं न ते शोधयन्ति ?

पितामहः- पौत्री - देशस्यायं दुर्भाग्योऽस्ति यद्देशे "सत्यं वद, धर्मंचर, मातृदेवो भव पितृदेवो भव आचार्यदेवो भव, एतत् - सर्वं उपहस्यते । असत्यं वद अधर्मं चर, मातुरवहेलनां कुरु पितुस्ताड़नमाचर, आचार्याणां प्रताड़नञ्च कुरु एतदेव प्रचारमधिगच्छति प्रसार्यते च प्रतिदिनम् । मातरः पितरः आचार्याश्चापि तथैव भ्रष्टाः सन्ति । यतोहि यादृशाः वयं स्मः तादृशी - एवास्माकं सन्ततिर्भविष्यति । परन्तु ईश्वरः सर्वं करिष्यति । शशिधरोऽपि देशं यथा वयं दिदृक्षव आस्मस्तत्तु दूरे बहुदूरे वर्तते ऽस्माकं तु स्वप्नभंग एव जातोऽस्ति इत्युक्त्वा मौनमास्थितः । क्षणाय परितो मौनमासीत । अन्ते पितामहः— उत्थाय- ईश्वरेच्छा गरीयसी - अस्माकं परिवारस्तु शोभनो वर्तते । यदि सर्वेषां परिवाराः एवं विधा एव स्युस्तु रामराज्यं कथं नागच्छेत् यान्तु भवन्तः सर्वे शयनायाद्य एकादशवादनवेला निशाया जाता । शुभरात्रिरिति वदन्तः सर्वे उत्थिताः । वातावरणे चैकः प्रश्नचिन्होऽवतीर्णः ।

——

अपरेद्युः सर्वे स्व स्व कार्योपरि गताः । गार्गी-अपि स्वकीयोद्योगप्रतिष्ठाने प्राप्ता । प्रबन्धनिर्देशको गिरीशस्तस्या प्रकोष्ठमकस्मात्प्रविष्टः । गार्गी तत्क्षणमुत्थाय, "किमादेशोऽस्ति श्रीमन् ! कथमद्य भवताऽत्रागमनस्य कष्टमकारि घण्टिकया सूचनीया आसम् इति प्रोक्तवती । गिरीशस्य मुखमण्डलोपरि श्वेतरक्तवर्णौ धावनिकामकुरुताम् । असौ समायातस्तु - अवश्यं प्रकोष्ठे परन्तु वार्तालापं कथं प्रारभेदिति निश्चयकरणे किञ्चित्कालमग्रहीत् । पश्चादुवाच - अद्य भवत्या (काफी) कृष्णपेयपानं मया सहाभ्यन्तरं मत्कक्षे कार्यं मध्याह्नकाले । गार्गी शिरश्चालनेन स्वीयां स्वीकृतिं ददौ । गिरीशः स्वकक्षं प्रविष्टः । स्वस्या सार्धैकवादनकालो जातः । गार्गी स्वच्छमनसा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्भयमभ्यन्तरं प्रविष्टा गिरीशस्य प्रकोष्ठे। गिरीशः सम्मुखस्थितासनोपरिसमुपवेशनार्थमकथयत्। गिरीशोऽपि कुलीन आसीत्। अतः कथमसावधुना स्वमनोगतं प्रकाशयेदिति चिन्तयन् - आसीत् तदैव पेयं गृहीत्वा परिचारकः समायातः। कपं मुखेन संयोजयन् गिरीशोऽन्ते कथनसाहसं यथाकथञ्चिदकरोत्। 'गार्गी ! चिरान्मया चिन्त्यते स्म यदेकदा तत्र भवत्या सह विवाहविषये वार्तालापं कुर्याम्, परन्तु साहसएव न जातः। यदि कुत्रचिद्भवत्याः कश्चित्पतिर्नैव निर्वाचितस्तर्हि अहमुपस्थितोऽस्मि।" तथैव गाम्भीर्येण गार्गी उत्तरं ददौ। "श्रीमन् ! न मया कश्चिदपि निर्वाचितः। न चास्माकं परिवारे तादृशी परम्परा एव वर्तते स्वयं निर्वाचनस्य। यदि निर्वाचनं स्यादपि तर्हि तत्किल मातृ-पितृ सूचनानन्तरमेव। अतो यदि भवान् मया साकं सम्बन्धमिमं स्थापयितुमिच्छति तु मम पितरौ प्रथमं प्रष्टव्यौ भवता स्वयमथवा भवतां मात्रा पित्रा वा।" मदीयपितरौ तु वर्षाणि पूर्वं लोकमिमं त्यक्तवन्तौ। अतस्तेषां गमनं तु कथं भवितुमर्हति। आम् - अहमस्मि यदि भवती अनुमोदयति मम प्रस्तावन्तु - अहं स्वयं भवत्याः पितरौ प्रार्थयिष्यामि; गिरीशेनोत्तरितम्" कृष्णपेयकपौ रिक्तावास्ताम् गार्गी स्व प्रकोष्ठमायाता।

द्वितीयदिवसे गिरीशः गार्गीगृहं प्राप्तः। तत्र तस्या पितृपितामहपार्श्वे च स्वीयप्रस्तावमुपस्थापयामास। सर्वेषाँ सहमत्याश्च सम्बन्धोऽयं जातः। वैदिकरीत्या यत्र यौतकस्य नामापि नासीद्, विवाहोऽयं जातः।

—

सुलभा एकस्मिन् दिने विद्यालयात्सायंकाले गृहमागता। गृहमागत्य प्रतिदिनन्तु सा चायनिर्माणं कृत्वा स्वयमपि पिबतिस्म स्वश्वशुरं पतिं पुत्रञ्चापि पाययति स्म? परन्तु - अद्य न तथा जातम्। सा गृहं प्राप्य यथा आगता तथैव शय्यायां निपतिता। शशिधरस्त्वरया गत्वा पप्रच्छ, सुलभे? किमिदं कथं सुप्तासि? किमु स्वास्थ्यं शोभनं नास्ति। ज्वरस्तु नास्ति। इत्यादिप्रश्नानकरोत् सुलभाऽपि विश्रम्योत्थाय च। नास्ति कोऽपि रोगो यो मां पीडयेत् परन्तु महामारी प्रसृता यया देशस्यैव विनाशो भविष्यति।" कुत्र कथम्वेति पुनरपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रश्नानकरोत् शशिधरः । मम विद्यालयछात्रैरपि मादकद्रव्यसेवनमारब्धम् । तत्सेवनेन कथं युवका युवत्यश्चास्माकं देशस्य नष्टा भविष्यन्ति - तत्सर्वं विचिन्त्य वेपते शरीरम् - कम्पते च हृदयम् सर्वमिदं सुलभा श्वासेनैकेन एवावर्णयत् ।

"इदमेव फलं भविष्यति वैदेशिकानामन्धानुकरणेन, अनुशासनहीनताप्रचारेण, भ्रष्ट - प्रशासनस्यायोग्यतया च । एष रोगस्तु विश्वविद्यालयेषु महाविद्यालयेषु वा भयंकरतां स्वीयां प्रकटी चकार । इदानीं उच्चविद्यालयेष्वपि चेदस्य प्रसारो जायते तदा नास्ति कोऽपि त्राता प्रशासनं यावत् - सामाजिक - व्यक्तिगत - दोषनिरासाय कठोरदण्डदानं न करोति, एवं विषमादकद्रव्यसेवनविक्रयादिकं न रोधयति मादकद्रव्यव्यापाररतान् - च न गोलिकाप्रहारेण मारयति तावन्न दोषोऽयं दूरो स्यात् शशिधरोऽवदत् ।

★

डा. शशि तिवारी सम्मानिता

"लखनऊ विश्वविद्यालयीयसंस्कृतविभागस्य भूतपूर्वछात्रायै, सम्प्रति दिल्लीविश्वविद्यालयान्तर्गतस्य मैत्रेयीमहाविद्यालयस्य वरिष्ठप्राध्यापिकायै डा० शशितिवारी महोदयायै तस्याः 'ऋग्वेदीय आप्रीसूक्त' इति वैदिकग्रन्थाय राजस्थानसंस्कृत–अकादम्या 'भारती–मिश्रा–पुरस्कारः (अखिल–भारतीयपुरस्कारः) उपात्तः । शताधिकैकसहस्ररूप्यकमितस्य राशेः पुरस्कारोऽयं एकोननवति – नवतितमाब्दाय राजस्थानराज्यस्य शिक्षामन्त्रिणा हरिकुमारऔदिच्यमहाभागेन तस्यै एकस्मिन् भव्ये समारोहे जयपुरे जौलाईमासस्य त्रयोदशेऽहनि समर्पितः । वर्धापनानि समर्पयामः ।

— सम्पादकः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रियदर्शिनी

इदानीन्तनोत्तरप्रदेशस्य प्रयागनगरे भारतस्य प्रख्यातो वाक्कील: पं श्री मोतीलाल नेहरूः प्रतिवसति स्म। देशस्य परतन्त्रतायुगे ऽपि एकदा आंग्लानां रेलगन्त्र्यामारूढ: । तदा आंग्लैर्विरोधो विहित: यदेको भारतीयस्तया रेलगन्त्र्या: गन्तुं न शक्नोति यस्यामांग्ला: यात्रामकुर्वन् । परन्तु मोतीलालेन तु रेलगन्त्र्याः पूर्णमेवैककक्षं क्रीतमासीत् । आंग्लै: बहुविरोधो विहित: परन्तु तेनैव यानेन श्री मोतीलाल नेहरूरपि देहरादूनं प्राप्तः ।

तस्यैव लिपिक:- आसीत् - श्रीमुबारकः। मुबारको यद्यपि साधारणलिपिक:- आसीत् परन्तु - आनन्दभवनस्य — यस्य निर्माणं श्री मोतीलाल नेहरुणा बहुव्ययेन कृतमासीत् यत्र च सर्वा: सुविधा: सुप्राप्या:- आसन्–सर्वविधप्रबन्ध- व्यवस्था ऽस्यैव लिपिकस्याधीनासीत् । मुबारकस्य सम्मानमपि गृहेऽस्मिनति - अधिकमासीत् । स्वयं मोतीलाल :- एनं स्वभ्रातरमिव सम्मानं स्नेहञ्च प्रददातिस्म । एकदाऽयं रुग्णो जात: रोगोऽपि भयंकर: । अर्बुद: (कैंसर) आसीत् । परन्तु केनापि तस्यपार्श्वे नेद कथितं यत्त्वं भयंकररोगेण पीड़ितोऽसि । तथापि मुबारिक लिपिक: (मुन्शी) स्वयमिद जानाति स्म यत्तस्य जीवनं स्वल्पमेव वर्तते। श्री जवाहरलालस्य पत्नी कमला तदानीं गर्भवती - आसीत । मोतीलालोऽपि सायं काले लिपिकमेनं द्रष्टुं तस्य स्वास्थ्यविषये च विशेषज्ञानं प्राप्तुं तस्य गृहं गत्वा किञ्चित्कालाय तत्रोपविशति स्म । मुबारकस्तु चिन्तामुक्त:- आसीत । एका पत्नी एकश्च पुत्र। । एष एवासीत्तस्य परिवार: । तत्पश्चादपि मोतीलालो जवाहरलालो वाऽनयो: पालनं पोषणं च सम्यक् करिष्यत इति तस्य दृढविश्वास:- आसीत्। एकस्मिन् दिने मुबारकस्य स्थिति: चिन्तनीया जाता। मोतीलाल: पार्श्वे उपविष्टोऽभूव। मुबारकोऽवदत्- 'पण्डितमहोदया: ? नाहं श्री जवाहरलालस्य पुत्रमुखावलोकनात् तस्मै आशीर्वददानात् च पूर्वं गमिष्यामि। अतो मम जीवनस्य चिन्ता न कार्या।" एतत्श्रुत्वा मोतीलालस्य नेत्राभ्यामश्रुधारा प्रावहत् कतिप-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यदिवसानां पश्चात् - कमलानेहरू सन्ततिमुत्पादयामास । धात्री (नर्स) पाटलवर्णशालेन समाच्छाद्य श्रीजवाहरलालस्य सन्तति अंके निधाय आनन्दभवनस्य परिसरे तस्मिन् लघुगृहे नीतवती यत्र लिपिक: स्वपरिवारेण साकं न्यवात्सीत् । यथैव लिपिक: सन्ततिमिमां ददर्श मोतीलाल नेहरू स इत्थमाह—"भ्रात: ? बर्धापनानि वहूनि, अहं सर्वशक्तिमन्तं भगवन्तं (खुदा) प्रार्थये यदयं पुत्रस्तथैव सुयोग्यो भवेत्-यथा जवाहर: स्वयमस्ति । साकमेव यथा भवद्भिरयं सुयोग्य: पुत्र: प्राप्तस्तथैव जवाहरोऽपि अनेन धन्यो भवेत् । यदा धात्री तस्मात् स्थानात् - गमनमकरोत् तया श्रुतं यत् लिपिक: कथयतिस्म– "प्रभु-कृपया मोतीलालस्य पौत्र: कुलमिमं प्रकाशयिष्यति।" तत्पश्चात् लिपि-केन यदक्षिणी निमीलिते तु न कदापि ते पुनरुद्घाटनमापतु: । न केनापि समय एव प्राप्तो लिपिकसूचनाय यज्जवाहरस्य गृहे पुत्रस्य नैवापितु पुत्र्या: जन्म जातम् ।

पुत्र्या: नाम करणं 'इन्दिरा' कृतमभूत । स्व मातु: सकाशात्तया प्रतनुदेहो, दीर्घे लोचने पितु: सकाशाच्च नासिका चिबुक तथा च विशिष्टा नमनीयता शारीरिककष्टसहनशक्ति: एतत्सर्वं रिक्थरूपे-णैव प्राप्तम् - शरीरस्यैव प्रभावो मानसविकासोपरि - अपि पतति । अत एव मातु: लज्जाशीलता संकोचश्च तस्यामासीत् - परन्तु सहैव शान्तभाव:, कठिनसंकटानां च साहसेन सम्मुखीकरणं ततश्च तेषां निवारणमिदं पितुर्गुणरूपेण तया गृहीतं स्यात् । श्री जवाहर: युवकेभ्य: स्वहस्ताक्षरदानकाले - लिखति स्म :"संकटेषु जीवन शिक्षणीयम्" इन्दिरा स्वयमिदमाह यत्तस्या पितृचरणोऽपि लज्जाशील: आसीत् । स्वभावश्चायं तेषामन्तकालं यावत् तथैव स्थितोऽभूत् । इन्दिराया जीवने एकतस्तु लज्जाशीलता तथाऽन्यत्र रक्तपिपासूनां सम्मर्दरोधनशक्तिरपि आसीत् । एतद्द्वयी तस्या जीवने मातु: पितु: सकाशात्समायाता । स्पष्टमस्ति यदनयोरुभयो: स्वभावभिन्नता आसीत् तथापि - इयमुभयोर्जवाहरकमलयो: जीवनपूरका सिद्धाऽभूत् । आस्या-मेव द्विविधविचाराभ्यां इन्दिरायामेकत:- उत्साह – गतिशीलतयो: तथा चापरतो मूकश्रद्धाया भावना - स्थापनमकारि ।

तस्या: परिवेषेऽपि वंश परम्पराया दर्शनं कर्तुं शक्यते ? आनन्द-भवनस्य परिसरे तस्या: पालनं पोषणञ्च जाते । आनन्दभवनम्-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भव्यप्रासाद एवासीत् – श्वेतचिक्वणपाषाणानां तलानि, विशाला:-आलिन्दा:, पुष्पाणामगणितकेदारिका:, सुसज्जितमुद्यानं प्रत्येकवस्तुषु च मोतीलालस्य प्रखरव्यक्तित्वस्य छाया ।

इन्दिरा परिवारसदस्यानां प्रभावेन पूर्णा आसीत् । एकदा कश्चित्-पत्रकारस्तामपृच्छत् "भवत्या उपरि कस्य प्रभावोऽधिक: पतित: ?" सा आह - बाल्येऽहं स्वपितामहस्य प्रभावेन युक्ता आसम् । यतोहि मम पितामह: परमोदार: आसीत् । एवं प्रतीयते स्म यथा तेन समस्तसंसार: स्वमनसि स्थापित: । तस्य मुक्तहासो मह्यं बहुरोचते स्म ।

असौ पूर्णरूपेण कुलपति: आसीत् । स्व सन्तति पुत्रसन्ततिञ्चासौ-अतितरामकामयत् । प्रेमवर्षा तेषामुपरि - अकरोत् । तस्येच्छा आसी-द्यत् - तदीया सन्तति: सर्वसुविधासम्पन्ना स्यात् । एतस्य कृते तस्य पार्श्वे साधनान्यपि - आसन् । विशालं प्रासादाकारं भवनम्, स्वपुत्र-पुत्रीणां कृते सेवकसेविकानां रक्षणम्. गृहेऽपि सुयोग्यशिक्षकशिक्षिकानां प्रबन्ध: । महार्घविद्यालयछात्रावासेषु च स्वसन्ततिप्रेषणमित्यादि: " एवं विधवातावरणे इन्दिरा एका समृद्धपरिवारस्य विकृता कन्याऽपि भवितुमर्हति स्म । श्री मोतीलालो विचारेण पूंजीवादमनुकरोति स्म । जवाहरलालस्य इयं चिन्ता आसीद्यत् - कथं किल इन्दिराया: शिक्ष-णस्य व्यवस्था तथा स्याद्यथा साधारणभारतीयस्य तदानीमासीत् । यतोहि श्री जवाहरलाल: समाजवादिविचारै: प्रभावित: आसीत् । असौ इन्दिराया: पालनं, पोषणं शिक्षादिकञ्च तथा चिकीर्षति स्म यथा तदानीन्तन: साधारणभारतीय: ।

स्व जीवनविषये पत्रकाराणां प्रश्नोत्तरकाले एकदा इन्दिरया कथि-तमासीद्यत् ममोपरि बाल्ये पितामहस्य ततश्च मम मातु:, पितु: पते: पुत्रयोश्चापि प्रभावो निपतित: । श्री रवीन्द्रनाथठाकुरस्य श्रीमहात्मन: गान्धिन: प्रभावमपि सा स्वजीवनेऽनुभवति स्म । तया कथितमासीत्-"यदाहं शान्तिनिकेतनं गता तु तत्र श्री रवीन्द्रनाथेन सौन्दयस्य कलायाश्च अद्भुतद्वारोद्घाटनं मम कृते कृतमासीत् । श्रीमती बकील-स्यापि सा प्रभावं स्वी करोति स्म । श्रीमतीबकील तस्या बाल्यस्य परिचारिका आसीत् । यदा तस्या पितरौ तत्र न भवत: स्म तदा श्रीमती बकील एव इन्दिराया: सर्वविध - उत्तरदायित्वं सम्भालयति स्म ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इतोऽप्यधिकः प्रभावस्तु - इन्दिराया उपरि तत्कालीनराजनैतिकसंघर्षस्य, तस्य विप्लवकारियुगस्य च पतितः स्याद्यदा कश्चिदपि कथयितुं समर्थः - नासीद्यत् - सर्वविधसुविधासम्पन्नः मोतीलालः स्वीयं सुखं परित्यज्य स्वतन्त्रतान्दोलने लीनो भविष्यति, श्री जवाहरलालश्च पुस्तकैः सुसज्जितं स्वकार्यालयं, आनन्दभवनञ्च परित्यज्य गमिष्यति भारतस्य ग्रामेषु धूलिं लिहन् - आतपे, वर्षासु शैत्ये च कारागारेषु वा निक्षिप्तो भविष्यति। कदाचिदुभावपि- इन्दिराया पितरौ सहैव कारायां निक्षिप्तौ भविष्यतः। ततश्च वराका इन्दिरा स्वमातृपितृ - अंकसुखमपि न प्राप्स्यति।

इन्दिराया जन्म १९१७ खीष्टाब्दे यदा जातम् - तदानीं रूसदेशे महीयसी क्रान्तिरुत्पन्ना। द्वितीयविश्वयुद्धश्चापि जातः आसीत्। समस्तभारते महात्मनो गान्धिनः राजनैतिकक्षेत्रेऽवतरणात्—आन्दोलनानि, हरितालः, संघर्षाश्च सर्वमिदं सर्वत्र प्रसृतमासीत्। इदानीमेव श्री जवाहरोऽपि राजनैतिकान्दोलने ऽवतीर्णः। "जलियांबाला बाग" स्थानेऽस्मिन्नेव वर्षे पाषाणहृदयैरांग्लै गौलिकाप्रहारः कृत आसीत्। जवाहरोऽपि पञ्जाबप्रदेशस्य भ्रमणं कृत्वा स्वगृहं प्राप्तः आसीत्। स्वपरिवारे तेन अतीव क्रुद्धमुद्रायां जलियां वाला बाग काण्डस्य भीषणनरसंहारस्य च कथा कथिता आसीत्। प्रवेशाय वहिर्गमनाय च तत्र केवलं द्वारमेकमासीत्। आंग्लैः 'जलियां वाला बाग" स्थाने एकत्रिताः परं सहस्रा लोकाः, स्त्रियो, वृद्धाः बालाश्च सर्वेऽपि निहताः। द्वारोपरि - एवाग्नेयास्त्राणां मुखानि समुद्घाटितानि भस्मसात्कृताश्च निरपराधाः- निश्छलाः साधारणाश्च भारतीयाः। एवं किल मधुरगीतिकालयस्थाने प्रियदर्शिन्या जागरण स्वापश्च संघर्षघोषैरेवाभवत्।

इन्दिरायाः पितामही स्वरूपरानी परमधार्मिका, सभ्या सुन्दरी चासीत्। अस्याः प्रभावोऽपि - आनन्दभवनस्य बालेषु पर्याप्तमात्रायामासीत्। अस्याः पूजा, पौराणिककथाश्च सर्वानपि तथा प्रभावयामास यथा भारतीयसंस्कृतेः स्वरूपं सर्वेषां मनसि दृढरूपेणाङ्कितमासीत्। भारतीयसंस्कृतेश्छाया तेषु स्पष्टमाभासते स्म।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रीष्मर्तोः दीर्घतमदिवसाः आसन् । विशालम् - आनन्दभवनं शून्य-मासीत् । केवलं परिचारिकया सह दिवसं कथं यापयेत् ? मोतीलालस्य कार्यालयप्रकोष्ठे परितः पिहितेष्वपि वातायनेषु न जाने कुतो धूलिः प्रवेशः। सर्वाणि पुस्तकानि धूलिसात् - जातानि। तत्रैव विशाललेखन-फलकमासीत् - यस्योपरि स्थूलफलकाच्छादनं प्रकीर्णं भवतिस्म । रक्तशिरोवेष्ठनयुतआरक्षिपुरुषैर्नीताबुभावपि कारागारे च निपातितौ - मोतीलाल जवाहरौ । गृहस्य सर्वा अपि महिलाः वर्वाबद्ध - गोष्ठीषु गता आसन्, ततश्च आंग्लवस्त्रहोलिकादहनमायोजने व्यस्ताः आसन् । वराकी प्रियदर्शिनी किं कुर्यात् । तया बहु प्रार्थितं – "यदहमपि भवतीभिः सहैव नेया ऽहमपि त्रिरंगध्वजं हस्ते कृत्वाऽग्रे ऽग्रे चलिष्या-मि " परन्तु न कयाऽपि तस्या वार्ता श्रुता ।

सा गृह एव स्वक्रीड़नकैः शालभञ्जिकाभिः सह क्रीडितुमारब्धवती । उत्तरप्रदेशस्य सर्वविधजनास्तस्याः क्रीडनकेषु - आसन् । आखेटकरः, तस्य सहयोगिनो जनाः तिलकधारिणः पण्डिताः, नासिकोपरि लम्बाय-मानोपनेत्रधारिणोऽध्यापकाः, राजान , राजमहिष्यः. मार्जकाः, कार्या-लयस्य चर्मपाशिनः, गृहभृत्या हस्ते गृहीतलगुड़ः- आरक्षिपुरुषश्चापि-एते सर्वे तस्याः क्रीड़नकसमूहे आसन् । काचन बहुमूल्यशालभञ्जिकाः प्रियदर्शिन्याः पितामहेन इंगलैण्डात् - क्रीत्वाऽस्यै दत्ताः आसन् । सर्वासां शालभञ्जिकानां विभिन्नवर्णानां वस्त्राणि कमप्यद्भुतमाकर्षणं धारयन्तिस्म । प्रियदर्शिन्या इयं क्रीड़ा कमपि तादृश रूपमधारयत् -यां-यदि तत्रत्यो मण्डलाधीशोऽवलोकयिष्यत्तु - नूनमेव तामपि कारागारे ऽस्थापयिष्यत् । कुरुण्टिकानां गृहस्य वाह्यभागे सर्वा अपि भारतीय-पांचालिकाः, प्रहरिण्यः स्थिता आसन् । गृहाग्रे कर्गजस्य त्रिरंगध्वजो गौरवेणान्दोलितोऽभवत् । राजा, राज्ञी, मार्जकः, आखेटकः साधुः सर्वे तत्रोपस्थिताः आसन् । वैवाहिकवस्त्राणि धारयित्वा वरो वधूश्च सत्याग्रहिणां मध्ये स्थितौ कुरुण्टिकानां गृहस्य वाह्यभागे प्रहरि-रूपेणोपस्थापितौ आस्ताम् । भारतस्यायं स्पष्टतरो महत्वपूर्णश्च प्रतीकः आसीत् । प्रियदर्शिनी शालभंजिकाभ्यः आदिष्टवती- पुत्रिकाः !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्मरणीयमिदं भवतीभिर्यद्भवत्यः सत्याग्रहिण्यः स्थ। आरक्षिपुरुषम्यः स्वल्पमपि न भेतव्यम्।"

ततस्तया बधूहस्ते कर्गजस्य स्वयं चित्रितो त्रिरंगध्वजः समर्पितः। सा उभयतो पुत्रिकादलद्वयमग्रेऽप्रेषयत्। इत्थं किल तस्या क्रीडायामपि-आक्रोशः समुत्पन्नः। सा सत्याग्रहदलं प्रोत्साहयत्- "अग्रे गन्तव्यं न भेतव्यम्। एवञ्च उभावपि दलौ आरक्षिपुरुषाणां सत्याग्रह संलग्नानाञ्च कीड़नकानाम् सम्मुखमायातो यथा यथा दलद्वयी परस्परं नैकट्यमाप्तवती तथा तथा प्रियदर्शिनी उच्चैस्तरामुच्चचार- "महात्मनो गांधिनः जयः. हिं दूमुस्लिमभ्रातृत्वं जयतु, भारतमातुर्जयोऽस्तु, इति। एवं सत्याग्रहिणां समूहोऽग्रेऽगच्छत्। लौहनिर्मित—आरक्षिपुरुषेषु च सत्याग्रहदलस्तथा पतितो यथा सर्वेऽपि लौहनिर्मित- आरक्षिपुरुषाः-धराशायिनो जाताः? तेषां पातेन तादृशी ध्वनिरुत्पन्ना यया सुप्तापि प्रियदर्शिन्या वृद्धा परिचारिका तत्क्षणं जागृता तत्र च समायाता यत्र प्रियदर्शिन्या क्रीडा प्रचलमाना आसीत्।

देशप्रेमस्य देशसेवायाः, भारतीयजनसेवायाश्च भावना प्रियदर्शिन्यां कियन्मिता आसीत् इति - अस्याः घटनायाः दर्शनेन स्पष्टं भवति।

राष्ट्रियान्दोलनस्य राजनीतिस्तस्या बाल्यस्य सर्वतो पुराणी स्मृतिरस्ति। तस्या जीवनस्येदमभिन्नाङ्गमपि विद्यते। यतोहि तस्याः परिवारस्य प्रत्येकसदस्यस्तस्मिन् संग्रामे सक्रियभागमग्रहीत्। दुग्धमुखी - अपि साऽनेन वातावरणेन पर्याप्तप्रभाविताऽभूत्। एवं किल तस्या बाल्यं गतम्।

(३)

इन्दिराया पिता कृषाणेषु भ्रमणमारब्धवान्। "ग्रामेषु गमनं, ग्रामीणैः साकं भोजनकरणं, तेषामेवोटजेषु निवासस्तैः साकं च वार्तालापः।" अतः पितुरपेक्षया पितामहः- इन्दिराया विशेषध्यानमरक्षत्। यदा पितामहः- कलकत्तानगरे राजनैतिकसम्मेलने एकस्मिन् भागग्रहणाय गतः— आसीत्तदा ततः द्विवर्षीय - इन्दिरायै एकं शकटमानीतवान्। एकदाऽसावस्या विषये स्वपुत्रमलिखत् "अहं सर्वदा इन्दिराया विषयेऽनवरतं चिन्तयामि। सा साधुताया मूर्तिरस्ति। तस्या कल्पनां कृत्वा मम मनः शान्तिमुपैति। कथं किल सुगमतयैव स्वल्पमात्मचिन्त-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेन मूर्तिपूजावत् - अन्यविषया अपि समुचिताः प्रतीयन्ते येऽस्माकं संस्कृतेरङ्गभूताः परन्तु - आधुनिकसभ्यता यान् निराधारान् कथयति अन्धविश्वासो वाऽयमिति वक्ति इन्दिराया उपरि विशेषध्यानदानस्यावश्यकता वर्तते; यतोहि तस्याः स्वास्थ्यं शोभनं नास्ति ।"

इन्दिरा चतुर्वर्षाणामपि नाऽभूदधुना यदा तस्याः पिता, पितामहश्चोभावपि कारायां प्रेषितौ । तया प्रथमराजनैतिकप्रकरणं स्वपितामहस्याङ्के उपविश्य दृष्टम् । श्री मोतीलालः- अस्य मिथ्याप्रकरणस्य दर्शनं कृत्रिमगाम्भीर्येणावलोकयत् । यतोहि तस्य मतेनाभियोगोऽयं पूर्णतो मिथ्या आसीत् । अस्यैव पुरातनमित्रं श्री बैनर्जी महोदयोऽत्र प्राड्विवाकः- आसीत् प्रशासकीयपक्षतः ।

असौ पूर्णप्रयासेन साधयितुमिच्छति स्म यत् - मोतीलालः-राजद्रोहसंलग्नायाः कांग्रेससंस्थाया एकः सेवकोऽस्ति । अस्य विचारस्य प्रचारः (इण्डिपैण्डैण्ट) स्वतन्त्र' इतिनामके स्वीयपत्रे मोतीलालेन स्वयमपि कृतः । ततोऽपि न्यायालयकार्यमावश्यकमासीत् साक्षिणां शपथोपरान्तं मोतीलालः षण्मासकृते कारायां प्रेषितोऽभूत् । पञ्चशतमुद्राणां च दण्डविधानमपि घोषितमासीत् । वराकी इन्दिरा तस्याङ्कात्गृहीता कारयानेन च गृहं प्रेषिता । पितामहस्यांकत्यागकाले सा रोदितुमियेष परन्तु पितामहेन पूर्वमेवोक्तमासीद्यत् पृष्ठतो रोदनमशोभनं भवति । अतस्त्वया न रोदितव्यम् । धैर्यं धारणीयम् ? सा पितामहस्याज्ञां शिरसि - अधारयत् । तस्याः पिताऽपि कांग्रेससंस्थायाः हरितालसम्बन्धि प्रपत्रान् लोकेषु गृहेषु च वण्टयन् - निगृहीतोऽभूत् । तस्मै अपि षाण्मासिकः कारावासस्तथा च षट्शतरूप्यकाणामार्थिकदण्डः समुद्घोषितः । एवमुभावपि पिता पितामहश्च कारायां गतौ । परन्तु उभाभ्यामेवार्थिकदण्डदानतो निषेधो विहितः । यतोहि तौ आंग्लानामधिकारमिममस्वीकृतवन्तौ । आंग्लप्रशासकैरनयोः सम्पत्तिरधिगृहीता ।

आंग्लानां दमनचक्रमिदानीमानन्दभवनस्य प्राङ्गणमायातम् । दीर्घकठोरचर्मपादुकायुताः आंग्लानामारक्षिपुरुषाः प्रथमं भवनस्य इतस्ततः सुन्दररूपेण निर्मितानां कुसुमकेदारिकानां मर्दनमथ च कोमलशाद्वलस्थलानामभिनाशनमकार्षुः । ततोऽभ्यन्तरं प्रविश्य महार्होपवर्हाणि,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बहुमूल्यविविधरंगपुष्पसुसज्जितानि - आस्तरणानि, सर्वमिदं वस्तुजातमेकत्री कृत्य द्रव्यवाहनोपरि संस्थापयन्ति स्म । वराकी चतुर्वर्षीया इन्दिरा मुष्टिद्वयं बद्ध्वा एभिरारक्षिपुरुषैः सह वाग्युद्धे व्यस्ताऽभवत् । किमर्थं लुण्ठ्यन्ते भवद्भिर्मम पितामहस्य सर्वमिदं वस्तुजातम् । आरक्षिपुरुषाश्च अट्टहास कुर्वन्तस्तस्या उपहास चक्रुः । अनेन प्रकारेण इन्दिराया राजनैतिकशिक्षणं राजनैतिकक्षेत्रेण साकं च तस्याः सम्बन्धस्थापना जाता । चिन्तामुक्तबाल्यस्य साधारणक्रीडाभ्यस्तयाऽन्तिमप्रणामो विहितः । यतोहि समयस्यास्य पश्चात्तया संघर्षेषु - एव जीवनयापनं करणीयमासीत् ।

भयंकरावर्तनपरिवर्तनयोर्दिनानि आसन् तानि । अस्य राजनैतिकान्दोलनस्य यद्यपि स्पष्टरूपं ज्ञातुं तस्याः वयो नासीत्तथापि साऽवलोकयत् - यत्तस्याः समस्तपरिवारोऽत्र संलग्नोऽस्ति । आनन्दभवनस्य परिसरात् साऽवलोकयत् - पिचुल - वसनानि श्वेतानि धारयित्वा हस्तेषु त्रिरंगध्वजं गृहीत्वा विभिन्नघोषैराकाश गुञ्जनं कुर्वतां स्वयंसेवकानां दलान् - ये तेन मार्गेणागच्छन् यदि वृद्धा परिचारिका तस्या अवलोकनं नाकरिष्यत्तु सापि तेषु दलेषु मिलिता अभविष्यत् । रात्रौ वैदेशिकवस्त्राणां होलिकादाहोऽभवत् । यथा होलिका दाहो भवति स्म तथैवायमपि क्रियतेस्म । परन्तु काष्ठस्थानेऽस्मिन् - वस्त्राणामाहुतयो दीयन्ते स्म— शाटिकाः महार्घाः प्रावारपादायामौ, शिरस्त्राणि, गलबन्धनानि, कौशेयानि, स्वर्णतारखचितानि च वसनानि - एतत्सर्वं स्वाहा क्रियते स्म । वैदेशिकवस्त्रज्वालनं वैदेशिकवस्तूनां वहिष्कारस्यैव एकाङ्गमासीत् । महात्मनो गांधिनो विश्वासः आसीद्यत्-आर्थिकआत्मनिर्भरता एव स्वशासनस्य प्रथमसोपानमस्ति ।

इन्दिरा तदानीमिदं तु न जानाति स्म सर्वं परन्तु सा नूनमेवेदमजानत् - यत्तस्याः पितुः पितामहस्य, मातुर्मातामह्याश्च बहुमूल्यवस्त्रयुगलानि (Suit) दीर्घप्रावारकाणि, शाटिकाश्च सर्वमपीदं वन्हो प्रक्षिप्तमभूत् । इन्दिरा तद्दिनं सम्यक् सस्मार यदा तस्याः प्रथमकलहः पित्रा साकं जातः आसीत् । आनन्दभवनस्य वाह्यभित्तिकायाः पारे एका विशालहोलिका प्रांज्वलत् । अग्निज्वालाः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्फुलिगाश्चाकाशचुम्बिनः- आसन्। इन्दिरा अपि सर्वमिदं दृष्ट्वा तत्र भागग्रहणमकरोत्। यथा प्रतिवेशिनो बालाः बालिकाश्च तत्र परितो नर्तनमकुर्वन् सापि तथा चिकीर्षति स्म। परन्तु श्री जवाहरेण सा किञ्चिद्भर्त्सिता कथिता च "यत्तव शयनकालोऽयमतो न तत्र गन्तव्यमस्ति। सा रुदन्ती, श्वसन्ती च रुष्टा शयनार्थं गता।

परन्तु एष रोषो न चिराय स्थितः। जवाहरः पुनरपि कारावासमाप्तवान्। इन्दिरा दिनानि गणयन्ती अतिष्ठत् - यदा तस्या प्रियपिता कारामुक्तो भविष्यति गृहञ्चायास्यति। सा स्वपितरं स्मृत्वाऽतीवोदासा भवतिस्म। श्री जवाहरस्तां प्रियदर्शिनी नाम्ना आकारयति स्म। कस्मैचिन्मित्राय जवाहरेण लिखितम्— ' ह्य मासत्रयपूर्तिर्भविष्यति यदा मया प्रियदर्शिनी अवलोकिता आसीत्।" यदा सा मिलितु कारागृहं गता तदा तां दृष्ट्वा जवाहरः स्तब्धोऽभूत्। इदं वर्णयन् जवाहरोऽलिखत् — "तस्या वर्णः पीतो जातः, साऽतीव क्षीणा दुर्बला च जाता।" अग्रेऽसौ एवमलिखत् "मदीयेयं कामना आसीत्-यत् इन्दिरायाः शिक्षायाः कश्चित्प्रबन्धोऽभविष्यत्। अहमिदं सनिश्चयं कथयितुं शक्नोमि यदि सा मम पार्श्वेऽतिष्ठत्तु - अहं तां सुशिक्षां दातुं समर्थः आसम्। परमहन्तु ४तमे कक्षेऽत्र कारागारेऽस्मि।" मासद्वयं पश्चात् - स पुत्र्यै पत्रमेकमलिखत् "प्रिय वत्से? पितृस्नेहः। त्वं शीघ्रं स्वस्था भव पत्रलेखनञ्च शिक्ष मां मिलितुं कारागारे आगन्तव्यम्। अहं त्वां द्रष्टुं सर्वदा आकुलस्तिष्ठामि। तव पितामहेन यत्चक्रं त्वत्कृते समानीतमासीत् - तस्य चालनं त्वया क्रियते? यत्सूत्रं त्वया निर्मितं स्यात्ततः स्वल्पमत्रानेयम्। किं मात्रा साकं प्रतिदिनं त्वया पूजा क्रियते?" प्रियदर्शिनी तु पत्रपठनेऽधुनाऽसमर्था आसीत्। एतस्य मासानन्तरं सा स्वपरिवारजनैः सह कलकत्ता नगरं गता। तदानीमपि जवाहरस्तां पत्रमेकमलिखत्-"प्रियपुत्रि इन्दिरे? पितृस्नेहम्। कीदृशमस्ति कलकत्तानगरम्? किं मुम्बापुरी सुन्दरास्ति? किं त्वया तत्रत्यचटकगृहं दृष्टम्? तत्र के के जन्तवस्त्वया दृष्टाः? किं त्वया तत्र विशालः एको वृक्षः दृष्टः? प्रयागं त्वया स्वस्थया स्थूलया चागन्तव्यम्।"

यदा जवाहरलालस्य कारावासस्य पुनः समाप्तिर्जाताऽसौ गृहमागतः। प्रियदर्शिन्या चिन्तितमिदानीं मम पिता सर्वदा मया साकं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्थास्यति । मां भ्रमणाय नेष्यति, मया साकं क्रीडिष्यति–इत्यादिः । जवाहरलालस्य पार्श्वे यदापि समयोऽभवत् स नूनमेव सम्पूर्णसमयं, पूर्णस्नेहं पूर्णध्यानञ्च इन्दिरायै प्रदात् । परन्तु कांग्रेससंस्थाया तस्य समयोपरि - अधिकाधिकार आसीत् । एकाधिकारः- इति वक्तव्यम् । तेन तु देशभ्रमणं कर्तव्यमासीत् । प्रतिनगरं प्रतिग्रामं गन्तव्यं भवतिस्म । तत्र तत्र च संगठनकार्यसञ्चालनं कर्तव्यमासीत । एकस्य पश्चात् द्वितीये..... एवं विविधविद्यालयेषु इन्दिराया प्रेषणं भवति स्म । देहल्यां एकस्मिन् (किंडर गार्टने) शिशु विद्यालये, प्रयागे एकस्मिन् (कानवेंटे) आश्रमे ततश्चैके आवासविद्यालये इन्दिरा प्रेषिताऽभूत् । सा स्वयमपि - एकदा अकथयत्—'मया एतावन्तो विद्यालयाः परिवर्तिता येषां नामस्मरणं सम्भवं नास्ति ।"

षड्वर्षदेशीयाया प्रियदर्शिन्या नामांकनं प्रयागस्य सेन्ट सिसीलिया-पाठशालायां कारितम् । एतस्य सञ्चालनमांग्लमहिलाभिः क्रियतेस्म । जवाहरलालोऽनेन सन्तुष्टो नासीत् एवं बहुषु विद्यालयेषु प्रियदर्शिन्या गमनागमनमभूत परन्तु समानवयस्कैः साकं चिराय सा स्थातुं नाशकत् । पिता राजनैतिकव्यस्तताभिराक्रान्तः आसीत् – माता च सततं रुग्णाऽतिष्ठत् । परिवारोऽयं सर्वदा विकीर्ण एवातिष्ठत् । तस्या कृते एक एव विद्यालय आसीदसौ च विद्यतेस्म तत्पितुः पुस्तकालयः । यदा तद्वयस्कछात्रैरप्सरसां कथाः श्रूयन्ते स्म पठ्यन्ते स्म च तदा सा स्वपितुः पुस्तकालयमेव सर्वं पीतवती शेक्सपीयरबर्नार्डशा इत्यादि-लेखकानां पुस्तकानि तया सर्वाणि पठितानि । "जान आफ आर्क" विषयेऽपि तया पठितमासीत् । तस्य बलिदानेन च सा भृशं प्रभाविताऽभूत । एकदा तस्या अध्यापिकया सा पृष्टा-"त्वं स्वजीवने किं बुभूषसि ? चिकित्सिका, प्राध्यापिकाऽथवा पोर्शिया इव न्यायाधिवक्त्री वा ? सा आह अहं जान आफ आर्क वत् बुभूषामि । शालभञ्जिकानां सत्याग्रहात्सा इदानीं बलिदानं यावत् प्राप्ता ।

— —

(४)

आनन्दभवनस्य स्थितिरपि विचित्रासीत् तत्र देशस्यानेकभागेभ्यो विभिन्नधर्माणामनेकजातीनां समृद्धाः दरिद्राः, कृषाणाः, व्यापारिणः,

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजनयिकाः पत्रकाराः, राजानः, एवमेव न जाने के के लोकाः प्रतिदिन-मायान्ति स्म । तत्रैको विशालोपवेशनकक्षः-आसीत् । अत्रैव सर्वे दर्शकाः उपविशन्ति स्म । पितापुत्रावुभावपि तैः साकमनेकविषयोपरि वार्तालापं कुरुतः स्म । इन्दिरापि, अत्रैवोपविष्टा एकस्मिन् - कोणे सर्वमपीदं शृण्वाना तिष्ठतिस्म । साहित्यज्ञानस्य विद्यालयो यदि तस्य पितुः पुस्तकालयस्तस्यै विद्यते स्म तु व्यावहारिकशिक्षणालयः स एव कक्षः आसीत् - यत्र देशविदेशेभ्यः समागच्छन्ति स्म लोकाः । प्रियदर्शिनी सर्वं व्यवहारं वार्तालापं च गम्भीरतया शृणोति स्म । यदा तस्याः पितामहः पिता चोभौ गृहे भवतस्म तदानीं सर्वे उत्सवास्तत्र सोल्लासं मानिताः भवन्तिस्म होलिकोत्सवे रंगानां वर्षैव भवति स्म । विभिन्न-रंगानां क्रीड़नं भवति, शुष्कानां तरलानाञ्च मोतीलाल जवाहरौ जीवनं प्रति बहुउत्साहवन्तावास्ताम् । दीपोत्सवः समायाति तु आनन्दभवनस्य प्रांगणे आग्नेयक्रीडकानां क्रीडनं दर्शनीयं भवति परितश्च दीपावलयः देदीप्यन्ते स्म । विजयदशमीदिने विभिन्नपुरुषैः भवनस्य सज्जा क्रियते स्म मुस्लिमानां 'ईदोत्सवकाले" मुस्लिमभ्रातरः जवाहरमोतीलालयोः पार्श्वे समायान्तिस्म तु इन्दिरायै तेषां स्वागत-करणस्यादेशो भवतिस्म तेऽपि उपाहारान् उपाहरन्ति स्म । ततश्च क्रीस्वानां 'क्रिसमस' दिवसोत्सवो भवति स्म । प्रियदर्शिन्यै सुन्दरस्य क्रिसमस - वृक्षस्य निर्माणं भवति स्म । एका बिशाला स्थूला च रोटिका (केक) निर्मीयते स्म । अपरस्मिन् दिने सर्वैस्तस्य कर्तनं क्रियते स्म । एकस्मिन् दीर्घे (मोजा) पादपरिधाने बहूनि वस्तूनि संस्थाप्यन्तेस्म यानि द्वितीयदिवसे प्रातः प्रियदर्शिन्यै दीयन्ते स्म एवं किलानन्दभवनं सत्यमेवानन्दस्य प्रतीकं भवति स्म कदाचित् ततश्च पुनः यदा पितापुत्रौ-आंग्लानां कारावासे नीतौ भवतः स्म तदा पुनः आनन्दभवनं शून्यं भवति स्म । वराका प्रियदर्शिनी बहुपीड़िता भवति स्म अनेन । द्वादशवर्षीया एव सा स्वात्मानं बहुबर्षीयं मनुते स्म । अस्यामेवावस्थायां तया क्रीडनकैः क्रीड़नं परित्यक्तम् । विशालपुस्त-कालय एवानन्दभवनस्य तस्या सहयोगी अभूत् । ग्रीष्मस्य दीर्घदिनानि, शीतस्य च लम्बतरनिशाः । कथं व्यतीताः स्युः एकलाया बालायाः । परन्तु सा पुस्तकेषु लीना ऽभवत्-प्रथममेव पुस्तकालये प्रभूतानि पुस्तकानि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सम्पादकीयम्

022708

दिव्यज्योतिषः शुभचिन्तकानां सेवायाम्

१९५६ खीष्टाब्दस्याक्तूबरमासीय १२ दिवसे दिव्यज्योतिषः प्रथमांक-प्रकाशनमभूत् । ततः प्रभृति नकोऽप्यंको ऽ प्रकाशितः । सर्वेऽङ्काः प्रतिमासं यथाकाल पाठकानां सेवायां प्रहिता बभूवुः । तदानीं डाकव्ययोऽङ्कप्रेषणस्य पणकद्वयमासीत् अद्य पञ्चादशपणाः सन्ति । प्रकाशनमुद्रणमसिः रुप्यकषट्कं-रायातिस्म एक किलो परिमिताऽद्य शतादूध्र्वं गतास्ति । कर्गजं तदानीं पञ्चदशरूप्यकेभ्यः पञ्चविंशतियावत् एकरिममितमायाति स्म । अद्य तदेव साधारणकर्गज पादोनशतद्वयेनापि नायाति । आवरणकर्गजं यत्तदानीं शतेन सार्धशतेन रिममितमायाति स्म तदेवाद्य षट्शतेनापि शोभनं न प्राप्यते । अक्षरसंयोजकानां तदानीं वेतनमासीत् पञ्चाशत् रूप्यकेभ्यः पादोनशतं रूप्यकाणि । इदानीं सार्धसहस्रात्न्यूनं न कोऽपि कार्यं कुरुते । संस्कृतस्याक्षर-संयोजनोपरि तु तस्मादपि द्विगुणितव्ययो भवति । शिमला नगरं स्वभावतो-ऽपि महार्घमस्ति । एवं किल महाघतयाऽस्माकं संघर्षोऽस्ति सततम् ।

अधुना यावत्- मूल्ये केवलं पञ्चगुणिता वृद्धिः कृताऽस्ते दिव्यज्योतिषः । यद्यपि एकसहस्रमिता जनाः पठन्ति सततं पत्रमिदं तथापि वार्षिकमूल्यं बहुबारं स्मारकप्रेषणोपरान्तमपि चतुः शतस्यापि न प्राप्यते । पञ्चाशत् सहस्रमितो व्ययो वार्षिको भवति । आयश्च द्वादशसहस्रमितः ग्राहकेभ्यो विज्ञापनेभ्यश्च तथा केन्द्रीयप्रशासन सार्धत्रयसहस्रमितं वार्षिकं ददाति । सर्वं सम्मेल्य षोडशसहस्रमितमपि वार्षिकं न भवति । एवं किल त्रिंशत्-सहस्ररूप्यकमितस्य धनहानेः पूर्तिः यथाकथंचित् पुराणवाचनं कृत्वा वार्षिकं व्ययसचालन आचार्यचरणैरस्माभिश्च सम्मिलय क्रियते । अस्माकीनाः निः शुल्क सेवास्तु अहर्निश पत्राय प्राप्ताः सन्ति ।

चतुस्त्रिंशत् वर्षाणि पूर्तिमेति - अङ्केनानेन सह दिव्यज्योतिषः संस्कृत-सेवायाः । एषु वर्षेषु अनेकविकटसंकटावलोकनमस्माभिः कृतम् । तथापि दिव्यज्योतिषः ये शुभचिन्तकाः सन्ति तेषां सहयोगेन क्षणमिव कालोऽयं व्यपगतः अत्र भवन्त एव कारणं ये दिव्यज्योतिषः शुल्कं सततं प्रेषयन्ति । अत्र वय श्री हरिश्चन्द्रनिस्तन्द्राणां जालन्धरनिवासिनां, डा. सत्यव्रतमहाभा-गानां देहलीविश्वविद्यालयसंस्कृतविभागाध्यक्षाणां, लोकनाथमिश्राणां निरमण्डनिवासिनां, श्रीमतीलीलादयाल बम्बईस्थाया, श्रीमती कमलारत्नम्- दिल्ली स्थाया डा० ओंप्रकाशमहाभागानां चण्डीगढ़वास्तव्या-नामति कृतज्ञाः स्म येऽनवरतमस्माक साहाय्यं कुर्वन्ति ।

तथाप्येतेन कार्यं न चलिष्यति । अह सर्वानपि दिव्यज्योतिषः-ग्राहकान्-प्रार्थये यद्भवद्भिर्नवीन-ग्राहकनिर्माणेऽस्माकं सहायता कार्या । प्रत्येक-शुभचिन्तकश्चेदेकमेक नवग्राहकमपि निर्माति तदापि - अस्माक ग्राहकसंख्या द्विगुणिता भवति । अनेनास्माकमार्थिककाठिन्यं किञ्चित्समाहितं भवितुमर्हति, अद्य भारतीया संस्कृतिः परितः परिक्रान्ता ऽस्ति एवंविधकाले संस्कृतपत्रप्र-काशनमत्यावश्यकमस्ति आशासे मम निवेदनोपरि सुरगिरः समुपासका-ध्यानं दास्यन्ति । सर्वतो भावेन च साहायमस्माकं करिष्यन्ति ।

— केशव शर्मा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

R. N. 6084/57 ल—33/एस. एम. / 10/89

संस्थान के प्रकाशन

Gurukul Kangri University Librarian

१. फलादेश कल्पतरुः (मूल संस्कृत में)
हिन्दी अंग्रेजी टीका सहित ४० वर्ष के अनुसन्धान और अनुभव पर आधारित जातकफल कहने का अनुपम ग्रन्थ ... — मू. ७०-००

२. संस्कृत कोशवाङ्मयम् (संस्कृत में)
संस्कृतकोशसाहित्यपर अनुसन्धानपूर्ण विवेचन ... ... मू. १७५-०

३. झञ्झा (संस्कृत में)
शेक्सपीयर के द टैम्पेस्ट नाटक का सचित्र रूपान्तर ... मू. ५०-००

४. हिमाचलप्रदशे संस्कृतस्य प्रसारो विकासश्च (संस्कृत में)
हिमाचल में संस्कृत के प्रसार विकास की विस्तृत कहानी ... मू. ५०-००

५. वैजयन्ती (हिन्दी काव्य)
नवीन प्राचीन विचारधाराओं का गीतिमय समन्वय — मू. १५-००

६. सूनृता (संस्कृत काव्य)
आधुनिक गीतों में गुम्फित अनुपम उपहार — ... मू. २५-००

७. शक्तिसौरभ (हिन्दी में)
संस्कृत लेखिकाओं का इतिहास ... — ... मू. १५-००

८. विचारामृत (हिन्दी में)
आचार्य जी के विभिन्न विषयों पर जीवनोपयोगी लेख दो भाग — मू. १५-००

९. पथ्यापथ्यविनिर्णय
सं. हि. टीका सहित आयुर्वेद का दुर्लभ ग्रन्थ ... ... मू. २०-००
(डाकव्यय सर्वत्र पृथक्)

सम्पर्क सूत्र :—
सचिव,

संस्कृत शोध संस्थान
भारती विहार मशोबरा
शिमला १७१००७ (हि. प्र.)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri